
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
मुमुक्षु[illegible]	—	धर्मशास्त्र	पूर्ण	—	६/१५	५००	संस्कृत	कागद				

M. 2992

॥मुमुसुव्येवहारप्रकर्णप्रारंभः॥ ॥पत्रेसंख्या ६२

॥ श्रीहनुमते नमः ॥ ॥अजमजरमाद्यमेकं निजसौख्यत्वं वांचिताखिलानं
निगमा॰ [illegible] ॥१८॥१॥ श्रीरामादिवचनमुखेन वर्णितापि साधनसंपन्नमुमुक्षुभिः ॥ केनक्रमेणाव्य
[illegible] थवचनयातत्वविश्रांतिर्लभ्य इति प्रत्येकं विविच्य तेषामुपदेशाय द्वितीयं प्रकरणमारभमाणः ॥ श्रीवाल्मीकिरुवाच
[illegible] रात्संबुद्ध पित्रा चोक्ते यविश्वसन् ॥ जनकोक्त्या शुकस्तत्वे विश्रांत इति कीर्त्यते ॥ तत्रादौ मंदवैराग्यादिसाधनानां सहसैवाधिका
[illegible] निश्रमेण श्रवणादौ प्रवृत्तिर्माभूदिति शुकाख्यायिकया तत्परिपाकलक्षणं निदर्शयन्नाचार्योद्दैवविद्याविदितासाधिष्ठं प्रापदि

श्रीगणेशाय नमः ॥ अथ मुमुक्षुव्यवहारप्रकरणं ॥ वाल्मीकिरुवाच ॥ इति नादेन महता वचस्युक्ते समागते ॥ राममग्र
गतं प्रीत्या विश्वामित्रोऽभ्यभाषत ॥१॥ न राघव तवास्त्यन्यज्ज्ञेयं ज्ञानवतां वर ॥ स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवानसि ॥२॥ के
वलं मार्जनामात्रं मनागेवोपयुज्यते ॥ स्वभावविमले नित्यं स्वबुद्धिमुकुरे तव ॥३॥
तिश्रुतेः ॥ कुलाचार्यवसिष्ठं श्रीरामस्योपदेश
नाय पूर्ववृत्तांतस्मारणतत्त्वोपदेशोपक्रमाभ्यां प्रोत्साहयिष्यन्स्वप्रयोजनसिद्धौ श्रवणाय त्वरमाणो विश्वामित्रः राघवं प्रथममभ्य
भाषतेत्याह इतीति ॥ सभायामागतैः ॥ सिद्धैः अग्रगं तं पुरः ॥ स्थितं अधिकारसीम्नि स्थितं च मुख्याधिकारिणं दौर्लभ्याद्रामे रसज्ञत
मत्वाद्दूर्निष्पमाणब्रह्मचर्यायां च प्रीत्या ॥१॥ ज्ञेयं अज्ञातत्वादवश्यज्ञातव्यं ॥ सर्वं हेयोपादेयरहस्यं ॥ तथा न्वसारासारविवेचनपरया
बुद्ध्या परमार्थसारभूतमखंडाद्वयचिन्मात्ररूपमात्मतत्वमपि त्वया विदितमेवेत्यर्थः ॥२॥ तर्हि किं तु तो न विश्रांतिस्तत्राह ॥ केवलमिति
मार्जनाऽविश्वाससंदेहमालिन्यनिराकरणं तावन्मात्रं स्वबुद्ध्या विदितेऽपि प्रमाणाचार्यादिसंवादमंतरेण विश्वासाभावादित्यर्थः

तथा चाहुर्वैलक्षण्यपि शिक्षितानाम सन्न प्रत्ययवेतसि ॥३॥

राम
१

सान्निधानाद्विलासिनीनां करांभोरुहेषु हंसयमानेषु चामरेषु श्रवणाकुंतार्थे समाधिनालीने विवेतिनिस्यंदत्वदर्शनादुत्प्रेक्षा मुक्तघुर्घुररवेषु तत्क कंकणकिंकिणारवेषु वयांस्येव वायसास्तेषु तरौ इति सदृशोपमा ५ तद्देषु विचारत्वेषु ६ नमसः भूमावेव घनत्वादुपरितनांबर पीगत्वेनोत्प्रेक्षा यथाज्ञाचार्यागमनेनारोप्य उत्तिष्ठन् पीठं परित्यजति तद्वत्सूर्यस्योदये परित्यक्त नमः पीगेसतीत्यर्थः ७ रसात् प्रेमार्द्रभावात्तस्यायमाशुक्तवर्षणादिति मुक्तवर्षणप्रयुक्तादार्द्रभावादितियावत् ८ यत्नेन आत्मपरावर्त्यस्थिते ९ शिक्षाबलविचक्षणत्वादेव विलसत्तदिस्फुरत्लक्ष्म

करांभोरुहहंसेषु लीनेषु श्रवणादिव मुक्तघुर्घुरवादेषु वायसेषु तराविव ५ नासाग्रपरिविश्रांततर्जन्यंगुलिकोटिषु विचारयत्सु विता नकालं तत्तेषु राजसु ६ रामे विकाशमायाते प्रभाते इव पंकजे परित्यक्तनमः पीगे सूर्यो दयइवांबरे ७ आकर्णयति वासिष्ठी गिरो दशरथे रसात् कलापिनीव जीमूतनिन्हादात् मुक्तवर्षणात् ८ आत्मत्यसर्वभोगेभ्यो मनोमर्करचंचलं श्रवणं प्रतियत्नेन सारणे मंत्रिणि स्थिते ९ वसिष्ठोक्तपरिज्ञातरवात्मनो दुकलामले लक्ष्मणे विलसत्त्वक्षे शिक्षाबलविचक्षणे १० शत्रुघ्ने शत्रुदलनेचेतसा पूर्णतां गते अलमानंदमापाते राकाचंद्रोपमोस्थिते ११ सुमित्रे मित्रतां याते मानसे दुःखशीलिते विकासितहृदयेजाते तत्कालइव पंकजे १२ तत्रस्थेषु तथान्येषु तदा मुनिषु राजसु सुधौतचिरंत्नेषु प्रोल्लसत्स्विव चेतसा १३ उदभूत्तदयन्नात्राः कल्पाभ्ररव मांसलः अथम ध्यान्हशंखानामब्धिघोषसमस्वनः १४ महतानेन शब्देन तिरोधानं मुनेर्गिरः ययुर्जलदनादेन कोकिलध्वनयो यथा १५ मुनिरंतरयां चक्रे स्वां वाचमथ संसदि -जितसारो गुणः केन महतां समुदीर्यते १६

बलत्यस्पतथाभूते १० अलंपूर्णमानंदं आयाते प्राप्ते ११ सुमित्रे मंत्रिविशेषे दुःखशीलितेमानसे मित्रतां वश्यतां याते सति विकासित हृदयेजाते अंबुजपक्षे आप्रातर्मानसे सरसि मनसि च दुःखेन शीलिते चिंतिते शो भनेमित्रे सूर्ये मित्रतां उदये न प्रीतिकरतां याते सति तत्काले विकासित हृदये जाते १२ प्रोल्लसत्स्विव ज्ञातेषु इति यथायोगं विपरिणामेन सर्वत्रानु षज्यते १३ आश्रादिशः कल्पाभ्रैः रवइव मांसलः बलवान् १४ मुनेर्वसिष्ठस्य १५ अंतरयां चक्रे निरोदधे उपसंजहार इतियावत् जितः अभिभूतः सा

१७ अन्हा निर्वृत्तमान्हिकं वक्ष्यामो वयमिति शेषः १८ मध्यान्हं मध्यान्हे यदुपपन्नं युक्तं द्विजन्मनां नियतितः प्राप्तं कर्तव्यं कर्म नावसीदतीति यत
तदिदं मयापि कर्तव्यमित्यन्वयः १९ २० मुनिना समं ससदाः सभास्थसर्वजनसहितो दशरथोप्युत्तस्थौ २१ अलिलोचना इति सभाया अपि विशेष
णं २२ अत्र समध्यान्हकाले अस्ताचले सूर्योदयकालः करिणामुत्थानयोग्य इत्याशयेन संध्याङ्गाविति विंध्याङ्गावित्ति पाठे स्थानोपमा २३ यतो
रत्नपूर्णा अतः सा दशरथादरुणांभोदसंध्यासमयस्य सूचनी स्मारिकेति यावत् २४ पतद्भिरुन्नतं सविश्रांतैर्भृंगैः आहितघुंघुमामुकुरानामुद्दामे

मुहूर्तमात्रं विश्रम्य श्रुत्वा मध्यान्हनिस्वनं घने कोलाहले शांते रामं मुनिरुवाच ह १७ रामाद्यतनमेतावदान्हिकं कथितं मया प्रातरस्युन
वक्ष्यामो वक्तव्यमरिमर्दन १८ इदं नियतितः प्राप्तं कर्तव्यं तत् द्विजन्मनां मध्यान्हमुपपन्नं यत् कर्तव्यं नावसीदति १९ त्वमप्युत्तिष्ठ सुभ
गसमलाचारसत्क्रियां अचाराचारचतुरः स्नानदानार्चनादिकं २० इत्युक्त्वा मुनिरुत्तस्थौ समं दशरथः प्रभुः ससदास्सेंदुरादित्य इव द्याद्रि
तटादिव २१ तयोरुत्तिष्ठतोः सर्वा सभोत्थानुमकंपन मंदवातपरामृष्टा नलिनीवालिलोचना २२ उत्तस्थौ सावतंसोत्थभृंगमंडलमंडिता
करिसेनेव संध्याङ्गा वालोलकरपुष्करा २३ परस्परांगसंघट्टचूर्णितांगदमंडली रत्नपूर्णारुणांभोदसं[illegible]ध्यासमयसूचनी २४ पतदुत्तं
सविश्रांतभृंगोपहितघुंघुमा मुकुरोद्दामविद्योतशक्रचापीकृतांबरा २५ कांतालताहस्तदलचारुचामरमंजरी वनैलेखेव विक्षुब्धवार
वारणमंडला २६ कंचुककरकभारकाकृतान्योन्यततांबरा वातव्याधूतपुष्पेव मंदारवनमालिका २७ कर्पूरकणनीहाररचितामलवारि
दा शारदिकरमालेव प्रसृताशेषभूमिका २८ लोलमौलिमणिप्रांतपाटलांबरकोटरा संध्येवाफुल्लनीलाब्जा कार्यसंहारकारिणी २९ ७॥

र्तनामणिविद्योतैः शक्रचापीकृतमंबरमाकाशं वस्त्रजातं वा यया सा २५ कांतालक्षणानां लतानां हस्तलक्षणेषु दलेषु पल्लवेषु चारुचामरलक्षणाः मं
जर्यो यस्यां तथाविधा वनलेखेवेत्यर्थः २६ कंचुकीभिः कटकभाभिः रक्तीकृतान्यन्योन्यमाकर्षणात् तनानि विस्तृतान्यंबराणि यस्यां २७ कर्पूरकणल
क्षणैस्तत्सदृशैश्च नीहारैर्हिमकणैः उड्डीयमानैः रचिताः अमलाः शुभ्रा वारिदा यया अत एव नीहारकाशपुष्पादिभिर्व्याप्ताशेषभूमिका शार
दिकरमालेव स्थिता २८ कार्याणां दिनकृत्यानामुपसंहारकारिणी २९

३० भूभृतां रात्रं तां पर्वतानां चन्द्रनैः ३१ ३२ रसेत्र ब्रह्मरसे जले च विहार वितानेकाविदाः ३३ आवर्जनमनुत्तानतदुन्मुखाल्लम्रनीक्षाः ५३ ३४ वनास्य
दाः वानप्रस्थाः ३६ ३७ ३८ ३९ तस्मादाश्रमप्रदेशात् ४० अथ ध्वरान्नागान् संस्तुतानां प्रशस्तानां गुणानां गोचरानाश्रयानि नियावत् यथा
क्रमं विसृज्य स्वगृहं प्रविश्य पेनिशेषः द्विजजनानां वासरोचितां पंचयज्ञक्रियां च कारेत्यर्थः ४१ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रक

रत्नांशुसलिलापूरमुखपद्मनिरंतरा पद्मिनीवालिवलितानूपुरारवसारसा ३० संततासासभोतस्थोभूभृच्छतसमाकुला भूतसंत
तिसंतैर्भ्रांतास्त्रिर्नवमिवोदिता ३१ प्रणम्यायन्नृपं भूपानिर्ययुर्नृपमंदिरात् शक्रचापीकृतारत्नैरंबुधेरिव वीचयः ३२ सुमंत्रोमंत्रि
णश्चैव वसिष्ठमथ भूमिपं प्रणम्य जग्मुः स्नानाय रसविज्ञानकोविदाः ३३ वामदेवादयश्चान्ये विश्वामित्रादयस्तथा वसिष्ठं पुरतः कृत्वा त
स्थुरावर्जनोन्मुखाः ३४ राजा दशरथस्तत्र पूजयित्वा मुनिव्रजं तद्विसृष्टो जगामाथ स्वकार्यार्थमरिंदम ३५ वनं वनास्पदा जग्मुर्मो
मेव्योमनिवासिनः नगरं नागराश्चैव प्रातरागमनाय ते ३६ महीपतिवसिष्ठाभ्यां प्रणयात्प्रार्थितः प्रभुः वसिष्ठसद्मनि निशां विश्वामि
त्रोत्सवाहयत् ३७ वसिष्ठः सह विप्रेंद्रैः पार्थिवैर्मुनिभिस्तथा उपास्यमानो रामाद्यैः सर्वैर्दशरथात्मजैः ३८ जगाम स्वाश्रमं श्रीमान्सर्व
लोकनमस्कृतः अनुयातस्सुरौघेण ब्रह्मलोकमिवाब्जजः ३९ तस्मात्प्रदेशाद्रामादीन्मुनिर्दशरथात्मजान् सर्वान्विसर्जयामासपादो
पांतेनतानसौ ४० नभश्चरान्धरणिचरानधश्चरान्विसृज्यसंस्तुतगुणगोचरांश्च तान् यथाक्रमं स्वगृहमुदारसत्ववांश्चकारतां द्विजजन
वासरक्रियां ४१ मोक्षोपायेषूपशमप्रकरणे प्रथममाह्निकवर्णनं सर्गः १ श्रीवाल्मीकिरुवाच तेसमेत्य गृहं गत्वा राजपुत्राः शशि
त्विषः चक्रुः सर्वमशेषेण स्वस्य स्वसुदिनक्रमं १ वसिष्ठो राघवश्चैव राजानो मुनयो द्विजाः इति चक्रुस्स्वकार्याणि तथा स्वगृहवीथिषु
२ सस्नुः कमलकल्हारकुमुदोत्पलहारिषु जलाशयेषु चक्राह्वहंससारसराजिषु ३
रणे प्रथमः सर्गः १ इहाह्निकक्रियारात्रौ रामस्य श्रुत
चिंतनं बुद्धेः श्रुतार्थस्थैर्यार्थं प्रार्थनाचोपवर्ण्यते दिनक्रमं आह्निकं १ इति वक्ष्यमाणप्रकारेण चक्रुः स्वगृहेषु वीथिषु तथा बहिश्चयान्युचिता

वा॰रो॰उप॰
३

५ अमरसयसु देवालयेषु स्वेषु स्वगृहेषु च ५ ६ दिवसस्तनुः सूक्ष्मोऽभवत् अष्टांगशेषत्वादष्टमभागशेषत्वात् ७ तत्कालोचितचेष्टया पुराण धर्मशास्त्रावलोकनादिरूपया ८ ९ ततइत्युपात्तस्यतदुत्तरकालस्य क्षीरोदः कामिनीएवं इंदिरक्रांतसंगमप्रयुक्तशोकहरणानंदस्य चंद्रसंग मप्रयुक्तस्तापापशमनोऽवशपायः इतिक्रमेणोपमानानि १० दीर्घीभूतमिंदुबिंबमिवरम्येषु ११ तद्व्यवहारिणीतत्कालोचितविषयभोगानिद्रा

गोभूतिलहिरण्यानिश्रायनान्यासनानि च ददुर्दानानि विप्रेभ्यो भाजनान्यंशुकानि च ५ हेमरत्नविचित्रेषु स्वेषु चामरसयसु आनर्चु रच्युतेशानकुनाशार्क्कादिकान्सुरान् ५ पुत्रपौत्रसुहृद्बंधुमित्रगणैः सह ततआस्वादयामासुर्भोजनान्युचितानि वै ६ एतस्मि न्समये चास्मिन्नगरे दिवसोऽभवत् तनुरष्टांगशेषत्वादृष्टोनचमनोहरः ७ सायंतनदिनांतं ते तत्कालोचितचेष्टया अनयन्नंशुभिः सा र्धयावद्स्तं पयोरविः ८ संध्यांववंदिरे सुषुजेपुश्चैवाघमर्षणं पेठुः स्तोत्राणि पुण्यानि जगुर्गाथा मनोहराः ९ ततश्चाभ्युदिता क्षपामा कामिनीशोकहारिणी क्षीरोदादिव माहेंद्री चंद्रावतापदायिनी १० शनैरास्तीर्णपुष्पेषु कीर्णकर्पूरमुष्टिषु दीर्घेंदुबिंबरम्येषु तु स्तुलत्येषु राघवाः ११ अथरामाइतेन्येषां तत्रतद्व्यवहारिणी व्यतीयायशनैः क्षपानासुहूर्तद्वयशोभना १२ तस्ड्डौरामस्तुतामेवबाल्यसिद्धां वचनावली चिंतयन्मधुरोदरांकरिणीकलभोयथा १३ किमिदंनामसंसारभ्रमणं किमिमेजनाः भूतानि च विचित्राणि किमायांति प्र यांति किं १४ मनसः कीदृशं रूपं कथं चैतत्प्रशाम्यति मायेयं साकिमुत्थास्यात्कथंचैवनिवर्त्तते १५ निरन्नपानयाकः स्यात्कुतोदोषो थवाभवेत् कथमात्मनिचैवायं ततेसंकोचआगतः १६ किमुक्तं स्याद्भगवतामुनिनामनसः क्षये किंचेंद्रियजयेप्रोक्तं किमुक्तमथवा त्मनि १७ जीवश्चित्तं मनो माये सेवमादिभिरात्ततेः रूपैरात्मैवसंसारं तनोतीममसन्मयं १८ एभिरेवंमनोमत्रतंतुबद्धैः क्षयंगतैः दुः खोपशांतिरेतानि सुचिकित्स्यानि नः कथं १९ दिव्यवहारवती १२ कलभः करिशावः करिणीमातरंयथा १३ चिंताथकामोनानि १४ दीर्घी

रमेवप्रपंचयतिकिमित्यादिना १४ १५ सर्वभोग्यभोक्तृभोगनिरत्ते दोषः पुरुषार्थ विघातोभवेत् ततेआकाशादपिविस्तीर्णे १६ किंसाधनंफलं चोक्तंस्यात् आत्मनिविज्ञातेरतिशेषः १७ १८ दुखोपशांतिः सिद्ध्यतीतिशेषः एतानिमनोमायादिरूपाणि १९ ७॥

३

भुज्यंत इति भोगा विषयास्त एव संस्कारात्मना यद्यनो भूय चित्ताकम्राणवरकलात् दुःखसहस्रधारावर्षिलाज्ज्याभ्राणि तान्यनुसृत्य मालेव वलयति वेष्ट
यतीति मालावलयां धीवृत्तिलक्षणां बलाकां बकीं कथं पृथक्करोमि विवेकेन परावर्त्तयामीति यावत् पयसो दुग्धस्य धारां भागमिति यावत् २० ननु किं
विमर्शैर्नित्यज्यतां भोगास्तत्राह भोगा इति विपदां प्रतीकारे इति निरोधः सर्वात्मना भोगत्यागे जीवनासिद्धेस्तदर्थमल्पस्यापि भोगस्योपादाने वासनादृ
ढे संकटमागतमित्यर्थः २१ संकटांतरमप्याह मनोमात्रमिति इदं प्राप्यमवश्यप्राप्तव्यमात्मतत्वं मन एव मीयते प्रमीयते ऽनयेति मात्रा प्रमा
णं येस्य तथाविधं तच्च मनः अस्माकं इदं बाह्यमेव विषयजातमेव प्रयुज्यते येन तत्प्रयोजनं निष्पत्तिहेतुभूतं पुरुषार्थभूतं च यस्य तथाविधं स

भोगाभ्रमालावलयां धीबलाकामिमां कथं पृथक्करोमि मोपयसो धारां हंस इवांभसः २० भोगास्त्यक्तुं न शक्यंते तत्त्यागेन विना वयं
प्रभवामो न विपदां अहो संकटमागतं २१ मनोमात्रमिदं प्राप्यं तच्चैवेदं प्रयोजनं संपन्नं नो गिरिगुरुर्मैरिव्याद्यक्षः शिशोरिव २२ परमां-
शांतिमागत्य गतसंसारसंभ्रमा बालेव लब्धदयिताकं चित्त्वाप्स्यति नो मतिः २३ कदोपशांतसंरंभं विगताशेषकौतुकं अपापमात्मवि
श्रांतं ममस्यात्पावनं मनः २४ कलाकलापसंपूर्णाच्छशांकादपि शीतले पदे सुरूढं विश्रम्य भ्रमिष्यामि कदा जगत् २५ कलनापेलवं रू
पमुत्सृज्यालीनमात्मनि कदैष्यति मनः शांतिमंभसीव तरंगकः २६ तस्मात्तरंगाकुलितमात्तग्रामकरमालिनं कदा संसारजलधिं नी
र्त्वास्मामहमज्वरः २७

तमोऽख्यातिः गिरितोऽपि गुरु दुरुद्धरं संपन्नं यथा शिशोर्मैरिव्याकल्पितो यक्षः तथा च विषयाधीनसिद्धिकं मनस्तेभ्यो
निवर्त्तयितुमेवाशक्यं निःस्वरूपतापत्तेस्तद्वनिवृत्तौ तु नतवसाक्षात्कारे प्रमाणतलकुं न शक्यमिति संकटांतरमित्यर्थः २२ यदि तु निर्वासनं
सर्वविषयोपरामेपि ब्रह्माकारतामात्रावलंबनेन मनोवस्थापयितुं शक्येत तदास्यादभिलषितसिद्धिरिति चिंतयन्नाह परमामिति लब्धोद
यितः कांतो यया तथाविधा बाला तरुणी वलब्धब्रह्माकारा सती किंचिदन्यं भोगं नो प्राप्स्यति न स्मरिष्यतीत्यर्थः २३ तादृशं प्राप्तसुखं कंरुते कदेत्या
दिना संरंभः क्रोधः कौतुकं कामः पापग्रहणं पुण्यतद्भयकार्याणामप्युपलक्षणं २४ ससंभ्रमिकापर्यंतं सुरूढं यथा स्यात्तथा विश्रम्य
जीवन्मुक्तिसुखं प्राप्येति यावत् २५ आत्मनि आलीना तिरोहितं सत् २६ २७ श्रीरामाय

मुमुक्षूणां प्राप्यासु पदवीषु पदेषु २८ अंगनिष्ठीपुत्रपश्वादीनि रत्नपादादीनि च धातवः स्वर्णरूप्यादयस्तैरासक्त्याऽऽसादयन्त्यः तेभ्यः क्षीयमाणेभ्यो भयंकरः २९ ३० विषयाभिमुखाकर्षणलक्षणदुरीहाभिर्दुश्चेष्टाभिर्दग्धो देहो यैस्तथाविधानींद्रियाणि विषयहेलया कृतदुःखानि संतरिष्यंती त्यर्थः अथवा इंद्रियाणि कर्तृणि दुरीहादुष्टविषयाभिलाषैस्तत्प्रयुक्तानि दग्धदेहानि भावनानानाशरीराणि कर्मविषयहेलयादुःखेभ्यः दुःखानि परिहर्तुं कदा तारिष्यंतीति योजना दुःखेभ्य इति सुखदुःखतत्क्रियायामिति चौरादिकाद् दुःखधातोर्भावे यन्निःसमर्थाच्च भाववचनादिति चतुर्थी ३१

करीपक्रमगुह्मसुपदवीषु विचक्षणाः मुमुक्षूणां निवत्स्यामो निःशोकं समदर्शिनः २८ संतापितसमस्तांगः सर्वधातुभयंकरः संसृति ज्वर आदीर्घः कदा नाशमुपैष्यति २९ निर्वातदीपलेखेव कदा चित्तं गतव्यथं शममेष्यति हे बुद्धे सुप्रकाशाघनांतरं ३० कदेंद्रियाणि दुःखेभ्यः संतरिष्यंति हेलया दुरीहादग्धदेहानि गरुत्मंत इवार्णवात् ३१ अयं सोऽहं रुदन्नरुदं इति व्यर्थाहितो भ्रमः शारदीवासिता मे घः कदा नाशमुपैष्यति ३२ मंदारवनलेखासु यामेतिरस्नातृणायते याचे तत्पदमात्मीयं संप्रातुं पामकदा वयं ३३ वीतरागजनप्रोक्तानिर्मलाज्ज्ञानदृष्टयः कच्चित्परं तु यामि मनः कारिष्यंतीति मे वद ३४ हा तात मातः पुत्रेति गिरा मासामहं पुनः भाजनं चिनमा भूवं भोजनं दुःखभोगिनं ३५ हे बुद्धे भगिनि भ्रातुरर्थितां एरयाशु मे आवयोर्दुःखमोक्षाय विचारय मुने गिरिः ३६

पशुपुत्रधनान्नपानादीनाम लाभवियोगादिना हरुदति मृतमैरोदन निमित्त भयंतः अयं देह एव सप्रसिद्ध आत्मा अहं चेति व्यर्थ एवं पूर्वदेहवासनाकामकर्मपरंपरोहितं भ्रमः प्रबोधवैमल्येन शारदिप्रस्तायां वार्षिकः असतो मेघ इव कदा नाशमुपैष्यतीत्यर्थः ३२ उत्कर्पानुमुक्षुपास्वर्गोपि त्स्वस्पतृणवज्ज्ञानीत्याह मंदारेति मतिःसुखानुभावः अहं याचे वांछामीति यावत् वयमित्यस्मदो द्वयोश्चेति बहुवचनं ३३ इदानीं मत्तश्चादीन्विवेकग्रहणाय प्रार्थयते वीतरागेत्यादिना हे मनः त्वपिपरं स्थानं कच्चित्करिष्यंति ३४ अहं दुःखलक्षणानां भोगिनाम जगराणां भोजनं भक्ष्यं सन्त्रासामाक्रंदगिरां पुनर्भाजनं मा भूवमित्यन्वयः ३५ जीवबुद्ध्योरेकोविद्ध्योदरोद्भूतत्वाद्भगिनीति संबोधनं मुनेर्वसिष्ठस्य ३६ श्रीरामायनमः

४

सतिसाध्वितिपात्रसज्जनप्रसादेनपश्चादुत्पन्नत्वात्सुतेपुत्रिमतेसन्मतेतेनप्रार्थनेनभवोच्छेदोपलक्षितनिर्णतासंपदे ३७ एवंप्रार्थनयास्थिरीकृता
मतिंवैराग्यप्रकरणादिप्रकरणचतुष्टयार्थस्मरणेः क्रमान्निर्मुक्तेवासिष्ठेतिप्रोक्ताःमन्मुखेनवादिताःस्वयंप्रोक्ताश्चस्थितिप्रकरणांताः ३८ विज्ञा
नगर्भंसुलभंसरलंचाभिर्विज्ञानगर्भैरधिकारिभिराख्यानैर्वासुलभंसुबोधमितिवा ३९ ननुमनसःप्राक्प्रार्थितत्वात्ततएवप्रकरणचतुष्ट
यार्थावधारणासिद्धेः किमर्थंतत्प्रतिरेकेणापुनर्मतिःप्रार्थ्यतेतत्राह कृतमतीति मानसस्यमनसः कृतमतिनिपुणमप्यथास्यात्तथाज्ञातस्त्रोपदृ
स्तुविचारितंभवतिनतत्बुद्धिरध्यवसानमतिर्यदिनोपेतिनांगीकरोतितर्हितत्तथाविचारितमप्यफलंशरवद्घनवन्नरूपत्वेवनास्थिरीभवतीत्यर्थःअ

॥ त्वांपादपतितःप्रीत्यायाचेसन्नतिसुतेमते तेनभयेभवोच्छेदभूतयेसुस्थिराभव ३७ वासिष्ठमुनिनाप्रोक्ताविरक्ताःप्रथमंगिरः ततोमुमुक्षोराचार
उत्पत्तीनांक्रमस्ततः ३८ ततःस्थितिप्रकरणंसमंदृष्टांतसुंदरं विज्ञानगर्भंसुलभंयथावत्स्मरहेमते ३९ कृतमतिज्ञातज्ञोविचारितंयद्युदितदु
पैतिनमानसस्यबुद्धिः भवतितद्फलंशरद्घनाभसत्तमतोमतिरेवकार्यसारः ४० मोक्षोपायेषूपशमप्रकरणेउपदेशानुवर्णनंद्वितीयः

ग्रं.०१

सर्गः २ श्रीवाल्मिकिरुवाच तस्यैवंप्रार्थयानत्वेततयोद्दारचिंतया सावतीयायरजनीयस्यसेवार्ककांक्षिणः १ किंचित्तमकडारासुकिंचिद
पारुणासुच नभोविरजतारासुदिक्षुसम्मार्जितास्विव २ प्रभातत्तूर्यघोषेणसममिंदुसमाननः उत्तस्थौराघवःश्रीमान्पद्मःपद्माकरादिव
३ प्रातःस्नानविधिंकृत्वासंपाद्यभ्रातृभिःपुनः प्रहितात्ल्पपरीवारोवासिष्ठसदनंययौ ४

(ततः श्रवः श्रवणेनविचारितेपितत्वेमतिर्मननिकृताध्य
वसायबुद्धिरेवसत्ततंकार्यंकिंतर्ह्यार्थविषयेसारोमुख्याभवतीतिमननायप्रयत्नःकार्यइत्युक्तमेवेत्यर्थः ४० इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपश
मप्रकरणेद्वितीयःसर्गः २ उषःस्नानःगृहाद्यातरामप्रभृतिभिःसह वासिष्ठस्यसभायानंप्रस्तावश्चात्रकीर्त्यते तस्यरामस्यएवंप्रार्थययाउक्त
प्रकारयातत्तयाविस्तृतयाचिंतया १ तमोभिःकडारासुकपिशवर्णासु २ ३ संपाद्यनिर्वर्त्यसंध्यावंदनादिकमित्यौचित्याऽऽक्षिप्यते भ्रातृभिःप्र
हितःप्रस्थितःअल्पःपरिवारःपरिजनोयस्यभ्रातृभिःसहप्रहितःआसन्नमाल्पःपरिवारोयस्येतिवा ४

समाधिसंस्थमिति पूर्वमेवरस्नालापात्तः कृतं निर्वर्त्त्य समाधिसंस्थमिति गम्यते ५ तेरामादयः यावत्तमः सम्यगालूर्नछिन्नंभवतितावत्तस्थुः ६
मौनं निःशब्दं यथास्यात्तथा ७ पार्थिवोचितनाचारे पिपार्थिवसदनमिवशोभनं शोभमानं ८ विनयाद्याचारेणप्रियवचनाद्युपचारेण ९
१० ११ अवनतांप्रणम्रजनां १२ निर्जगाम अभिजगाम १३ १४ १५ १६ तेषुमुनिनृपमंत्रिप्रभृतिषुप्रथमसमुपविष्टेषुसत्सुपश्चादन्येचापिस

समाधिसंस्थमेकं तेमुनिमात्मपरायणं दूरएवाननामासोरामोविनतकंधरः ५ तेप्रणाम्यांगणे तस्थुस्तस्मिंस्तेविनयान्विताः यावत्तमस
मालूनंप्रक्तंदिङ्मुखमंडलं ६ राजानोराजपुत्राश्चऋषयोब्राह्मणास्ततः आययुःसदनंमौनंब्रह्मलोकमिवामराः ७ तद्वसिष्ठस्यसदनंबभ्र
वजनसंकुलं हस्त्यश्वरथसंबाधंपार्थिवाचारशोभनं ८ क्षणाद्वसिष्ठोभगवाननुविरराम समाधितः आचारेणोपचारेणजग्राहप्रणतंजनं ९
तथानुयातोमुनिभिर्विश्वामित्रान्वितोमुनिः आरुरोहरथंश्रीमान्सहसाब्जमिवाब्जजः १० ययौगृहंदाशरथंसैन्येनमहतावृतः ब्रह्मेवशक्र
नगरंसमस्तसुरमालितः ११ विवेशावनतांतत्ररम्यांदाशरथींसभां हंसपृथ्वानुवलितोराजहंसइवाब्जिनीं १२ त्रीणितत्रपदान्याशुनदाद
शरथोनृपः निर्जगाममहावीरस्सिंहासनसमुत्थितः १३ विविशुस्तत्रतेसर्वेनृपादशरथादयः वसिष्ठाद्याश्चमुनयोऋषयोब्राह्मणास्तथा
१४ मंत्रिणश्चसुमंत्राद्यास्सौम्याश्चविपश्चितः राजपुत्राश्चरामाद्यास्त्रिपुत्राःशुभादयः १५ अमात्याद्याःप्रकृतयःसुहोत्राद्याश्चनागराः
मालवीयाद्यास्तथाभृत्याःपौराद्याश्चैवमालिनः १६ अथतेषूपविष्टेषुस्वेषुस्वेष्वासनेषुच सर्वेष्वेवोपविष्टेषुवासिष्ठोन्मुखदृष्टिषु १७ सभाक
लकलेशांतेमौनसंस्थेषुबंदिषु वृत्तासुस्थितिवार्त्तासुसौम्येनास्मिन्सभांतरे १८ स्फुरत्सवनमालासुविश्रान्तंभोजकोटरात् परागेषुविजोभ्नेषुमु

यं
क्तादामसुसैधवं १९ वैषूपविष्टेष्वित्यर्थः सर्वेष्वेवेत्यादीनांसर्गसमाप्तिपर्यंतंसर्वेषांसतत्त्वंतानाम्युत्तरसर्गस्थेनइदंदशरथवाक्येनुवाच्ये
त्पत्रसंबंध १७ सभायाःकलेकलेकोलाहलेस्थितिवार्त्तासुपरस्परंरात्रिसुखावस्थितिप्रश्नप्रतिवचनवार्त्तासुवृत्तासुसतीषु १८ अंभोजको
टरान्निर्गत्यसभांविश्रान्त्विति शेषः अतएवांभोजानांपरागेषुमुक्तादामसुचंचलंयथास्यात्तथाविलोलेषुलंपष्टेषु १९ श्रीरामयनमः

२० मृदुषु पर्यंकेषु २१ आलागतैरर्ककरैरवलोकनप्रतियातान्यलोलानि विलोचनानि यासां रत्नप्रभानिकरैः पिंगलासु कोमलासु सुकुमारीषु
तासु प्रगुक्तासु सितचामरधारिणीषु संत्यक्तचापललवं यथास्यात्तथा मौनस्थितासु २ २२ नानारत्नखचितास्वजिरभूमिषु मुक्ताफलानां प्रति
फलानि प्रतिछायाः तन्मूर्तिमाः अर्करश्मिरागाः उदरे यासां तथाविधासु नानापुष्पाकारचित्रासु जातासु अभिनवातपबिंबाए एवमेइति भ्रां
तिबुद्ध्या अलिकुले पुष्पकौघं विकीर्णपुष्पसमूहं नासादयति अलभमाने अत एव भूम्युस्पर्शान्निभसि मेघइव भ्रमति सति २३ तास्मिंस्तत्संगमे

(वातायनेषु) बृहत्कुसुमदोलाभ्यः प्रसृताभ्यः समंततः वाति मांसलमामोदमादाय मधुरानिले २० वातायनेषु मृदुषु कुसुमाकीर्ण
भूमिषु पर्यंकेषूपविष्टासु पत्रपंक्तीषु पुराध्रेषु २१ आलागतार्ककरलोलविलोचनासु रत्नप्रभानिकरपिंगलकोमलासु संत्यक्त
चापललवं चपलासु तासु मौनास्थितासु सितचामरधारिणीषु २२ मुक्ताफलप्रतिफलप्रतिमार्करश्मिरागोदरास्वजितेरभूमिषु पु
ष्पकौघं नासादयत्यभिनवातपबिंबबुद्ध्या भ्रांते भ्रमत्यलिकुले नभसीव मेघे २३ पुण्यैर्वसिष्ठवदनप्रसृतं श्रुतं यत्तत्संततिप्रसृत
विस्मयमार्यलोके सत्संगमे मृदुपदाक्षरमुग्धवाक्यमन्योन्यमीप्सितमनल्पगुणाभिरामं २४ दिग्भ्यः पुराच्च गगनाच्च वनाच्च सिद्ध
विद्याधरार्यमुनिविप्रगणे वसिष्ठं मौनप्रणाममभितः प्रविशत्यनाबंसोपाश्रु गौरववतासह जातवाके २५ श्रीरामायनमोनमस्ते

सतां समाजे आर्यलोके बहुमतजने प्राक्संचितैः पुण्यैर्यद्वसिष्ठवदनप्रसृतं वचनं श्रुतं तत्स्यसंततस्यात्तद्विस्तारेण प्रसृतविस्मये उद्भूताश्चर्यं य
थास्यात्तथा अन्योन्यं इप्सितं अभिमतं अनल्पगुणाभिरामं मृदुपदाक्षरमुग्धवाक्यं भाषमाणे सतीति शेषः २४ वनाच्च समागते इति शेषः वि
द्याधराणां आर्यमुनीनां अन्येषां च विप्राणां गणे वसिष्ठं अभितः मौनप्रणामं मौनेन प्रणम्य अश्राबं पिहितास्यं यथास्यात्तथा प्रविशति सति
ततः गौरववता गरीयसा अवरूपसंभाष्येण सह सोपाश्रु अतिमंदस्वरं कर्णसन्निधौ जातवाक्ये सति वसिष्ठमभितः सर्वतः परितः समयानिक
षाहाप्रतियोगेपीति षष्ठ्यर्थे द्वितीया २५ ७॥

यो॰ वा॰ उप॰
६

उन्निद्राणां कोकनदानां रक्तकमलानां कोमलेभ्यः कोशेभ्यः कृष्टानां प्राकरंदनमग्नानां अलिजालानां मकरंदानां सुवर्णानां परागाणां चरागैः रं
जनैः आपिंगले ईषत्पिंगलवर्णे मरुता स्वाभिमर्शाद्धिलोलानां गृहप्रांतघंटानां टंकारगीतैर्विनिपीतानि अभिभूतानि निशांतानां गृहाणां गी
तानि येन तथाविधे मरुति वाति सति घंटाजिह्वाग्रे पिप्पलपत्राकारस्वनान्मंदवातैरपि गृहपल्लवघंटावलिध्वननं दाक्षिणदेशगोपाले च प्रसिद्धं
२६ चंदनामोदैर्मिश्रैश्चलकुसुमरजोभिरंकाः तइत्यंकस्तथाविधे अत एव सरसानां कुसुमदाम्नां उद्दामैर्गंधैरंकितानि सुरभितान्यभ्राणि
येन तथाविधे अगरुतगरुनिर्यासधूमेनान्निलिन्ना तिरोहितवर्णत्वाच्छब्दैरेव विज्ञातानन्तु साक्षाद्दृष्टाभ्रंगाय स्मिन्कर्मण्येन यथास्यात्तथा॥

उन्निद्रकोकनदकोमलकोशकृष्टमग्नालिजालमकरंदसुवर्णरागैः आपिंगले मरुति वाति विलोलघंटाटंकारगीतविनिपीतनिशांतगीते २६
अगरुतगरुधूमे चंदनामोदमिश्रसरसकुसुमदाम्नो द्दामगंधांकिताभ्रे सरति सति वितानांभोरुहामोदलेशैश्चलकुसुमरजोंके शब्दविज्ञात
भृंगं २७ मोक्षोपायेषूपशामप्रकरणे सभासंस्थानं सर्गः ३ श्रीवाल्मीकिरुवाच मेघगंभीरया वचा विश्रब्धपदसुंदरं इदं दशरथो वाक्यमु
वाच मुनिनायकं १ भगवन्त्युस्तनेनत्वं वाक्यसंदर्भजन्मना कच्चिन्मुक्तोसि खेदेन तपः कार्श्यातिशायिना २ त्वस्तनेनोकोय आनंदो विविक्तो व
चसां गणाः अमृतावर्षणेनेव तेनैवाप्यासिता वयं ३ चंद्रांशवइवोत्सार्य तमांस्यमृतनिर्मलाः अंतःशीतलयंत्येनामरुतामलागिरः ४ अप
र्वाङ्गदरायिन्यउच्चैस्तरपराश्रयाः अतिमोहाय हारिण्यः सूक्तयो हि महीयसां ५ (वितानबद्धानामंभोरुहाणामामोदलेशैः सहसरति कृष्वंभ्रवह
तिसतीत्यर्थः २७ इति श्रीवासिष्ठतात्पर्यप्रकाशेनुपशामप्रकरणे तृतीयः सर्गः ३ राजा वासिष्ठवाक्यानां प्रशंसामुनिवाक्यतः रामेण चिंतितार्था
नामनुवादश्च वर्ण्यते विश्रब्धैर्विश्वासातिशायप्रकाशकैः पदैः सुंदरं १ त्वस्तनेन पूर्वेद्युर्भवेन वाक्यसंदर्भेश्वारणजन्मना खेदेन श्रमेण २
आनंदोश्रोत्रानंदशीलः विविक्तो विशदः ३ तमांसि अज्ञानान्यंधकारांश्च ४ इदानीं चंद्रांशुभ्योप्युत्कर्षमाह अपूर्वेति अपूर्वाः अनास्वादितपूर्वाः
कारणान्यन्यश्चानंदो ब्रह्मसुखं प्रयोजनं तदेव मानुषानंदादिहैरण्यगर्भानंदांतविषयसुखेभ्यश्चैस्तरं परं तदाश्रया नदविषयाः अतिमोहापहा

मुक्तिलक्षणा ज्योतिर्लता यस्मादुदेति यमाश्रित्योदेति ६ दुरीहितं मानसदोषं दुर्विहितं शारीरदोषं सर्वं समस्तेंद्रियदोषं शमितांश्शेषं दुःस्यांघ्रयः
किरणाः ७ तानेव स्पष्टमाह तन्नमामि तनुताम्यमावशोषणं ८ रसैः सिद्धरसस्तद्वचितैः सिद्धांजनैस्तानीतदृशः ब्रह्मरसाभ्यंजने नानीत प्रत्यगृहशास्त्र
९ हृदयांबरे स्थिते निश्शेषः रूपकबलादेवांतर्भूते इवार्थे गम्यमाने पुनरिवशब्दप्रयोगान्नत्वे स्पष्टार्थोतनार्थः १० अमृतांभसः अमृतांभोधेः ११

॥ आत्मरत्नावलोकैकदीपिका सरसात्मिका यस्मान्मुक्तिलतोदेति सर्वंघः सुजनद्रुमः ६ दुरीहितं दुर्विहितं सर्वं सज्जनसूक्तयः प्रमार्ज्जयं
तिशमितांशोत्तमः कांडमिवांघ्रयः ७ तस्माल्लोभादयोस्माकं संसारनिगडा मुने तवोक्त्या नतु तां यातः शारदीं वासितांबुदाः ८ संप्रवृत्तावयं द्र
ष्टुमात्मानमपकल्मषं रसांजनानीतदृशो जात्यंधा इव कांचनं ९ संसारवासनानाम्नीमिहिका हृदयांबरे प्रवृत्तानेनुनां गंतुं त्वदुक्तिशारदे
वनः १० मुनेमं शारमंजर्यस्त्वरं गाबामृतांभसः ननथाङ्क्षादयंतं संतर्पयो दारधियां गिरः ११ पंच राघवसंपाति महाजनसपर्यया दिनं तदिह
सालोकं शोषाल्लंधादिनालयः १२ रामराजीवपत्राक्ष प्रकृतार्थमिहाव्ययं मुनिमाबोधय पुनः प्रसादे समवस्थितं १३ इत्युक्तोभूद् भन्नात तत्र रामो
भिमुखमास्थितः उवाचेदमुदारात्मा वसिष्ठो भगवान्मुनिः १४ श्रीवसिष्ठ उवाच राघव स्वकुलेकेदीयन्मयोक्तं महामते कच्चित्स्मरसि वाक्या
र्थं पूर्वापरविचारितं १५ उत्पत्तीनां विचित्राणां सत्वादिगुणभेदतः कच्चित्स्मरसि सर्वासां विभागमरिमर्द्दन १६ कच्चित्सर्वं च सर्वं च सदसच्च स
दोदितं रूपं स्मरसि वेत्स्येव वि विक्तं परमात्मनः १७ यथेदमुदितं विश्वं विश्वेशादेव चेश्वरात् कच्चित्स्मरसि तत्साधो साधुवादैकभाजन १८ ७

यद्यदिनं महतां जनानां ब्रह्मविदां सपर्यया पूजया संयात सफयाति सालोकं सप्रकाशं अंधास्तमोहताः १२ आबोधय पष्ठ १३ आस्थितः त
पविष्टः १४ १५ सर्वासां प्रागुक्तजीवजातीनां १६ सर्वं नटवन्मायया जगद् वेषणास्थितं ब्रह्म असर्वं निष्प्रपंचं सत्स्थूलमसत्सूक्ष्मं सत्यासत्यरू
पं वा मदुक्तं स्मरसि स्वबुद्ध्या दृश्यो भावविविक्तं वेत्स्येव वा १७ विश्वेशात्सर्वशक्तिसंपन्नादीश्वरात् ईक्षणाः एवकारः सांख्याद्यभिमतप्रधानादिकार
णवादनिरासार्थः साधुवादाः प्रशंसाः सदुपदेशाश्च बलात्कालबलात् संख्यया अनंतं देशकालादिनाल्पं तत्वत् १८ श्रीरामायनमो नमस्ते ७

१९ २० त्वय्यस्तनस्य विचारस्य श्रवणात्तद्विषयो वाक्यार्थः विचारितो मननेन परिष्कृतः २१ हेलया अनादरेण हतासां स्थितिरुपदिष्टार्थधारणं येन तथाविधस्य पुरुषाधमस्य न फलतीत्यर्थः २२ विविक्तहृदयः विवेकत्वशालिमनाः विज्ञानलवसाम्य २३ २४ विजृंभितं प्रभाविस्तारः २५ तथैवकृतमिति शेषः तदेवस्पष्टमाह अपास्तेति २६ भवता कर्त्रा उक्तिलक्षणेन विवस्वता सूर्येण करणेन उक्तेनुपदेशेनार्थप्रकाशनविषये विवस्वतास्तु यं भूतेन भवतेति सामानाधिकरण्यं वा आज्ञादिजाड्यशीतापनयसुखकरं २७ अंतःकृतं हृदि कृतं अन्वितं क्रमयुक्तं २८ सर्वाणि

रूपं कश्चिद्वविद्यापाबलाड्गुरुभानतं अनंतमंतवद्यैवसम्यक्स्मरासि सन्मते १९ चिंतमेव नरो नान्यदितियत्प्रतिपादितं लक्षणादिविचारेणा कश्चित्स्मरासि साधु तत् २० वाक्यार्थश्चाखिलः कश्चित्त्वयारामविचारितः त्वय्यस्तनस्य विचारस्य रात्रौ हृदि निवेशितः २१ भूयो भूयः परामृष्टं त्वद्दये कृतनियोजितं प्रयोजनं फलत्युच्चैर्न हेलाहतसंस्थितेः २२ भाजनं त्वं विविक्तानां वचसां शुद्धशालिनां विविक्तहृदयः कं वे मुक्तानामिवराघव २३ श्रीवाल्मीकिरुवाच कमलासनपुत्रेण मुनिनासमहौजसा एवं वितीर्णावसरो रामो वाक्यमुवाच ह २४ श्रीराम उवाच भगवन्सर्वधर्मज्ञ तत्तवैवत्वद्विजृंभितं यदहं परमोदारो बुद्धवान्वचनं तव २५ (तथैव कृतमिति) यदादिष्टानि तत्सर्वं तथैव न नदृन्यथा अपास्तनिद्रेयामयावाक्यार्थोहृदि चिंतितः २६ भवांधकारस्तनये भवतो कि विवस्वता त्वत्प्रसादितमाज्ञादिवाग्रश्मिपटलं प्रभो २७ तदतीनमदीनात्मन्सर्वमंतः कृतं मया रम्यं पुण्यं पवित्रं च रत्नदंडमिवान्वितं २८ हितानुबंधि तद्दृष्टं च पुण्यमानंदसाधनं शिरसाध्रियते कैर्नो सिद्धैस्त्वदनुशासनं २९ प्रतिक्षिपंतः संसारमिहिकावरणं वयं प्रसन्नास्त्वत्प्रसादेन वर्षांतद्यवासराः ३०

त्वद्वचनानुबंधित्वान्मधुरतरत्वात्परमपुरुषार्थसाधनत्वाद नुल्लंघ्यत्वशासनत्वाच्च तव वचनं अवश्यं शिरसा प्रणम्य त्वदादिकार्यमित्याशयेनाह हितानुबंधीति सिद्धैर्द्विविधैर्योगमंत्रादिसिद्धैः स्वतः सिद्धैः सनकादिभिर्वकैर्न शिरसाध्रियते २९ स्वास्मिंस्तु पदे श्वास्य नैष्फल्यशंकां वारयन्नाह प्रतिक्षिपंत इति निरस्यंतइत्यर्थः वर्षांते शरदि ३०

उपदेशस्य कालत्रयेपि हितकारितामाह आपातेति आपाते श्रवणकाले मध्ये मनननिदिध्यासनकाले सौभाग्यस्य अंतर्मुखताप्रयुक्तस्य शमादिसंपत्सुखस्य अनुत्तमं मोक्षाख्यं फलं यत्र तथाविध उदर्क उत्तरकालो यस्य तत् ३१ सितं स्वच्छं शुभ्रं च आह्लादितानि आनंदैकरसीकृतानि शुभाशुभानि पुण्यपापानि तत्फलानि च येन आह्लादिताः शुभा देवाः अशुभाः सर्पादयश्च येन तद्गोलक्षणं कुसुमं कल्पवृक्षपुष्पं ३२ इदानीं गुरुं तीर्थत्वान्महाह्रदत्वेन रूपयन्संबोधयन्पुनः शिष्यार्थोपदेशवाक्प्रवाहं प्रार्थयते सकलेति सकलशास्त्रविचारे शुचिशारद हे प्रस्तावात्पुण्यजलानां एकमहाह्रद चिरं तव तं मां प्रति प्रस्नुतं तोनुपदेशवाक्प्रसरं भजेत्यर्थः इदं पद्ये सकलशास्त्रलक्ष

आपातमधुरारंभं मध्ये सौभाग्यवर्द्धनं अनुत्तमफलोदर्कं पुण्यं त्वदनुशासनं ३१ विकाशि सितमम्लानमाह्लादितशुभाशुभं त्वद्वचःकुसुमं नित्यं श्रीमत्फलदमस्तु नः ३२ सकलशास्त्रविचारविशारद प्रस्तुतपुण्यजलैकमहाह्रद भज भजस्व वितत व्रतसंप्रति प्रस्तुततां हतकिल्बिषसंततिः ३३ मोक्षोपायेषूपशमप्रकरणे राघवप्रश्नस्सर्गः ४ श्रीवसिष्ठ उवाच इदमुत्तमसिद्धांतसुंदरं सुदृशाकृते उपशांतिप्रकरणं शृणु श्रावहितोहितं १ दीर्घसंसारमायेयं राम राजसतामसैः धार्यते जंतुभिर्नित्यं सुस्तंभैरिव मंडपः २ सत्वस्थजातिभिर्धीरैस्त्वादृशैर्गुणबृंहितैः हेलया संत्यजते तुच्छा मायेयं त्वगिवोरगैः ३ ये सत्वजातयः प्राज्ञास्तथा राजससात्विकाः विचारयंति ते साधो जगत्पूर्वपरंपरां ४

[illegible] ५

१ यानां विना हंसादिपक्षिणा चारैः विचारदक्षोभमानाः वितताः विस्तारितानि व्रतानि नियमनिभिर्य त्रैस्ताद्दृशां हतानि किल्बिषाणि येन एवंविध हे प्रस्तुतपुण्यजलैकमहाह्रद त्वं संप्रति इदानीं संततिं वाक्संतानरूपां प्रस्नुतां प्रवाहं भजेत्यर्थः मां प्रतीति संतेपाठे महिश्रुद्दये इत्यर्थः ३३ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुर्थः सर्गः ४ अविवेकप्ररूढी यामनोमात्रजगत्स्थितेः इहोपशमनोपायक्रमः सम्यगुदीर्यते अवहितः सावधानचित्तः १ प्रागुक्तमनूद्य प्रस्तुतेन संगमयति दीर्घेति राजसतामसैः प्रागुक्तजीवैर्धार्यते पुरुषो वा अस्थितिः सहीदमन्वाधि याधियाजनयते कर्मभिरित्यादि श्रुतेरिति भावः २ प्रागुक्तलक्षणैः सत्वस्थजातिभिः राजससात्विकैः शुद्धसात्विकैश्च ३ केनोपायेन त्यज्यते तमाह ये इति पूर्वपरंपरां मूलपरंपरां अन्वेनसोम्य शुंगेना

वा॰टी॰ उप॰
८

सत्कार्याणि यज्ञो दानं तपश्चेत्यपावनानि मनीषिणामिति भगवदुक्तानि ५ स्वयमेवेति उद्धरेदात्मनात्मानमिति न्यायादिति भावः नाधिगतं न
ज्ञातं अधिगम्यते प्राप्यते ६ त्वयि तु तस्यातियोग्यतास्त्येवेत्याह प्रज्ञावतामिति नयवतां प्रमाणे कुशलानां ७ आलोकयाविचारेण परूप ८
अस्तीति सत् सदेव सत्यं असत्तु विरुद्धस्वभावं तद्विरुद्धं नास्ति स्वभावं कथं संभवेत् स्वभावविपर्यासायोगादिति भावः नित्यं नियतसत्त्वभावं
९ आसमन्तेसत्त्वबुद्ध्यारज्यते १० मनोरथरचितप्रासादकल्पनामात्रत्वात्कार्यत्वात् पिनसत्यतापसक्तिर्जगत इत्याशयेनाह जायत इति ११

शास्त्रसज्जनसत्कार्यसंगेनोपहतैनसां सारावलोकिनी बुद्धिर्जायते दीपिकोपमा ५ स्वयमेव विचारेण विचार्यात्मानमात्मना या
वन्नाधिगतं ज्ञेयं न तावदधिगम्यते ६ प्रज्ञावतां नयवतां धीराणां कुलशालिनां आसाराजससत्त्वानां मुख्यस्त्वं रघुनंदन ७ स्व
यमालोकय प्राज्ञ संसारारंभदृष्टिषु किं सत्यं किमसत्यं वा भव सत्यपरायणः ८ आदावंते च यन्नास्ति कीदृशी तस्य सत्यता आदावं
ते च यन्नित्यं तत्सत्यं नाम नेतरत् ९ आद्यंतासन्मये यस्य वस्तुन्यारज्यते मनः तस्य मुग्धस्य नोर्जेतो विवेकः केन जन्यते १० जायते मन
एवेह मन एव विवर्द्धते सम्यग्दर्शनदृष्ट्या तु मन एव हि मुच्यते ११ श्रीराम उवाच तात मे तन्मया ब्रह्मन्यथास्मिन्भुवनत्रये मनए
व हि संसारि जरामरणभाजनं १२ यत्तस्योत्तरणोपायस्तन्मे ब्रूहि सुनिश्चितं हार्दं तमस्त्वया केन राघवानां विनाश्यते १३
श्रीवसिष्ठ उवाच पूर्वं राघव शास्त्रेण वैराग्येणापरेण च तथा सज्जनसंगेन नीयतां पुण्यतां मनः १४ सोऽजन्योपहितं चेतो यदा वैराग्य
मागतं तदानुगम्या गुरवो विज्ञानगुरवोऽपि यो १५ ततस्तस्योपदिष्टेन कृत्वा ध्यानार्चनादिकं क्रमेण पदमाप्नोति तद्यत्परमपावनं १६

प्रश्नः स्पष्टः १२ १३ प्रथमं शास्त्रसज्जनसंगाभ्यां वैराग्यादिसाधनचतुष्टयं संपाद्यमित्याह पूर्वमिति पुण्यतां ज्ञानोदययोग्यतापादिकां विशुद्धिं
१४ सोऽजन्यं निरभिमानिता येगुरवो विज्ञानेन सर्वशास्त्ररहस्यज्ञानेन गुरवो गरीयांसो पित्र्याद्युपदेश कौशले नशिष्यबोधनसमर्थाश्च भ
वंति तैर्विधिना अनुगम्याः १५ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्ता

पृ॰ १८

८

विश्वंकृत्स्नंइंदुनातेजसापूर्णमिव १७ चेतसाबुद्धिरूपेणविचारलक्षणेनरंयावद्विश्रांतिंस्थैर्यंनेति १८ आधीन्मानसदुःखानिअधःक
रोतिनिरस्यतीतियावत्सौम्यंनिम्नप्रसन्नं १९ भस्मनिगूढंहेमअन्यैर्विवेकुकुमशाक्यमपियथाहेमज्ञानात्मनःसदाहेमपरिज्ञोघने
नतद्विवेककुशलात्मनोहेमकारस्यइदंरुक्मंइदंभस्मेतिस्फुरंपरिज्ञातमितिनतदलाभमोहस्यावसरस्तथाअयमतदंशाप्रसिद्धोम
नागात्मापरिच्छिन्नजीवःचिरंविचारेणविविच्यस्वात्मनिअवगतेसतिअक्षयःकालादिपरिच्छेदशून्यःस्वतएवस्फुरंभवतीतिकुतोमोहः

विचारेणावदातेनपवित्ररूपस्वात्मानमात्मना इंदुनाशीतलेनांतर्विश्वंखमिवतेजसा १७ तावद्भवमहांभोधौजनस्तृणवद्दृश्यते
विचारतरविश्रांतिमेतियावन्नचेतसा १८ विचारेणापरिज्ञातवस्तुनोस्यजनस्यधीः सर्वानधःकरोत्याधीन्सौम्याभइवचालुकः १९
इदंरुक्ममिदंभस्मपरिज्ञातमितिस्फुरं नयथाहेमकारस्यहेमज्ञानात्मनस्तथा २० अक्षयोयंमनागात्मास्वात्मन्यवगतेचिरं
भवतीतिनरस्येहमोहस्यावसरःकुतः २१ अपरिज्ञातसारोहिमनोंतर्यदिमुह्यते ज्ञातसारत्वसंदिग्धमसतीकिलमूरता २२ हेजं
नाह्यपरिज्ञातआत्मावोदुःखसिद्धये परिज्ञातस्त्वनंताय सुखायोपशमायच २३ मिश्रीभूतमिवानेनदेहेनोपहतात्मना यक्रो
कृत्स्नमात्मानंस्वस्थोभवनमाचिरं २४ देहेनास्यनसंबंधोमनागेवामलात्मनः हेम्नःपंकलवेनेवतद्गतस्यापिमानवाः २५
एषगात्मापृथग्देहीजलपद्मदलवोपमो ऊर्ध्वबाहुर्विरोम्येषनचकश्चिच्छृणोतिमे २६ जडधर्मिमनोयावद्गतेकुछपवात्तितं
भोगमार्गवदामर्ग

स्यावसरइतिपरेणान्वयः २०२१ अपरिज्ञातसारेपुरुषेयदिमुह्यतितर्हिमुह्यतांनामेतिशेषः असतीअसंभावितैवकिले
त्यर्थः२२ इदानीमनुक्रोशात्सर्वश्रोतजनान्प्रत्याहहेजनाइतिपदात्प्रविषएतस्मिन्नुदरमंतरंकुरुतेअथतस्यभयंभवतितत्त्वेवभयंविदुषोम
त्वानसेत्यादिश्रुतेरितिभावः परिज्ञानात्त्विति रसंह्येवायंलब्ध्वानंदीभवतिसर्वान्कामानाप्नोत्यमृतःसमभवत ज्ञात्वातंमृत्युमत्येतिआ
नंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेत्यादिश्रुतेरितिभावः २३ यक्रोकृत्स्नपंचकोशाविवेकेनदृष्ट्वा २४ व्याकिकरणमेवस्फुरयतिदेहेनेत्यादि
ना अस्यपृथक्त्वएवकारः २५ आत्माब्रह्मदेहीजीवभ्रमयथापद्माधारमहाजलपद्मपत्रनिविष्टजललवश्चोपाधितएवपृथगिवलक्ष्यतस्तद्वदित्य
र्थः ननुमहाजलस्यपद्मपत्रारोहपरिच्छेदाहेवाय्वादिनिमित्तंसिद्धंपूर्णात्मनःपरिच्छेदेनदेहारोहणेकिंनिमित्तमितिचेदसहृदुःखितंपापिष्ठ
मनएवअतस्तन्नाशायैवयत्नःकार्यइत्याशयेनानुक्रोशादाक्रोशतिऊर्ध्वबाहुरित्यादिना २६ दुर्वासनापंकगर्तेकुछपवन्निलीनंकठोरंचभोग

वा·टी·उप·
१

स्वांपारमार्थिकीं स्थितिं विवेचयति अनन्तादिविश्वप्रपतिसति २९ योगोदेहादितादात्म्याध्यासस्तल्लक्षणायां अध्याप्यायां गतं सुखं समाधि
विश्रांतिं कृत्वेति वा ३० कथं बोधयेत्तदाहयथेति ३१ हेमतादात्म्यापत्तिलक्षणां परिणतिं भंतवलिकतो न याति ३२ अनुभावितत्वमनुसारि
त्वमनुभवितृत्वं च इत्यवबुध्यते मरु इत्यत्रोषः बिंदुतातघ्यावद्रकाणि संपतं तीव इत्थं तरितिश्रुत्यनुभवसिद्धा बिंदुसहस्राकारतासान
तामालिनी ३३ यदि नात्मनः सुखदुःखे तर्हि किं देहस्य नेत्याह सुखदुःखे इति तर्हि कस्य तत्राह एते इति अत्ता न मे वा त्ता न कंतस्यैव ३४ आ

तावत्संसारतिमिरं सेंदु नापि सवह्निना अर्कद्वादशकेनापि मनागपि न भिद्यते २८ संप्रबुद्धे हि मनसि स्वां विवेचयति स्थितिं नेत्राम
कोदय इवत मोहा हेपेलायते २९ नित्यसुप्तमबोधाय योगत्र्यायागतं मनः बोधयेद्रव बोधाय भवे बोधसंतदुःखये दः ३० यथा रजो
भिर्गगनं यथा कमलमंबुभिः न लिप्यते हि संश्लिष्टे देहे हत्मा न थैव च ३१ कर्दमादिप्रया हेम्नाश्लिष्टमेतिप्र यक्लिष्टतं नां नः परिणा
तिं याति जडो देहस्तथात्मना ३२ सुखदुःखानुभावित्वमात्मनास वबुध्यते असत्यमेव गगने बिंदुताश्चानतेयथा ३३ सुखदुःखे
न देहस्य सर्वातीतस्य नात्मनः एते स्यज्ञानेकस्यैव तासिन्नत्य न कस्यचित् ३४ न कस्यचित्सुखं किंचिद्दुःखं चन च कस्यचित् सर्वमात्मम
यं शांतमनंतं परपराघवः ३५ इमायाः परि हर्वं पनेविततः स्वचिद्रूपः पयूत्रीव तरंगास्तेपिंडे ओमीव चात्मनि ३६ यथा माणि
ईशासात्मछायाः स्वयमकारणं तेजोमयीस्तथैवायमात्मा सृष्टीः प्रयच्छति ३७ आत्मा जगच्च सुमतेनैकं नद्वैतमप्यसत् आभा
समात्रमेवेदमित्यं संप्रतिजंभते ३८ सर्वं खल्विदं ब्रह्म सर्वमात्मैव मा ततं अहमन्यदिदं चान्यदिति भ्रांतिं त्यजानघ ३९ त्वमयमात्मा विव
र्तें शांतं नित्यप्रशांतं ३५ विवर्ततां दृष्टांतेन दर्शयति इमा इति ओम्निपिंडं अर्द्धनिमीलिताक्षस्य सूर्याभिमुखं आयानस्य भ्रांत्या प्रसिद्धं ३६
तेजोमयीः आत्मछायाः स्वकां नोर्द्दातिप्रसारयति अकारणमाक्रियाया एतद् इति यावत्प्रयच्छति प्रसारयति ३७ नैकं नाद्वयं तद्वैतं नना
नापि यतो जगद्रूपमसत्तन्न तत्सनासतः अभेदो भेदो वा निरूपयितुं शक्यः तदस्यर्थः संप्रत्य ज्ञानकाले ३८ परमार्थतस्तु भ्रांतेरपि स्थितद्दुर्निरूप

ततेनैदैशिकपरिछेदरहिते ब्रह्मघनेवस्तुकृतपरिछेदरहिते नित्ये कालिकपरिछेदशून्ये ४० वास्तवैकत्वविरोधादपि नद्वैतकल्पनासत्ती
त्याह कस्मिन्नेवेति ४१ इदानीं तादृशात्मपरिचयेन तत्रावेिश्रांतये सदा तद्भावना कार्येत्याह भावयन्निति तद्रूपेण स्त्री शेद कवत तद्रूपाय
तेन वमनसा जुज्वलमये माया कौटिल्यमालिन्यरहिते इतियावत् ४२ तद्भावापन्नस्य जीवन्मुक्तिविश्रांतिदशां वर्णयति नशोक इत्यादिना

तते ब्रह्मघने नित्ये संभवंति न कल्पनाः विछिन्नयः पयोराशौ यथा रामन सन्मयाः ४० एकस्मिन्नेवसर्वस्मिन्परमात्मनि वल्क
नि द्वितीया कल्पना नास्ति वन्हौ हिमकणो यथा ४१ भावयन्नात्मनात्मानं चिद्रूपेणैव चिन्मयं ऋजूज्ज्वलमये स्वात्माख्ययमा
त्मनि जृंभते ४२ न शोको स्ति न मोहो स्ति न जन्मास्ति न जन्मवान् यदस्तीह तदेवास्ति विज्वरो भव राघव ४३ निर्द्वंद्वो नित्यसत्वस्थो
निर्योगक्षेम आत्मवान् अद्वितीयो विशोकात्मा विज्वरो भव राघव ४४ समः स्वस्थः स्थिरमतिः शांतशोकमना मुनिः मौनी वर
मणिस्वच्छो विज्वरो भव राघव ४५ विविक्तः शांतसंकल्पो धीरधीर्विजिताशयः यथा प्राप्तानुवर्त्ती च विज्वरो भव राघव ४६ वी
तरागो निरायासो विमलो वीतकल्मषः नादानानपरित्यागी विज्वरो भव राघव ४७ विश्रांतीतपदं प्राप्तः प्राप्तप्राप्तव्य एतिः
पूर्णार्णववदक्षुब्धो विज्वरो भव राघव ४८ विकल्पजालनिर्मुक्तो मायाजनविवर्जितः आत्मानात्मनि तत्सात्मा विज्वरो भव रा
घव ४९ अनंतपारपर्यंत वपुरात्म विदांवर धराधरशिरोधीरो विज्वरो भव राघव ५० यथा प्राप्तानुभवनात्सर्वत्रानभिवांछ
नात् त्यागादानपरित्यागाद्विज्वरो भव राघव ५१ आत्मन्येवात्मनोदार्यं भज पूर्ण इवार्णवः आत्मन्येवात्मनाह्लादं भज पूर्णेंदुबिं
बवत् ५२ विश्वप्रपंचरचनेयमसत्स्वरूपा नासत्स्वरूपमनुधाव विरामतद्वः तद्धीसि शांतकलनोसि निरामयोसि नित्योदितोसि भ
वसुंदरशांतशोकः ५३

४३ निर्द्वंद्वः शीतोष्मादिशारीरद्वंद्वविक्षेपरहितः नित्यसत्वस्थितत्वात् रजस्तमः प्रयुक्तमानसविक्षेपरहि
तः अतएव तदुभयपरिहारोपायोगक्षेमचिंतोज्झितः ४४ ४५ विविक्तः अविद्यातत्कार्यनिर्णिक्तः विताशयः स्वाधीनचित्तः ४६ ४७
४८ ४९ धराधराणां शिरइव श्रेष्ठो मेरुः स इव धीरः ५० ५१ औदार्यं अकार्पण्यं पूर्णकामतामितियावत् आह्लादं सर्वतापोपशमसुखं

स्वस्वभावविश्रांतिलक्षणं ... ५२ ५३

वा॰टी॰उप॰
१०

यदितद्धः असक्तं नानुधावति तर्हि किं मम राज्यादिना पारिव्राज्यमेवयुक्तमिति रामाशङ्कायामालक्ष्याह एकेति गुरुणापित्रानुपदिष्टं आत्त
मुक्तं एकान्तपन्नं राज्यं समस्तगुणारंजिताः राजानोलोकाः प्रजाश्च येन तथाविधः सन्नुसमयादृष्ट्या चिरं ससम्यक्सुपालयप्रारब्धत्वादव
श्यभोक्तव्येषु कर्मसुनत्फलेषु च त्यागोनयुक्तः नापिरागोयुक्तः रूसर्थः त्यक्ता कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोपि
नैव किंचित्करोति स इति भगवद्वचनादिति ॥ ५४ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचमः सर्गः ५ इह कर्मगतीः पूर्वमुक्त्वा
चरमजन्मनां जीवन्मुक्तोगुणावाप्तोसामान्यक्रमईर्यते गुणार्जनक्रमस्य वक्ष्यमाणस्य प्रकृतसंबंधं दर्शयितुं प्रकृतनिरासंगविहि
ताप्रतिषिद्धकार्यप्रवृत्त्या जीवन्मुक्तं लक्षयति इमामिति विश्वं कृत्स्नं परिस्पंदं श्रुतिस्मृत्याचारप्राप्तव्यवहारं अयत्नकांतं वत्सनिधिमात्रे

एकान्तपन्नमव नैगुरुणोपदिष्टं सम्यक्सुपालय चिरंसमये हदृष्ट्या राज्यं समस्तगुणरंजितराजलोकस्त्यागोनयुक्तइह कर्मसुनापि
१९५
रागः ५५ इति श्रीमोक्षोपाये उपशमप्रकरणे रामोपदेशः सर्गः ५ श्रीवसिष्ठ उवाच इमं विश्वपरिस्पंदं करोमीत्यस्तवासनं प्रव
र्ततेयः कार्येषु समुक्त इति मे मतिः १ पौरुषीं तनुमाश्रित्य केचिदेत क्रियारताः स्वर्गान्नरकमायांति स्वर्गे च नरकान्पुनः २ केचित्त
कर्माणिरताविरता अपि कर्मतः नरकान्नरकं यांति दुःखाद्दुःखं भयाद्भयं ३ केचित्त्वासनानंतुबद्धाः कर्मफलोदिताः तिर्यक्त्वात्स्थ
वरतनुं यांति तिर्यक्तनुं ततः ४ केचिदात्मविबोधेन विचारितमनोदृशाः विच्छिन्नतृष्णानिगडा यांति निःकेवलं पदं ५ श्रीरामः

याकरोमीति अस्तवासनं प्रवर्ततेनत्वहं एव कर्तृत्वाभिनिवेशेनेत्यर्थः १ कर्मफलासंगादेवाज्ञानामनर्थप्राप्तिरिति दर्शयन्निपौरुषीमिति पौ
रुषीं मानुषीं तनुं देहमाश्रित्य प्राप्यापि केचिन्मूढाः एतस्यां निरासंगकर्मानुष्ठानलक्षणायां क्रियायां अरताः कामात्मानः काम्यकर्मभिः
स्वर्गं भुक्त्वा ततः कृपयानुशयावशेषेण नरकमायांति २ अकर्माणि निषिद्धकर्माणि रताः कर्मणः सत्कर्मणो विरताः तथा च स्मृतिः वि
हितस्याननुष्ठानान्निंदितस्य च सेवमानात् अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीति ३ नरकोपभुक्तदुष्कर्मफलक्रमेण तिर्यग्यो
निषु उदिताः जाताः ४ राजसतामसमिश्रशुद्धतामसांशात्काष्ठ्द्धसात्विकजीवानाह केचिदिति विचारितः मनोदृक् मनः साक्षात्मा यैस्तैनिः

राजससात्विकान्दर्शयतिपुरेति कतिपयानिउत्तरोत्तरोत्कृष्टानिमानुषजन्मानि ६ तस्यऋतंत्यादिभिर्गुणैरभिवृद्धिमाहजातइत्यादिना सौभाग्यंसाधनचतुष्टयपुष्पश्रीः ७ विद्याब्रह्मविद्योपायसर्वविद्याः वेणुमिवेतिवेणुविशेषस्यापिमुक्ताकरत्वप्रसिद्धेः ८ ततापरोक्षप्रायंतानं ९ तस्योपक्रमोक्तजीवन्मुक्तलक्षणोपक्रममाह यइति पुष्टेप्रवृद्धे १० द्वंद्वानिसुखदुःखादीनिप्राज्ञःअन्तलिनाअपिधृतिश्रद्धादिप्रभृतयोगुणाः ११ वेणुकीचककंमारुतपूर्णरंध्रत्वेमधुरनिध्वानं १२ जातमेवेतिबाल्यात्प्रभृत्येवेतिपावन १३ एवंगुणसंपन्नो

पुराकृतिपुण्यान्येवभुक्त्वाजन्मानिराघव आस्मिञ्जन्मनियेमुक्तस्तस्माद्राजससात्त्विकः ६ जातोसौवृद्धिमभ्येतिपार्वणश्चंद्रमाइव कुरुजंप्राप्वृषिवनंसौभाग्यमनुगच्छति ७ यस्येदंजन्मपाश्चात्यंतमाश्वेवमहामते विशंतिविद्याविमलामुक्तावेणुमिवोत्तमं ८ आर्यतातुच्छतामैत्रीसौम्यताकरुणाततः समाश्रयंतितंनित्यमंतःपुरमिवांगनाः ९ यःकुर्वन्सर्वकार्याणिपुष्टेप्यत्तत्फले समःसर्वेषुकार्येषुनतुष्यतिनशोचति १० तमासीवदिवापांतितत्रद्वंद्वानिसंक्षयं रागरोषव्यनास्तत्रगुणागच्छंतिश्रद्धतां ११ पेशलाचारमधुरंसर्वेवांछंतितंजनाः वेणुंमधुरनिध्वानंवनेवनमृगाइव १२ नरंपाश्चात्यजन्मानमेवंप्रायागुणाश्रियः जातमेवानुधावंतिबलाकाइववारिदं १३ ततोसौगुणसंपूर्णोगुरुमेवानुगच्छति सतमेवंविकैवेनियोजयतिपावने १४ विचारवैराग्यवताचेतसागुणशालिना द्वंद्वपद्रूपस्यात्मानमेकरूपमनामयं १५ ततोत्तमंविचारेणचारुणाशांतचेतसा प्रबोधनायप्रथमंमनोमननमातरं १६ येहिपाश्चात्यजन्मानस्तेहिसुसंममनोम्यगं प्रबोधयंतिप्रथमंगुणहीनंमहागुणाः १७ प्राप्तितगुणान्स्तु

गुरुमुखाच्छ्रवणाधिकारोनापक्वचित्तानामित्याशयेनाह ततइति एवंप्राग्गदुक्तप्रकारेआत्मानात्मतत्वविवेकउपायानुपदिश्यस्वबुध्यापिकार्येसिन तेनियोजयतीत्यर्थः १४ एवंगुणसंपन्नस्यैवगुरुपूर्वेश्रवणादिनासाक्षात्कारलाभविचारेतिएकरूपमानंदेकरसं १५ नियोजयतीत्यत्रस्वचितंमननंविवृणोतिननोतीति १६ गुणहीनंनिर्गुणंब्रह्मैवयथाभवतितथाप्रबोधयंतीत्यर्थः १७ श्रीरामायनमः॥

उक्तमर्थं संक्षिप्योपसंहरन्निप्रार्थितेतितेउक्तगुणसंपन्नाश्चरमजन्मनोमानवाः प्रार्थितगुणान्प्रख्यातजीवन्मुक्तलक्षणगुणान्सु
गुरून्पन्नान्निषेव्यतद्दर्शितयुक्तिभिरमलाधियाचित्तान्तर्गतंरत्नप्रत्यगात्मानंप्रविचार्यरत्नपरीक्षावन्मननपरीक्ष्यचित्तांतःप्रका
शंपरंप्रत्यगभिन्नंब्रह्मचिरंअवलोकसाक्षादनुभूयतत्साक्षात्कारमात्रेणतद्भावलाभलक्षणांअमलांमायातत्कार्यसर्वमलनिर्मु
क्तांपरमपुरुषार्थलक्षणांगतिंउपसमीपेस्वस्थानएवयांतिलभंतेनोपासकवदुत्क्रम्यलोकांतरंगच्छंतीत्यर्थः ९ इतिश्रीवासिष्ठतात्पर्यप्र

प्रार्थितगुणान्सुगुरून्निषेव्ययत्नादमलधियाप्रविचार्यचित्तरत्नं गलितमलामुपयांतिमानवास्तेपरमवलोकचिरंप्रकाशमंतः
२९३ ९ मोक्षोपायेषूपशमप्रकरणेप्रथमतृपदेशःसर्गः ६ श्रीवसिष्ठउवाच एषतावत्क्रमःप्रोक्तःसामान्यःसर्वदेहिनां इममन्यं
विशेषंत्वंशृणुराजीवलोचन १ अस्मिन्संसारसंरंभेजातानांदेहधारिणां अपवर्गस्तमोरामद्वाविमावुत्तमौक्रमौ २ एकस्ता
वद्गुरुप्रोक्तादनुष्ठानाच्छनैःशनैः जन्मनाजन्मभिर्वापिसिद्धिदःसमुदाहृतः ३ द्वितीयस्त्वात्मनैवाशुकिंचिद्व्युत्पन्नचेतसा भव
तिज्ञानसंप्राप्तिराकाशफलपातवत् ४ नभःफलनिपाताभंज्ञानसंप्रतिपत्तये तत्रेमंशृणुवृत्तांतंप्राक्तनंकथयामिते ५ शृणु
सुभगकथामहानुभावावपगतपूर्वशुभाशुभार्गलौघाः खपतितफलवत्परंविवेकंचरमभवाविमलंसमश्नुवंति ६॥ ॥
मोक्षोपायेषूपशमप्रकरणे आकाशफलप्राप्तिविज्ञानसंप्राप्तिक्रमसूचनंसर्गः ७
(क्रमेणोपशमप्रकरणेषष्ठःसर्गः ६ इहत्वेन २२८
विचारेणकिंचिद्व्युत्पन्नचेतसःवर्ण्यतेज्ञानसंप्राप्तिराकाशफलपातवत् उक्तंसामान्यक्रममनूद्यकस्यचिद्गुणवतोविलंबेतंद्वैविध्यनीत
तत्त्वविचारमात्रेणैवसहसासर्वगुणसंपत्त्याहितत्ताज्ञानोदयलक्षणंविशेषंदर्शयितिएषइत्यादिना १ अपवर्गस्तमोमोक्षफलोपहितो
रामौउक्तवक्ष्यमाणौ २ एकेनजन्मनाबहुभिर्वाजन्मभिःसिद्धिदोमोक्षप्रापकःसमुदाहृतःप्रागुक्तइत्यर्थः ३ आत्मनास्वेनैवदैवोपनी
तजीवजगत्तत्त्वविचारवताज्ञानसंप्राप्तिर्भवतीत्यर्थः ४ द्वितीयक्रमेजनकारव्यापिकामुदाहरिष्यन्भूमिकांरचयतिनभःफलेति ५
हेसुभगचरमभवाश्चरमजन्मानोमहानुभावाःपुरुषाःपरंविवेकंपयारवपतितफलवत्समश्नुवंतितथावक्ष्यमाणांकथांशृणि

जनकेन वसंते वनो विहरता क्वचित् सिद्धगीताश्शुभाः श्लोकाः श्रुता इत्क पर्य्यन्ते विदेहानां जनपदानां महीपालो राजा १ अर्थिसा
र्थानां याचकजनसंघानां बंधुलक्षणानां पुष्पाणां माधवो वसंत २ भुवं विष्णुर्नवानिव आस्थितः ३ प्रफुल्लाः बाललतिका यत्र अनुकं
पायां कनमत्तेम नववह्निजं भमाणे अतएव कोकिलालापैः लासिन् तस्मिन् तत्तीवास्थितेम धौवसंते ४ सुविलासाः ललनाएवं अंगनालताः अंगना
श्चवायत्र ५ केसरेषु रुद्दामाः रजसो गंधमकरंदकणापहरणसमर्थाः ननु पांसुविकिरणादौ मंदसुरभिः गीता इतियावत् तथाविधाः
मारुतायत्र सानुकुंजेषु क्रीडन्नोल्लप्रस्थप्रस्रुतेषु लतागृहेषु ६ अप्रहृतरूपाणामंतर्हितानां स्वप्रसंगात् स्वानुग्रहार्थमितियावत् ७ श्रुति
स्मृतिपुराणेतिहासे गीतमात्मनं श्रवणमात्रेण भावयंति यथा स्वयमेव साक्षाद्भवति तथा कुर्वंती इति गीतात्मभावनाः गीताः स्मातेपि

श्रीवसिष्ठ उवाच अस्त्यस्तमितसर्वापदुद्यत्संपदुदारधीः विदेहानां महीपालो जनको नाम वीर्यवान् १ कल्पवृक्षोऽर्थिसार्थानां मि
त्राज्ञानां दिवाकरः माधवो बंधुपुष्पाणां स्त्रीणां मकरकेतनः २ द्विजकैरवशीतांशुर्द्विषत्तिमिरभास्करः सौजन्यरत्नजलधिर्भुवं वि
ष्णुरिवास्थितः ३ प्रफुल्लबाललतिके मंजरीपुंजपिंजरे मकरन्दचिन्मधौ मत्तकोकिलालापलासिनि ४ यथैः कुसुमिताभोगं सुविलासलतां
गनं लीलयोरुवनं कांतं नंदनं वासवो यथा ५ तस्मिन्वरवने हृद्ये केसरोद्दाममारुते दूरस्थानुचरः सानुकुंजेषु विचचार ह ६ अथ शुश्रा
व कस्मिंश्चित्तमालवनगुल्मके सिद्धानामप्रहृतरूपाणां स्वप्रसंगादुदाहृताः ७ विविक्तवासिनां नित्यं शैलकंदरचारिणां इमाः कमल
पत्राक्ष गीता गीतात्मभावनाः ८ सिद्धा ऊचुः दृष्टृदृश्यसमायोगात्प्रत्ययानंदनिश्चयः यस्तं स्वमात्मतत्त्वोत्थं निस्पंदं समुपास्महे ९

निषदः श्रुश्राव: ८ दृष्टुः चक्षुरादि द्वारा विषयप्रमातुर्दृश्येन स्रक्चंदनवनितादि विषयेण समायोगात्सन्निकर्षात् जाते प्रत्यये विषया
कारबुद्धिवृत्तौ स्वयं प्रथमानः य आनंदरूपो निश्चयः तं तत्स्वभावमेव आत्मतत्त्वपरिशोधनेन उत्थं निरतिशयभूतात्मना विर्भूतं स्वं आ
त्मानं निस्पंदं निर्विकल्पसमाधिनिरस्तसर्वबाह्यांतःकरणस्पंदं यथा स्यात्तथा समुपास्महे निरंतरमनुभवामः अयं भावः विषयाका
रवृत्तौ स्वयं प्रथमान आनंदो न विषयकोटौ जडत्वप्रसंगात् नापि कर्तृकरणवृत्तिकोटौ तेषां कारकत्वेन तच्छेषतानुभवविरोधात्
तस्मात् साक्षिकोटावेव साक्ष्येव हि अविद्यावरणमंदीकृतं चिदानंदस्वभावो न्यमहंकारात्मानं कल्पयित्वा तच्छेषतामिवापन्नो विषयाकार

वस्याविर्भूतं स्वानंदं तच्छेषतामिव नयन्नूस्वात्मानं निरतिशयानंदं प्रतिबुध्यते अतस्तमेव स्वतत्वविचारोत्थनिरतिशयानंदस्वभावं
समाहितेन मनसा वयमुपास्महे एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेर्ब्रह्मानंदस्यैवाविद्यया विषयाकारवृत्तिपरि
छेदेन विषयानंदत्वभावनादिति अथवा दृष्टुः पुरुषस्य दृश्यरूपस्य विषयादेश्च बाह्याध्यात्मिकवैषम्यप्रविलापनेन समे परिशिष्टस
न्मात्रस्वभावे आत्यंतिकाभेदापत्तिलक्षणाद्योगान्मेलनाद्यारूढयोगादिति युक्तस्यानिर्विकल्पसमाधिपरिपाकाद्दुद्भूतस्य यःस्वा
नुभवादेव विश्वसनीयः भूमानंदनिश्चयो यस्तं आत्मनस्तत्वेन यथार्थरूपेणोत्थं प्रकटीभूतं स्वं निस्पंदं समुपास्महे इत्यर्थ अथवा दृष्टु
र्बुद्धेर्दृश्यानां विषयाणां चक्षुपचयजाद्यप्रियाप्रियादिरूपसाम्येन समात् आयोगात्संबंधात्तदुभयांतरात्तिकस्तदुभयविलक्षणा
त्तात्पर्यस्य एवानंद इति निश्चीयत इत्यादनिश्चयस्तं निस्पंदं सक्रियवृत्त्युपाधिनिर्मुक्तं अत एवात्मतत्वोत्थं स्वीययथार्थरूपेणाविर्भू
तं चिदानंदैकरसं स्वं प्रत्यगात्मन समुपास्महे इत्यर्थः अथवा यः आत्मा अहमिति इदं मम इति दृश्यैश्चान्योन्यतादात्म्यसंसर्गाध्या
सलक्षणात्समायोगात्प्रतीयते अनुभूयते स्रक्चंदनकस्तूरिकादिभिरपीति प्रत्ययः विषयानंद एव पुरुषार्थ इति निश्चयवान्संसरति स्वास्वी
यापामाप्रमावेदांतजन्याखंडाकारवृत्तिस्तया आत्मतत्वोत्थं स्वीययापरमार्थिकरूपेणाविर्भूतं केवलानिस्पंदं निश्चलं समुपास्महे इत्यर्थः
अथवा यः प्रत्ययः स्वप्रकाशः आनंदैकरसः स्वरूपनिश्चयः दृष्टृदृश्यसमाययः सन् दृष्टृदृश्याकारमायासहितो भूत्वा आगात्स्वरूपप्रच्यु
तो भूत् तं आनंदइति निश्चयं चरमसाक्षात्कारवृत्त्यारूढाया स्वात्मभूतैवमातयाद्दृष्टृदृश्यमायानिरासेनात्मतत्वेनोत्थमित्यादिप्राग्वत्
अथवा दृष्टृदृश्यसमायः यःअगादिति छेदः यः आत्मानंदेन तत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादित्यादिश्रुत्यनुभवसिद्धात्सरमप्रे ४ १२
मास्पदत्वप्रत्ययादानंदरूपत्वेन निश्चेतुं योग्योऽपि विवेकविचारादिप्रत्ययाभावात् दृष्टृदृश्यसमाः भोक्तृभोग्यपाप्राप्याः संसारदृत्ताः अगात्
तं यत्नं प्रसुप्रयत्नेक्तः विवेकवैराग्यश्रवणमननादिप्रयत्नैः साक्षात्कृतं स्वेनैव निमीनेपरिछिनत्ति हि नास्ति वा सर्वदृष्टृदृश्यपदे न आनमि
त्तिस्वमयं यदात्मतत्वं तद्भावेनोत्थितं निर्दं पुनःसंसारप्रसक्तिशंकाशून्यं सम्यगुपेत्य सर्वसामीप्यावधिप्रसंगात्मतया प्राप्य आस्महे तिष्ठाम
सं

तमेवात्मानं निष्कृष्य करतलामलकवद्दर्शयंतद्द्वान्ये प्राहुर्द्दृष्टृदर्शनेति द्रष्ट्रादित्रिपुटीत्यागेनावस्था द्वयनिरासः वासनयासहेत्यनेन तु त
दुभयबीजवासनासंभृतसौषुप्ताज्ञानस्यापि निरासउक्तः दर्शनाख्यास्तुषमानसादिवृत्तेः प्रथमं पूर्वमेव तदुत्पत्तिसाक्षितयाभासमानमित्यने
न पूर्वं सिद्धस्त्रिपुटीसाक्षी सर्वानुभवसिद्धोविविच्यदर्शितः तमेव सबीजत्रिपुटीत्यागात्तुरीयमात्मानं समुपास्महे इत्यर्थः १० दर्शनप्रथमाभासे
साक्षिणि ये अस्तिनास्तीति विप्रतिपद्यंते तान्प्रत्यपि तदुभयपक्षाविरुद्धं साक्षिणं दर्शयितुमन्ये प्राहुर्द्वयोरिति येनावदास्ति दर्शनप्रथमाभासः प
रं तु सोपि जन्य एव न नित्य इत्याहुस्तेषां पूर्वापूर्वतदाभासानां स्वप्रकाशत्वस्व विषयत्वे वा स्वगात्रभानपाक्षीपात्स्वात्स्वर्वांतरविज्ञानास्पर्शित्वाच्च न
तदुत्पत्त्यादिसाक्षिता निर्वहतीतत्साक्षी अन्य आवश्यक इति तत्य क्षमध्यगतं तं विरुद्धयोरपि नास्तीत्याहुस्तेषां नास्तिता अपि निःसाक्षिका

अन्येऊचुः द्रष्टृदर्शनदृश्यरूपा नित्यस्फुर्ता वासनया सह दर्शनप्रथमाभासमात्मानं समुपास्महे १० अन्येऊचुः द्वयोर्मध्यगतं नित्यम
स्तिनास्तीति पक्षयोः प्रकाशनं प्रकाशरूपानामात्मानं समुपास्महे ११ अन्येऊचुः यस्मिन्सर्वं यस्य सर्वं यतः सर्वं यस्मायिदं येन स
र्वं यद्धि सर्वं तत्सत्यं समुपास्महे १२

या असिद्धेस्तस्य स्वसाधकत्वेन न मध्यगतमित्यर्थः अथवा जगतः अस्तित्वं आविर्भूतावस्थाकार्यं
नास्तित्वं तु तिरोभावावस्थाकारणं असद्वा इदमग्र आसीत्ततो वै सदजायतेति श्रुतेः तयोरुभयोरप्योगपद्यात्पक्षयोः पाक्षिकयोरनु
गतसन्मात्ररूपेण मध्यगतमित्यर्थः अथवा अस्ति नास्तीति पक्षयोः कल्पितविरुद्धकोट्योर्द्वयोरप्यधिष्ठानतया मध्यगतमित्यर्थः अ
त एव कल्पितनास्तित्वस्याधिष्ठाना स्पर्शान्नित्यप्रकाशरूपाणां भावाभावानां प्रकाशकं ११ यस्मिन्सर्वमिति यस्मै इदमिति च्छेदः सप्तमी
विभक्तिमारभ्य व्युत्क्रमेण सर्वाः विभक्तयः षट्पंकारकाणां संबंधप्रातिपादिकार्थभेदस्य च प्रदर्शनपरा निर्दिष्टाः तथा च यद्ब्रह्म सर्वाधा
रत्वात्सर्वस्वामित्वादेः सर्वोपादाननिमित्तावधिभावात्सर्वपाराध्यसंप्रदानादिभाववनिर्वाहकत्वात्सर्वकर्तृकरणादिभावाच्च मायया सर्व
जगद्व्यवहारनिर्वाहकं च भवति तत्सर्वाधिष्ठानं परमार्थसत्यं प्रत्यगात्मैवेति बोधने सम्यगुपगूढत्सु तद्रूपता आस्महे इत्यर्थः १२ ७:७॥

अः त्रिरद्व प्रथमोयस्य तं अकारादिमित्यर्थः हकारोंते यस्य तं हकारांतं अहं पदं अशेषवस्तुप्रकाशकवेदशास्त्रादिशब्दजालं प्रकृति
भूतानामशेषवर्णानामक्षरसमाम्नाये अकारहकारांतरालनिवेशादशेषजगदाकारे सप्रपंचे ब्रह्मण्यभिहन्यते नहीयते इति श्रुतसा
अभ्यासाविति धातुनिष्पन्ना चनशिष्यते आकारोयस्मिन्नित्यशेषाकारे निर्गुणे च संस्थितं तात्पर्यनिष्ठं प्राप्तं अजस्रं क्रियमाणो युक्तव्यव
हारेषु उच्चरं तं अहंकारोपाधिनिरासेन तं वर्णितं अहं पदार्थं आत्मा वा इदमेक एवाग्र आसीदित्यादिश्रुतिप्रसिद्धं ब्रह्मात्मानं उपास्महे निरं
तरं भावयाम इत्यर्थः अथवा अशेषवस्त्वाकारसंस्थितं लंवंरंयंहं इति हकारांतं पंचबीजप्रतिपाद्यं पंचमहाभूतात्मकं जगत् अत्रिरस्कं
त्रिरोभूतमलाज्ञानरहितं कर्तुमिव अस्यति वामायां तं जगादेति व्युत्पत्त्या स्मच्छब्दनिष्पन्नं अकारं त्रिरस्कं हकारांतमहं पदं अजस्रमु
च्चरं तं युष्मासिभ्यां मदिगिसप्तेर स्यतेर्वास्मिच्छब्द व्युत्पादनादित्यर्थः अथवा अशेषजगदाकारसंस्थितं निःप्रमाणकत्वेनानिर्मूलत्वाद्रु

अन्ये ऊचुः अत्रिरस्कं हकारांतमशेषाकारसंस्थितं अजस्रमुच्चरं तं स्वं तमात्मानमुपास्महे १३ अन्ये ऊचुः सं
त्यज्य तत् उहे शानंदे वमन्यं प्रयांति ये ते रत्नमभिवांछंति त्यक्त्वा हस्तस्थकौस्तुभाः १४

इति त्रिरोबात्यत्वाच्चात्रिरस्कं हकारां
तं मोहं परमार्थसंगचिदेकरसत्वादजस्रमुच्चरं तं उदस्य चरं तं मुधत्त्वमक्षयं तं वास्वं प्रत्यग्रूपमात्मानमुपास्महे इत्यर्थः संप्रहे तु त्रि
रस्कं हकारादिमिति पाठः तस्य च सुरनरतिर्यगाद्यशेषशरीराकारेषु संस्थितं सत्रिरस्कं हकारादिं हंस इति मंत्रं अजपागायत्रीरूपेणाष
ट्शताधिकैकविंशतिसहस्रसंख्यया अजस्रं प्रत्यहं श्वासोच्छ्वासच्छलेनोच्चरं तामित्यर्थः उदश्चरः सकर्मकादित्यात्मनेपदविषये त्वरुः शा
स्त्रादेशश्छांदसः अथवा पूर्वरूपेणापहराज्ज्ञायते अकारो यत्र तदशेषाकाकारं सोऽहमिति पदं तत्र संस्थितं अत एव अत्रिरस्कं त्रिरोभू
तप्रथमवर्णरहितं हकारांतं हकारमात्रावशेषं अहं पदं सेहं मंत्रमिति यावत् अजस्रमुच्चरं तामित्यादि प्राग्वत् १३ त्वदुहेशानं अंगुष्ठ
मात्रः पुरुषोंतरात्मा सदाजनानां हृदये सन्निविष्टः अंगुष्ठमात्रः पुरुषोज्योतिरिवाधूमकः ईशानो भूतभव्यस्य स एवाद्य स उश्वः इ

अन्येत्वाशोवैराग्यमेवमुख्यंसाधनमित्याहुः सर्वात्मनाइति एतत्हृदयस्थंज्ञानफलंब्रह्म अवाप्यते लभ्यते येनतल्लाभेनमूलमालावासना
आलजटिलहृदयग्रंथिः रसोप्यस्यपरंदृष्ट्वानिवर्तत इतिभगवद्वचनादितिभावः १५ पदार्थेषुभोग्यविषयेषुभावनांभोगतृष्णां १६ अ-
न्येइंद्रियनिग्रहएवमुख्यंसाधनमित्याशयेनाहुः उत्थितानिति हरिरिंद्रः तथाचब्रह्मवैवर्ते एकमेकंकालकूटमिंद्रियंनाम्नाहुःपुनःतदेवबा-
धितंसाक्षाद्विषमप्यमृतंयथेति १७ अन्येतुउपशमएवमुख्यंसाधनमित्यत्रतत्संवेत्तिदर्शमित्याशयेनोपसंहरंति उपशमेति उपशमःबा
ह्याभ्यंतरेंद्रियव्यापारेपरमस्तेनविक्षेपदुःखोपशमदशाविर्भूतंआत्मसुखंआहरेत्संपादयेत् तद्धिनविषयसुखवद्दोषहेतुः किंतुचित्तप्रसा

अन्येऊचुः सर्वात्मनः किलसंत्यज्यफलमेतदवाप्यते येनाशाविषवल्लीनांमूलमालाविलीयते १५ अन्येऊचुः बुध्वाप्यत्यंतवैरस्यं
पःपदार्थेषुदुर्मतिः बध्नातिभावनांभूयोनरोनासौसगर्दभः १६ अन्येऊचुः उत्थितानुत्थितानेतानिंद्रियाहीन्पुनःपुनः हन्याद्विवे
करंडेनवज्रेणेवहरिर्गिरीन् १७ अन्येऊचुः उपशमसुखमाहरेत्पवित्रंशमवशतःशममेतिसाधुचेतः प्रशमितमनसःस्वकेस्वरू
पेभवतिसुखेस्थितिरुत्तमाचिराय १८ इतिमोक्षोपायेषूपशमप्रकरणेसिद्धगीतासर्गः ८ श्रीवासिष्ठउवाच इतिसिद्धगणो
द्गीतागीताःश्रुत्वामहीपतिः विषादमाजगामाशुभीरुरण्यइवादिव १ जगामपरिवारंस्वमाकर्षत्स्वगृहंप्रति स्वनीरवत्क्षमानुग
तःसरित्पूरइवार्णवं २ परिवारमशेषेणविसृज्यस्वंस्वमालयं एकएवारुरोहाग्र्यंगृहकमद्रिवाचलं ३ श्रीरामायनमोनमस्तु

दहेतुत्वात्पवित्रं शमवशात्तोनिरिंधनाग्निवत्चेतःप्रशमंउपक्षयंप्रयाति एवंप्रशमितमनसःसुखेनिरतिशयानंदेस्वकैस्वीयेपरमार्थस्व
रूपेस्थितिर्भूमिकापरंपरारोहणक्रमेणउत्तमासप्तमभूमिकाप्रतिष्ठालक्षणाचिरायविदेहकैवल्यावधीभवतीत्यर्थः १८ इतिश्रीवा
सिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेअष्टमःसर्गः ८ इहश्रुतवतोराज्ञोनिर्वेदाद्गृहमीयुषः विमर्शोनर्थभूतानांमनोनिर्णयईयते भी
रुर्भयशीलः दुलोपेपूर्वस्यदीर्घोणः १ स्वंस्वीयंपरिवारं २ स्वंस्वंआलयंगृहंप्रतिविसृज्यगृहं गृहप्रासादं अचलमुदयाद्रिं ३ श्रीरामाय

प्रोद्डुयने आलोलाः खगानां पक्षतयः पक्षमूलानीव चंचलाः सोद्वेगभंगुरा इतियावत् लोकगतीः देहादिद्रव्यपदार्थास्थितीः इदं वक्ष्यमाणप्रकारं विललाप ५ लोकानां जीवानां लोलासु जन्मजरामरणादिना लोलासु दशासु पाषाणदृष्टांतो मौर्ख्यकठोरतायोतनार्थः ५ जीवधातोरकर्मकत्वेपि कालभावाध्वगंतव्याः कर्मसंज्ञास्त्वकर्मणामिति कात्यायनवचनाज्जीव्यत इति काले कर्मणि लः तास्मिन्तादृशेऽपि जीवने भावं आस्थां ६ आजीवितावधिराज्यं एतेन एतावन्मात्रेण संतुष्टः सन् हतधीर्मूर्ख इव दुःखं भावि दुःखप्रतीकारचिंतां विना किं तिष्ठामीत्यर्थः अथवा एतेन एतावन्मात्रेण हतधीर्विनष्टबुध्युपाधिजीवन्मुक्त इव विना दुःखानि दुःखं तिष्ठामि किं इति

तत्र प्रोद्डुयनालोलखगपक्षतिचंचलाः आलोकयल्लोकगतीर्विललापेदमाकुलः ४ हा कष्टमतिकष्टासु लोकलोलदशास्वयं पाषाणोष्विव पाषाण आलुठामि बलादहं ५ अपर्यंतस्य कालस्य कोऽप्यंशो जीव्यते मया तस्मिन्भावं निबध्नामि धिङ्मामधमचेतनं ६ कियन्मात्रमिदं नाम राज्यमाजीवितं मम किमेतेन विना दुःखं तिष्ठामि हतधीर्यथा ७ आनंदायं नेष्यनं तोहं मध्ये पेलवजीवितः बालश्चित्रेंदुनेवाहं किमु धाध्वतिमास्थितः ८ प्रपंचरहितेनाहमिंद्रजालेन जालिना हा कष्टमतिमुग्धाम्मि केनास्मि परिमोहितः ९ यद्दलु यच्च वा रम्यं यदुदारमकृत्रिमं किंचित्तदिहनास्त्येव किं निष्ठेहमतिर्मम १०

११ का क्कायोज्यं ७ ननु देह एवात्मा तस्य नाशे संहैवतेनसुर्वदुःखनिर्वृत्तिः किं नस्यात् नेत्याह आद्यविति कर्मकर्मवासनाबीजमंतरेण भोगवैचित्र्यप्रयोजकजन्मासिद्धेर्विधिनिषेधमोक्षशास्त्रप्रामाण्यानुरोधाच्चानादिरनंतश्चाहं न देहमात्र इत्यर्थः चित्रलेखितेनापि इंदुनेवं दुबुध्या गृहीतेन बालइव नात्मनैवात्मतया गृहीतेन न देहेनेत्यर्थः धृतिं आश्वासं ८ केन जालिना ऐंद्रजालिकेन परिमोहितोस्मि ९ वसतीति वलु सत्त्वं रम्यं सुखैकरूपं उदारं अपरिछिन्नं अकृत्रिमं ममजन्यं च तत्तादृशं किंचिदपि इह जगति नास्त्येव कस्मिन्निष्ठा विश्रांतिर्यस्या सा किंनिष्ठा भवलिति त्रोषः १० श्रीरामः॥

१४

ननु दूरदेशेगतादपूर्वं वस्तु प्रसिद्धं स्यात् तन्नेत्याह दूरस्थमिति दूरस्थत्वेन प्रसिद्धमपि यत्किंचिद्वस्तु अदूरस्थमेवा कुतः यद्यस्मान्मेममम
मासि वर्जतेन हि मनो देहाद्बहिर्दूरं व्रजति तथा सति दूरे एव वर्तेत तथगनुभूयेत न तु दूरे तद्येव हि सर्वे बोल्यवस्तु बोधमनुभवंति तन्न सादृ
श्यादि कल्पनाप्यंतर्भासमानानवास्तवीत्यनर्थ एवेति तद्भावनातान्यैव नोपादयेत्यर्थः ११ लोकानां जनानां भोगार्थं धनार्जनादि प्रवृत्ति
रूपः आर्जवं जीवभावः सलिलावर्तइव भंगुरः नश्वरफलः जन्ममरणादिदुःखहेतुश्च बकुत्रापि दृष्टः सुखं विषयसुखं प्रति १२ उक्तमेव प्र
पंचयति प्रत्यग्रमित्यादिना दुःखपिंडानि दुःखनिविडानि एवार्थे तु न्याय्यः १३ अत्र संसारे तिष्ठतीत्यत्रस्थं किंचित्कालं दृष्टं सद्य एव नष्टं त्वरा

दूरस्थमप्यदूरस्थं यन्मेमनसि वर्तते इति निश्चित्य बाह्यार्थभावनां संत्यजाम्यहं ११ लोकार्जवं जीवभावः सलिलावर्तभंगुरः दृष्टो ग्रा
पि हि दुःखाय केपसास्त्वासुखं प्रति १२ प्रत्यग्रं प्रतिभासं च प्रत्यहं च प्रतिक्षणं सुखानि दुःखपिंडानि दुःखानि तु पुनः पुनः १३ परामृष्टं
विशिष्टं हि दृष्टं नष्टं च भावितं अत्रस्थं न तदस्तीह सतां यत्रास्तु संस्थितिः १४ अद्य ये महतां मूर्ध्नि ते दिनैर्निपतंत्यधः हतचित्तमहत्तायां
कैषा विश्वस्तता तव १५ अहं जु रेवबद्धो हमयं कोसिकलंकितः पतितोस्म्युपरिस्थोपि हमात्मन्हतगास्थितिः १६ कस्मादकस्मान्मोहो
यमागतो धीमतोपि मे असितः पिंडितालोको भास्करा ग्रमिवांबुदः १७ कइमे के महाभोगाः कइमे मम बांधवाः बालो भत्तभयेनेव
संकल्पैतेनाहमाकुलः १८ स्वयमेव निबध्नामि जरामरणरागिणी किमिमामहमेतेषु धत्तिमुद्वेगकारिणीं १९ ज्यादिपदं तुच्छत्वान्न

भावितं न चिंतितमेव हि यतः विशिष्टं सर्वोत्कृष्टत्वेन प्रसिद्धमैंद्रप्रजापत्यादिपदमपि परामृष्टं विचारितं सतां विवेकिनां संस्थितिरास्तांतेकवि
श्रांतिर्यत्रास्तु तादृशं इह नास्त्येवेत्यर्थः १४ हतेत्याधिक्षेपार्थे चित्तविशेषणं महत्तायां राज्यादि वैभवोत्कर्षे हतचित्तमहत्तायामिति पाठे तु
हत चित्तं यथा स्यात्तथा अहंतायां राजाभिमाने इति योज्यं १५ आत्मन् इति संबोधनं आत्मनि स्वस्वभावे स्थितिर्हतेति सुह्लकिस धर्म्यं तं वा
योग्यं १६ असितः कृष्णः भास्करस्य अग्रं पुरोदेशं १७ संकेतेन ममतालक्षणसंबंधकल्पनेन १८ एतेषु भोगादिषु जरामरणयोः रागि

एतां भोगबांधवादिसंपदं प्रति कः ग्रहः आग्रहः २० ते चक्रवर्त्तिनां पृथुमरुत्तादीनां प्रसिद्धा महाविभवाः संतु सद्गुणाः सर्वामिति सामा
न्येन पुंसकं काध्वनिरास्था २१ ब्रह्मणः शक्तिना हिरण्यगर्भस्य जगंति भुवनानि कृप्रयातानि मम धनादि विति विशेषः २२ गिलितानि काले
ने ति विशेषः गलितानी निवापाः साधवः विवेकिनः २३ कोदिग्रहणं मानं तस्योपलक्षणं संसारस्यानादित्वात् धृतिरास्था २४ संसार एव रात्रि
स्तमोमयत्वात्तत्त्पदुःस्वप्नभूते देहमये देहप्रचुरे अहंममताव्यवहारभ्रमे अस्थितिं अभयदीं अविवेकितामिति यावत् २५ अयमिति देहसं

पातु तिष्ठतु वा सम्यक् ममैतां प्रति को ग्रहः बुद्बुदृष्टीरिवैषा हि मिथ्यैवेत्यमुपस्थिता २० ते महाविभवा भोगास्ते संतः स्निग्धबांधवाः सर्वं स्म
तिपथं प्राप्तं वर्त्तमानेपि काधृतिः २१ क्व धरानि महीपानां ब्रह्मणः क्व जगंति वा प्राक्तनानि निप्रयातानि केयं विश्वस्तता मम २२ गिलिता
नी दुर्लक्षाणि बुद्बुदानीव वारिणा मां जीवितनिबद्धास्थं विहसिष्यंति साधवः २३ ब्रह्मणां कोटयो याता गताः सर्गपरंपराः प्रयाताः पांसुव
द्भूपाः काधृतिर्मम जीविते २४ संसाररात्रिदुःस्वप्ने चैतद्देहमये भ्रमे आस्थां चेदनुबध्नामि तत्रेमां तु धिगास्थिति २५ अयं सोहमिति व्यर्थ
कल्पनासत्त्वरूपिणी अहंकारपिशाचेन किमस्तवदहं स्थितः २६ हतं हतमिदं कस्मात् आयुरागततयानया पद्मपत्रपिनपद्मगामि सूक्ष्म
याकाललेखया २७ पादपीठकृते ग्रानाशार्ङ्गि क्रीडनकंदुकः कालकापालिकाग्रस्ताः किमास्ते मयि वल्गसि २८ ॥ निहितेऽपरोक्षता

कल्पनासदिति तद्विप्रकृष्टे परोक्षता कल्पना अहमिति देहे आत्मना कल्पना सा त्रिविधापि असत्त्वरूपिण्येव अतः अहंकारपिशाचेन मोहि
त इति शेषः अहमत्त इव किं किमर्थं निर्विचार एतावंतं कालं स्थित इत्यर्थः २६ सूक्ष्मया क्षणलवमुहूर्तादिरूपया काललेखया इदमायुः हतं
हतं प्रतिक्षणं मुहुर्मुहुः छिन्नं पद्मपत्रपि कस्मान्न पश्यामि न वीक्षणामीत्यर्थः २७ पादपीठे पादपीठवद्रचितेषु भुवनेषु कृताः प्रतिमावद्रचि
ता निर्मिता वा ईशाना ईश्वराः ब्रह्मादयोपि येः शार्ङ्गिणः विष्ण्वादिदेहाः क्रीडनकंदुका इव मुहुर्मुहुरुद्धा दिव्यवहारेषु नभस्युत्क्षिप्ताः येः तथावि
धः महाकल्पलक्षणकालरूपाः ब्रह्मकपालपाणित्वात् कापालिकः तद्ग्रस्तेऽपि महाकालेन ग्रस्ता आस्ते हे जीवितात्ते मयि किं वल्गसि न्यसि २८

उपयांति आगच्छति अद्यास्मिन्नपि वयसि सर्वाणि वृथैवापगच्छंति अविनष्टं नित्यं एकं सत् निर्दोषमानंदैकरसं वस्तु लब्धं यस्मिंस्तथाविधो वास
रः अद्यापि अद्यतनकालावधिन दृष्टः २९ स्वप्रत्यगात्मभूतं यत्परमं पदं तस्य दृष्टयः साक्षात्काराः ३० रागलोभादिदूषितत्वादधम आम्नायो
मनो यस्य तं ३१ भावनाप्रीतिः भव्येषु रमणीयेषु वस्तुषु विषयेषु ३२ मध्ये मनोरमं वयः पर्यंते मनोरमो धर्मः आपाते मनोरमानौ विषयाः
ध्वनिं आस्थां तस्य मानवस्य अयं प्रसिद्धः नाड्योदयो दुःखप्रादुर्भावः ३४ अतस्य तु नरकालेपि विश्रांतिं प्रत्याङ्गनास्ती ताहृश्य स्वदृति राग

अजस्रमुपयांति ते ते यांति चाद्यापि वासराः अविनष्टैकसद्वस्तुर्दृष्टो नाद्यापि वासरः २९ सारसाः सरसी चेन्ने सर्वस्मिन्जनचेतसि
भोगा एव स्फुरंत्यंतर्न तु स्वपददृष्टयः ३० कष्टात्कष्टतरं प्राप्तो दुःखाद्दुःखतरं गतः अद्यापि नाविरक्तोस्मि हा धिङ्मामधमाशयं
३१ येषु येषु दृढा बद्धा भावना भव्यवस्तुषु तानि तानि विनष्टानि दृष्टानि किमिहोत्तमं ३२ यन्मध्ये यच्च पर्यंते यदापाते मनोरमं
सर्वमेवापवित्रं तद्धिना शामेध्यदूषितं ३३ येषु येषु पदार्थेषु धृतिं बध्नाति मानवः तेषु तेष्वेव तस्यायं दृष्टो नाशोदयोभरं ३४ श्वः
श्वः पापीयसीमेष श्वश्वः क्रूरतरामयि श्वश्वः खेदकरीमेति दशामिह जडो जनः ३५ अज्ञाने कहतो बाल्ये यौवने मदनाहतः शेषे
कलत्रचिंतार्त्तः किं करोति कदा जडः ३६ आगमापायिविरसं दशावैषम्यदूषितं असारं सारसंसारं किं तत्पश्यति दुर्मतिः ३७ राजस्
याश्वमेधाद्यैरिष्ट्वा यत्तत्पशातैरपि महाकल्पांतमप्यंत्रांस्स्वर्गं प्राप्नोति नाधिकं ३८ लोभाद्यभिवृद्धा पापीयसी हिंसादिप्रवृत्ता क्रूर
तरां तस्फलकाले खेदकरीं ३५ शेषे वयसि कलत्रं तदुपलक्षितं कुटुंबं तद्भरणादिचिंतया आर्तः विनार्थ इति पाठे कलत्रविनाशादिक्षये ना
र्तः कदा किं स्वोद्धारसाधनं करोति न कदाचिदपीत्यर्थः ३६ आगमापायि आद्यंतयोः संभोगकालेपि विरसं दारिद्र्यरोगवार्द्धकादिदशावै
षम्यैर्दूषितं आरंभेव सारं सारबुद्ध्या गृहीतं किं चित्तत्पश्यति पश्यति तत्किं निमित्तमिति वार्थः ३७ ननु यन्न दुःखेन संभिन्नमित्यादिश्रु
तिलक्षणः स्वर्गः सारभूतः किं तस्यात्तत्राह राजसूयेति महाकल्पांतं ब्रह्मादिभोगपमपि स्वर्गमिहाकालदशांशं क्षणभोग्यप्रायमल्पमेव

वा॰टी॰उप॰
१६

न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्तीति श्रुतेः स्वर्गिणामप्यसुरादिपीडाश्रुतेश्च न दुःखासंभिन्नत्वमपि तस्य संभवतीत्याशयेनाह का
साविति ३९ किं चेद्देहाभिमाने सत्याधिव्याध्योर्दुर्निवारत्वान्न कापि तस्य विश्रान्तिरस्तीत्याशयेनाह निजेति ४० भंगुरत्वदुःखग्रस्तत्वाभ्यां सर्व
स्यामंगलत्वामेव प्रपंचयति सत इत्यादिना सतः स्ववर्तमानकालवद्रूपस्य असत्ता नाशः ४१ आत्मनः प्रकृतिः स्वभावादि कर्मज्ञानं तन्मोहिताः
नीरं बध्नाति बिडितैतिपावत् ४२ हासायैव योगपाइ ति शेषः ४३ ननु राजत्वात्सर्वनियमनसमर्थस्योत्तमपुरुषस्य तव कुतो नाश्वासस्तत्राह

कोसौ स्वर्गोस्ति भ्रमो वा पाताले वा प्रदेशः कः नयत्राभिर्वृंतस्तेनादुर्भ्रमर्य इवापदः ३९ निजचेतोबिलग्राला शरीररङ्कलपद्धवाः आ
धयो व्याधयश्चैते निवार्यन्ते कथं किल ४० सतोसत्ता स्थितामूर्ध्नि मूर्ध्नि रम्येषु रम्यता सुखेषु मूर्ध्नि दुःखानि किमेकं संश्रयाम्यहं ४१ जा
यंते च म्रियंते च प्राकृताः क्षुद्रजंतवः धरावैरे वनीरंध्रा दुर्लभाः साधु साधवः ४२ नीलोत्पलालिनयनाः परमप्रेमभूषणाः हासायै
व विलासिन्यः क्षणभंगितया स्थिताः ४३ येषां निमेषणोन्मेषे जगतां प्रलयोदयौ तादृशाः पुरुषाः संति मादृशां गणनैव का ४४ संतिर
म्यतराश्चार्थाः सुस्थिरादपि सुस्थिराः चिंतापर्यवसानेयं पदार्थश्रीः किमीहसे ४५ संपदश्च विचित्रा याताश्चेच्चित्तेन संमताः तत्ता
अपि महारंभा हंत मन्ये महापदः ४६ आपदोपि विचित्रा याताश्चेन्मनसि संमताः तत्ता आपि महारंभा मन्ये मनसि संपदः ४७

येषामिति ४४ चिंता अर्जनरक्षणवियोगादिनार्त्तिस्तैव पर्यवसानं फलं यस्यास्तथाविधेयं पदार्थश्रीः अतस्त्वां किं ईहसे इच्छसि ४५ याः नानार
त्नगजवाजिधनदारादिभेदेन विचित्राः संपदः ताश्चेच्चित्तेन समंता बहुमताः स्युः न तर्हि ता अपि महारंभाः बहुप्रयत्नलभ्या दुःखरक्ष्या
अवरपापायिन्यश्चेति महापद इत्येनमन्ये इत्यर्थः ४६ एवं याः दारिद्र्य बंधुराज्यादिनाशलक्षणाः आपदोपि यदि साधुसंगतितीर्थतपः प्रबोधा
दिप्रापणेन विचित्राः श्रेय एवेति मनसि संमताश्चेत्ता अपि विवेकोवैराग्यादिमहारंभाः संपद एव मन्ये इत्यर्थः ४६

व

१६

तस्मादसत्येजगतिममताभिदृढैरेवविपन्नविवेकास्ततत्परिक्षयएवसंपदित्याशयेनजगतोममतानर्हत्वंदर्शयतिमनोमात्रेति अब्धौ
प्रतिबिंबितइंदुरिवभंगुरेभंगस्वभावेमिथ्याभूतेच अक्षरमालिकापदवाक्यात्मिकावर्णपंक्तिःकुतस्त्यानिरार्थिकेतियावत् ४८ का
कतालीययोगेनकाकागमनमिवतच्छिरसितालपतनमिवाविचारमात्रकृतेनस्वसंबंधेन धूर्तेनभोगलंपटेनमनसा ४९ देशकाल
वस्तुकृतयाइयत्तयाआच्छिन्नासुपरिच्छिन्नासुत्रिविधोतापग्रस्तत्वाभासुहरीपाग्निशिखापक्षेस्पष्टं ५० निरंतरदुःखभोगोऽभ्यासात्स
त्योपिस्यात्सुखभोगाविच्छिन्नाभ्यासोदुःखभोगोयंदुःसहएवेत्याशयेनाहवरमिति आलूनाविच्छिन्नाःसुखदुःखपरिवर्ताः यासुस्थितं

मनोमात्रविवर्तेस्मिन्जगत्यब्धौदुर्भंगुरे ममेदमित्यपूर्वेयंकुतस्त्याक्षरमालिका ४८ काकतालीययोगेनसंपन्नायांजगत्स्थि
तौ धूर्तेनकल्पितात्यर्थहेयोपादेयभावना ४९ इयत्ताच्छिन्नतस्मासुखेसुनाम्नीषुदृष्टिषु कस्त्वेतास्वनुरक्तोस्मिपतंगोग्निशि
खास्विव ५० वरमेकांतदाहेषुलुठनंरौरवाग्निषु नत्वालूनविवर्तासुस्थितंसंसारवृत्तिषु ५१ संसारएवदुःखानांसीमांतइतिक
थ्यते तन्मध्यपतितेदेहेसुखमासाद्यतेकथं ५२ अकृत्रिममहादुःखेसंसारेयेव्यवस्थिताः तएतेन्यानिदुःखानिजानंतेमधु
राण्यलं ५३ अहमप्यधमोत्कृष्टःकाष्ठलोष्ठसमास्थितिः अत्तैरेवागतःसाम्यंपरमाम्रपदवस्तुभिः ५४ सहस्रांकुरशाखा
त्मफलपल्लवशालिनः अस्यसंसारवृक्षस्यमनोमूलमहांकुरः ५५

एस्थितिःभावेक्तः ५१ विषयसुखानांसुसत्तानास्त्येवकिंतु
दुःखविशेषभस्तूपतेवेतियुक्त्योपपादयति संसारेतिवा ५२ कथंतर्हिसुखत्वानुभवस्तत्रयुक्तिमाहअकृत्रिमेति खड्गाघातानुभवः
सुखमितिवत् दुःखान्येवमधुराणिसुखानिजानंतेमन्यंतइत्यर्थः ५३ श्रुतिस्मृत्यादिप्रमाणकुशलोमेधावीविचारपुरुरप्यहंप
रमंअत्यंतमवेनमच्छाननविचारितानिशास्त्रलोकप्रमाणवस्तूनियैस्तैरस्तैर्मूर्खैःसाम्यमित्यर्थः ५४ इदानींतस्यप्रमाणकुशल
तांसंसारमूलावधारणेनसफलयतिसहस्रेति अंकुराःसंकल्पाःशाखादेहभुवनादयःआत्मश्रगशाखाद्यवयवीविराट् फलानिसुखदुःखे

वा॰टी॰ उप॰ मनसोपि रहस्यं त्वेनतातमेवेत्याह संकल्पैमेवेति ५६ मनोमर्कटस्य वृत्तिषु चापलेषु अयैव अद्यप्रभृति ५७ पातो अधोगतिः उत्पातः ऊर्ध्वगतिः अपकर्षोत्कर्षौ वा उपतापो दुःखं ५८ इति भयाय पुनः पुनः प्राक् शोचितं तद्गतमेव अहमिदानीं नानुरोदिमि न शोचामीत्यर्थः ५९ कुतो नानुशोचसि तत्राह प्रबुद्धोस्मीति आत्मनः स्वपारमार्थिकरूपस्य धनस्य चोरः अपहर्ता न केवलं चोरत्वादेव निहन्मि अपितु वैरित्वादपीत्याह मनोसीति ६० अविद्धमलक्ष्यीकृतं मुक्ताफलपक्षे गुणं शमदमादि मुक्तापक्षे सूत्रं ६१ चिरं अनादि ब्रह्म तत्वं तत्र प्रवृत्त

१७

संकल्पमेव तन्मन्ये संकल्पोपशमेन तु । शोषयामि यथा शोषमेति संसारपादपः ५६ आकारमात्ररम्यासु मनोमर्कटवृत्तिषु परित्यक्तास्विहाद्यैव न रमे नाशनीषु हं ५७ आशापाशशतैः प्रोताः पातोत्पातोपतापदाः संसारवृत्तयो भुक्ता इदानीं विश्रमाम्यहं ५८ हा हतोस्मि विनष्टोस्मि मृतोस्मीति पुनः पुनः शोचितं गतमेवाहमिदानीं नानुरोदिमि ५९ प्रबुद्धोस्मि प्रहृष्टोस्मि दृष्टश्चोरो मयात्मनः मनो नाम निहन्म्येनं मनसास्मि चिरं हतः ६० एतावन्तमिमं कालं मनो मुक्ताफलं मम अविद्धमासीदधुना विद्धं तु गुणमर्हति ६१ मनस्तुषारकणिका विवेकार्कातपेन मे चिरप्रवृत्तयेनैनमविरालयमेष्यति ६२ विविधैः साधुभिः सिद्धैरहं साधुप्रबोधितः आत्मानमनुगच्छामि परमानंदसाधनं ६३ आत्मानं मणिमेकं तेल बद्धैवालोकयन्सुखं तिष्ठाम्यचलमित्यन्यैरहं शारदीवाचलेंबुदः ६४ अयमहमिदमाततं ममेति स्फुरितमपास्य बलादसत्यमंतः रिपुमतिबलिनं मनो निहत्य प्रशममुपैमि निमोत्तु

येष्टार्थं तुषारकणिकापक्षे चिरं प्रवृत्तिः सदा गतिर्वायुस्तत्प्रासयेषदा आपत्कलुषं निवारणमेवापिपं तौ निश्रुतेरित्यर्थः ६२ विविधैरुपदेशैः सिद्धविशेषणं वानुगतिमात्रेण परमानंदस्य स्वस्यैव साधनं अभेदे पुपचारालंकरणता ६३ अतः परं आत्मनिष्ठां कदापि न त्यक्ष्यामीत्याह आत्मनमिति अचले हिमवदादौ ६४ इदानीमुक्तं संक्षिप्योपसंहरन् विवेकगुरुं नमस्यति अयमिति अयं देहोमिति इदं धनदारादि ममेति स्फुरितं आततं असत्यरूपं ज्ञानबलादपास्य समाध्यभ्यासेन अतिबलिनं मनोरिपुं निःशेषं हत्वा सततमहमिका विश्रांति

अ

इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेनवमःसर्गः ९ इत्यस्मिन्प्रार्थितेप्यत्रमाध्यान्हिकविधिक्रमेतस्मिंविचारेभूयोपिजन
कस्योपवर्ण्यते प्रतीहारोद्वारपालःउपसर्गस्यदात्रयमनुष्टुब्छंदमितिदीर्घः १ देवःस्तंभयोर्विश्रांतःसमस्तवसुधाभरोयस्य नृपनायाः
उचितंअनुरूपं २ तत्रसामग्रीसिद्धिमाहएताइत्यादिना ३ कमलिनीपात्रैःसपद्मविसरज्जुभिःरचिताःपरितश्चारुनिर्मिताःकनकचित्रा
शुकमंडपाःयासुतथाविधाःअतएवताःकर्बुरवर्णाःकमलिन्याःकमलवत्याःसरस्यास्तीरभुवइतिपरेणान्वयः ४ तथास्नानावसरेसे

मोक्षोपायेषूपशमप्रकरणेजनकविनर्कःसर्गः ९ श्रीवसिष्ठउवाच इतिचिंतयतस्तस्यपुरस्संप्रविवेश्याह प्रतीहारःपरोभानोः
संध्यनाग्रइवारुणः १ प्रतीहारउवाच देवदोस्तंभविश्रांतसमस्तवसुधाभर संपाद्यतोतिष्ठदिनव्यापारंनृपतोचितं २ एताःकु
सुमकर्पूरकुंकुमांबुपुराःस्त्रियः स्नानभूमौस्थिताःसज्जानघोमूर्तिपुताइव ३ एताःकमलकल्हारकाननभ्रांतषट्पदाः कृत्वा
कमलिनीपात्ररचिताशुकमंडपाः ४ एताःकमलिनीतीरभुवस्तत्रैःप्रपूरिताः सचामररथेभाश्वैःस्नानावसरसेविनां ५ समग्र
कुसुमनःपूर्णैरत्नौषधिपरिप्लुतैः सज्जीकृताःपटलकैर्देवार्चनगृहास्तथा ६ स्नातःपवित्रहस्तश्चपरिजप्याघमर्षणः त्वामेवप्रेक्ष
तेदेवदक्षिणार्हाद्विजव्रजः ७ लसच्चामरहस्ताभिःपाल्यंतेपरमेश्वर सज्जीकृतास्तेकांताभिःशीताभोजनभूमयः ८ उत्तिष्ठमुत्ति
ष्ठभद्रंतेनियतंकर्मसमाचर नकालमतिवर्त्तंतेमहांतःस्वेषुकर्मसु ९ प्रतीहारपतावित्थमुक्तवत्यथपार्थिवः तथैवचिंतयामा
सचित्रांसंसारसंस्थितिं १०

वंतेतद्वीलानांचामरैरथैरिभैरश्वैश्चसहितैस्तत्रै श्चपूरिताःअनेनहंससारसनक्रपद्मादिसहितसरसी
सांप्राप्तिस्तीरभुवोर्यज्ज्म्भते ५ समग्रैःसुमनोभिःपुष्पैरासमंतात्सेव्यपूर्णैःअन्नैःपक्वैःरोगौषधिभिर्यवांकुरादिभिश्चपरिप्लुतैःपटल
कैःप्रांतभागैःदेवतिसंबुद्धिःअर्चनागृहाःदेवब्राह्मणातिथिपूजागृहाःदेवार्चनगृहाइत्येकपद्यंवा ६ तवस्नानकालेपरितोजप्याःज
पितव्याअघमर्षणमंत्रायेन अतएवदक्षिणार्हः ७ लेपनचंदनोदकसेकादिपरिप्लुतत्वाच्छीताः ८ ९ १०

वा॰टी॰त्र॰ ११ शंबरपदेनशंबरीमायालक्ष्यते मिथ्याशंबरं मृगतृष्णाजलं तन्न दृश्यं वा १२ १३ हे चित्त चातुर्यं सुखलवास्वादचतुरतां त्यज
१८ १४ यासु दृश्यासु विषयाभिलाषतत्प्रयत्नतदुपभोगतदनुस्मरणादिरूपासु संभ्रमं सुखलवास्वादं भ्रांतिं तत्साहं वा १५ भोगा
शयाप्रवृत्तं सत् भोगशक्तिकुंभीभावाद्वोकशास्त्रादिभयाद्वानिवृत्तं सत् १६ ततः कृत्रिमसुखानामनर्थबीजत्वाद्येन हेतुनाकृ

कियन्मात्रमिदं नाम राज्यं सुखमिति स्थितं न प्रयोजनमेतेन मम मेह क्षणभंगिना ११ सर्वमेव परित्यज्य मिथ्याडंबरडंबरं ए
कांत एव तिष्ठामि संशांत इव वारिधिः १२ अलमेभिरसत्प्रायैर्मम भोगविजृंभितैः त्यक्त्वा सर्वाणि कर्माणि सुखं तिष्ठामि के
वलं १३ चित्तचातुर्यमेतस्माद्भोगाभ्यासकुसंभ्रमात् त्यज जन्मजराजालजंबालशांतये १४ दृश्यसुखासु पाशेष्वसं
भ्रमं चित्त पतयसि ताभ्य एवाभिराचितं परमं दुःखमेष्यसि १५ प्रवृत्तं सन्निवृत्तं सद्भूयो भूयश्चिरं चिरं भोगभूमिषु सर्वासु चित्त
त्वमिंगं गच्छसि १६ तस्मात्पापालमनयानुच्छया भोगचिंतया भव त्यक्तकृत्रिमात्मस्थैर्ये नाभियतनं ततः १७ इति संचिंत्य जनक
स्तूष्णीमेव बभूव ह शांतचापलचेतस्त्वाच्चित्रपिकर्मार्पितोपमः १८ प्रतीहारोपि नो वाचा गौरवेण भयेन च पुनर्वाक्यं महीपानां
चित्तेवृत्तिषु शोषितः १९ तूष्णीमथ क्षणं स्थित्वा जनके जनजीवितं पुनः संचिंतयामास मनसा शाममशालिना २० किमुपा
देयमस्तीह यत्नान्संसाधयाम्यहं कस्मिन्वस्तु निबध्नामि धृतिं नाशविवर्जिते २१ किं मे क्रियापरतया किं मे निःक्रिययापि वा न
तदस्ति विनाशेन वर्जितं यत्किलोदितं २२ क्रियावानक्रियो वास्तु कायोपमसदुत्थितः समास्थितस्य शुद्धस्य चितः कानाम मे क्षतिः २३ १८

त्रिमा प्रीतिर्भवति तं हेतुं यत्नलभस्वेति यावत् १७ १८ चित्तवृत्तिषु चित्तानुवर्तनेषु १९ जनजीवितं प्राणिजीवननिदानं
येन जातानि जीवंति तिष्ठंतः २० २१ अपि वा कार्यमिति शेषः यत्किल उदितं जन्म प्राप्तं तत् विनाशेन वर्जितं नास्ति जन्यभावस्य वि
नाशानियमादिति भावः २२ समास्थितस्य देहचलनाचलनक्रिययोरस्तकल्परूपास्थितेः चित्तः चिन्मात्रस्वभावस्य २३ यन्मम प्राप्यव्यापनी

यन्ममप्रारब्धोपनीतमास्तितदेवास्तुनान्यदित्यर्थः॥ अथवायन्ममनिरतिशयानंदरूपमांतरास्तितदेवास्तुनबाह्यंकिंचिदित्यर्थः २४ अ
कृतेनउपेक्षणेनकश्चनअनर्थइतिशेषः अक्रिययानुपेक्षयाप्राप्तंदुःखंअसन्मयंमायामयंमिथ्यैवेतियावत् २५ युक्ताःशास्त्रविहि
ताः अयुक्तालोकप्राप्ताः २६ पूर्वपूर्वव्यवहारक्रमप्राप्तां अस्पंदितांगस्तुअयंदेहःशुष्यतितत्किंसाधु आबद्धरूपकंनेत्यर्थः २७ कार्यैःप्रा
रब्धकर्मोपनीतोपुण्यपापानुदयलक्षणेफलेसमो २८ तत्कुतस्तत्राह कर्मजास्विति कृतमप्यकृतंभुक्तमप्यभुक्तमित्यपियोज्यं २९

नाभिवांछाम्यसंप्राप्तंसंप्राप्तंनत्यजाम्यहं स्वस्थआत्मनितिष्ठामियन्ममास्तितदस्तुमे २४ नममेहकृतेनार्थोनाकृतेनेहक
श्चन क्रिययाक्रिययावापियत्प्राप्तंतदसन्मयं २५ अकुर्वतःकुर्वतोवायुक्तायुक्ताःक्रियाममा नाभिवांछितमस्तीहयदुपादे
यतांगतं २६ तदुत्थायक्रमप्राप्तांकायोयंप्रकृतांक्रियां करोत्वस्पंदितांगस्तुकिमयंसाधुशुष्यति २७ स्थितेमनसिनिष्कामेसमेवि
गतरंजने कायावयवजोकार्यैःस्पंदोस्पंदोफलेसमो २८ कर्मजासुफलश्रीषुमनसाकर्तृभोक्तृते तास्मिन्प्रत्यूर्णंतिमायानेकृतमप्य
कृतंनृणां २९ योनिश्चयोंतःपुरुषस्यरूढःक्रियास्वसौतन्मयतामुपैति अनामयंमेपदमाहताधीरधीरतामंतरलंत्यजामि

३३२

३० मोक्षोपायेषूपशमप्रकरणेनिश्चयसर्गः १८ वसिष्ठउवाच इतिसंचिंत्यजनकोयथाप्राप्तांक्रियामसौ असक्तःकर्तुमुत्त
स्थौदिनंदिनपतिर्यथा १

२९ पुरुषस्यांतर्यएवनिश्चयःकर्ताभोक्तेतिवाअसौपुरुषःसर्वासुदेहादिक्रियासुतन्मयतांस्वनिश्चिता
र्थमयतामुपैतीतिवास्तवस्थितिःसोप्रवृत्तंतुममधीरनामयंकर्तृभोक्तृतारोगशून्यंआत्मपदंआहताअविद्वान्दृढनिश्चयासंपन्नेत्यर्थः
अंतःअंतश्चित्तेकृताकृतफलाबद्धरूपंमावायुपुनर्जन्मादिप्राप्तिशंकानिमित्तांइष्टानिष्टप्राप्तिविघातनिमित्तांचअधीरतांअलंअत्यंतमे
वत्यजामीत्यर्थः ३० इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेदशमःसर्गः १० कृताह्निकस्यराज्ञोत्रनिश्चयांतेवर्ण्यतेपुनः विवे
केर्बद्धाभिश्चित्तैःस्वचित्तस्यप्रबोधनं असक्तःकर्तृत्वभोक्तृत्वाभिमानलक्षणासंगरहितः १

वा॰टी॰ नप
१९

इमैदं मे इष्टमिदं मे ऽनिष्टमिति कल्पनानिमित्तभूताः वासनाः सुषुप्तवदिति स्थलस्य स्म देहाद्यभिमानाभावे जाग्रत्सुषुप्तयो विशेषाभा वादिति भावः २ आर्याणां पूज्या नां देवब्राह्मणादीनां आवर्जनं पूजादानादिना समाधानं अहः कार्यमाह्निकं ३ समरसं समाहितरूपत्वात् स्थैर्य वक्ष्यमाणरीत्या ४ शांतं निर्विक्षेपं सारभूतमात्मसुखं ५ ६ अनंतानाधिव्यमसंख्यव्यथाज्वालितां आपातसिप्राप्तोषितं ७ यतो जन्मसं सारस्यस्थयो विषयचिंताजालविकल्पोत्थाः इति पूर्वेणान्वयः ८ हे सुंदर विवेकिन् इमां संसारस्थितिं श्रमसुखं च तुल्यपतुलामारोप्य वु

इष्टानिष्टाः परित्यज्य चेतनावासनाः स्वयं यथाप्राप्तांच कारासौ जाग्रत्येव सुषुप्तवत् २ सपाद्यतदहः कार्यमार्यविर्जनपूर्वकं अ नयच्छर्वरीमेकं तयैव ध्यानलीलया ३ मनः समरसं कृत्वा संत्यक्तविषयभ्रमं शर्वर्यां क्षीयमाणायामित्थं चित्तमबोधयत् ४ चि त चंचलसंसार आत्मनो न सुखायते शममेहि शमाछांत सुखसारमवाप्यते ५ यथा यथा विकल्पौघान्संकल्पयसि हेलया तथा तथैति स्फारत्वं संसारस्तव चिंतया ६ शांतशाखत्वमायाति सेकेन विटपी यथा अनंताधित्वमायाति रागभोगेच्छया तथा ७ चि ताजालविलासोत्था जन्मसंसारस्थयः तस्मात्त्यक्त्वा विचित्रालं चिंतामुपशमं व्रज ८ संसारस्थितिं तरलामिमां तुलय सुंदर असां चेत्सारमाप्नोषि तदेतामेव संश्रय ९ आस्थां यस्मात्परित्यज्य दृश्यदर्शनलालसात् मैतद्ग्राह्यमामुंच स्वेच्छयाविहरेच्छया १० इ दं दृश्यमसत्सद्वाप्युदेत्यस्तमुपैतु वा साधो विषमतां गच्छ मे तदीयैर्गुणागुणैः ११ मनागपि न संबंधस्तव दृश्येन वस्तुना अविद्य मानरूपेणासंबंधः कोपमीदृशः १२ ७

ध्याकः सार इति परीक्ष्य तरलामिस्य नेननश्वरत्वाद्विक्षेपदुःखजटिलत्वाच्च नास्त्यत्र सार इति स्व
चितं ९ यस्मादियमसारा तस्मादस्यामास्थां परित्यज्य एतद सार दृश्यं दर्शनयोग्यमेतदिति दर्शनलालसात्प्रियं मा ग्रहाणं अप्रियं च दर्शना न्नहीमिति द्वेषान्मामुंच किंतु भयसाक्षित्वात्ममात्रेच्छया आत्मकामः सन् इच्छया स्वैरं विहर १० असत्प्रागविद्यमानं सुखदुःखसाधनं मुदेतुं सांप्रतं सत् विद्यमानं अस्तं नाशमुपैतु वा मातदागमापायप्रयुक्तहर्षविषादलक्षणां विषमतां गच्छेऽस्यर्थः ११ ननु सति तत्संबंधे कथं तत्प्रयु

[illegible] ९८

१९

हेमनः त्वमसत् एनत् दृश्यं च न सत् अप्यर्थे एवकारः अतः द्वयोरपि वंध्यापुत्रखपुष्पयोरिवासतोः तनोः निस्वरूपस्थितिकयोः संबंध इत्य
क्षरावलीउक्ति अपूर्वा आश्चर्यैवेत्यर्थः १३ यदि मन्यसे नाहमसत्सत्य आत्मैवाहं दृश्यमेवासदिति तथापि न संबंधघटनेत्याह असदि
ति मर्त्यजीवयोः सदात्मतज्जीवतोः १४ द्वयोरपि सत्वमेव नासत्वं कस्यचिदपीति कल्पेपि कदापीष्टयोगाभावान्न हर्षविषादप्रसक्तिरित्या
ह चित्तेति हे चित्त त्वं इति छेदः १५ महान्तमाधिं विषादं मूकं तूष्णीभूतं सत् आत्मस्वरूपास्थितौ तत्साहं आहर समाध्यभ्यासेन संपादय सं

असत्त्वमेतच्च न सद्द्वयोरेवासतोः सतोः संबंध इति चित्रेयामपूर्वैवाक्षरावली १३ असदेतन्नु सच्चेत्त्वं तथापि किल सुंदरं संगः सद
सतोः कीदृग्वदत्वं मर्त्यजीवयोः १४ चित्तत्वमथ दृश्यं च द्वे एव यदि सन्मये सदास्थितेन तत्प्रसरः कुतो हर्षविषादयोः १५ तस्मान्महाधिं
मुच त्वं मूकमुत्थाय समाहर संस्तुब्धां बुधिमाविश्यांसत्र जाभव्यामि मांस्थितिं १६ कंदुकालानवद्ध्यर्थमात्मनेव परिज्वलन् मामोह
मलमासाद्य मंदतां गच्छ सन्मते १७ नन्वदेहास्तिसमुन्नतमुत्तमं व्रजसि येन परां परिपूर्णतां तदवलंब्य बलाद्धीरतां जहिहि चंच ति
लतां शठरे मनः १८ मोक्षोपायेषु पञ्चामप्रकरणे चित्तानुशासनं सर्गः ११ ३५१ श्रीवसिष्ठ उवाच एवं विचारयंस्तत्र स्वराज्ये जन
कोन्तपः चकाराखिलकार्याणि न मुमोह च धीरधीः १ मनः प्रोल्लासास्पदे चिदानंदवृत्तिषु केवलं सुषुप्तसंस्थं सदैव व्यवतिष्ठतः २

क्षुब्धं संक्षोभो विक्षेपस्तल्लक्षणं अंबुधिं १६ कंदुकालातमुत्सवेषु जनकौतुकार्थमाग्नेयद्रव्यरचितं कंदुकाकारं अलातयंत्रं तद्वित्तत एव ज्वल
न्पुनःपुनरुच्छलति मोहं अलमिति मोहलक्षणं मलमिति वा इह दृश्यपवर्गमध्ययेन लब्धेन त्वं परिपूर्णतां व्रजसि न तादृशं किमपि नास्ति क
थं तर्हि पूर्णतालाभस्तमुपायमाह तदिति ततस्मादभ्यासं वैराग्यबलादनिमकंपं लंब्य तद्बलावलंब्यातिधीरतां प्राप्येति वा चंचलतां जहिहि
त्यज १८ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकादशः सर्गः ११ वर्ण्यते जनकस्यात्र जीवन्मुक्ततया स्थितिः विचारप्रज्ञयोश्चि
त्रं माहात्म्यमपि विस्तरात् न मुमोह अहं मम ताभ्यां पृथिवविदित्यर्थः १ आनंदवृत्तिषु हर्षस्थानेषु सुषुप्ताविव संस्थानिर्विक्षेपास्थितिर्यस्मिन्नि

वा॰टि॰उप
२०

तिष्यवस्थितिक्रियाविशेषणंभिमावर्तमानेतत्कालोपस्थितेनेदृरूपेवास्थितः अलंबुध्यास्थितः ३ अनारतविवेकेनसदाविचारवताः सनातनं
अनादिस्वभावप्रासंकलंकं अहंममानमालिन्यंराजसंरजोगुणेनधूलिभिश्चप्रसंजितं ४ अनंताभमपरिछिन्नब्रह्माकारं ५ विक्षेपमेघ
पटलेभ्य अनामृष्टविकल्पाअसंपादितरंजनाभेदाअंशवःप्रकाशायस्यविगताःदेहभेदनिरोधप्रयुक्ताआमयादुःखानियस्य ६ चिछक्ते
चिदात्मनिसमवास्थितानधस्तात् अतएवपरमार्थदृशाआत्मभूतान् ७ प्रकृतेर्मायायाःसर्वव्यवहाररूपत्वादसंगात्मासंस्पृष्टदिदृशं

ततःप्रभृत्यसौदृष्टपुंनाजहाराऽनवात्पजत् केवलंविगताशंकंवर्तमानेष्ववास्थितः ३ अनारतविवेकेनतेनसद्यःसनातनं पुनःक
लंकंनैवासमंबरेणेवराजसं ४ स्वविवेकानुसंधानादितितस्यमहीपतेः सम्यक्ज्ञानमनंताभमभूंद्विमलतायथो ५ अनामृष्ट
विकल्पांशुशुभ्रिरात्माविगतामयः उदयायतदाकाशेतस्यव्योम्नीवभास्करः ६ सदर्दर्शाखिलान्भावांश्चिछक्तौसमवास्थितान् आ
त्मभूताननंतात्मासर्वभूतात्मकोविदः ७ प्रहृष्टोनबभूवासौकचिन्नचसुदुःखितः प्रकृतेव्यवहारत्वात्सदैवसममानसः ८ जी
वन्मुक्तोबभूवासौततःप्रभृतिमानदः जनकोजरवत्ज्ञानीज्ञानलोकपरावरः ९ राज्यंकुर्वन्विदेहानांजनकोजनजीवितं नेवहृ
र्षविषादाभ्यांसोवशःपरितप्यते १० नास्तमेतिनचोदेतिगुणदोषविचेष्टितैः अर्थानर्थैःसराज्योत्थैर्नग्लायतिनहृष्यति ११ कुर्व
न्नपिकरोत्येषनकिंचिदपिकुत्रचित् सतिष्ठत्येवसततंसर्वदैवांतरेचितः १२ सुषुप्तावास्थितस्यैवजनकस्यमहीपतेः भावनाःसर्व
भावेभ्यःसर्वथैवास्तमागताः १३ भविष्यन्नानुसंधत्तेनातीतंचिंतयत्यसौ वर्तमाननिमेषंतुहसन्नेवानुवर्तयेत् १४ (नात्ममानसः ८ ज

२०

रवज्ञानीज्ञानहृद्धृइतियावत् ९ जनानांजीवितमिवप्रियइतियावत् १० मानसेगुणदोषविचेष्टितैरस्तंस्वरूपतिरोधानंउदयंपुनस्तद्वीविर्भा
वंचनेति बाह्यैश्वराज्योत्थैः अर्थानर्थैर्नहृष्यतिनग्लायतीतिव्युत्क्रमेणान्वयः ११ नकिंचिदपिकरोति अकर्त्रात्मभूतात्वादित्यर्थः तदेवासौहेति
ष्ठतीति १२ भावनाःरागादिवासनाः १३ वासनाक्षयफलमाहभविष्यमिति वासनावशात्पूर्वोत्तरानुसंधानंतेनप्राक्तनानिष्टकारिषुद्वेषआगा
मिप्रियार्थेरागःततःप्रवृत्तिरितिसर्वानर्थप्रसक्तिःवर्तमानमात्रंदर्शनंतुदुःखस्याप्युपेक्षयानाप्रियनानुसंधानामितिसहजानंदानुवृत्त्याह

आख्यानोपक्रमबीजं समाप्य तदनुपसंहरति स्वविचारेति अशेषेणानिरवशेषेण प्राप्तं ज्ञानमात्रेण विस्मृतकं चामीकर वस्त्रबध्दं तेन जनकेन
१५ तथा च फलपर्यंतं विचारः कार्यो नांतरा निर्वेदाद्युपद्रुत्साहता वादिति प्रविचारयेदित्यर्थः १६ गुर्वादीनां साधनानामसाधनत्ववादो विचार
प्राधान्यबोधनार्थः अपत्राणो वा अन्यगो अश्वेभ्यः पत्रावेष्णोऽश्वाग्रतिवत् १७ सुंदर्या सच्छास्त्रविवेकादिपरिष्कृतया ऊहापोहकुशलामतिः
प्रज्ञा तया वयस्यया सख्या १८ जाड्यमज्ञानं तल्लक्षणमांध्यं तमः १९ नाप्नोति विपन्नदीप्यः प्रज्ञयानावा तीर्यते जनैरिति प्रसिद्धं २० पेलवाम् दु
ला अनिला अनिलस्य कल्लोलेत्राः उत्पन्नं तृणं विज्ञेयं २१ असहायः गुर्वादिसहायशून्यः विद्याशास्त्रश्रवणशून्योपि द्वयमपि प्रज्ञा साथमेवानु

स्वविचारवशेनैव तेन तामरसेक्षण प्राप्तं प्राप्यमशेषेण रामनेतरयेच्छया १५ तावत्तावत्त्वकेनैव चेतसा प्रविचार्यते यावद्यावद्विचा ७
रणां सीमांतः समवाप्यते १६ नतं गुरोर्न शास्त्रार्थान्निपुण्यात्प्राप्यते परं यत्साधुसंगाभ्युदिताद्विचारविशदाद्धृदः १७ सुंदर्या नि ७
नया बुद्ध्या प्रज्ञयैव वयस्यया परमापद्यते राम न नाम क्रियया न्यया १८ यस्योज्वलति तीक्ष्णाग्रा पूर्वापरविचारिणी प्रज्ञादीपशिखा जा
तु जाड्यांध्यं तेन बाध्यते १९ दुरुत्तरा या विपदो दुःखकल्लोलसंकुलाः तीर्यते प्रज्ञया ताभ्यो नावापद्भ्यो महामते २० प्रज्ञाविरहितं मूढमा
पदल्पापि बाधते पेलवाचानिलकलासारहीनमिवोलपं २१ प्रज्ञावानसहायोपि विज्ञास्त्रोप्यरिमर्दन उत्तरत्येव संसारसागराद्राम
पेलवात् २२ प्रज्ञावानसहायोपि कार्यान्तमधिगच्छति दुःप्रज्ञः कार्यमासाद्य प्रधानमपि नश्यति २३ शास्त्रसज्जनसंसर्गैः प्रज्ञां पूर्वं विवर्द्धये
त् सेकसंरक्षणारंभैः फलप्राप्तौ लतामिव २४

क्तिः आचार्यादिवैयर्थ्यविधिता साधिष्ठं प्रापयेदित्यादिश्रुतिविरोधात् हेयामपेलवात् ज्ञानमा
त्रबाध्यत्वेनातिकोमलत्वात् २२ लोकेपि प्रज्ञावतो मंत्र्यादेर्बलांतरवत्त्वात्प्राबल्यं प्रसिद्धमित्याह प्रज्ञावानिति प्रधानं बहुतरसेनादिबल
मुख्योपि सन्नरपति अथवा प्रज्ञाचरमसाक्षात्कारवृत्तिस्तद्धानात्मा सर्वेषां कार्यप्रपंचानामंतं बाधं सर्वश्रमवत्प्रकर्तव्यपुरुषार्थानामं
तमवधिं पुरुषार्थं च अधिगच्छति दुःप्रज्ञो मोहकः सर्वप्रपंचं संतानलक्षणं कार्यजातमासाद्य तन्मूलत्वात्प्रधानं स्वरूपितानमात्रेण न पश्य
तीत्यर्थः ज्ञानपक्षे भेदेन वा योज्यं २३ प्रज्ञा तातर्हि केनोपायेन लभ्यात त्राह शास्त्रेति २४

वा॰टी॰ जुप॰ ५

२९

प्रज्ञाबलमेव बृहत् तन्मूलं यस्य तथाविधः सत्कार्यं सत्कर्म प्राक्तनभाग्यं तल्लक्षणः पादपः भासः सूर्यप्रकाशः स यथा शुक्लपक्षे क्रमेण चंद्रमंडलं प्रविष्टः पूर्णमिति नमयचंद्रबिंबं फलितं तद्वत् अथवा ऐंदवं बिंबं कर्तृ तद्यथा जगत्तिमिरापहः भासः चांद्रिकाः फलंति तद्वत् तन्मूलाज्ञाननिबर्हणाक्षमं आत्मज्ञानं फलतीत्यर्थः २५ यः यादृशः यत्नः उद्योगः सतां हृदयः न तथा च नाधिकः श्रमोस्तीत्यर्थः २६ सर्वेषां दुःखानां दर्शनानां सीमांतं परमावधिं २७ एवंप्रज्ञाकोशस्यापि सर्वसंपदवधित्वमिति दर्शयति स्वर्गादिति यत्सम वाप्यते सुखमिति निःशेषः स्वर्लोकादपि रम्यापि पाता

प्रज्ञाबलबृहन्मूलः काले सत्कार्यपादपः फलं फलत्यतिस्वादु भासो बिंबमिवैंदवं २५ य एव यत्नः क्रियते बाह्यार्थोपार्जने जनैः स एव यत्नः कर्तव्यः पूर्वं प्रज्ञाविवर्द्धने २६ सीमांतं सर्वदुःखानामापदां कोशमुत्तमं बीजं संसारवृक्षाणां प्रज्ञामांद्यं विनाशयेत् २७ स्वर्गाद्यद्युच्च पातालाद्राज्याद्यत्समवाप्यते तत्समाप्यते सर्वं प्रज्ञाकोशान्महात्मना २८ प्रज्ञयोत्तीर्यते भीमात्तस्मात्संसारसागरात् न दानैर्न च वा तीर्थैस्तिः पसा न च राघव २९ यत्प्राप्ताः संपदं दैवीमपि भूमिचरा नराः प्रज्ञापुण्यलतायास्तत्फलं स्वादु समुत्थितं ३० प्रज्ञया नखरालूनमत्तवारणयूथपाः जंबूकैर्विजिताः सिंहाः सिंहैर्हरिणिका इव ३१ सामान्यैरपि भूपत्वं प्राप्तं प्रज्ञावशान्नरैः स्वर्गापवर्गयोग्यत्वं प्राज्ञस्यैवेह दृश्यते ३२ प्रज्ञया वादिनः सर्वं स्वविकल्पविलासिनः जयंति सुभटप्रख्यान्नरानप्यतिभीरवः ३३ चिंतामणिरियं प्रज्ञा हृत्कोशस्था विवेकिनः फलं कल्पलतेवैषा चिंतितं संप्रयच्छति ३४ भव्यस्तरति संसारं प्रज्ञया पोह्यते धमः शिक्षितः पारमाप्नोति नावा नाप्नोत्यशिक्षितः ३५

लानिति नारदः जगाद द्युसदां मध्ये पातालेभ्यः समागत इति पौराणिकवचनात्पातालेपि सुखातिशयः प्रसिद्धः २८ अंत्यंतिकदुःखक्षयोपि प्रज्ञैकफलमित्याह प्रज्ञये ति दानतपःप्रभृतीनामल्पपापक्षयफलत्वादिति भावः २९ यत्प्राप्य स्वर्गादि दानादिकर्मणां फलं तदपि प्रज्ञाफलमेवेत्याह यदिति भूमिचरा अपि नराः दैवीं नभश्चरत्वादिलक्षणां संपदं प्राप्ता इति यत्तदपीत्यर्थः ३० ३१ ३२ सुभटः प्रख्यान् वादशूरानिति यावत् ३३ ३४ शिक्षितः नौकानयने शिक्षावान् कैवर्तः ३५ श्रीरामायनमोनमस्ते ७ श्रीः

२९

धीरेवसम्यग्विवेकवैसरागादिसन्मार्गयोजिताचेतारंनयतिअसम्यकरागद्वेषलोभोद्यसन्मार्गयोजितातुआपदंनयतिप्रापयतीत्यर्थः ३६ आशुगतस्मात्तत्पक्षीयागणाःलोभमोहक्रोधचिंतादयस्तेभ्यउत्थितादोषाःद्वेषचिंताविषादादयःसंनद्धंवर्मनद्धं ३७ सम्यक्गुणदोषतत्वविवेकेनदृश्यते सम्यकदर्शनंयस्यतंसम्यग्दर्शनंपुरुषं ३८ परमपरमात्मातल्लक्षणस्यार्कस्यपिधानंतिरोधायकः लङ्कयोरभेदादंबुदपक्षेजलात्माविततोविस्तीर्णःअसितोऽखच्छोनीलश्च ३९ लालनीबालइववक्रमाह्विवेकविरक्षणेनशोधनीया फलंकृषिफलधाम्ना

धीरस्सम्यग्योजितापारमसम्यग्योजितापदं नयरंनयतिसंसारेभ्रमंतीनोरिवार्णवे ३६ विवेकिनमसंमूढंप्राप्तमाशुगणोत्थिताः दोषानपरिबाधंतेसन्नद्धमिवसायकाः ३७ प्रत्यक्षजगतस्सर्वसम्यग्येवागदृश्यते सम्यग्दर्शनमायांतिनापदोनचसंपदः ३८ पिधानंपरमार्कस्यजडात्माविततोसितः अहंकारांबुदोमत्तःप्रज्ञावातेनबाध्यते ३९ परमतुलमुपेतुमिच्छतोचैःप्रथममियंमतिरेवलालनीया फलमभिलषताकृषीवलेनप्रथमतरंननुकृष्यतेधरैव ४० मोक्षोपायेषूपशमप्रकरणेप्रज्ञामाहात्म्यंनामसर्गः ९९ श्रीवसिष्ठउवाच एवंजनकवद्रामविचार्यात्मानमात्मना पदंविदितवेद्यानामविघ्नेनाधिगच्छति १ येहिपोक्तात्मजन्मानःप्राज्ञाराजससात्विकाः प्राप्नुवंतिस्वयंप्राप्यंतेजनाजनकइव २ तावत्तावद्विजितारीनिंद्रियारव्यान्पुनःपुनः यावदात्मात्मनेवात्मन्येवप्रसीदति ३ प्रसन्नेसर्वगेदेवेदेवेशेपरमात्मनि स्वयमालोकितेसर्वाःक्षीयंतेदुःखदृष्टयः ४ मुष्टयोमाहबीजाभिर्वृद्धिनंविंतिप्रसिद्धेः ४० इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेद्वादशःसर्गः १२ जनकस्यविचारंसंदृष्टांतीकृत्यविस्तरात् चित्तस्यप्रशमोपायाःकीर्त्यंतेइहयुक्तिभिः अविघ्नेनअसंभावनादिप्रतिबंधकनिरासेन १ राजसापुरुषप्रयत्नसंभवात्तत्वेनचचित्तप्रसादोपचयाद्राजससात्विकाएवरवविवेकेनाकाशफलपातवत्तौनप्राप्तावप्यधिकारिणइतिभावः २ नकथंप्राप्नुवंतिनइहतमवत्तावदिति सत्वोपचयात्यावदात्मनिप्रसीदतितावत्तावदजसोविष्टंभशक्त्याद्रिद्रियारीन्पुनःपुनर्विजितेत्यर्थः ३ अध्यात्माधिकारात्सर्वेषांदेवानामिंद्रियाणामीशेचदेशेनिदेवेपरमात्मनिस्वयमालोकितेसति ४

वा॰टी॰उप॰
२२

मोहबीजानांदुर्वासनानांमुष्टयः मुष्टिवदंतर्दृढंसंग्राहकाः चित्तक्षेत्रेउप्यमानाश्चविविधानामाध्यात्मिकादिभिन्नानामापदांदुःखानांवृष्टयः दृष्टिवद्दकस्मात्सर्वतःप्रसारयित्र्यः कुदृष्टयः अहंममनादिप्रत्ययलक्षणाः हृदयग्रंथयः पराः मानुषानंदादिहैरण्यगर्भानंदांताःसुखोत्कर्षाः अवराः न्यूनायस्मात्तथाचश्रुतिः भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेपरावरेइति ५ प्रत्ययाविवेकबुध्याआत्मानंस्वंसर्वारंभवत्सर्वजगदुत्पत्त्याद्यवधिंप्राप्तंब्रह्मतदात्मनाआलक्ष्यसाक्षात्कृत्यानुभूयपरमपुरुषार्थलक्ष्मीवानुत्तमःसर्वोत्कृ

मुष्टयोमाहबीजानांवृष्टयोविविधापदां कुदृष्टयः क्षयंयांतिदृष्टेतस्मिन्परावरे ५ सदाजनकवद्रामसर्वारंभवदात्मना प्रत्ययात्मानमालक्ष्यलक्ष्मीवानुत्तमोभव ६ नित्यमंतर्विचारस्यप्रयत्नश्चंचलंजगत् जनकस्येवकालेनस्वयमात्माप्रसीदति ७ नदेवंनचकर्माणिनधनानिनबांधवाः शरणंभवभीतानांस्वप्रयत्नादृतेनृणां ८ येदैवनिष्ठाःकृत्सादौकुविकल्पपरायणाः तेषांमेदामतिस्तातनानुगम्याविनाशिनी ९ विवेकंपरमाश्रित्यविलोक्यात्मानमात्मना धियाविरागोद्धुरयासंसारजलधिंतरेत् १० एषासाकाप्यनारामनभःफलनिपातवत् सुखदाज्ञानसंप्राप्तिरज्ञाननरुद्रागतनी ११ जनकस्येवसद्बुद्धेःस्वयमेवविलोकिनः विकासमेत्ययंदेहीदेवःप्रातरिवांबुजं १२ संसारमननंचित्रंविचारेणविलीयते गलद्धस्मीकृतस्पर्शमातपेनहिमंयथा १३ अयमेवाहमित्यस्मिन्निश्चयेउदितेक्षये स्वयंसर्वगतःस्फारःस्वालोकःसंप्रवर्त्तते १४ अयमेवाहमित्यस्मिन्संकोचेविलयंगते अनंतभुवनव्यापीविस्तारउपजायते १५ पुष्टोभवेत्यर्थः ६ इदानीमात्मप्रसादोपाये

विचारएवमुख्यइत्याहनित्यमिति चंचलंअनित्यंभ्रमणस्वभावंच ७ विचारस्यापिमूलंपुरुषप्रयत्नएवेत्याशयेनाहनेति ८ ननुदैववशात्स्वयमेवकालेनज्ञानंभविष्यतिकिमस्मत्प्रयत्नेनेतियेमन्यंतेतान्निंदतियेइति कृत्स्नआदिपदाद्विवेकवैराग्यविचारादयस्तेषुदैवेप्रतिकूलेकिंस्वप्रयत्नसहस्रेणसेत्स्यतिबहूनांयातमानानांदैवोपहतानांकाममन्युभिर्भ्रंशादर्शनादित्यादिकुविकल्पपरायणाः ९ १० एषाजनकाख्यायिकोदाहरणप्रपंचिता ११ देहीदेहांतर्हृदिस्थितोदेवःपरमात्मा १२ संसारस्यमननंकल्पनंचिंतनंचवशीकृतस्पर्शमपहत्यत्रोत्सं

ति
२२

१६ नूनं निश्चयेन अवरूपमिति यावत् स्वालोकात्माभास्करः सूर्यः संप्रोदेतां प्रातरीवस्फुरत्प्रकाशात्मा १७ अतितमः तमसो मुखं बमिति यावत् १८ अहमहंतानास्ति असन्छब्दार्थस्याप्यहंकारस्याप्रसक्तविवक्षणान्नतमिधानायोत्तमपुरुषः कृतः अहमर्थस्यतदसत्त्वस्य चनिषेधेऽन्यत्वाप्रसक्तिमात्रं स्वोक्तं नचनास्तीति नुभयसाक्षिणः सत्वादितिभावः उपादेयेषु नुपादानार्हेषु विषयेषु १९ उपादेयेषुरा गोहेयेषु द्वेषश्चमानसः पुरुषस्य बंधो नाम इत्याह नुपादेयेति २० हेयादेयदृशोरागद्वेषात्मक दृष्ट्योस्त्रोषमत्तत्वे प्रीतत्वछलरेकेनिश्चस

जनके न परित्यक्ता यथाहंकारवासिना तथात्वमपि सद्बुद्धे विचार्यांतः परित्यज १६ अहंकारांबुदे क्षीणे चिद्व्योम्नि विमले तते नूनं संप्रोदेत्यात्मा स्वालोको भास्करः परः १७ एतावदेवातितमो यदहंभावभावनं तस्मिंश्चश्रममानीते प्रकाशात्रोपजायते १८ ना हमस्ति नचान्योस्तिनचनास्तीति भावितं मनः प्रत्यगतिमायातं नोपादेयेषु मज्जति १९ नुपादेयानुपतनं हेयैकांतविवर्जनं य देतन्मनसो रामतद्बंधं विद्धिनेतरत् २० मा खेदं भजहेयेषुमोपादेयपरो भव हेयादेयदृशौ त्यक्त्वा शेषस्थः स्वस्थतां व्रज २१ येषा मिदमुपादेयमिदं हेयमिति स्थितिः विलीनाते न वांछंति न सज्जंतीह किंचन २२ हेयोपादेयकलने क्षीणे यावन्नचेतसः नताव त्समताभाति साभ्रेव्योम्नीवचंद्रिका २३ अवस्थितमिदं वस्तुपस्येति लुलितं मनः तस्मिन्नोदेतिसमताशाखोटइवमंजरी २४ यु क्तायुक्तेषणापत्रलाभालाभविलासिनी समतास्वछतातत्रकुतोवैराग्यभासिनी २५

नस्वछतां विक्षेपकालुष्यमत्यंतां २१ इतिस्थितिरेवंरूपा व्यवस्था येषां सर्वत्र हेयानुपादेवात्ममात्रतया दृष्टत्वान्निष्क्रिया विलीनास्ते पुरुषाः २२ सम ता अविषमब्रह्मात्मना २३ अवस्त्र अप्रशस्तं वस्तु अतो हेयं वस्तु प्रशस्तं वस्तु अतः उपादेयमिति यस्य मनः अंतर्लुलितं लोलतांग तमित्यर्थः शाखोटो रोहसविशेषः सतु पुष्पफलपल्लवोनुपजीव्यच्छायः प्रसिद्धः २४ युक्तमनुकूलं अतदरं मेभूयादिति एषणा लाभवि लासिनी अयुक्तं प्रतिकूलमिदं अतो मे कदापि मा भूदिति स्य राग विलासिनी एषणा इच्छा द्वेषश्च यत्र यस्मिन्पुरुषे २५ श्रीरामायनमः ११

वा·टि·उप·
३३

तत्रसमतास्वछतयोः संभावने को विरोधस्तमाह एकस्मिन्निति नानाः नानातयाभेदाभेदविकल्पनपायघुसंगाद्वितीयानंदाअभिन्नास्त
हि आत्मत्वादेवसर्वेप्यनुकूलाएव यदि भिन्नास्तथाप्यात्मस्पर्शान्नानुकूलानवाप्रतिकूलाइतिनतदापितयोरेवकाशइतिभावः २६
तस्यचित्तपादपस्यसौम्यता निष्कंपता २७ इदानींजीवन्मुक्तलक्षणभूतान्संचदशगुणानाह निराशतेति द्वाभ्यांनिरीहतामनस्थाप
लाभावः निःक्रियताशरीरकर्त्तृत्वाभिनिवेशाभावः सौम्यता सदाप्रसन्नता २८ मैत्रीसर्वभूतसुहृत्त्वंमतिर्मननशीलता यदि गुण
स्त्रिष्ठंति तर्हि तद्वासनयेवतस्य बंधः स्यादित्याशंक्याह अपवासनमिति वासनाबीजस्याज्ञानस्य नष्टत्वादिति भावः २९ इदानींरामस्यत

एकस्मिन्ब्रह्मतत्वास्मिन्विद्यमाने निरामये नानाः नानातयानित्यंकिमयुक्तं क्वयुक्तता २६ ईप्सितानीप्सिताशंकेमर्कटोचित्तपा
दपे चंचले स्फुरतो यस्मिन् कुतस्तस्येह सौम्यता २७ निराशतानिर्भयतानित्यतासमताज्ञता निरीहतानिःक्रियतासौम्यतानि
र्विकल्पता २८ धृतिर्मैत्रीमतिस्तुष्टिर्मृदुतामृदुभाषिता हेयोपादेयनिर्मुक्ते ज्ञे तिष्ठंत्यपवासनं २९ धावमानमधोभागेचित्तंप्रत्या
हरेद्बलात् प्रत्याहारेणपतितमधोवारीवसेतुना ३० बाह्योनर्थानिमांस्त्यक्त्वा तिष्ठनाछन्नवपन्नश्वसन् सर्वथासर्वदासर्वान्नांत
रांश्चविचारय ३१ गृहीतत्स्माशाफरिवासनाजालमाविलं संसारवारिप्रसृतंचिंतातंतुभिराततं ३२ अनयातीक्ष्णयाताततं छिंधि
बुद्धिशलाकया वात्ययेवांबुदंकाले वहंस्तावितते पदे ३३ अस्यसंसारवृक्षस्यमूलंदोषांकुरास्पदं भ
त्रुणार्जनेनउपायमाह धाव
मानमित्यादिना अधोभागेनिकृष्टेषु प्रत्याहारेणविषयेभ्यः सर्वबाह्येंद्रियाणांपरावर्त्तनेनअधःपतितंप्रवाहोन्मुखंवारिसेतुनेव ३० बा
ह्येषुषयेषुआत्मताभ्रांत्याप्रसक्तेस्यागएवोपायःआंतरेषुतुत्रप्रसक्तेःसर्वदासर्वप्रकारेणतत्त्वरत्नवत्परीक्षाचद्विचारःकार्यइत्याहबाह्यानि
तितथाचाकुर्वद्भिःगच्छतस्तिष्ठतोवापिजाग्रतःस्वपतोपिवा नविचारपरंचेतोयस्यासौमृतउच्यतइति ३१ अनयामदुपदिष्टयोबुद्धि
लक्षणयाशलाकयाकर्त्तयविासनालक्षणं जालं आनाय्यंछिंधीतिपरेणान्वयःगृहीताःतत्स्माःशफर्योयेन मोहत्वैवालेनविलंमलिनं

३३

विततेविस्तीर्णतरेपदेअकान्तेब्रह्मणिचवहंत्वेतिवात्माशलाकयोर्विशेषणं ३३ हेभव्यधीरेणचिराभ्यासदृढीकृतेनैकात्मस्थैर्यलक्षणे
नचित्तधैर्येणसंपन्नयाअतएवोद्धुरयाअनादिकालनिमग्नात्मोद्धारसमर्थयाअपरोक्षसाक्षात्कारधियासंसारवृक्षस्यमूलंसवासनम
तानंछिंधीत्यर्थः ३४ ननुसतिविक्षेपहेतौकथंमूलच्छेदस्तत्राहमनसैवेति यथाअग्निविष्टलोहेनपादपावयवकाष्ठात्मनाकुठारेणपा
दपश्छिद्यतेतद्वदग्निभिर्वासितवृत्तीद्धब्रह्मचैतन्येनमनश्छिन्नेत्यर्थः ३५ ननुपूर्वसिद्धमनसत्वकोपायेनछेदनेपिभाविमनोवर्त्तमानब्र
ह्माकारमनोवृत्तेर्वाकिथंछेदनंतत्राहविस्मृत्येतिविस्मृतिर्वासनोच्छेदलयाचरममुत्तरकालप्रसक्तंवृत्तिरूपंअसत्यं वासनाया

अनयातीक्ष्णयातातछिंधिबुद्धिशलाकया वात्यये वांबुदंकालेवहत्वंविततेपदं ३३ अस्यसंसारवृक्षस्यमूलंदोषांकुरास्य
दं भव्यधीरेणधैर्येणप्रोद्धरोद्धुरयाधिया ३४ मनसैवमनश्छित्वाकुठारेणेवपादपं पदंपावनमासाद्यसद्यएवस्थिरोभव ३५
मनसैवमनश्छित्वाविस्मृत्याचेरमंमनः वर्त्तमानमपिछित्वाछिन्नसंसारतांव्रज ३६ मोहोविस्मृतसंसारोनभूयःपरिरोहति चित्तं
विस्मृतसंसारोनभूयःपरिरोहति ३७ तिष्ठन्गच्छन्स्वपञ्जाग्रन्निवसन्नुत्पतन्पतन् असदेवेदमित्यंतनिश्चित्यास्थांपरित्यज ३८
समतामलमाश्रित्यसंप्राप्तंकार्यमाहरन् अचिंतयंस्तथाप्राप्तंविहरेहहिराघव ३९

ग्रेपिवृत्त्यनुदयात् वर्त्तमानंकनकरेणुन्यायेनस्वेनैववृक्षस्यनिरासाच्छित्वा ३६ नन्वेवमपितत्वाविद्रोजीवनस्सिद्ध्येतदुपादानभूताविद्या
रव्योमोहोवश्यमभ्युपगंतव्यःसएवपुनःसंसारंप्ररोहयिष्यतीत्याशंक्याहमोहइति परिरोहतिप्ररोहतिवासनाक्षयलक्षणेविस्मरणेसति
तस्यबीजेश्वरात्यभावादितिभावः तर्हिसंसारस्तस्मिन्मोहक्षेत्रेस्वयमेवप्ररोहतांतत्राहचित्तमिति चित्तसंस्कारोच्छेदलक्षणेचित्तविस्मरणे
सतिनचेत्तस्यप्ररोहःसंभवतिचित्तसंस्कारस्याप्यविद्यारोपेबीजत्वादितिभावः ३७ चित्तत्वेत्योर्विस्मरणेनतदास्थात्यागएवोपायइत्याह
तिष्ठन्निति ३८ आस्थापरित्यागोसमतापिसिद्ध्यतीत्याशयेनाह समतामितितथाअप्राप्तमितिच्छेदः ३९

यथाश्वत्थो महेश्वरः क्षित्याद्यष्टमूर्तिलक्षणानि लिंगानि शुद्धचिन्मात्ररूपान बिभर्ति जगदाकारविवर्तमानमायाधिष्ठानत्वात्सन्निधिमात्रेण बिभर्ति चेतनेन सर्वकर्ता च भवति एवं त्वमपि राज्यादिकार्याण्युपस्थितानि सन्निधिमात्रेण कुरु अकर्त्रात्मनिश्चयान्माकुरु चेत्यर्थः ५० किंच नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोतेत्यादिश्रुतेः सर्वशरीरेषु त्वमेव वेत्ता वेदिता दृग्भावस्थं छांदसः सत्ता यो हि दृग्रूपत्वं तिष्ठपरमासन्नित्यर्थः अजोजन्मादिविक्रियाशून्यः सर्वस्यात्मा प्रत्यक्चिद्रसः प्राणुक्तो महेश्वरश्च त्वमेव आत्मनः स्वस्वभावादव्यतिरिक्तः अप्रच्युतस्वभाव एव सन्

यथाश्वत्थोपि लिंगानि न बिभर्ति बिभर्ति च त्वमेवमिह कार्याणि कुरु माकुरु चानघ ५० त्वमेव वेत्ता त्वमजस्त्वमात्मा त्वं महेश्वरः आत्मनो व्यतिरिक्तः संल्लयेत्यमिदमाततं ५१ येनात्मादिस्वरूपसद्भावादभितो भावनोज्झिता सनसंगत्यते दोषैर्हर्षामर्षविषादजैः ५२ रागद्वेषविनिर्मुक्तः समलोष्टाश्मकांचनः युक्त इत्युच्यते योगी त्यक्तसंसारवासनः ५३ सपलकरोतियद्यत्कर्म यद्ददाति निहंतियत् तत्रमुक्तधियस्तस्य समता सुखदुःखयोः ५४ प्राप्तकर्तव्यमेवेति त्यक्तेष्टानिष्टभावनः प्रवर्तते यः कार्येषु नसमज्जति कुत्रचित् ५५ चित्सत्तामात्रमेवेदमिति निश्चयवन्मनः त्यक्तभोगाभिमननं श्रममेति महामते ५६ मनः प्रकृत्यैव जडं चित्तत्वमधावति मांसगृद्धेनमार्जारो वने मृगपतिं यथा ५७ सिंहवीर्यं व रागत्वब्धं मांसं तत्तेनुगोहरेः चिद्वीर्यवशगः प्राप्तं रत्नामाश्रयते मनः ५८

एवं भूतेन त्वया स्वमोहादित्यमिदमाततं विस्तारितं नान्येनेत्यर्थः ५१ यदिमयैवेदमाततं तर्हि किं यं ममात्र हर्षामर्षदोषादयस्तत्राह येनेति येन तत्त्वविदा आत्मस्वरूपस्य सद्भावात्परमार्थसन्मात्रताभावनादभितोन्यदिति भावनाउज्झि त्यक्ता सः न दोषैः संगत्यते अतस्त्वमप्युपस्थितेस्यर्थः ५२ ५३ ५४ ५५ इदं जगत्सुखं च भोगाभिमननं भोगचिंता सा त्यक्ता येन ५६ चित्सत्तामात्रमेवेदमिति यदुक्तं तदुपपादयति मन इत्यादिना यतो जडं अतः स्वेद्धं परं साधयितुं चासमर्थत्वात्स्वसिद्धये स्वविषयसिद्धये चासाक्षिभूतं स्वप्रकाशचिद्रूपं तत्त्वं पारमार्थिकं वस्तु अनुधावत्यनुसरति यथा स्वजीवनाय स्वपुत्रादिभरणाय च मार्जारः सिंहमनुसरति तद्वदित्यर्थः ५७ स्वरूपं स्वविषयं च आश्रयते उपजीवति ५८ श्री॥

अस्त्येव किं न तस्तत्राह मन इति एवं च सति मनः असत्कल्पं भ्रान्तिप्रायं मिथ्येति सिद्धमित्यर्थः कथं जीवति तदाह भावयन्निति एकमद्विती
यमात्मानं विस्मृत्य विश्वं जगदाकारमेव भावयन् छान्दसो लिंगव्यत्ययः कल्पयन् सत् जगदाकारं भूत्वा जीवतीत्यर्थः अत एव चिंतामा
त्मस्मृतिं एत्य प्राप्य न तु पुनः चिदपि भवति मनस्त्वं जहातीत्यर्थः ४९ मनसः प्रकाशशक्तिरिव स्पंदशक्तिरपि चिदधीनैवेत्याह जडमिति चि
त्स्वरूपणया दीपिकया ओजसा बलेन च विना न तिष्ठति स्पंदते ५० अत एव चितिस्पंदकल्पनैव मन इति वृद्धसंवादोऽप्युक्त इत्याह चित्स्वभावेति ५१ स्प
न्दशक्तेरेव विलासश्चित्तं तद्वृत्तयश्चेत्याह य इति फूत्कारग्रहणं विषयस्याप्युपलक्षणं तथा च चित्तादिवृत्तिपुटीदृश्याकारतैव कलनेत्यर्थः चितां

मन एवमसत्कल्पं चित्प्रसादेन जीवति भावयन्विश्वमेवैकं चिंतामेत्य चिदप्युत ४९ जडं यत्किल निर्हीनं चितादीपिकयौजसा तन्मनः शवसंकाशम
चिदुत्तिष्ठति कथं ५० चित्स्वभावपरामृष्टा स्पंदशक्तिरसन्मयी कल्पनाचित्तमित्युक्ता कथ्यते शास्त्रदृष्टिभिः ५१ यच्चित्तफणिफूत्कारः सैवेयं क
लनोच्यते चिदेवाहमिति त्यक्त्वा सा चित्तामेव गच्छति ५२ चेत्येन रहिता येषा चित्तत् ब्रह्म सनातनं चेत्येन सहिता येषा चित्सेयं कलनोच्यते ५३ किं
चिदामृष्टरूपं यद्बुद्धसत्त्वं च तत्स्थिरं मनः कल्पनासत्त्वदैवेतत्सादिवोपस्थिता हृदि ५४ चित्तमित्येव रूपं यदैव कलनोदिता तदेव चित्तां विस्मृत्य सा
जडेव व्यवस्थिता ५५ संपन्ना कलना नाम्नी संकल्पानुविधायिनी अवच्छेदवती ग्राह्यहेयोपादेयधर्मिणी ५६ शुद्धचिन्मात्रतां ५२ तथा च चित

श्चेत्यत्याग एव ब्रह्मतात्पर्यवसन्नेत्याह चेत्येनेति ५३ कलनैव मननात्मनो भवतीत्याह किंचिदिति ब्रह्मैव किंचिदामृष्टरूपकलनासत्त्वसदैव द
दि सदिव उपस्थिता संकल्पविकल्पकल्पनाभूत्वा स्थिरं एतत्प्रसिद्धं मनो भवतीत्यर्थः ५४ नित्यानुभवस्वभावस्य स्वरूपविस्मरणे कलनैव स्मृतिलमा
पन्ना चित्ततां गच्छतीत्याह चित्तमिति तदा परोक्षतापत्तियोग्या जडताप्यस्याः संपन्नेत्याह जडेवेति ५५ अतीतविषयाकारकल्पनेन चित्ततामिव
अनागतविषयाकारकल्पनेन संकल्पविकल्पानुविधानात् मननामपि सा प्राप्तेत्याशयेनाह संपन्नेति एवमवच्छेदवती द्विधा परिच्छिन्ना सती प्राक्त
नेष्टानिष्टसाधनसजातीयामध्यवस्य भावीष्टानिष्टसाधनतां संकल्प्य हेयोपादेयधर्मिणी अग्रमुख्या चिदेव संपन्नेत्यर्थः ५६

मनाः प्रकृत्यैवेत्यादिनोपपादितं चित्सत्तामात्रमेवेदमित्यंतरां पिंडीरूपोपसंहरतिसैषेति स्वशक्तिभिः स्वीयमायाशक्तिवशात् गुरुशास्त्रस्व
विचारैर्यावन्नसंप्रबोधिता तावद्बालवपूर्णानंदाद्वयस्वरूपं न बुध्यत इत्यर्थः ५७ बोधयेज्जडाकारकलनालक्षणादवस्थाभ्रयस्वभावाद्व्यावर्त्तयेदि
त्यर्थः ५८ विज्ञानेन शास्त्रजन्यज्ञानेन शमेन शमादिसाधनसहितमनननिदिध्यासनाभ्यामितरथा विज्ञानशमाभ्यामप्रबोधने ५९ व्यामोहो रागः
आत्मनः अवेदनमज्ञानं निद्रा तेन संसुप्ता ६० ननु कल्पनायदि सुप्ता कथं जगदवबुध्यते अवबोधवानस्याः प्रसिद्धचित्स्वभावात्केनेत्याशयेनाह
हअप्रबुद्धेति यन्मयास्ते जगदवबुध्यत इति तन्न किंचिदवबुध्यते जगतोऽनवबोधमात्रविलसितत्वात् यतो दृश्यमानापि जगत्स्थितिः सांकल्पिक

सैषा चिदेव जगतामागते वस्वशक्तितः न संप्रबोधिता यावद्रूपं तावन्न बुध्यते ५७ अतः शास्त्रविचारेण वैराग्येण परेण च निग्रहेणेंद्रिया
णां च बोधयेत्कलनां स्वयं ५८ कलना सर्वजंतूनां विज्ञानेन शमेन च प्रबुद्धा ब्रह्मतामेति भ्रमतीतरथा जगत् ५९ व्यामोहमंदिरमज्ञालुलि
तां विषयावटे आत्मावेदनसंसुप्तां कलनामेवबोधयेत् ६० अप्रबुद्धा यदा त्वेषा न किंचिदवबुध्यते संकल्पकलनेवांतर्दृश्यमानाप्यसन्मयी
६१ तथा परमया दृष्ट्या कलनैषांतरस्थया मंजरी गंधशक्तेव पदार्थेषु विराजते ६२ तनु संकल्पिता येषा कलनेति जगत्त्रये साहि किंचि
द्विजानाति नित्यं ज्ञानैकधर्मिणी ६३ चेतनेन जडाकारा मकलनोपलरूपिणी पद्मिनी वातयेनासौ परेणैव प्रबोध्यते ६४

प्रासादकल्पनेव असन्मयीत्यर्थः ६१ विषयाशापरित्यागे ऽवशिष्टा कलनैवात्मेत्युक्ते शंति ज्ञानमेवायमात्मेति माया ह्येति तत्साक्षिणी तदंतरी
शुद्धचित्तं विविच्य दर्शयति तयेत्यादिना एषा चित्तवृत्तिरूपा कलना अंतरस्थया तया सर्वसाक्षिण्या परमदृष्ट्या दृष्टरूपा व्याप्ता सती पदार्थेषु ल
स्वविषयेषु विराजते प्रकाशनसमर्था भवतीति स्वतः इत्यर्थः ६२ यदि सा सर्वसाक्षिणी कुतस्तत्तदंतःकरणधर्मानेव प्रकाशयति न सर्वं तत्राह
तनु संकल्पितेति या एषा ज्ञानैकधर्मिणी नित्यबोधस्वभावा साक्षिचित्सा परिच्छिन्नवृत्तिकलनोपाधिवशात् तनुरल्पैवेति जगत्त्रयेऽपि तैस्तैः
प्राणिभिः संकल्पिता अतः किंचिदल्पमेव तत्तदंतःकरणादि जानातीत्यर्थः ६३ वृत्तिरूपा तु कलना विवेकेन उपलरूपिणी पाषाणकल्पा जडैव अ

येतु नैयायिकप्रभृतयः नित्यसाक्षिणमजानानाः परप्रकाशस्यैवानित्यज्ञानस्य अर्थप्रकाशतामभ्युपेतास्तानेभिर्दृष्टांतैरुपहसति यथेत्या
दिना ६५ अचेतनस्यांतःकरणतद्वृत्त्यादेर्नित्यचित्संनिधानाभावे विषयोन्मुखप्रवृत्तिरेव दुर्लभा दूरे तत्प्रकाशकतेत्याशयेनाह लिपिकर्मेति ।।
लिपिकर्मभिश्चित्रलिखितैः नृपैः प्रतिबोधिताआप्यायिताः ६६ परिवलितं धावितं ६७ पुंसाविहितैः शिलादिना निर्मितैः ६८ ६९ नित्य
चिदात्मानभ्युपगमे कलनाद्यध्यास एव न सिद्ध्येदित्याशयेनाह यथेति ७० चित्तः परिच्छेदस्पंदकल्पने वमन इत्युक्तं इदानीं सैव चिद्विरंशा

यथा शिलामयी कन्या चोदितापि न नृत्यति तथेयं कलना देहेन किंचिदवबुध्यते ६५ लिपिकर्मनृपैर्युद्धं कृतं घर्घरारवं क्वचित्
चंद्रकिरणैरौषध्यः प्रतिबोधिताः ६६ अस्रगालिप्तगात्रैश्च श्वभिः क्वपरिवालितं क्वगीतं मधुरध्वानं वनपाषाणखंडकैः ६७ क्व पुं
साविहितैरर्कैः स्नापितं यामिनीतमः क्व संकल्पमयैः स्नायाः क्रियते व्योमकाननैः ६८ क्व जडैरुपलाकारैर्मिथ्याभ्रमभरोत्थितैः म
गतृष्णामयैरेभिर्मनोभिः क्रियते क्रिया ६९ यथातपे स्फुरत्यस्फारे मृगतृष्णातरंगिणी कलना तद्वदेवेयं स्फुरत्यात्मनि सत्यलं ७०
यदेतत्स्पंदितं नाम तन्मनोधिगतं शठैः मरुतां विद्धि तां शक्तिमंतःप्राणशरीरिणी ७१ येषां संविदनाक्रांता संकल्पलवनिःस्रयैः
अनाक्षिप्तरसाकाराः प्रमेयापारमात्मिकी ७२ अयं सोहमिदं तन्म इति या कलना विला प्राणात्मनत्वयोस्तस्याः संज्ञा जीव इति कथ्यते ७३

स्यात्ममात्रत्वाज्जडांश एव परिशिष्यते तथाविधा तु स्पंदशक्तिः प्राण एवेति तन्निरोधे कृते न मनागप्यपि विरोध्यमस्तीति वक्तुं भू
मिकां रचयतो शठैः स्ववंचकैरेतैः अन्नमयांतः प्राणशरीरिणी प्राणमयकोशात्मिकां ७१ सा प्राणशक्तिः संकल्पादुत्थिता निःसंकल्पानां
योगिनां चिदात्मैव तज्जानपृथगस्तीत्याह येषामिति न आक्षिप्तः कल्पितः रसस्यंतः इति रसा विषयास्तदाकारो यया ७२ सैव अहंममेत्याक्षिप्तर
साकारा यदा तदा विनाऽस्पंदं तदाक्षेपायोगात्स्पंदात्मकप्राणतत्वस्य चिदात्मकस्यात्मतत्वस्य च पृथगेव संज्ञा तस्या विवेकाभावे न रेकाध्याहारेन
आविला जडांशवलितचिद्रूपा कलना जीवप्राणधारणे इति धात्वर्थानुगमाज्जीवतीति जीव इति संज्ञा कथ्यत इत्यर्थः ७३ श्रीरामाय नमोनमः

एवमन्या अपि संज्ञास्तस्याः प्रसिद्धा इत्याह धीरिति ७४ कुतो न परमार्थतस्तत्राह मन इति यतः परमार्थेन मनः चित्तं बुद्धिः शरीरमित्येत
दुपलक्षितं दृश्यमात्रं इहात्मनि नास्ति अप्राणो ह्यमनाः शुभ्रः अकामपव्रणमस्नाविरं अस्थूलमणित्यादिश्रुतत्वात् तेन विद्वदनुभवैर्युक्ति
भिश्च बाधितत्वादिति भावः ७५ यद्यात्मैवास्ति न हि स कुतो न भाति जगद्रूपेण वा कथं भातीति तत्राह आत्मैवेति ७६ कुतो नास्त्येव कुतश्चास्ते
वेति निश्चयस्तत्राह अच्छत्वादिति अच्छत्वाद्युस्तु रागादियोग्यताप्रयोजकस्यौल्पनैल्माद्यभावादसादेवाभासत इत्यसदाभासः चिद्रूपतया
स्वपरप्रथानिर्वाहकत्वात् सन् अत एव स्वानुभूत्यैवानुभूयते न करणैरित्यर्थः ७७ स्थौल्याद्यभावात्करणांतराणि तत्र न प्रवर्त्ततां मन

धीश्चित्तं जीव इत्येताः संकल्पस्यास नो मतः संज्ञाः संकल्पितास्तज्ज्ञैर्नराम परमार्थतः ७४ मनो नो न मतिर्नापि धीरेषा न शरीरकं
अस्तीह परमार्थेन सदात्मैवेहास्ति सर्वदा ७५ आत्मैवेदं जगत्सर्वमात्मा कालक्रमस्तथा सचाकाशादच्छतरो नास्तीवास्त्येव चामलः
७६ अच्छत्वादसदाभासः संविद्रूपतया तु सन् आत्मा सर्वपदातीतः स्वानुभूत्यानुभूयते ७७ मनस्तत्र परिक्षीणं यत्र संवित्परा
त्मनः अंधकारक्षयस्तत्र यत्र लोकः प्रवर्त्तते ७८ यत्रात्मसंविदच्छायाः संकल्पोत्पत्तिरूपताः तत्रात्मनो विस्मरणं स्मरणं
चित्तजन्मनः ७९ परस्य पुंसः संकल्पमयत्वं चित्तमुच्यते अचित्तत्वमसंकल्पान्मोक्षस्तेनाभिजायते ८० \\ स्तस्य स्वमतयार्थनिर्णय

निमित्तत्वेन प्रसिद्धं कुतो न प्रवर्त्तते तत्राह मन इति सत्यं तत्र मनः प्रवर्त्तेत यदि तद्दर्शनकाले स्वयं न नश्येत् मनसस्तु तत्र नकार्यत्वात्तद्दर्शनव
त्तुदयसमकालमेवाविद्यया सह क्षयान्न तद्दर्शनशक्तं तेत्यर्थः ७८ कुतर्हि मनसः प्रवृत्तिशक्तिस्तदाह यत्रेति यत्र यस्यां दशायां अच्छायाः
स्वच्छतराया आत्मरूपायाः संविदः संकल्पवशाद्बाह्यविषयाकारोत्पत्तया बाह्यार्थः प्रकल्पत्वेनाभिमतास्तत्र पारमार्थिकस्यात्मनो विस्म
रणं चित्तजन्मनो मिथ्यार्थस्य स्मरणं दर्शनमित्यादि प्रसिद्धमित्यर्थः ७९ स्वोद्भवप्रतिकूलत्वादपि न मनस आत्मदर्शनशक्तिरस्तीत्याह परस्ये
तिसंकल्पमयत्वाधीनोद्भवं मनः सर्वसंकल्पक्षयोपलक्षिते मोक्षात्मनि कथं प्रवर्त्तेतेति भावः ८०

अत एव संकल्पः चित्तजन्मबीजमित्यस्य हृदयं वेदितमित्याह एतावदिति संकल्पोन्मुखतं यातेरगच्छतः आत्मनः यत्संविदः स्थितत्वभावात्
वा विकल्पनं ईषदन्यथाभावलक्षणं एतावदेव चेतसो जन्म किलेसन्नयः ८१ नक्तमेवस्फुटीकृत्याह निर्विकल्पादिति निर्विकल्पात्प्रच्यु
तेति शेषः यथा स्म्रादिसंकल्पकलनया पुस्त्वं पुंस्त्वं जनं बुध्यते प्रजाप्रसवार्थमाविर्भवति तथा मनोपि जगत्प्रसवार्थमित्यर्थः तथा च वा

रा

दैयणस्यापि स्त्रत्वं पुंस्त्वादिवदपि हि लोके इति ८२ यदेतत्स्पंदितं नाम तस्यादिनाय स्पक्तं तत्तस्य प्रयोजनमाह प्राणशक्ताविति यथादर्शस्य
दर्पणादेः संबंधिनी छाया प्रतिच्छाया तास्मिन् दृश्ये विलीना नितद्दृव्यमनुविलीयते न द्रुत् तत्कुतः यतो यथा प्रतिबिंबं दर्पणस्यैव कल्पितं
रूपं तथा मानसं मनोपि प्राणस्यैव रूपमित्यर्थः ८३ प्राणरूपं मानसमिति कुतो ज्ञानं तत्राह देशान्तरेति यतः प्राणः जीवन्पुरुषः दूरदेशां

एतावदेव तचेतसो जन्म बीजं संसारभूतये संकल्पोन्मुखतां यातसंविदो वा किलात्मनः ८१ निर्विकल्पाच्चितः सत्त्रासंकल्पांककलंकित
कलनेत्युच्यते तेन पुंस्त्वं बुध्यते मनः ८२ प्राणशक्तौ निरुद्धायां मनो राम विलीयते द्रव्यछायानुतद्द्रव्ये प्राणरूपं हि मानसं ८३ देशान्तरा
नुभवनं प्राणो वेति तद्देहस्थितं संवेदनतो यन्मन इत्यभिधीयते ८४ वैराग्यात्कारणाभ्यासाद्युक्तितो व्यसनक्षयात् परमार्थविबो
धाद्रोधं ते प्राणवायवः ८५ दृषदो विद्यते शक्तिः कदाचिज्ज्वलने यथा न पुनर्मनसामास्ति शक्तिः संदावलोधने ८६

र तस्यानुभवनं

मानसानुभवं तद्देहस्थितं वेत्ति तदिमे तस्य देशस्यानुभवोस्तीसनुभवति तच्च देशान्तरसंबंधस्यस्पंदमंतरेणासिद्धेः वेदनं शास्य चित्तं वलनमंत
रेणायोगात्संवेदनोभयशक्तियोगात्प्राण एव मन इत्यभिधीयत इत्यर्थः ८४ इत्थं प्राणनिरोधेन मनोनिरोधसिद्धये तद्योरेकां युक्तयादयश
नो निरोधोपायमाह वैराग्यादिति कारणं प्राणायामस्तस्याभ्यासात् योगो युक्तिः समाधिस्तस्मात् चित्तस्य बाह्यविषयेषु सर्पणं दुराभ्यासो व्य
सनं तस्य क्षयात् ८५ इदानीं अन्नमयं हि सोम्य मन आपोमयः प्राण इति श्रुत्या भिन्नोपादानकयोः प्राणमनसोर्भेदं घटितपक्षेपि मनसः स्वतः
स्पंदशक्तेः स्थितक्षेत्राभावात्प्राणचिदात्माधीन एव ते इति प्राणनिरोधे निरोधोपपत्तिरित्याशयेनाह दृषद इति एधः शब्देन काष्ठवाधिना
तत्कार्यज्वलनशक्तिर्लक्ष्यते दृषदः शिलाया अपि कदाचिज्ज्वलनशक्तिर्ज्वलनशक्तिश्च विद्यते संभवेत् न तु मनसां स्पंदविषये वाशक्तिरस्ती

कथोक्तं हि तेनाकाशवाहस्पंद इति ७ किं तर्हि मनस्तदाह चिच्छक्तेरिति ८ अविद्याकार्यो विद्यामायाविक्षेपशक्तिः एतन्मन एव तान
सर्वस्वनिर्वाहकत्वाद्भूतानं ९ संकल्पकल्पनं संकल्पननिमित्तमिति यावत् अत एव तन्निमित्तानननेनेमित्तिकापायासिद्धिरित्याह नकृतं चेदि
ति १० वायोरिति वायुतः षष्ठ्यंतात्सार्वविभक्तिकस्तसिः ११ न विद्यंते खंडमंडलाकारस्पंदरूपाणि यस्यां तथाविधा चिदेव यद्युस्मात्सर्वार्थ
इत्यर्थः १२ साखंडाकारखंडपूर्णतालक्षणा चित्ता चित्त्वभावता तदन्येन केन संबाध्यते खंड्यं ते किलेति तदसंभावनाद्योतनार्थः किं तदधीन

स्पंदः प्राणमरुच्छक्तिश्चलद्रूपैव सा जडा चिच्छक्तिः स्वात्मनः स्वच्छा सर्वदा सर्वगैव सा ७ चिच्छक्तेः स्पंदशक्तेश्च संबंधः कल्प्यते मनः
मिथ्यैव तस्य मुख्यत्वं मिथ्याज्ञानं तदुच्यते ८ एषा स्यादविद्याकथिता मायैषा सा निगद्यते परमेतन्नराज्ञानं संसारादिविषप्रदं ९
चिच्छक्तेः स्पंदशक्तेश्च संयोगः संकल्पकल्पनं न कृतं चेत्तरि क्षीणास्तादृग्माभवभीतयः १० वायुतः स्पंदशक्तिः प्रसाधिता चेत्सुबद्धेन यत्ना
सचेत्सा चित्तदेवांतः संकल्पाद्याति चित्ततां ११ चित्तनैषा चितो मिथ्याकल्पिता बालयक्षवत् अखंडमंडलाकारस्पंदरूपा चिदेव य
त् १२ सैषा चितान दन्येन केन संबाध्यते किल अखंडशक्तेरिंद्रस्य केन स्यात्सह संगरः १३ अतः संबंधितो भावात्संबंधोऽत्र न विद्य
ते संबंधेन विना कस्य सिद्धं तत्कीदृशं मनः १४

॥ सिद्धिकेनउत्तान्येन अन्यस्याप्रसिद्धेः चिदधीनसिद्धिकस्यापि तद्बाधनाशक्तेर्बाधस्या
पिसिद्धेश्चित्सत्ताधीनत्वाच्चित्खंडनमंतरेणापि दंतरालेऽशचित्सिद्धयोगाद्वेतिभावः तर्हि दंते इति पाठे तु तांतादृशीं चित्त्वभावतां स्वसमवे
तीति तद्वत् अंते सकार्याविद्यानाशे सति केन संबाध्यते इति योज्यं इंद्रस्य देवराजस्य परमेश्वरस्य वा १३ अतः अचितः श्चिद्विरोधा
योगाद्विरोधे चित्सत्ताबाधिनत्स्थितिकत्वाच्च कीदृशं मनः पदिनडमपि स्वसत्तायामन्येनिरपेक्षं स्वतः सिद्धमुच्यते तथापि नदनुभवितुस्त
त्संबंधिनश्चेतनस्याभावाच्चित्संबंधेन विना तन्मनः कस्यासिद्धं कीदृशं वा तत्स्यात्ननुभवानारोहे अलीकस्य तस्य च विशेषासिद्धेरिति भावः
१४

इत्थं चित्स्पंदयोर्भेदपक्षे मनसो लीकत्वामुक्त्वा एकतापक्षे सुतरां तथेत्याह चित्स्पंदयोरिति चित्स्पंदयोरेकतापि चिदपलापेन तावद्द्रष्ट्राद्यभावकुंस्पंदसाध
काभावप्रसंगात् परिशेषात् स्पंदापलापे नैकलोकोक्तौ राजातिरिक्तगजतुरगाद्यपलापे सेनास्वरूपासिद्धिवन्मनसः सुतरामसिद्धिरित्यर्थः ९५ त
स्मात्सद्द्वयेप्यसंभवाच्चित्तं मनो नास्त्येव नत्वतानान्नास्तीति निश्चय एवं मनोनाम्नाद्ग इत्यर्थः ९६ ९७ ९८ हतस्येनत्दर्पांतस्थ प्रसंगात्मोच्यतेतत्वस
मोपरो असम्यग्ज्ञानेनसंभूता मुनेः तिरामसंबोधनं मननप्रवणतार्थविधानार्थं ९९ मरणं यदि चैतन्यनिर्वृत्ति यदि वानिःस्वरूपतापत्तिस्तदुभय
मपि मनस्यस्तीति निसमन्तं मोरर्व्यचक्रिकाम्बकवत्परिवर्तमानमोरर्व्यपरंपरा १०० आत्मस्वरूपं आकृतिरवयवस्थानं जाति र्वा सामग्र्यं शस्त्रास्त्र

चित्स्पंदयोरेकतायां किंनाममनउच्यते कासेना हयमातंगसंगसंघट्टं विना ९५ तस्मान्नास्त्येव दृष्टात्मचित्ते रामजगत्त्रये सैषासम्यक्परिज्ञाना
त्तेतसो जायते स्थितिः ९६ मुधामैवमनर्थायमनः संकल्पयानघ मनो मिथ्यासमुदितं नास्त्यत्र परमार्थतः ९७ मात्वमंतः क्वचित्किंचित्संकल्पय
महामते मनः संकल्पकं राम यस्मान्नास्तीह कुत्रचित् ९८ असम्यग्ज्ञानसंभूता कल्पनामृगतृष्णिका तन्मरेतवसंज्ञातासम्यगालोकनान्मुने
९९ जडत्वान्निःस्वरूपत्वात्सर्वदैवमृतं मनः मृतेन मार्यते लोकश्चित्रेयं मोरर्व्यचक्रिका १०० यस्य नात्मा न देहोस्ति नाधारो नापि चाकृतिः तेने
दं भक्षितं सर्वं चित्रेयं मोरर्व्यवागुरा १ सर्वसामग्र्यहीनेन हन्यते मनसापियः नीलोत्पलदलाघातैर्मन्ये दलितमस्तकं २ जडेन मूकेनांधेन विहतोम
नसापियः मन्ये सदह्यते मूढः पूर्णचंद्रमरीचिभिः ३ विद्यमानोपियः शूरो लोकस्तेनाभिभूयते अविद्यमानमेव दंहन्यते मुग्धनोदितो ४ श्री छ॥

देहस्तपादादियुद्धसामग्री तेन हीनेन दलितमस्तकं तद्वृत्तिशेषः १ २ ३ तेन अविद्यमानेन मनसा विद्यमानः शूरः शत्रुंजयः सर्वसामग्रीसंपन्नो
पि लोको मूढजनः आभिभूयते विवेकिभिस्तु वैराग्यादिभिर्महाप्रयत्नसंपाद्यैः साधनैर्महता योगध्यानसमाध्यभ्याससाक्षात्कारोपायेन अविद्यमा
नमेव हन्यते इति दृश्यं सर्वा विकल्पना मुग्धतैवसुदितानपारमार्थिकीत्यर्थः तथा चाहुः स्वामिनः समसरामिति निरविदामितिसमतरमिति चेहस
हजसांद्रसुखैकेवलचिद्गगनेमयि केयमहो विफलत्वबुद्धिविधकल्पलतेति ५ व्यक्तता आभिभावितुमितिशेषः ५ श्लो० मिथ्यासंकल्पकलितं मिथ्या
वाञ्छितिमागतं अन्विष्टमपि नोदृष्टं कांतस्याकि

द्विवा

वा॰टी॰उप॰
२८

महामायांविलितेनप्रसिद्धस्यमयस्यापिविधायिनीनीनिर्मात्री ६ यद्यामैरिवंतदासतुरुषःसर्वेणाप्यापद्यआन्विष्टःपरिमग्नपुआश्रितःना
त्रविप्रतिपत्तिःहियस्माद्ज्ञानतोमूर्खस्यकाआपत्नास्तिसर्वापत्स्वेवेत्यर्थः नविद्यतेज्ञानंयस्यसः अज्ञानमूर्खस्तिमितेनमौर्ख्यात्तिदुष्क
र्मादिद्वाराइत्थंसर्वापन्निधिभूतास्टष्टिः ७ इयंसःष्टिर्मनोरेहारिदुर्बुद्धेः निमित्तान्मौर्ख्यस्यवशंगतामौर्ख्येणपीडयामानापिएतेनप्रसि
द्धेनजीवेनाप्यसताअसन्मार्गानुवर्तनेनैवोत्तरोत्तरदुःखापत्तपपाद्यतेनयाबाधस्येवजडस्यमनआदेःस्वाभाविकमौर्ख्यात्तिविडितस्यपुन
स्तद्दुःखाभितेनजीवेनापिपीडनंकष्टात्कष्टतरंअनुचितमित्यर्थः ८ असंतपेलवाअपिचारमात्रसिद्धत्वारेमात्रेणवाधितुंशक्यातियाव

अहोनुखलुचित्रेयंमायामयविधायिनी चेतसाप्यतिलीलेनलोकोयमभिभूयते ६ मौर्ख्ययदाःपदान्विष्टःकाहिनापदज्ञानतः
पत्रपमौरख्यादियंस्टष्टिरस्तानेनैवजन्यते ७ हाकष्टमपिदुर्बुद्धेःसृष्टिमौर्ख्यवशंगता असतैवयदेतेनजीवेनाप्युपपाद्यते ८ मन्ये
मौर्ख्यमियीस्टष्टिरियमसंतपेलवावास्तरंगप्रवाहेणकणशःपरिशीर्यते ९ नीलांजनालबालेनयंत्रेणेवविचूर्ण्यते इंदोराभोगपू
र्णस्यकरस्पर्शेनमुह्यति १० रिपुभिर्नयनोन्मुक्तैर्दृष्टस्त्रैर्निबध्यते संकल्पकृतयाऽऽग्रहसेनयापरिभूयते ११ तस्मात्किलेयंमन
सानास्थितेनैवकुत्रचित् कल्पितेनमधान्येनक्रूपणेननिहन्यते १२ तत्तत्रतादृशान्विकारमात्रनिरस्यानदृष्टांतानाह वारिस्यादिना

यथावाःवारिस्वकल्पितेनतरंगप्रवाहेणपिष्यमाणंकणशःपरिशीर्यतेइतिभ्रांतिवदित्यर्थः ९ तदेववारियत्रावर्तस्तत्रनीलांजनवर्णेन
आलवालेनमध्यछिद्रवतापेषणयंत्रेणेवविचूर्ण्यतेतदेववारियत्रकंपतेतत्रआभोगेनमंडलेनपूर्णस्यंदोःकरस्पर्शेनमुह्यतितन्मादपर
वशतांगच्छतीतिचभ्रांतिर्यथानद्वदित्यर्थः १० रिपुभिर्दृष्टःदृष्टमात्रःपुरुषःनयनोन्मुक्तैर्नेत्रस्टष्टेःस्त्रेबंधनइत्यादिभ्रांतिवदित्यर्थः
अथवामन्येइत्यादिश्रसनाम्गतछायावास्तरंगप्रवाहादिनापीयंस्टष्टिर्विनाशयितुंशक्यानेकिंपुनःशास्त्राद्योपायेनेतिइत्येवयोज्यं ११
तस्माद्गतिपेलवत्वात् इयंमूर्खलोकमयीस्टष्टिःनिहन्यतइतिपरेणसहान्वयः १२

२८

तस्मान्मनोवशीकरणाशक्तोनाधरात्मशास्त्राधिकारीत्याह मन एवेति १३ कुतो नोपदिश्यते तत्राह अभिजातेति यतस्तस्यैषाप्रज्ञा अभितो जा
ता अभिजाता बाह्यजाता विषयेष्वेव निरूढा तावतैव परिपूर्णेव संसाध्छितानमनोनिग्रहो युक्तार्थस्वरूपानवियुते आंतरं स्वरूपं यस्या स्तथा
विधा प्रत्यक्स्वरूपानभवतीत्यर्थः अत एव श्लोकेषु सत्शास्त्रार्थविचारेषु नक्षमा १४ अत एव धैर्यहेतुभावात्सर्वतो बिभेतीत्याह बिभेतीति १५ अ
सतोपि शत्रुजनात्प्रतारकादिभिरायानस्ते शात्रु जन इत्युद्वेगीता झीतासती पलायते किं बहुना स्वेन स्वीयेनैव मनसापि विवशीकृत्य भीषिता
किमन्येनेत्यर्थः १६ इदानीं सा दुष्प्रज्ञा बिभेतु नाम तथापि न तद्वशो न पुरुषस्य व्यामोहो युक्त इति प्राक्प्रस्तुतमेवोपसंहरति सुखेतिपतः साप्र
ज्ञा विषसंपृक्त मोदकास्वादसुखलवप्रायेण विषयसुखलवेन मरणोन्मुखी विवशा द्विषे च प्रहरतात्हृदयगतेन चेतसैव तप्ता संतापिता विधुरिता

मूर्खलोकमयीस्पष्टिर्मन एवासदुत्थितं यः शक्तो न वशीकर्तुं नासौ रामोपदिश्यते १३ अभिजातास्वरूपैषाप्रज्ञा श्लोकेषु नक्षमा नो
पदेशागिरो योग्या परिपूर्णेव संस्थिता १४ बिभेत्येषापि वीणायास्तंत्रीगुणतनुध्वनेः बंधोरपि सनिद्रस्याबिभेति वरनधुतः १५ अस
तोपि जनादुद्वेगीता झीता पलायते स्वेनैव मनसाप्यन्ता किलैषा विवशीकृता १६ सुखलवविवशा द्विषेवतप्ता हृदयगेनेन निजेन चेत
सैव विधुरिता धिषणा न वेत्ति सत्यं तदितिकथं परिमोहितोमुधैव १७ मोक्षोपायेषूपशमप्रकरणे मनोनिवारणं सर्गः १३ श्रीवसिष्ठ
उवाच संसारसागरासारकल्लोलैरूह्यमानया मतेर्मानिदमकृतं यथायाजनतयार्जितं १ श्रन्याधिषणा विवेकबुद्धिर्यस्या स्तथाविधास्तं तु सुतरां न वेत्ति तन्न यथाभ तयापि तथा पुरुषो मुधैव परिमोहितः स्वस्थचित्तात्वजना संतसाद्विवेकबुद्धिमतः सत्यस्वरहस्य वेदिनः शास्त्रेः

सकाशान्मोहो युक्तो न तु तद्विपरीतायाः दुष्प्रज्ञायाः सकाशादिति भावः १७ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रयोदशः सर्गः
१३ उपेक्ष्यानुपदेश्याहं ल्लाना यो नित्यदुःखितः मनो निर्मार्जनोपायस्तदेहंभ्योत्र वर्ण्यते तत्रादौ मन एवासदुत्थितं यः शक्तो न वशीकर्तुं नासौ
रामोपदिश्यत इति प्राक्प्रस्तुतानुपदेश्यानधिकारिजनानेवोपेक्षणीयतया वर्णयति संसारेत्यादिना संसारसागरस्य असारकल्लोलभूतैर्वि
षयसुखाभिलाषैरूह्यमानया निरंतरं प्रवर्त्यमानया यया जनतया मनोनिग्रहविवेकराग्यादि विषये अपेक्षाभावाद्विदुषः प्राप्यापि प्रश्नप्रा

र्थनाशकारणात्मतेर्मूकत्वमेवाश्रितं साजनतामया आत्मलाभोपायप्रचुरोत्कृष्टकलाजालिभिर्विचारोक्तिभिः इहजगत्यस्मिन् शास्त्रेणो पदिश्यते इति द्वयोरन्वयः १ २ यः अंधस्येव वक्रयेनित्यन्नपश्यतितुक्तिश्रुश्रुषामपियः दुरदृष्टद्वेषादिनानपश्यतितस्मदन्नमिमनुचित मितिस्तुत्तनार्थ ३ कुष्टरोगविशीर्णघर्घरस्वननादिघ्राणं यस्यतं पुरुषं कः अमतिनिर्बुद्धिर्नानामोदानांविचारणेपरीक्षणे प्रमाणीकुरुते आमोदतत्वनिर्णतत्वेनाश्रयतीत्यर्थः ४ ५ समवायजनसमूहस्तत्रसंकथाशातं ६ आशोतेअस्मिन्निति आशायो हृदयंतद्विलस्थः ७ नहि

आत्मलाभमयोदारकलाभिरिहसामया विचारोक्तिभिरेताभिः शास्त्रेस्मिन्नोपदिश्यते २ नपश्यत्येवयोत्यर्थंतस्यकःखलुदुर्मतिः विचित्रमंजरीचित्रंसंदर्शयतिकाननं ३ कः कुष्टघर्घरघ्राणंनानामोदविचारणे मूर्खमात्मोपदेशेनप्रमाणीकुरुतेमतिः ४ विपर्य्य स्तेंद्रियंमत्तंमदिराघूर्णितेक्षणं धर्मनिर्णयसाक्षित्वेकः प्रमाणीकरोत्यधीः ५ कः शवंवारमशानस्थंसमवायकथाशतं परिपृच्छतिसं देहेकश्चमूर्खंप्रशास्तिच ६ येनाशयबिलस्थोपिमर्कोधोपिननिर्जितः मनोव्याळसुदुर्बुद्धिःकथंनामोपदिश्यते ७ जितमेवमनोवि द्धिवस्तुतोयन्नविद्यते निकृत्तासाविशत्तेवयाशिलानैवविद्यते ८ मनोनविजितंरामयेनासदपिदुर्द्धिया तेनाग्रस्तविषेणैवम्रियतेवि षमूर्छया ९ तःपश्यतिसदैवात्मासंदनेप्राणशक्तयः इंद्रियाणिस्वधर्मेषुमनोरामकिमुच्यते १० प्रणानांस्पंदनीशक्तिर्ज्ञानशक्तिःप रात्मनः इंद्रियाणांनिजाशक्तिरेकःकोत्रनिबध्यते ११

१ किंविवेकिनोपिमनोजयोऽशक्यः नेत्याह जितमेवेतिनिकृत्तखसन्निधेः आत्मा दूरनिरस्तेव ८ अग्रस्तविषेणेतिसर्पदंशाद्यभावस्याप्युपलक्षणं ९ वस्तुतोयन्नविद्यतेऽसत्तदुपपादयतितत इति किंअर्थप्रथार्थंमनः ततःस्पं दार्थंजतत्तानकर्मेंद्रियप्रयोजनसिद्ध्येनतत्रपमपिप्राणप्रेरितैरिंद्रियैरुपनीतानामर्थानांसाक्षिणेवप्रथासंभवान्नमनसःकृत्स्नमस्तीतिभा वः १० ननुसर्वशक्तिभिर्निबद्धंमनःकिंनस्यादितिचेदत्स्येनमुक्तिविवेकेघटतेवीणामधुरध्वनिवत्समाजेनापिसमुदितव्यवहारासिद्धेरिसा शयेनाह प्राण्यानामिति तथाचयथातैर्थिकसमाजस्नानदानगानस्तवनादिव्यवहारोनसर्वशक्तिमदेकःप्रयुक्तस्तद्वदयमपीत्यर्थः ११ २९

यदि कश्चित् ब्रूयात्संघातस्य संहतपदार्थत्वनियमादत्रापि कश्चिद्रूपोऽस्ति न इति तर्हि अस्यापि संघातस्य जगत्संघातांतःपातात्सर्वेषां सर्वाः
व्यवहारशक्तयः सर्वनिर्मातुरीश्वरस्यात्मन एवांशा वर्तंते तादर्थ्यमेवास्यापि सिद्धेन्नाचेतनमनोधर्मत्वमिति न प्रतिशरीरभिन्नाचेतन
मनःसिद्धिरित्याशयेनाह सर्वाइति वाच्यतामनआदिशब्दवाच्यता ९२ तर्ह्यस्तु जीवश्चेतनोस्याधिष्ठाता सच न चित्ताख्यमनःप्रग्रहेण विना।
इंद्रियाण्याधिष्ठातुं शक्नोतीति चित्तमपि सिद्धमेवेति चेत्तत्राह किंनामेति जीव इति चित्तमेव चेति यत्त्वयोक्तं तदुभयं किंनाम किं आत्मातिरिक्तं
चेतनांतरं वा तत्राचेतनं तन्नाद्यः नान्योतोस्ति द्रष्टा नान्योतोस्ति श्रोतेति श्रुत्या ब्रह्मातिरिक्तचेतनांतरस्य प्रतिषेधात् द्वितीये त्वाह कान्तस्यत्रा

सर्वास्ता अंशावस्तस्य सर्वशक्तेः किलात्मनः पृथक्ता वाच्यतां चेयं कुतो नाम नवोत्थिता ९२ किंनाम जीव इत्युक्तं येनेहांधीकृतं जग
त् चित्तं चैवासदेवत्वं विद्धि कातस्य शक्तता ९३ मनो निर्दग्धदृष्टीनां दृष्ट्वा दुःखपरंपरां मतिर्मे करुणाक्रांता रामसुग्धेव तप्यते ९४
कः किलात्र कुतः खेदो यन्मूर्खः परितप्यते दुःखायैव हि जायंते करभाः प्राकृतास्तथा ९५ विनाशायैव जायंते जडा देहेषु बुद्धयः अ
नारतोदयाः पापा बुद्बुदा जलधेरिव ९६ कियंतः पक्षपशवः प्रत्यहं प्रतिमंडलं सूनावध्निर्निहन्यंते कैवात्र परिदेवना ९७ श्रीरा

त्कृतेति अचेतनस्य चेतनार्थत्वावश्यकतया इंद्रियेभ्यो विशेषाभावात्तदधिष्ठानशक्त्यभावात् अतस्त्वं तदुभयमसदेव विद्धीत्यर्थः ९३ खक
ल्पितेन मनसा निर्दग्धा परमार्थदृष्टिर्येषां तद्दुःखनिवारणोपायस्यान्वेषणे वर्षकोटिभिरप्यलाभान्मुग्धा व्यामोहमिवापन्ना ९४ सनिमि
त्तकं हि दुःखं निमित्तनिवारणेन वारयितुं शक्यं मूर्खाणां तु निर्निमित्तमेव दुःखमतो दुर्वारमित्याशयेनाह कः किलेति करभा गर्दभाः प्राकृ
ताः मूर्खाश्च अनःशगच्या एवेत्यर्थः अथवा नैते शोच्याः ईदृशानां मूढयोनीनामसंख्यातानां दर्शनेन न तद्द्वेषोपेक्षार्हत्वादित्याशयेन उक्तिः
९५ उक्तार्थविवरणाय नानायोनिभेदं दुःखिन उदाहरंत्यपि विकारं च यति विनाशायैवेति पापाः यतः पापकारिण इत्यर्थः ९६ अतानांयोनि २
भेदेषु दुःखवैचित्र्याणि वैराग्यदार्ढ्याय उदाहरति किंयत इत्यादिना प्रतिमंडलं प्रतिदेशं सूनापशुहिंसास्थानं तद्वधिसत्तदधिष्ठितैः पुरुषैः

शा॰टी॰उप॰
३०

समाजातेषु भस्मपुद्भवं जंतुषु मध्ये अनिलः दशानां मशकानां च अर्बुदान्य संख्यातानि हंति १९ दिशं प्रति प्रति दिशं वीप्सायां द्विर्वचनस्या व्ययीभावारंभसामर्थ्याद्विकल्पिततेप्यन्यतरस्यावच्छय कलादुभया भावस्थानदसः १९ इदानीं दुर्बलानां प्रबलैः पीडनं परंपरयोपपाद यति लिप्सेत्यादिना अप्पु कणवत् सामिमथ्याद्विकल्पितमांसलिप्सां वस्त्र पूकंमासिका सुधावुभुक्षयारवादतिकोशाकारकर्णनाभिः कीट विशेषो वादंशेव नमक्षिका २१ दर्दुरो भेकः खगो गरुडादिः बभ्रुर्नकुलश्येनं सर्पं २२ स्रत्साभल्लूकः रिस्छदतिपाठे श्वापदविशेषः २३ मत्तसंजंतो मेघस्य विलंघने स्योपरि भागगमने प्रसक्ते तदसहनेनोत्सात्शिलातले निपातान्नाशमायातीनि प्रसिद्धमित्यर्थः २४ व

अर्बुदान्यनिलो हंति समाजातेषु चान्वहं दंशानां मशकानां च केवात्र परिदेवना १९ दिशं प्रति गिरींद्रेषु पुलिंदा याव नेवने निघ्नंति मृगलक्षाणि केवात्र परिदेवना १९ जले जलचरव्यूहान् सूक्ष्मान्स्थूलो निकृंतति ग्रासार्थं निर्दयामत्स्यः केवात्र परिदे वना २० लिप्सामणुकणस्यामांसुधात्यादतिमक्षिका तां कोशाकारः सुधितो दंशस्तमपि वेवं चलं २१ तं दंशं दर्दुरो भुंक्ते व्याल लमपि दर्दुरं सर्पमुग्रं खगो हंति बभ्रुश्येनं निकृंतति २२ बभ्रुं हि नास्ति मार्जारो रिक्षः श्वानं निकृंतति ऋक्षः कौलेयकं हंति रि छं व्याघ्रो निकृंतति २३ सिंहोभिभवति व्याघ्रं शरभः सिंहमंतिव शरभो नाशमायाति मत्तमेघविलंघने २४ मेघा वातैर्विधूये ते वायवो गिरिभिर्जिताः गिरयो वज्रनिष्पिष्टाः शक्रस्य वशगाः पविः २५ विष्णुनाक्रियते शक्रो विष्णुर्गच्छति जंतुतां स्फरदुःख दशमेतां जरामरणपालितां २६ जंतवोपि महाकायाअपि विघ्नायुधान्विताः लिप्साभिरंगलग्नाभिरुपजीव्यंतवहि २७ छ

त्रेण निष्पिष्टाः खंडिताः पविर्वज्रस्य शक्रस्य वशगः शक्रेण बलाद्वशीकृत इति यावत् २५ क्रियते वशाद्त्सनुवर्तते जंतुनां मत्स्य कूर्म वराहादितिर्यग्जंतवतारान् अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति संकल्प्य जीवात्मना विष्णोरेव प्रवेशात्तजी वभावेन सर्वजंतुशरीरिणां स्वर्जंलात्मकतां वा अतएव विशिनष्टि सुखदुःखेति जरामरणाभ्यां स्वभोग्यमन्नमिवयावदायुः पालितां

आधिभौतिकैरालूनां अध्यात्मिकैराधिदैवैकैश्च दुःखैर्विशीर्णं भूतजंगलं प्राणिवृंदं अद्यते भक्ष्यते उत्तरकाले भक्षणाय इदानीं रक्ष्यते अ
पिशब्दाद् दग्धं भक्षयित्वाऽदं रक्ष्यते च २८ अनारतं संततं यूकाः शिरोरुहजाः लिक्षा यूका पिपीलिका इति क्षुद्रजंतव इत्येकवद्भावाकरणं छंदसं
न च सर्वो द्वंद्वो विभाषैकवद्भवतीति तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यमिति सूत्रबहुवचनग्रहणेन ज्ञापनात् सिद्धमिति यु
क्तं ज्ञापकस्य सजातीयापेक्षत्वेन तस्याप्राप्तविभाषात्वादन्यथा प्राणितूर्याद्यंगद्वंद्वेपि विभाषापत्तेरिति २९ बाधकपरंपरां ससमाप्यप्रकृ
तमनुवर्तते जलकोशेष्विति जलकोशेषु जलाशयेषु इभाः इभाकाराजलजंतुविशेषः ३० आकाशे विहगाः क्षुद्रपक्षिविशेषास्ते हि सदाभ्र

अजस्रमेवमालूनविशीर्णं भूतजंगलं परस्परमलं मोहाद् भक्ष्यते रक्ष्यते पि च २८ अनारतं विनश्यंति विविधा भूतजातयः अनारतं च
जायंते लिक्षायूकापिपीलिकाः २९ जलकोशेषु जायंते मत्स्येभमकरादयः भूमावंतः प्रजायंते कीटा घाटश्विकादयः ३० अंतरिक्षे
पि जायंते आकाशे विहगादयः वनवीथिषु जायंते सिंहव्याघ्रमृगादयः ३१ प्राण्यंगेष्वपि जायंते विचित्राः ककुभं प्रति स्थावरेष्वपि
जायंते घुणजघनकादयः ३२ शिलांतरेषु जायंते कीटभेकघुणादयः विष्ठायामपि जायंते नानाकीटगणास्तथा ३३ एवमेतेषु संसारे
ष्वेषु जन्मक्षयप्रत्ययेषु च अजस्रं करुणाविनो नंदंतु प्ररुदंतु वा ३४ अनारतमनंतावस्मिन्नारतसमुद्भवो संसारसंभ्रमे युक्ता न तुष्टि र्न
च दुःखिता ३५ पंक्तयस्त्वेवमेवेमा वृक्षपर्णगणैः समाः उत्पद्यंते लीयंते भूतानां भरिसंभवाः ३६ (मंतो नरिक्षएव प्रसूयंते प्रसू

तं चांडमधः पातात्प्रागेवाभित्वा निर्गताः श्रावकाः सद्यः संजातपक्षा अंतरिक्ष एव सत्सभ्रमंतीति लोकप्रवादे प्रसिद्धं आदिपदात् तिशाचभूत
वेतालादयो ग्राह्याः ३१ प्राण्यंगेषु कृमियूकादयः ककुभं प्रति प्रतिदिशं घुणाः काष्ठकृमयः जघनकाः भ्रमरिकाकाणः काष्ठकीटाः आदि
पदात्तत्रफलपुष्पाद्युद्भवाः कृमिमत्राकभेदा गृह्यंते ३२ ३३ उपसंहृत्य प्रस्तुतं योजयति एवमिति नंदंतु प्ररुदंतु वेति द्वेषाभावात् परपीडा
भिनंदनामिवस्नेहाभावाद् रोदनमप्यनुचितमिमुपेक्षैव युक्तेति भावः ३४ उक्तमेवस्पष्टमाह अनारतेति भूतानां पंक्तयः समूहाः एवमेव वृ

यः दयावान्सन् कुबुद्धीनां दुःखमार्जने प्रवृत्तः सः नभः कृत्स्नमाकाशं स्वगतेन छत्रेण निर्मृष्टसूर्यांशुनिवारितातपं कर्तुं खिद्यते श्राम्यतीत्यर्थः खि
द्यतेनसः इति पाठे तु किं न खिद्यते इति काक्वा योज्यं ३७ ३८ स्फारमनसां विषयविस्तारितमनसां विशेषणं विशेषः ३९ उपलाः पाषाणा अपि प्ररु
दंतिकिं पुनः सचेतना इत्यतिशयोक्तिः ४० समंतात्सर्वदेशेषु सर्वदा च दुःखदाः दशाः पूर्णाः संतीति शेषः अतः कृत्स्नभूमिपांसुसंमार्जनव
दशक्यत्वान्न संप्रतिपद्यत इत्यर्थः ४१ सुविचार्याणि रत्नयोरभेदात्सुविचाल्यानि सुखनिरस्यानीत्यर्थः तेन हेतुना अत्र तन्मार्जने त्वत्तस्से यस्त

यः प्रवृत्तः कुबुद्धीनां दयावान्दुःखमार्जने स्वगतछत्रनिर्मृष्टसूर्यांशुः खिद्यते न भः ३७ न तिर्यक्समधर्माणस्तु पदेन्नूपानराभुवि कथार्थक
थनेनार्थकः स्थाणुनिकरैर्वने ३८ किं किल स्फारमनसां पश्नांच विशेषणं कृष्यंते पशवो रज्वा मनसा मूढचेतसः ३९ स्वचित्तपं
कमग्नानां स्वनाशारब्धकर्मणां मूर्खाणामापदं दृष्ट्वा प्ररुदंत्युपला अपि ४० अनिर्जितात्मचित्तानां समंताद्दुःखदा दशाः तन्मार्ज
नं कृत्स्न भूस्तोनातः संप्रतिपद्यते ४१ विनिर्जितात्मचित्तानां दुःखानि रघुनंदन ॥ सुविचार्याणि तेनात्र ज्ञानज्ञेयः प्रवर्ततां ४२ मनोनास्ति
महाबाहो मा मुधोपप्रकल्पय अनेन कल्पितेनत्वं वेताले नेव हन्यसे ४३ यावद्धि स्मृतवानात्मतत्त्वं मूढो भवद्भवान् तावत्तव मनोव्या
लो बभूवाभ्युदितस्ततः ४४ इदानीं भवता तात्त्वं यथाभूतमरिंदम संकल्पाद्दूरतश्चित्तं तदेवाशु परित्यज ४५ इदं रूपमाश्रयसीदं चेतस्त
चिंतासि बंधवान् इदं रूपं संत्यजसीदं चेतदचिंतोसि मोक्षवान् ४६ अयं गुणसमाहारो बंधायैव समाश्रितः संसक्तो भवमोक्षाय यथेच्छ
सि तथा कुरु ४७ नाहं नेदमिति ध्यायंस्तिष्ठत्वमचलाचलः अनंताकाशसंकाशाहृदयोहृदयेश्वरः ४८

((त्ववित् ४२ प्रासंगिकामाधिकारि चिं

तां समाप्य प्रस्तुतमेवानुवर्तमान आह मन इति ४३ यदि नास्ति न र्हि प्रतियोग्यप्रसिद्धौ निषेधानवकाशमाशंक्याह यावदिति तथा च प्राक्त
नीमज्ञदशामादाय प्रतिद्धिरुपपन्नेत्यर्थः ४४ यथाभूतं परमार्थात्मिरूपं ४५ बंधमोक्षरहस्यमाह इदं रूपमिति ४६ किं तर्हि इदं रूपत्वं तदाह
अयमिति त्रिगुणात्मकमायामय इत्यर्थः ४७ अहमिसां तरं इदं रूपमिति बाह्यं च नास्त्येवेति ध्यायन् अचलः पर्वत इवाचलः स्थिरः हृदयेश्वरः

अहमिदमितिद्वित्वमयीं कलनां अलं सर्वात्मिनात्यक्त्वेत्यर्थः ४९ ननु तदुभयकलनात्यागे किमिवशिष्यते यत्र स्थितिरुपदिश्यते तत्राह आत्मन इति
दृष्टृदृश्यदशायोरंतरे अंतराळे इत्येतावत्युक्ते वृत्तिज्ञानस्याप्यंतरालिकत्वात् दृक् एव स्यात्तन्माभूदिति आत्मयौनो जगतश्चांतरिति तथा च त्रिपु
ट्यनुस्यूतसन्मात्ररूपे दर्शनाख्ये त्रिपुटीसाक्षिस्वभावे स्थितं स्वं आत्मानं भावयन् भव आस्वचा सुषुप्ति त्रिपुटीवद्वासनादि त्रिपुटीष्वपि स एव तत्सा
क्षीपदस्यैव यत्ताश्रायेनाह स्वापेति पूर्ववद्योजना ५१ अनुमित्याद्यनुभावांतरेष्वप्येवं बोधमित्याशयेनाह रामेति निरालंबां आलंबो विषय
भूतस्त्रिपुट्यंतर्गतस्तद्व्यतिरिक्तं मध्यं तदंतरं तद्दयमध्ये अवलंब्य स्थिरो भवेत्यर्थः ५२ भवस्य भावनासंस्कारवशादृश्यं नं स्वप्नदशेति यावत् भाव

आत्मनो जगतश्चास्य त्वमंगकलनामलं राम द्वित्वमयीं त्यक्त्वा शेषस्थः सुस्थिरो भव ४९ आत्मनो जगतश्चांतर्दृष्टृदृश्यदशांतरे दर्श
नाख्यं स्वमात्मानं सर्वदा भावयन् भव ५० स्वाद्यस्वादकसंत्यक्तं स्वाद्यस्वादकमध्यगं स्वादनं केवलं ध्यायन् तिष्ठ मात्मभयो भुव ५१ रामा
नुभवनीयस्य तथानुभवितुः स्वयं अवलंब्य निरालंबं मध्यं मध्ये स्थिरो भव ५२ भवभावनया हीनं भावाभावदशोज्झितं भावयन्नेवमा
त्मानमात्मसंस्थः स्वयं भव ५३ आत्मसत्तां त्यजन्नेतां चेत्संभावयसि स्वयं यदा राम तदायासि चिंतनामतिदुःखदां ५४ चित्ततां शृंखलामेतां
स्वरूपज्ञानयुक्तितः बलाच्छित्वा महाबाहो स्वात्मसिंहं विमोचय ५५ परमात्मदशां त्यक्त्वा चेत्संपरिपतन्नलं यदा गच्छसि संकल्पं चेत्संसंपद्य
से तदा ५६ आत्मनो व्यतिरिक्तं सच्चित्तमित्संगसंविदा मनः संपद्यते दुःखि क्षीयते त्यक्तया तया ५७
॥ दृशा जाग्रत् अभावदशा सुषुप्तिः

भावाभावदशोज्झितमिति पाठे तु तदुभयदर्शनोज्झितमित्यर्थः ५३ एतां शुद्धचिन्मात्रस्वभावामात्मसत्तां प्रमादात्त्यजन् यदा चेत्संतदतिरि
क्तं भावयासि तदा चित्ततां यासीत्यन्वयः ५४ स्वरूपज्ञानयुक्तितः भंक्त्वेति शेषः चित्ताच्छित्तलक्षणाद्धि ला तत्पंजरात् बलादिति पाठे तु मननादि
कृतज्ञानदार्ढ्यबलात् ५५ संपद्यसे पद्यसि पदव्यत्ययश्छांदसः ५६ कथं चेत्संपरिपतनं तेन च कथं संकल्पगमनं कथं वा तत्संपन्नत्वदाह आ
त्मन इति हे अंग यदा चित्तपूर्वानुभवजनितदृश्यसंस्कारोद्बोधे सति चिदेवाकिं चित्त्वलोभमिवापन्नं चित्तमिति संविदा आत्मनो व्यतिरिक्तं सत्
सिद्धं भवतीति तदेव पुनः पुनर्मननात् दृढीभूतं संकल्पसमर्थं स तन्मनः संपद्यते तदेव दुःखि तया स्वव्यतिरिक्तसत्तासंविदात्यक्तया तु क्षीयते ५७

एतदेवस्पष्टमाहआत्मैवेदमिति संविदेवसंविदा भागुरिमतेनहलंताष्टप् तस्माउदितेसति चेतचितिनाउपहितश्चित्तमुपाधिः चेत्यंतद्व्याप्ति
व्याप्यंचेतनवृत्तिरिति चतुष्कमपिकिंनाकिंचिदवशिष्यतइत्यर्थः ५८ इतिएवमनुभूयमानदेहेंद्रियादिशालीजीवोस्मि ५९ आत्माब्रह्मैव
नजीवाख्याःब्रह्मेतराःसत्ताःपरमार्थसत्यःसंति ६० सर्वस्यजगतोब्रह्मभावेतदंतर्गतचित्तस्याप्यसत्ताअर्थात्संपन्नाभवत्येवेत्याह आत्मैवेदमि-
ति ६१ मनोनाशोपायमुक्तमुपसंहरतिएवमिति ६२ अथतत्फलान्याहमनःसर्पइत्यादिना योगात्समाधेःप्रतीचोब्रह्मैकलक्षणामिलना

आत्मैवेदंजगत्सर्वमित्यंतःसंविदोदये क्वचेताक्वचवाचित्तंकिंचेत्यंचेतनंचकिं ५८ अहमात्मेतिजीवोस्मीत्येतावच्चित्तकंविदुः अने-
नेत्थमनाद्यंतंदुःखंराघवतन्यते ५९ अहमात्मानजीवाख्याःसत्ताःसंतीतराःक्वचित् इत्येवचित्तोपशमःपरमंसुखमुच्यते ६० आत्मै-
वेदंजगदितिज्ञातेराघवनिश्चये असत्ताचेतसोजाताभवत्येवनसंशयः ६१ एवंसत्त्वावबोधेनस्वात्मैवेदमितिस्थितिः मनःसुगलितंवि-
द्धिसूर्यभासातमोयथा ६२ मनःसर्पःशरीरस्थोयावत्तावन्महद्भयं तस्मिन्नुत्सारितेयोगात्कुतस्त्यावसरःकुतः ६३ भ्रांतिमात्रोत्थि-
ताश्चित्त-वेतालोतिबलोनघ सम्यग्ज्ञानेनमंत्रेणप्रसभंविनिपात्यतां ६४ देहगेहाद्गतेचित्तयक्षेबलवतांवर निराधिर्विगतोद्वेगस्ति-
ष्ठनास्तिभयंतव ६५ नीरागएवनिरुपार्जनएवचास्मीत्येनावृत्तेवगलितानववित्तसत्ता निर्दुःखमुत्तमपदंपरमंगतोसि तिष्ठोपशांतप-
रमैषणएवमंतः ६६ मोक्षोपायेषूपशमप्रकरणेस्वचित्तनिरूपणंसर्गः १४ ५१५

((द्वितीयाद्वैभयंभवति एषएतस्मिन्नदृश्येऽनात्म्येऽनिलयने
अभयंप्रतिष्ठांविंदतेअथसोऽभयंगतोभवति आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनेत्यादिश्रुतेरितिभावः ६३ ६४ आधिःप्रहणंसर्वदुःखोप-
लक्षणं उद्वेगोदुःखासहिष्णुतयाव्याकुलता ६५ आत्मलाभेनावाप्तसर्वकामत्वान्नीरागःअतएवनिरुपार्जनःबाह्यसुखसाधनोपार्जन-
शून्यः एवंचमुमुक्षापिनपरिशिष्टेतिनतदर्थमपिप्रवृत्तिप्रसक्तिरित्याशयेनाहउपशांतपरमैषणइति ६६ इतिश्रीवासिष्ठतात्पर्यप्रकाशे
उपशमप्रकरणेस्वचित्तनिरूपणंनामचतुर्दशःसर्गः १४ ७ ॥

आत्मामनस्त्वमापन्नो बध्यते संसृतौ यथा सा तस्मानर्थबीजानां सविचित्रोपवर्ण्यते चित्तनाम्नानेपरमपुरुषार्थप्राप्तिरुक्ता इदानीं चित्तानु
सरणे तस्मा विपरीतात् अनर्थपरंपराप्राप्तिरिति दर्शयितुं भूमिकां रचयति रामेतामित्यादिना आत्माएतां चित्तसत्तामनुसरन् सन् त्यक्तस्वीय
ब्रह्मात्मरूपाभोगमलिनां अविद्यापिहितां इंद्रियकृत्स्नधीनाभिव्यक्तिकां दृष्ट्वा ज्ञानं आप तत् चित्तमेवानुरुध्य चित्तकल्पितं देहादिसंघात
मात्रोऽहमिति संधत्ते चित्तोपनीतनानाविषयकलनाप्रयुक्तरागद्वेषवासनामलमवधत्ते इति द्वयोरन्वयः १२ धत्तां नाम किं तत्रसत्त्राह वर्द्धमा
नेति मरणमूर्छाभ्रांतिसहस्रहेतुत्वात् विषलतारूपा तस्मा अस्मै कलनमलधारिणे आत्मने मूर्छामिव प्रयच्छति नसुखलेशमपीत्यर्थः ३ व

श्रीवसिष्ठ उवाच एतामनुसरन्नाम चित्तसत्तामपावनीं संसारबीजकणिकां जीवबंधनवागुरां १ आत्मात्यक्तात्मरूपाभोमलिनामा
पतद्दृष्ट्वा चित्तं समनुसंधत्ते धत्ते च कलनामलं २ वर्द्धमानमहामोहदायिनी भयकारिणी तस्मा विषवल्लीनारूपा मूर्छामिव प्रयच्छति
३ यदायदोदेति तदा महामोहप्रदायिनी तस्मात् कस्मान्निशं वेयं मनं तान्तमविकारिणी ४ कल्पानलशिखादाहं सोढुं शक्ताहराहयः
तस्मान्नलशिखादाहं सोढुं शक्ता न केचन ५ तीक्ष्णा कस्मात् सुदीर्घा वा वहं संगं सदा निजं शीतलेवासुखोदर्का घोरा तस्मात् कृपाणिका
६ यान्येतानि दुरंतानि दुर्जरानुन्नतानि च तस्मा वल्याः फलानीह तानि दुःखानि राघव ७ अरण्ये वातिमांसास्थिरुधिरादि शरीरका
न् मनो बिलविलीनैषा तस्मा वनश्वनीनश्यं ८ क्षणमुल्लासमायाति क्षणमायाति भस्मतां जडा विरलयत्यात्मा तस्मा प्रावृट् तरंगिणी

र्द्धमानमहामोहदायिनीत्येतद्विवृणोति यदेति कस्मान्निशं वार्षिकतमिस्रासापि हि अनंतात्मन्याकाशे मेघविस्फूर्जित तच्छ्यायानेकविकारिणी ४
भयकारिणीत्येतदपि विवृणोति कल्पानलेति न केचन धीरा इति शेषः ५ कृपाणिका असिः तीक्ष्णत्वाद्यसित्वोपपादनं निजं अंगं सदा वहंतिश्छंत
तीति यावत् असुखः उदर्कः फलकालो यस्याः ६ विषलतेत्येतद्विवृणोति दुर्जराणि जरयितुमशक्यानि दुर्निवाराणीति यावत् ७ श्वेन श्व
नीवृकी ८ क्षणमुल्लासं वृद्धिं विशेषणत्सुभयत्र योज्यानि जडा शीतभा मालिना च विरलयति मलिना चूलिलाकं कारणादिप्रदेशोनीता खं
डयति प्रावृट्तरंगिणी वर्षा वृद्धनदी ९ ७

वा॰रि॰उप॰
३३

मूर्छामिवप्रयच्छतीत्येतद्विवृणोति दृष्टदैन्यइति १० तस्मात्क्षयसर्वदुःखहानि सर्वपुण्योदयश्चसिध्यतीत्याह नास्तिनेत्यादिना ११ १३ अंधानां
विवेकदृष्टिहीनानां नराणां अप्राप्यश्रितं तत्त्वलक्षणे अरण्ये अनंतव्याकुलतालक्षणएककल्लोलवतीभ्रांतिलक्षणैरावर्तैश्चसंकुलात स्मान्नदी
नंतं प्रवहति १४ सूत्रेणायंत्र्यंते बध्यते इति सूत्रयंत्रः पतत्री पक्षी तद्वत् प्रथमं वित्तस्यार्जनाय भ्राम्यं नेन ततः रक्षणव्यये क्षयचिंताशोकैः
पक्षलुंचनैरिवप्रविशीर्यते अंतेच संछिद्यंते मार्यंते १५ धर्मज्ञानसत्त्वानि दयाविवेकादीनि सुसूक्ष्माणि ईषदंकुरितान्यपि कठिनेन निर्द

दृष्टदैन्योहतस्वांतोहतोजायातिनीचतां मुह्यते रौतिपतनितस्मयाभिहतोजनः १० नास्तिनाकोदरेयस्यतस्मात्कृष्णभुजंगमी तस्यप्रा
णानिलाः स्वस्थाः पुंसोल्पदरं ध्रयाः ११ न नमस्तं गतो यत्र तस्मात् कृष्णनिशाक्रमः पुण्यानि तत्र वर्द्धंते शुक्लपक्षइवेंदवः १२ योनत
स्मायुणावल्पास्ततः पुरुषपादपः पुण्यप्रसूनैः ससदादश्यांयाति विकाशितोनो १३ अनंताकुलकल्लोलाविवर्त्तावर्त्तसंकुला प्रवहत्या
शयारण्येतस्मांधानां नदीनराणां १४ तस्मायमे जनाः सर्वे सूत्रयंत्रपतत्रिवत् भ्राम्यंति प्रतिशीर्यंते संछिद्यंतेच भूरिशः १५ मूलान्य
पिसुसूक्ष्माणि कठिनाशयकर्कशः तस्मात्परशुधारेव वल्गांतीविनिकृंतती १६ निपतत्सर्वदेमूर्ध्नि तस्मात्मनुसरज्जनः नीलामनुपतं
छुभ्रतणाग्रखायथैणकः १७ नोन्मत्तापिजराचक्षुस्तथाजरयतिक्षणात् यथाजरयतिक्षामातस्मात्तद्दयरूपिका १८ तस्मयान्याप
कौशिकात्तद्यमंगलभूतया रूढया भगवानेष विष्णुर्वमिनतां गतः १९ कयाचिदेवदैविकात दिग्राध्येतयानया तस्मयाभ्राम्यते
योत्रिरज्जेवार्केन्विह किल २० सर्वदुःखमयाकारां जगदीं तोजीवनच्छिदं तस्मोपरिहरेत्क्रूरामुरगीमिव दूरगः २१ येनाशयेन कर्कशा

वल्गांतीनत कालं निपंति १६ अवटेनरकांधकूपेनीलां हरितां श्मश्रस्य कूपस्य मुखेरूढस्यतणस्य शाखां अनुपतन् एणको हरिण इव १७ उन्म
त्ताप्ररूढतामापि जराचक्षुर्जरयत्संधयति तद्देपस्थाद्रूपिकापिशाच १८ अमंगलभूतयात् हृदि रूढया कृतनोडया १९ दैविकादेवेनेष्व
रेणप्रयुक्तयादेवभोग्यसुखलवविषयपावात्तस्मयारज्जेच बद्ध इतिशेषः २० नगतीपदे नजगतीस्थाः सर्वप्राणिनोलक्ष्यंते २१ ७ ७

३३

सर्वसंसारस्थितिः तस्मात्त्वज्ञोदेवेत्याद्युपायेनाहंतस्मयेति २२ वरत्राचर्ममयीरज्जुः २३ संकल्पवर्जनमात्रेणाकथंतस्मात्त्यागासिद्धिरित्यत्राह
मनइति अकल्पनंसंकल्परहितंमनोनास्तिमनसोऽभावेकुतस्तस्मात्प्रसक्तिरितिभावः २४ (विषलतेत्येतद्विवृणोति दुर्जराणिजरयितुम)
(अशक्यानिदुर्निवाराणीतियावत् १० वनस्थ) त्वंअयंदेहोहमितिदुराशांसर्वदुरात्म्यानिमित्तमभिमासंकल्पय २५ २६ अनहंभावलक्षण
यास्यालोकयाकर्त्र्याअहंभावमयींएतांतस्मंगच्छित्वाहेभव्यभवस्यांतोबाधस्तद्भूमौब्रह्माणि सप्तभूमिकाभेदेवाभयैव आरत्वेत्यर्थः

तस्मयाभ्रांम्यै वायवोवांतिशैलास्तिष्ठंतितस्मया तक्षणयेवधरित्रीत्रैलोक्यंतस्मयाधृतं २२ सर्वैवलोकयात्रेयंप्रोतात्स्मावरत्रया
सुबंधाद्विमुच्यंतेतस्माबंधान्नकेचन तस्माद्राघवतस्मांत्वंसजसंकल्पवर्जनात् मनस्त्वकल्पनंनास्तिनिर्णीतमितियुक्तितः २४ अयं
त्वमहमित्येवप्रथमंतावदाश्राये मादुराश्रांममहाबाहोसंकल्पयतमोमयीं २५ एतांदुःखप्रसविनीमनात्मन्यात्मभावनां नभावय
सिचेद्राम तदात्तद्विषुगएपते २६ एतामहंभावमयीमपुण्यांछित्वानहंभावशलाकयैव स्वभावनांभव्यैभवांतभूमौभवाभिभूताखिल
ये
भूतभीतिः २७ मोक्षोपायेषुपशमप्रकरणेतस्माबर्णनंनामसर्गः ९५ श्रीरामउवाच स्वभावगंभीरमेतद्भगवन्वचनंतव यदहंकारतस्मां
त्वंमाग्रहाणेतिवाक्तिमां १ यद्यहंकारसंत्यागंकरोमितदिदंप्रभो त्यजामिदेहनामानंसन्निवेशमशेषतः २ जानुस्तंभेनमहताधार्यते
सुतरुर्यथा अहंकारेणदेहोयंतथैवकिलधार्यते ३ अहंकारक्षयेदेहःकिलावश्यंविनश्यति मूलेकृकचसंलूनेसुमहानिवपादपः ४ त
कथंसंत्यजाम्येनंजीवामिचकथंमुने एनमर्थंविनिश्चित्यवदमेवदतांवर ५ ९ २७ इतिश्रीवा० उपशमप्र० पंचदशांसर्गः ९५ वर्णितेवासनात्या

गोध्येयज्ञेयविभागतः तेनात्रजीवन्मुक्तानांविदेहानांचलक्षणं जीवतादेहअहंभावस्यत्यक्तमशक्यत्वाच्छिष्यमरणेगुरोस्तात्पर्ययोगादेतामहं
भावमयींतस्मांछित्वेत्याद्युक्तेस्तात्पर्यमनवधारयन्रामःपृच्छतिस्वभावेत्यादिना १ अशेषतइतिप्राणाहंकारयोरेकतापत्तेस्त्वयैवोक्तत्वा
त्प्राणत्यागरिशेषाहंकारत्यागासंभवात्प्राणानामप्यनवशेषणेनेत्यर्थः २ जानुस्तंभेनजानुवत्प्रसृतमूलबंधविष्टंभेन ३ तदेवव्यतिरेकेण
द्रढयति अहंकारेति ४ ५

वा॰रि॰उप॰
३५

ज्ञेयो विदुषां समाधिकाले विदेहकैवल्ये च ज्ञानबाधितः अधिष्ठानमात्रपरिशेषात् ध्येयः व्युत्थानकाले वाक्यजन्याखंडाकारवृत्त्या स वासनस्याज्ञानस्य बाधेऽपि जीवन्मुक्तिशास्त्रानुरोधात् प्रारब्धफलभोगशेषात् तन्निर्वाहाय बाधितानुवृत्तेरविद्यालेशपरिशेषस्य विक्षेपांशबाधस्य वाभ्युपगमादनुध्यस्ताहंभावेन देहेन भोगहेतुव्यवहारासिद्धेस्तात्कालिकाहंकाराभासानुवृत्तेर्विद्वदनुभवसिद्धत्वात् दृश्यायां तद्बाधानुसंधानस्य फलसाधकत्वेन ध्यानप्रायत्वात् ध्येय इव ध्येय इति द्विविध इत्यर्थः ६ तत्र द्वितीयमुपपादयति अहमिति विवेकिदृशान्नहेतो अहंप्रत्ययगोचरौ प्रतीयेते एकदेहेंद्रियबुद्धिमनःसापेक्षसंघातात्मा पुत्रमित्रकलत्रधनादिममतानिरूपकः अपरः अखंडैकरसभावोऽध्यस्ताव्ययमरणम् ऊर्जन्मांतरसाधारणश्चिन्मात्रस्वभावो विवेकपरिशिष्टः तत्राद्यस्य स्वरूपं प्रथमं विचार्य निह्नुयिमिसाह अहमिति ए

॥ श्रीवसिष्ठ उवाच सर्वत्र वासनात्यागो राम राजीवलोचन द्विविधः कथ्यते तज्ज्ञैर्ज्ञेयो ध्येयश्च मानद ६ अहमेषां पदार्थानामेते च मम जीवितं नाहमेभिर्विना कश्चिन्न मयैते विना किल ७ इत्यंतर्निश्चयं कृत्वा विचार्य मनसा सह नाहं पदार्थस्य न मे पदार्थ इति भाविते ८ अंतःशीतलया बुद्ध्या कुर्वतो लीलया क्रिया यो नूनं वासनात्यागो ध्येयो राम स कीर्तितः ९ सर्वं समतया बुद्ध्या यं कृत्वा वासनाक्षयं जहाति निर्ममो देहं ज्ञेयोऽसौ वासनाक्षयः १०

एषां देहेंद्रियादीनां वास्त्रान्नपानादीनां चोपभुक्तानां पदार्थानां संघातात्मेत्यर्थः एते देहादयोऽन्नादयश्च मम जीवितं स्वरूपसिद्धौ मित्तं अत एव एभिर्विना अहं न कश्चिद्व्यवहारपदे त्रसिद्धोऽस्मि इति अंतः प्रथमस्याहंपदार्थस्य निश्चयं कृत्वा मनसा सह पृथक्करणे संघातात्मानमत्यंतासद्रूपमेव विचार्य द्वितीये परिशिष्टे चिद्रूपे नाहंपदार्थस्य न मे एते पदार्था इति निष्कृष्टबोधेन तथैव भाविते सति यो भावनात्यागः स ध्येय इति मया कीर्तित इति त्रयाणामर्थः ७ ८ ९ प्रथमं वासनाक्षयमुपपादयति सर्वमिति सर्वं जगत्समतया समं ब्रह्म तद्भावेन बुद्ध्या साक्षात्कृत्य अभ्यासक्रमेण यं वासनाक्षयं कृत्वा निर्ममो निरहंकारश्च निर्विकल्पकसमाधिस्थः प्रारब्धक्षये नवाय यत्ते वर्षा देहं जहाति असौ ज्ञेयो वासनाक्षय इत्यर्थः १०

नि

३५

तत्र द्वितीयमुदाहरति अहंकारेति लीलया लोकसंग्रहो चित व्यवहारेण यस्तिष्ठति सं ध्येयसंत्यागी ध्येयवासनात्यागवान् ११ आद्यमुदाहरति निर्मलेति मलेनाज्ञानेन सह कलनां तत्कृतं स्वयं त्यजति अर्थः ते ये त्यागमयं ज्ञानबाधितवासना ज्ञानपरिशिष्टचिन्मात्रप्रधानं १२ तक्रमेव प्रपंचयति ध्येयामित्यादिना लीलया व्यवहारेण १३ १४ अप्यर्थ एवकारः १५ युक्तमतिः समाधिमारूढः अयुक्तमतिर्व्युत्थानव्यवहारवान् एतौ युक्तायुक्तमती द्वावपि सुखेन आस्पते चिरं रम्यते आस्मिन्निति निवासे विमले अविद्यामलनिर्मुक्ते ब्रह्मण्येव केवलोऽस्थितो कलातीते विशेषतमा

अहंकारमयीं त्यक्त्वा वासनां लीलयैव यः तिष्ठति ध्येयसंत्यागी स जीवन्मुक्त उच्यते ११ निर्मलकलनां त्यक्त्वा वासनां यः शममंगतः ध्येयं त्यागमयं विद्धि मुक्तं तं रघुनंदन १२ ध्येयं त्वं वासनात्यागं कृत्वा तिष्ठति लीलया जीवन्मुक्तो महात्मानः सुजनाजनकादयः १३ ते ये तु वासनात्यागं कृत्वोपशममागताः विदेहमुक्तास्तिष्ठंति त्रिब्रह्मण्येव परावरे १५ द्वावेतौ त्यागौ समौ मुक्तपदे स्थितौ द्वावेतौ ब्रह्मतां यातौ द्वावेतौ विगतज्वरौ १५ युक्तायुक्तमती स्वात्मे केवलं विमलेऽनघे एकः स्थितः स्फुरद्देहः शांतदेहः स्थितोऽपरः १६ एकः सदेहो निर्मुक्तो लिप्स्यपगतज्वरः त्यक्तदेहो विमुक्तोऽन्यो वर्तते ह्येयवासनः १७ आपतत्सु यथाकालं सुखदुःखेष्वनारतं नलपत्यतिग्लायति यः स मुक्त इति होच्यते १८ ईप्सितानीप्सिते नस्तो यस्यैवान्तर्वत्तिषु सुषुप्तवद्यश्चरति यः स मुक्त इति कथ्यते १९ हेयोपादेयकलने मममेत्यहमिहेति च यस्यांतः संपरिक्षीणे स जीवन्मुक्त उच्यते २० हर्षामर्षभयक्रोधकामकार्पण्यदृष्टिभिः न परामृश्यते यांतः स जीवन्मुक्त उच्यते २१ सुषुप्तवत्प्रशामितभावटत्तिना स्थितं सदा जाग्रति येन चेतसा कलान्वितो विधुरिव यः सदा बुधैर्निषेव्यते मुक्त इतीह सस्मृतः २२ १ इह एकाकी इति एको व्युत्थितः अपरः समाहितः १६ अतएव वासनत्रुतिछेदः १७ अवहार तो मुक्तस्य लक्षणमाह आपतत्स्वित्यादिना १८ ईप्सितानीप्सिते इष्टद्वेषौ अंतःस्थितवैषयेनसंमतेषु च वस्तुषु सुषुप्तवदनासक्त इति यावत् १९ इहदेहे तत्संबंधिनि च अहं मम मेति च कलनेत्यादि योजना २०-२१ येन युक्तात्सुषुप्तवत्प्रशामिताः भावटत्तयः पदार्थवासना यस्य तथा विधेन चेतसोपलक्षितेन जाग्रति जागरेऽपि सदास्थितः भावेऽक्तः यश्च सदा मुदा

स्वाभाविकहर्षेण कलान्वितः पूर्णकलो विधुश्चंद्र इव प्रसादेनाविष्वग्भूतेन सह इह जगति मुक्तो जीवन्मुक्त इति स्मृत इत्यर्थः २२

२३ इति वासिष्ठतात्पर्यप्रकाशे उ० षोडशः सर्गः १६ माहात्म्यैर्निश्चयैर्युक्तो जीवन्मुक्तो न बध्यते अतश्च बध्यते भूयस्तद्विभागोत्र वर्ण्यते रा
मस्येति । गिते विदेहमुक्तलक्षणजिज्ञासां प्रतिलक्ष्य तस्यैकरूपेण लक्षणाद्यभावाच्चाकुंठीभाववत्त्वैवनिरतिशयस्वप्रभाशाभमानंदमात्र
परिशेषत्वं तत्स्वरूपलक्षणमिति सूचयन् जीवन्मुक्तिलक्षणे एवावश्योपादेयान्विशेषान्वक्तुं प्रतिजानीते विदेहमुक्ता इति १ ननु तर्हि जीवन्मु
क्तानां तत्तद्वर्णाश्रमोचितकर्मफलतृष्णाप्राप्त्यास्ति तर्हि अतत्ववदेव तद्भोगाय पुनर्देहबंधोपि स्यात् यदि नास्ति नहि प्रवृत्तिरेव न स्यात् प्रयोजन
मनुद्दिश्य न मंदोपि प्रवर्तत इति न्यायादिति दोषं परिहर्तुं तत्तयोः प्रवर्तकस्तुच्छाशुद्धत्वं तृष्णावैलक्षण्यमुपपादयितुमुपक्रमते प्राकृतान्येवे

श्रीवाल्मीकिरुवाच इत्युक्तवत्यथमुनौ दिवसो जगाम सायंतनाय विधयेस्तमिनो जगाम स्नातुं सभा कृतनमस्करणा जगाम श्यामाक्षये
रविकरैश्च सहाजगाम २३ दिवस ११ मोक्षोपाये मुमुक्षुचिकित्सा नाम सर्गः १६ श्रीवसिष्ठ उवाच विदेहमुक्ता ये राम ते गिरामिह गोचरे
नैव तिष्ठंति तस्मात्त्वं जीवन्मुक्तिमिमां शृणु १ प्राकृतान्येव कार्याणि यथा वर्जितवांछया क्रियंते तृष्णयैमानि तां जीवन्मुक्ततां विदुः २ यात्स्थि
तिस्तृष्णया जंतोर्बाह्यार्थविद्भावया तं बंधमाहुराचार्याः संसारनिगडो दृढः ३ नूनमुज्झितसंकल्पात् दिबाह्ये विहारिणी वासना या हिता
सेह जीवन्मुक्तशरीरिणी ४ बाह्यार्थव्यसनोच्छूनात् तृष्णाबद्धेति राघव सर्वार्थव्यसनोन्मुक्ता तृष्णामुक्तेति कथ्यते ५ पूर्वं यस्यास्तु तृष्णाया
वर्तमानेपि शाश्वती निर्दुःखता निष्कलंकता सो मुक्त इति बुधैः स्मृता ६ इदमस्तु ममैतं तस्यैषा राघव भावना तां तृष्णां शृंखलां विद्धि कलनां
च महामते ७ तामेतां सर्वभावेषु सत्स्वसत्सु च सर्वदा संत्यज्य परमोदारः परमेति महामनाः ८

१ इत्यादिना प्राकृतानीति तत्तद्वर्णाश्रमस्वभाव
प्रापितानि वांछापि विषयास्वादनोत्साहः २ बहुदुःखोत्साहदृढीकृतो भावः सारसत्यताबुद्ध्या भोगोत्साहो येया ३ भोग्यवर्गाणामनंतत्वनिश्चये
नतु दिनुज्झितभोगसंकल्पा बाह्ये लोकसंग्रहमात्रप्रयोजनेन विहारिणी वासना तृष्णा जीवन्मुक्तानां शरीरमात्राश्रितेत्यर्थः ४ उक्तलक्षणे एव
तृष्णे प्रपंचयिष्यन् पिंडीकृत्याह बाह्येति व्यसनं व्यापद्यं ५ पूर्वं विषयप्राप्तेः प्राक्कालो विषयनाशोत्तरकालस्याप्युपलक्षणमेतत् निर्दुः

भावेपि द्वैताश्रयणे ऐकात्म्यक्षतिरित्याह भवेत्विति स्यातैरज्जुभ्रमनिमित्तैः पूर्णसुदरी ग्रहणेन गर्तालिप्यते तथा च संसारगर्तपातनरावतन्त्र क्षति
रिति भावः ३० सत्त्वाद्वैतमुक्तमुपादयति द्वैतमिति द्वैतं परमार्थसत्वं न संभवतीयतस्तत् चित्तमयं चित्तकल्पितमेव न वस्तु स्पर्शी परस्प
रापेक्षाबुद्धिजन्यत्वाभ्युपगमात्तन्नाशेनाशाभ्युपगमाच्च एवमात्मन्यैकमेकत्वाख्यसंख्यागुणोपि न संभवतीयतस्तदपि द्वित्वादिव्यावर्त्त
कत्वेनैव कल्पितत्वाद्वितयादेवत्र दित आत्मा स्वरूपं यस्य तथाभूतं अतः अद्वैतं ऐके न च रहितं तत्स्वसिद्धावप्यन्यानिरपेक्षत्वात्सततोदि
तं तन्मन्मात्रं ब्रह्म एकेन निरासात्सर्वं द्वैतनिरासान्न किंचिदपीत्यतस्मात्तत्सर्वमभवत् नेह नानास्ति किंचनेत्यादिश्रुतयस्तदनुभवितृ

भवभूमिषु भीमासु भावभावनवासया मापतेस्यात पूर्णसुदरीधृतः कर्यथा ३० द्वैतं न संभवति चित्तमयं महात्मन्नात्मन्यथै
क्यमपि न द्वितयोदितात्मा अद्वैतमैक्यरहितं सततोदितं सत्सर्वं न किंचिदपि चाकुरतः स्वरूपं ३१ नैवाहमस्मि न च नाम जगंति सं
ति सर्वं च विद्यत इदं ननु निर्विकारं विज्ञानमात्रमचभासत एव शांतं नासन्न सज्जगदिदं च सदेति विद्धि ३२ परमममृतमनाद्यं भास
नं सर्वभासामजरमजमचिंत्यं निष्कलं निर्विकारं विगतकरणजालं जीवनं जीवनानां सकलकलनहीनं कारणं कारणानां ३३
सततमुदितमीड्यं व्याततेचित्प्रकाशं स्थितमनुभवबीजं स्वात्मभावोपदेश्यं स्वहृदमनुचितांतब्रह्मसर्वैसदैव त्वमहमपि जगच्चे
त्यस्तु ते निश्चयोंतः ३४ मोक्षोपायेषूपशमप्रकरणे तत्स्माविच्छेदोपदेशो नाम सर्गः ९७ (श्लक्ष्णया आतुरित्यर्थः ३१ अहं इ

ति युष्मदात्म प्रविभक्तरूपं नैवास्ति अस्मदर्थं प्रविभक्तरूपाणि युष्मदादि जगंति च न संति किंतु सर्वं इदं निर्विकारं विज्ञानमात्रमेव विद्यते
न च भासमानस्तत्साक्षात्कारमात्रतः शांतं इदं तु जगत्सत् नासत् न सच्चेति विद्धीत्यर्थः ३२ पुनस्तन्निश्चयमेव दृढमाशंसापि संपाद
यति परमिति द्वाभ्यां जीवनाकेः प्राणस्य जीवनं प्राणन व्यवहारनिमित्तं प्राणस्य प्राणमित्यादिश्रुतेः ३३ अनुभवानां चाक्षुषादीनां बी
जं मूलभूतं स्वात्मभावः स्वस्वरूपावस्थितिस्तेन दृशामस्त्वमसीति वच्छब्दापरोक्षापादनेनोपदेश्यं अतः स्वदनमोनरानंदैकरसं ब्रह्मैव त्वं अ
हं जगच्च न ततोन्यदस्तीति अनुस्मस चित्त उपचितो निश्चयस्तेनं तरालिस्मा नीरुपदेशाश्च ३४ इति वा० उपशमप्रकरणे सप्तदशः सर्गः ९७

वा॰टि॰उप॰
३७

यथास्थितमास्थितो विद्वान्संसारे नावसीदति इति सास्थितिर्विस्तरेणात्र राघवायोपदिश्यते युक्ताचारयाणां समाहितमनसां काममलोभादिकु
दृष्टिभिरहतानां अदूषितानां अयं वक्ष्यमाणप्रकारः स्वभावः स्थितिः श्रूयतामिति शेषः १ आदौ जन्मादिदुःखैर्मध्ये आध्यात्मिका
दिदुःखैरंते मृत्युनरकादिदुःखैर्विरसः विहसेत् हासं योगप्रतया तुच्छीकुर्यादपत्रपेत् २ सर्वेषु कृतेषु तत्कालप्रसक्तेषु कार्येषु अनुचिता
चरणेषु तिष्ठतीति तत्स्थः सर्वसुहृच्छत्रुमित्रादिदृष्टिषु मध्यस्थः समः तं तं तयोर्ध्येयमध्येयेति द्विविधवर्णितवासनात्यागयोर्मध्ये ध्येयं वास
नात्यागमालंब्येत्यर्थः ३ सर्वेषामर्थस्याभिमतस्य परिपोषकः न कस्यचिदप्रियकारी प्रबोधलक्षणेनोपवनेस्थितिर्यस्य ४ ५ समः शान्तो

श्रीवसिष्ठ उवाच युक्ताचारयाणां महतामहतानां कुदृष्टिभिः स्वभावोयं महाबाहो लीलया चरतामिह १ विहरन्नपि संसारे जीवन्मु
क्तमना मुनिः आदिमध्यान्तविरसा विहसेच्छागतागतीः २ सर्वप्रकृतकार्यस्थो मध्यस्थः सर्वदृष्टिषु ध्येयं तं वासनात्यागमवलं
ब्य व्यवस्थितः ३ सर्वत्र विगतोद्वेगः सर्वार्थपरिपोषकः विवेकोद्यानदृष्टात्मा प्रबोधोपवनस्थितिः ४ सर्वातीतपदालंबी पूर्णे
न्दुशिशिराशयः नोद्वेगी न च तुष्टात्मा संसारे नावसीदति ५ सर्वशत्रुषु मध्यस्थो दयादाक्षिण्यसंयुतः प्राप्तकर्मकरोग्राणां सं
सारे नावसीदति ६ नाभिनन्दति न द्वेष्टि न शोचति न कांक्षति मौनस्थः प्रकृतारंभी संसारे नावसीदति ७ पृष्टः सन्प्रकृतं वक्ति न
पृष्टः स्थाणुवत्स्थितः ईहितानीहितैर्मुक्तः संसारे नावसीदति ८ सर्वस्याभिमतं वक्ता चोदितः पेशलोक्तिमान् आशयज्ञश्च भूता
नां संसारे नावसीदति ९ युक्तायुक्तदृशा ग्रस्तमात्रोपहतचेष्टितं जानाति लोकदृष्टान्तं करकोटरबिल्ववत् १० (चामित्रे चेतिपाठः

३०

स्पष्टः अग्र्याणां गुरुप्रभृतीनां समयोचितप्राप्तसेवापरिपालनादिकर्मकरः ६ मौनस्थो मितभाषी प्रकृतारंभी आवश्यककार्येष्वनलसः
७ नरे वा हपृष्टश्चेति ८ अभिमतं प्रियवक्ता चोदितः आक्षिप्तः पेशलोक्तिमान् चतुरं समाधानं ९ इदं युक्तमिदमयुक्तमिति वैषम्यदृष्ट्या जानाति अ
पक्षपातितया पश्यति अत एव करकोटरः करतलगर्तस्तत्र प्रतिष्ठितबिल्वफलवत्स्पष्टमित्युक्तं एकतरपक्षपाते तु तत्पक्षदोषाः अपरपक्षग
तगुणाश्च रागद्वेषविहितत्वान्न स्पष्टं भासंत इति १०

बध्नंतीतिबंधोदेहादयस्तदाज्ञां मोक्षस्तन्निवृत्तिस्तदाज्ञांबंधमिथ्यात्वनिश्चयेनतन्निवृत्तेरनाज्ञास्यत्वान्नहिजागरूकःस्वाप्ननिगडबं
धमोक्षमाशास्त इतिभावःसुखदुःखदज्ञानामपिमिथ्यात्वनिश्चयएवात्रतपणः ९ १० आत्मात्यागेऽन्वयमाहपदार्थेति इदंदृश्यपदा
र्थरूपंनेतत्वनत्वमपिननतस्मात्परमार्थसत्तादन्यादेवकिंचित्तुच्छमित्यर्थः १२ हेराम अन्यद्वक्ष्यमाणंचतुर्विधं निश्चयभेदंशृणुवाति
तिद्रोषः तमेवाहमनसीति १३ १४ सर्वेभ्योदेहेंद्रियादिभेदेभ्योऽतीतःअतिरिक्तःतनुःसूक्ष्मःसूक्ष्मोल्परहितइतियावत् त्वंपदार्थशोध
विधयास्यमोक्षहेतुत्वं १५ तृतीयइतिअस्याध्यात्मिकपरिछिन्नात्मनाम्नमनिवृत्त्यानतत्पदार्थेनसहैकबोधनसंभवान्मोक्षोपयो

बंधायज्ञामथमोक्षायज्ञांसुखदुःखदज्ञामपि सत्कासदसद्वाज्ञांचतिष्ठाक्षुब्धमहाब्धिवत् ९ अजरामरमात्मानंबुध्वाबुद्धिमतां
वर जरामरणवृत्तांकाभिर्ममिनःकलुषंकृथाः १० पदार्थतत्वंनेदंतेनायंत्वमासिराघव किंचित्तदन्यद्देवेदमन्यएवासिराघव ११
असदभ्युदितेविश्वेसतीवासतिसंस्थिते त्वयिननामतिगतेतत्क्षमायाःसंभवःकुतः १२ अन्यच्चरामममनसिपुरुषस्याविचारिणः जा
यतेनिश्चयःसाधोस्फाराकारश्चतुर्विधः १३ आपदमस्तकमहंमातापितृविनिर्मितः इत्येकोनिश्चयोरामबंधायासद्विलोकना
त् १४ अतीतःसर्वभावेभ्योबालाग्रादप्यहंतनुः इतिद्वितीयोमोक्षायनिश्चयोजायतेसतां १५ जगज्जालपदार्थात्मासर्वमेवाहम
क्षयः तृतीयोनिश्चयश्चेत्थंमोक्षएवरघूद्वह १६ अहंजगद्वासकलंशून्यंव्योमसमंसदा एवमेषचतुर्थोन्योनिश्चयोमोक्षसिद्
ये १७ निश्चयेषुचतुर्थेषुबंधायप्रथमःस्मृतः त्रयोमोक्षायकथिताःशुद्धभावनयोत्थिता १८ एतेषांप्रथमःप्रोक्तःस्वेच्छयावं
धयोग्यया शुद्धस्तृष्णास्त्रयःस्वस्थाजीवन्मुक्ताविलासिनः १९ सर्वमात्मैवहि नेनानास्तीति हमेवेतिनिश्चयोयमहामते तमादायविष

गः १६ अहमित्याध्यात्मिकपरिछेदोपाधिः जगदिति आधिदैविकाद्युपाधिःसदाकलत्रयेपि एषःसर्वदृश्यबाधात्मनिश्चयः १७ १८ तस्मा
भेदनिरूपणेऽस्याविभागस्यकाप्रसक्तिस्तत्राहएतेषामिति अस्मिन्सतेवत्तृष्णायाबंधकत्वादयमेवबंधहेतुरित्यर्थः शुद्धानिर्दोषात्तृष्णा
येषुतेशुद्धतृष्णाः उत्तरेत्रयोनिश्चयाः १९ तत्रतृतीयस्यप्रयोजनमाहसर्वमिति २० ॥श्रीरामायनमः॥साराखतव्याकरए श्रीरामायनमः

वा.रि.उप.
३६

चतुर्थस्य श्रुत्यवादिमतप्रविष्टतां वारयन्नाह २१ श्रुत्यामितिपरिशिष्टात्मैव वादिभिः श्रुत्यादिशब्दैः कथ्यते नावास्तित्यर्थः २२ विद्य
यापरमार्थस्वरूपद्रष्ट्या जगद्व्याप्य संप्रसृतं द्वैतरयापूर्वं वर्तुतीतिधियाना २३ यथा अनंतात्मा अपरिछेद्यपरिणाहो अंभोधिरा पातालमंबु
भिः पूरितस्तथेत्यर्थः २४ अस्तापूर्णो किं तत्तस्तत्राह अत इति अतस्सतं प्रमाणबोधितं ब्रह्मैकमेव विनित्यं सत्यं नव्यतिरेकेण अनन्तं जग
द्रूपं नविद्यत इति सिद्धमित्यर्थः २५ कांचनात् न पृथक् आत्मनः पृथिव्यात्मनः सकाशान्नभिन्ना २६ कथं तर्हि जलसमुद्रादौ जगति भेदः
भेदप्रत्ययस्तत्राह द्वैताद्वैतेति अद्वैतापरमा सामर्थ्यशक्ति ब्रह्मैव सैवाज्ञानं प्रति द्वैताद्वैतसमुद्रे द्वैर्विजृंभत इत्यर्थः २७ अस्त्वेवं किंनत

तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमात्मनः सर्वमात्मेति तेनांतर्निश्चयेन नबध्यते २१ श्रुत्यंतस्य कृतिर्मायाब्रह्मविज्ञानामित्यपि शि
वःपुरुषईशानोनित्यआत्मैवकथ्यते २२ सदासर्वं सदेवेदं नेह द्वितास्यते कश्चित् विद्यते विद्ययाव्याप्तं जगन्नेतरयाधिया २३ आपा
तालमनंतात्मा परितोभोधिरंबुभिः आब्रह्मस्तंबपर्यंतं जगद्व्याप्तं पूर्णमात्मना २४ अतः सत्यमनंतं नित्यं नान्यत्तं विद्यते कश्चित् वार्यं
वसकलंभोधिर्नतरंगादयः क्वचित् २५ पृथक्कटककेयूरनूपुरादिनकांचनात् भिन्नालरुतणाकारकोटयश्चैवनात्मनः २६
द्वैताद्वैतसमुद्रे द्वैर्जगन्निर्माणलीलया परमात्ममयीशक्तिरद्वैतैवविजृंभते २७ आत्मीयेपरकीयेचसर्वस्मिन्नेवसर्वदानवैवो
पचितेकार्ये सुखदुःखेग्रहाणमा २८ भावाद्वैतमुपाश्रित्यसत्ताद्वैतमयात्मकः कर्माद्वैतमनादृत्य द्वैताद्वैतमयोभव २९ श्रीराम

स्तत्राह आत्मीय इति स्वीये परकीये पुत्रमित्रादौ सर्वस्मिन्जगति चउपचिते नष्टे वा सुखदुःखे अभिन्नत्वं मा गृहाण इत्यर्थः २८ कथं त
र्हि मया व्यवहर्तव्यमिति चेद्बुद्धैव द्वैताद्वैतालंबने नैव नितांतं भज्याह भावाद्वैतमिति ब्रह्मैव इदं चलं परमार्थतः सत्ताद्वैतमयात्मक ए
वसन् व्यवहारकालेपि भावनया अद्वैतमेवापाश्रित्य सततं त्वं प्राणिकर्मफलदाने ब्रह्मैव वर्णाश्रमधर्मव्यवस्थापनकर्मविषयं अद्वैतं सर्वं
थैतैः सर्वैवानादृत्य व्यवहरन् यथोचितं द्वैताद्वैतोभयपरो भवेत्यर्थः अद्वैते कर्मणामेवासिद्धेरेकरूपे एस सर्वत्र कथंचिदद्वैताचरणे

जगद्व्यवस्थाधर्मशास्त्रादिबाधप्रसंगाच्चनत्वद्वैता
श्रयणमेवोचितामिति भावः २९

३६

अत एवैषम्यद्दर्शनादेः फलमपि जनानां हसन्निव ताटस्थ्यो नैव परपतीत्याह परमिति ११ उपसंहरति जितेति १२ मुक्ताछितिरिव बद्ध छितिरपि तदाशयो द्वार नेनवर्ण्यतामिति चेन्न सर्वमनोरथभ्रांतीनां तत्प्रयुक्तदुश्चेष्टानानलैकलदुःखवैचित्र्याणां चानंतानां न्तसावर्णयितुं शक्योत्साशयेनाह वयमिति चतुर्भिः १ तेषां मूर्खाणांनार्याः स्त्रियः अभिमताः अभिलषिताः याः भावानां विवेकबुद्धीनां अत्यंताभावैः सर्वसंचितसुकृतानां प्रध्वंसाभावैः संभावितसुकृततपः संयमादीनां प्रागभावपरिपालनैश्च विभूषिताः आपादमस्तकमलंकृताः

परं पदमुपारूढोभंगुरं जागतीं स्थितिं अंतः शीतलया बुध्या हसन्निव निरीक्षते ११ जितचित्ता महात्मानो येहि दृष्टपरावराः स्वभाव ईदृशास्तेषां कथितस्तव राघव १२ वयं तु वक्तुं मूर्खाणां अजितात्मीयचेतसां भोगकर्दममग्नानां नविद्मोभिमतं मतं १३ तेषामभिमता नार्यो भावाभावविभूषिताः ज्वालानरकवन्हीनां याताः कनकरोचिषः १४ अनर्थगहनाश्चार्थाव्यर्थानर्थकरर्थिनादिदांतोदुःखसंरंभमभितः प्रदितापदः १५ फलसंधीनि कर्माणि नानाचारमयानि च सुखदुःखावपूर्णानि तानि वक्तुं न शक्नुमः १६ पूर्णां दृष्टिमवष्टभ्य ध्येयत्यागविलासिनीं जीवन्मुक्ततया स्वस्थो लोके विहरराघव १७ अंतः संत्यक्तसर्वाशो वीतरागो विवासनः बहिः सर्वसमाचारो लोके विहरराघवः १८ उदारः पेशलाचारः सर्वाचारानुवृत्तिमान् अंतः सर्वपरित्यागो लोके विहरराघव १९ प्रक्षिप्ता

अत एव नरकवन्हीनां कनकसमानरोचिषो ज्वाला एवेत्यर्थः १४ तथा मूर्खाणामभिलषिताः अर्थाधनानि ते च अनर्थगहनाः अर्जने पालने व्ययेनाशे च वव्हायासाधर्मरात्रिनिमित्तभूताः वृथाः अनर्थप्रयोजककलहवैरादिसकर्मचरणे सिद्धेर्निस्तारः स्यात् नेत्याह फलसंधीनीति यानि मूर्खाणां यत्तादिकर्माणि तान्यपि फलाभिसंधियुक्तान्येव न निरभिसंधीनी नानाविधैः दंभमानमदमात्सर्याद्याचारैश्च प्रचुराणि अतएव पुनर्जन्मादिप्रयुक्तसुखदुःखैरवपूर्णानीति मूर्खाणां किंचिदपि निस्तारनिमित्तं वक्तुं न शक्नुम इत्यर्थः १६ अतस्त्वामपि विद्वच्चरित्रेणैव विहर नान्येनेत्याह पूर्णामित्यादिना १७ १९ सर्वेषां अज्ञानामपि कर्माद्याचारेषु अनुवृत्तिमान् नबुद्धिभेदं जनये

सर्वाः संसारदृष्टयः परमार्थस्वरूपा बहिर्भूमिकाभेददृष्टयः १९ आगतोन्मुखानामिव हितानि चेष्टा यस्य सर्वात्मनानेराद्रपप
कर्णे धनामित्रादि संग्रहत्यागाद्वाज्यपरिपालनादिव्यवहारेतिभावः अत एव धनादिनाशो बहिस्तस्य इव तप्तः अंतस्तु आशीतः सर्वतः शी
तलः २१ २२ अंतरं व्यवहारतः परमार्थश्च सारासारतारतम्यः अतः सद्व्यवहारे अनिसर्गस्तिवेत्याह यथेछसीति २३ २४ चंद्रस्करात्राव हमे

मविचार्य दृष्ट्याः सर्वा यदितु छंपरंपरं तदेवभावेनालंब्य लोके विहर राघव १९ अंतर्नैराश्यमादाय बहिराशोन्मुखो हितः बहिस्तप्तो
तरो शीतो लोके विहर राघव २१ बहिः कृत्रिमसंरंभो हृदिसंरंभवर्जितः कर्ता बहिरकर्तांतर्लोके विहर राघव २२ ज्ञात्वा तु वानसि सर्वेषां
भावानां सम्यगंतरं यथेछसि तथा दृष्ट्या लोके विहर राघव २३ कृत्रिमो त्वासह र्षस्थः कृत्रिमो द्वेगगर्हणः कृत्रिमारंभसंरंभो लो
के विहर राघव २४ त्यक्ताहंकृतिराश्वस्तमतिराकाशशोभनः अगृहीतकलंकांको लोके विहर राघव २५ आशापाशशतोन्मुक्तः
समः सर्वासु वृत्तिषु बहिः प्रकृतिकार्यस्थो लोके विहर राघव २६ न बंधोस्ति न मोक्षोस्ति देहिनः परमार्थतः मिथ्यैवायमिंद्रजा
लश्रीः संसारपरिवर्तिनी २७ भ्रांतिमात्रमिदं मोहाज्जगद्राघव दृश्यते अनितं प्रत्ययस्फारं जलेनीवातपेपया २८ अबद्धस्यैकरू
पस्य सर्वगः स्यात्मनः कथं बंधः स्यात्तदभावे तु मोक्षः कस्य विधीयते २९ अतत्त्वज्ञानजाते यं संसारभ्रांतिरातता तत्त्वज्ञानात्क्षयं या
ति रज्ज्वामिव भुजंगधीः ३० ज्ञातवानसि तत्त्वं त्वमेकयासूक्ष्मया धिया आत्तोसि निरहंकारो व्योमवत्तिष्ठ निर्मलः ३१ नोसि बलित्यंतदाखि
लाः सुहृद्बांधववासनाः संत्यजासत्त्वभावस्य कानाम किल भावना ३२ ऐवप्रकाशकरतिरहीताहंकृतिः स्वपरोगित्वाद्रनाश्वस्तमतिः गृही

तकलंकलांछनश्वत्वं तु न तथेति व्यतिरेकः २४ प्रकृतिस्तत्तद्वर्णाश्रमस्वभावस्तदुचितकार्यस्थः प्रजाहितकार्यस्थो वा २६ समः सर्वासु वृत्तिषु वि
तियुद्धकेन द्वंधमोक्षादि वैषम्यप्रतिषेधेनोपपादयति न बंध इत्यादि २७ जलं मृगतृष्णोदकं २८ कुतो न बंधोस्ति तत्र युक्तिमाह अबद्धस्येति
असंगस्येत्यर्थः विधीयते यत्नेन संपाद्यते २९ तर्हि किं तत्त्वज्ञानं मर्थनेत्याह अतत्त्वेति ३० ३१ नासाक्ष्यासि ततस्तात्कहृद्बांधवविषयाः असत्त्व

अपिचइत्थंमदुक्तप्रकारेणवासनात्यागेनाभ्योऽन्यःसाक्षित्वंपरमार्थसत्त्ववान्परिशेषादनुमीयसेप्रथमतःवासनात्यागात्एवंतेपरमाका
रणाद्भूक्षणःप्रलयसुषुप्त्योर्निसिद्धाभासादपिइदंपरिछिन्नाभाससरूपमेवप्राप्तंनपरमार्थसत्स्वरूपमितिवासनात्यागएवतत्साक्षित्वेहेतुर्नान्यइत्य
र्थः अथवाअपिचेतिसमुच्चयेतदन्यस्त्वस्मादसत्स्वभावादन्यः परमार्थसत्स्वभावस्त्वंस्वभावेनैवप्रसत्स्वभावेभ्यो विद्यात्मकार्येभ्यःसत्त्ववान्
बलवाननुमीयसेअतःपरमात्मायदविद्यालक्षणात्कारणादपिइदंप्रथमतःअनादिकालात्प्राप्तंबंधमपिइत्थंवासनात्यागे वसंसजेत्यनुष
ज्यते ३३ भोगैस्तत्साधकैर्बंधुभिर्जगद्भावैःस्वकृतैरनादिनिवृत्तसाक्षिनिमित्तैःशुभाशुभैःकर्मभिश्च ३४ आत्मतत्त्वमेवैकःसारःसत्यःपरमा
नंदोयस्यतथाविधोहंइतिजाताधीर्यस्यभयैर्भयहेतुभिः ३५ ममतत्त्वविदःस्वतोदुःखंमाभूतबंधूनामतत्त्वेनदुःखित्वात्तद्दुःखसमागमेमेदुःखं

अपिचेत्थंतदन्यस्त्वंसत्त्ववाननुमीयसे इदंप्रथमतःप्राप्तंपरमादपिकारणात् ३३ भोगबंधुजगद्भावैःकर्मभिश्चशुभाशुभैः आत्मनो
नास्तिसंबंधःकिमेनाननुशोचसि ३४ आत्मतत्त्वैकसारोहमितिजाताधियोभयैः नतेरामास्तिसंबंधःकिंबिभेषिजगद्भ्रमात् ३५
अजातस्यसतोबंधोबंधुदुःखसुखभ्रमैः कस्तेराघवसंबंधोयदेताननुशोचसि ३६ त्वमेवेद्धभूर्विश्वपुरातथेदानींभविष्यसि ६
अद्यचेहस्थितोसीतिज्ञातवानसिनिश्चयं ३७ तदनंतरगानन्यान्प्राप्यादीन्निकटस्थितान् बंधूनतीतान्सुबहून्कस्मात्त्वंनानुशोचसि

तुदुःखंभविष्यतीतिचेत्तत्राह अजातस्येतिमिथ्यात्वाद्बंधो अजातेसतीत्यर्थः षष्ठीचनादरे इति षष्ठी अथवाबंधोःसंबंधितयाअजातस्यतवेनियो
ज्यं ३६ एवमात्मनःअसंगत्वाद्द्वितीयत्वदर्शनेशोकासंभवउक्तः इदानींअस्यात्मासंगीतथापिसकिंनित्यःउतक्षणिकःउतप्रागभाववदु
दादिवात् कालांतरेणनश्वरःसर्वेषामपिपक्षेषुबंधुशोकनयुक्तइतिप्रोद्यासमाधित्सुराघेकल्पेतावदाहत्वंचेदितिपुरापूर्वजन्मसु तथाभावि
जन्मसुभविष्यसिअद्यइदानींइहजन्मनिचस्थितोसिइतिएवंस्वभावमात्मानंयदिनिश्चयंदृढं ज्ञातवानसितदाअनंतरगान्वर्तमानान्निकट
स्थितान्सन्निहितान्बंधून्प्राप्यानिवेत्यध्याहारःअनंतजन्मस्वतीतान्सुबहून्कस्मान्नानुशोचसिविनिगमनाविरहात्सर्वत्रशोकाभावात्केव
नकापिशोकोयुक्तइतिभावः ३७ ३८ ७ ७ ॥॥

पु

द्वितीयेप्याह पूर्वमिति इदानीमन्यः अग्रेप्यन्यः भविष्यतीति क्षणिकमात्मानं यदि जानासि तथापि त्वं किं सद्रूपमालंब्य विमुह्यसि शोच
सि शोचसि हि द्वितीयक्षणे शोच्यस्य शोचितुश्चासत्वेन शोकावसराभावादित्यर्थः ३९ तृतीयेप्याह पुरेति तथाप्यात्मनाशादेव क्षीणसंसारः
४० यदा आत्मनो जन्मादिसंगितैः पित्रा कोनयुक्तस्तदा किं वाच्यमसंगोदासीनो नित्यकूटस्थस्वप्रकाशः पूर्णानंदैकरसस्त्वे सन युक्त इतीत्याश
येनोपसंहरति तस्मादिति मुदिताः सहजसंतोषवृत्तिः ४१ ४२ यथा ज्वालानां कोटरे सर्वतः प्रभा व्याप्ता तमसो नावकाशस्तद्वत्त्वय्यपि न मोहदुःखादेरि

पूर्वमन्यस्त्वयेदानीं बभूविथ भविष्यसि यदि राम तथापि त्वं सद्रूपं किं विमुह्यसि ३९ पुराभूत्वाद्य भूत्वा च भूयश्चेन्न भविष्यसि तथापि क्षीण
संसारः किमर्थमनुशोचसि ४० तस्मान्न दुःखिता युक्ता प्राकृते जागते क्रमे तथैव मुदिता युक्ता युक्तं कापि निवर्तनं ४१ मणौ च दुःखितां राम
सुखितामपि मा व्रज समतामेहि सर्वत्र परमात्मा हि सर्वगः ४२ अनंतः सत्स्वरूपस्त्वं स्वामिवावितताँतरं प्रकाशो नित्यशुद्धस्त्वं ज्वालानामि
व कोटरं ४३ जागतानां पदार्थानामर्थात्मतनुस्तनुः सूत्रस्थोसि हारमुक्तानामेकस्तंतुरिवाततः ४४ संसाराद्भिन्नतिरेवेयं यद्भूत्वा भूयते पुनः
अतो नैव नतत्त्वेन त्वोसि राम सुखी भव ४५ स्वरूपमिदमस्यास्य संस्थितेः सततापि धिमत् अतानात्स्फारतामंति ज्ञानदानासि सन्निते ४६ रू
पं किमन्यद्भवतु भ्रमभामात्रावृते भ्रमे स्वप्नमात्रावृते स्वप्ने भवस्यास्यो हि कः क्रमः ४७ सर्वशक्तेरियं शक्तिर्भ्रमभात्रमयं तथा रामरूपत एवेदमा
भानमतिभास्वरं ४८ सुबंधुः कस्य चित्कः स्यादिह नो कश्चिदप्यरिः सदा सर्वे च सर्वस्य सर्वे सर्वेश्वरेच्छया ४९

तिभावः ४३ त्वमेव सर्वांतरस्त्वा
ह जगतानामिति नरस्था आत्मनस्तनुः स्वरूपं यस्य तनुः सूक्ष्मः हारभूतमुक्ताफलानां तंतुरिवाततः अनुस्यूतः ४४ पुनर्जन्मशंकां वारयति सं
स सारो निभत्वात् उषपुनर्भूयते ४५ स्वरूपं स्वभावः सततं आधिमत् दुःखबहुलं ४६ स्वरूपं तत्वमिति निर्मतत्वमिसाह रूपमिभ्रांसंतरेषु तत्वाप्र
सिद्धेस्त्रापि न तत्वमस्तीत्यर्थः ४७ ननु निस्तत्वं कथं सदिति तद्रूपतत्राह सर्वेति आभानं जगदाकारभानं अतिभास्वरं व्यक्तं ४८ जगतो भ्रां
तिमात्रता प्रदर्शनाय अनियतस्वभावत्वं दर्शयति सुबंधुरित्यादि सर्वस्य सर्वोपि सर्वे अरयो मित्राणि उदासीनाश्चेत्यर्थः ४९ श्रीरामायन्माः

अन्योन्यंसंश्रितंपरस्परनिमित्तं ५० अधइतियत्सद्यंचेदंज्योतिश्चक्रंभागानांभ्रमेश्वेतिभावः ५१ एवमुत्कर्षापकर्षविषयनियतावेवेत्याहस्व
र्गस्थाइति ५२ धीराःअप्रार्थनशीलाः ५३ उपसंहरति एकरूपेतिचक्रंपदार्थमंडलं ५४ विनाशस्तुसर्वत्रनियत इत्याहयथेति ५५ अ+
स्वंनियततांकिंनतस्तत्राहपरतेति ५६ विगलंतुविशीर्यत्तां ५७ हतदृष्टिभिर्बाधितानुवृत्तदृष्टिभिः आमूलंअतानवासनाभ्यांसहअं

आलूनशीर्णमखिलमिदमन्योन्यमाश्रितं अनारतंयातिजगत्तरंगौघइवांभसा ५० अधऊर्ध्वत्वमायातियात्यूर्ध्वत्वमधस्तथा
संसारस्यचलस्यास्यचक्रनेमिरिवाभितः ५१ स्वर्गस्थानरकंयांतिनारकाश्चात्रिविष्टपं योन्यायोन्यंतरंयांतिद्वीपाद्वीपांतरंजनाः ५२
धीराःकार्पण्यमायांतिकृपणायांतिधीरतां परिस्फुरंतिभूतानिपातोत्पातक्रमभ्रमैः ५३ एकरूपंस्थिरंचक्रंस्वच्छंसंतापवर्जितं ने
हसंप्राप्यतेकिंचिदस्मौहिमकरोयथा ५४ येयेनाममहाभागाबहवोबांधवास्तथा विनष्टाएवदृष्टंतेतेतेकतिपयैर्दिनैः ५५ परता
त्मीयतानित्यतत्वसत्वादिभावना नेहसत्यामहाबाहोद्वित्वंशादिदृशोपथा ५६ अयंबंधुःपरश्चायममयंचाहमयंभवान् इतिमिथ्या
दृशोरामविगलंतुतवाधुना ५७ क्रीडार्थंव्यवहारास्त्वेएताभिर्हतदृष्टिभिः आमूलमतश्छिन्नाभिर्बहिर्विहरहेलया ५८ संसारसर
णावस्यांतथाविहरसुव्रत नयथैवश्रमश्रांतोवासनाभारवानिव ५९ यथायथैषाकार्याणिवासनाक्षयकारिणी विचारणातथोदे
तिसंशाम्यंतितथातथा ६० अयंबंधुरयंनेतिगणनालघुचेतसां उदारचरितानांतुविगतावरणैवधीः ६१ नतदस्तिनयत्राहं
नतदस्तिनयन्मम इतिनिर्णीतधीराणांविगतावरणैवधीः ६२ नास्तमेतिनचोदेति यश्चिदाकाशवन्महान्सर्वसंपन्नपतितस्वस्थःस्व

तःछिन्नाभिः ५८ वासनाभारवान्अनडुद्वश्रमश्रांतोयथानभवस्येवतथाअस्यांसंसारसरणौविहर ५९ कदातर्हिममव्यवहारोपरमोभविष्यति
तत्राहयथायथेति वासनाक्षयकारिणीविचारणायथोदेतितथाकार्याणिव्यवहाराःप्रशाम्यंतिउपरस्यंतइत्यर्थः ६० विगतअयमेवबंधुरि
तिपरिच्छेदलक्षणंयस्यास्ताहृदृपेवसर्वत्रसमतादर्शिनीत्यर्थः ६१ उक्तमेवार्थंकारणोपन्यासेनविवृणोतिनतदिति ६२ स्वस्थःस्वरूपप्रतिष्ठि
तःचिक्षेपदुःखोपशमत्वास्थवान्वा ६३

८

बल्लीभूतं भर्तारमेव अनुपयोस्वयमपीब्रल्लीभावं प्रापेतियावत् नहिब्रत्तविरहेदेशांतरेगतिरास्तिनतस्यप्राणाउत्क्रामंतस्तत्रैवसमवलीयंत इतिश्रुतेः २२ अव्यग्रः विशोकः २३ आयासं ज्येष्ठभ्रातरं अनवेक्ष्यतद्दुर्दर्शमनालंब्येतियावत् २४ २५ पितृसमोज्येष्ठ इतिशास्त्रोक्तात्पुत्रेतिसंबोधनं शोकं दुःखमूष्माणंच घनतांनिविडतां मेधतांच अतएवबाष्पधराधरं आंध्येककारणमिति च श्लेषात्साधारणेविशेषणं अंबुजं

भर्तारमेवानुपयोजनस्पादृष्टजांगताप्रभा गगनकोशात्समस्तयातमिवोडुयं २२ मातापित्रोस्कगतयोरौर्ध्वदेहिककर्मणि पुण्यए वल्लितेऽव्यग्रः पावनोदुःखमापयो २३ शोकोपहतचित्तोसौभ्रमन्काननवीथिषु ज्यायांसमनवेक्ष्यैवपावनोविललापह २४ अथौर्ध्व देहिकं कृत्वामातापित्रोरुदारधीः आययौविपिनेपुण्यःपावनं शोकलालसं २५ पुण्यउवाच किंपुत्रधनतांशोकंनयस्यांध्यैककारणं बाष्पधाराधरंघोरंप्राप्तदुःखलद्वांबुजं २६ पितातृवमहाप्राज्ञगतःसार्ईत्वंदंबया स्वामेवपरमामात्मपदवींमोक्षनामिकां २७ तत्स्थानंसर्वजंतूनांतद्रूपंविजितात्मनां स्वभावमभिसंपन्नेकिंपितर्यनुशोचसि २८ ईदृशोतुलयाबद्धाभावनेहविमोहजा संसारेयदशोच्यो पितयातातोनुशोचते २९ नसैवभवतोमातानासावेवपितातव नभवानेषतनयस्तयोर्निःसंख्यपुत्रयोः ३० मातापितृसहस्राणि समतीतानितेसुत बहून्यंबुप्रवाहस्यनिम्नानीववनेवने ३१ असंख्यपुत्रयोर्नैवभवानेवसुतस्तयोः सरित्तरंगवत्सुत्रगतापुत्रग णानृणां ३२ अस्मात्पित्रोरतीतानिपुत्रलक्षाण्यनेकशः पत्रकोरकवृंतानिलताविटपयोरिव ३३ मित्रबांधववृंदानिजंतोर्जन्मनि जन्मनि तावंतावंतीतानिलफलानीवमहातरोः ३४ शोचनीयायदिस्नेहान्मातापितृसुताःसुतं तदतीतानशोच्यंतेकिमजस्रंसहस्रशः ३५

आंबुजसंबंधिनमंबुजसंदृशानेत्रसंबंधिनंच २६ २७ स्थानंतत्पसारिकालत्रयेप्याधारभूतंजंतूनांजननधर्मिणांप्राणिनां विजितात्मनांब्रह्मवि दांरूपंस्वरूपं अतएवनपितुःशोच्यतेत्याहस्वभावमिति २८ ईदृशीद्वयमेवममममाताअयमेवपितेत्येवंरूपापतयाभावनया २९ निःसं ख्याःसंख्यातुमशक्याःपुत्रायेयोः ३० निम्नानिगभीरस्थानानीव ३१ हेपुत्रनृणांअन्येषामपि ३२ विटपग्रहणेनविटपीलक्ष्यते विटपिनोवि

जाग्रते जगत्कल्पनानिमित्ते भ्रमे मोहे सत्येव दृश्यते परमार्थेन परमार्थतस्तु नेतवत तथा चोक्तं वार्त्तिके अविद्यास्तीत्यविद्यायामेवासित्वा प्र
कल्प्यते ब्रह्मदृष्ट्या त्वविद्येयं न कथंचन युज्यत इति ३६ परमार्थेन परमार्थदृष्ट्या मरौ मरुत्वादेव पयो लवानसंततितन्नेसुतरां तथा ब्रह्म
स्वाभाव्यादेव नाश्रोनास्ति तत्र तत्त्वबोधे सुतरामिति योजना यापि शब्दः ३७ लक्ष्मीः राजादिसंपदः स्वप्न एव ता इति शेषः ३८ ३९ स्वसंक
ल्पलक्षणोपत्नुपतापः संनिपातभ्रमदृष्ट्याः पुरो दृश्यंते ४० अज्ञानलक्षणेनातपेन विस्तीर्णे आछन्ने मरौ मरुभूमिसदृशे आत्मनि स्वसं
कल्पवासनानामकं मरीचिवारि मिगतत्ष्णोदकं ४१ इतिश्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनविंशः सर्गः १९ नानायोनिषु जन्मा

प्रपंचोयं महाभाग दृश्यते जाग्रते भ्रमे परमार्थेन ते प्राज्ञ नास्ति मित्रं न बांधवाः ३६ न नाशस्त्विह हि भ्रांतः परमार्थे न विद्यते महत्यपि चिरात
ते मरावि व पयो लवाः ३७ एताः याः प्रेमसेलक्ष्मीश्छत्रचामरचंचलाः स्वप्न एव महाबुद्धे दिनानि त्रीणि पंच वा ३८ दृष्टपातु पारमार्थिक पुत्र
यच्चिंतयामास तदाह युक्तमित्यादिना २३ युक्ततामुपपादयति अयमादित्य इत्यादिना चेत्यते संज्ञायते तमोघटदीपादिवा त्वत्ततयाय
दिन प्रकाश्यत इत्यर्थः भेदः व्याहन्ति विच्छित्तिर्वैधर्म्यं च ४ भूमित्वं जलादिव्यावृत्तरूपं किं एवमग्रेऽपि सर्वत्र इवशब्दो वाक्यालंकारार्थः
भव्यतां निरूढतां गतं प्राप्तं ५ शैलेषु पिंडमेव शैलं इति यदि न चेत्यंते इत्यर्थाज्जृम्भते ६ जगत्क्रियावन्मूर्तं द्रव्यं न भस्त्वमूर्तं ७ भूतेषु पृत्कुभौ
तिके ग्राहकाय इति पर्वताकारः स्थूल इति यावत् ८ स्वंभस्त्वं असद्भावात्तद्विलक्षणाः संतः भवाल्छिनिस्तदुभयसंवलनात्कादाचित्कीस

युक्तमुक्तं भगवता चिदेवेदं जगत्त्रयं चिदहं चिदिमे लोकाश्चिदाशाश्चिदियं क्रिया २ सबाह्याभ्यंतरं सर्वं चिदेव परमार्थतः आस्ति चिद्व्यति
रेकेण नेह किंचन कुत्रचित् ३ अयमादित्य इत्येकेन चितायदि चेत्यते तदर्कतमसोर्भेदः क इहैवोपलभ्यते ४ इयं भूरिति भूरेषा चिताय
दि न चेत्यते भूमेः किं नाम भूमित्वं तद्व्यपेभव्यतां गतं ५ इमा दिशो दिश इति चेत्यं तेन चितायदि तत्किं नाम दिशां दिक्त्वं शैलानां चापि का
द्रिता ६ इदं जगज्जगदिति चितायदि न चेत्यते तत्किं जगत्त्वं जगतो नभस्त्वं नभसोऽथवा किं ७ कयायं पर्वताकारश्चितायदि न चेत्यते तत्किं नाम
शरीरत्वं शरीरस्य शरीरिणां ८ चिदिंद्रियाणि चित्कायश्चिन्मनाः चित्तदेषणा चिदंतश्चिद्बहिश्चित्त्वं चिद्ज्ञावाश्चिद्ज्ञवाल्छितिः ९ चित्तैवेन
महं सर्वं स्पर्शनैषणापूर्वकं करोमि मात्रासंस्पर्शं शरीरेण न किंचन १० किमनेन शरीरेण काष्ठलोष्ठसमेन मे अशेषजगदेकात्मा चिदहं
चेतनात्मकः ११ अहं चिदंबरे भानावहं चिद्भूतपंजरे सुरासुरेषु चिदहं स्थावरेषु चरेषु च १२ ॥ त्ता ९ स्पर्शनैषणा भोगेच्छा तत्पूर्वकं मात्राणां श

ब्दादिविषयाणां संस्पर्शं भोगं शरीरेणेति अचेतनस्य भोक्तृत्वायोगादिति भावः १० यदि शरीरेण न किंचन तर्हि शरीराभिमानो वृथैवेति त्याज्य
एवेत्याह किमनेनेति तत्त्यागे निरुपाधिचितो भेदकाभावात्सर्वचिदेकात्म्यसिद्धिरपरो लाभ इत्याशयेनाह अशेषेति चेतनात्मक इति चेन
नाचित्तदात्मकत्वस्य सर्वत्राविशेषादिति हेतुप्रदर्शनार्थं ११ अंबरे आकाशे भानौ सूर्यादितेजसि भूतपंजरे अवान्तिष्टभूतत्रये सुरासु
रादिस्थावरजंगमदेहेषु चयावित्सा अहमेवमेवाहमिति वार्थः १२

एवंसर्वचिदेकाभेदप्रत्ययानांपृथगनवशेषाद्व्याघाताद्द्वित्वस्यासंभवाच्छत्रुमित्रादिकल्पनापिदूरनिरस्तेत्याहचिदस्तीति १३ अस्तुवारे
हाद्दैतंतथाप्यसंगपूर्णचिन्मात्ररूपस्यममनत्वस्याकापिक्षतिरस्तीत्याहबलिनाम्न इति १४ अस्तुवातच्चितएवछिन्नंतथापिछेद्यछेदना
दिभावाभावानांतज्जन्यरागद्वेषादीनांचचिदधीनकल्पनत्वेनचिद्व्यतिरेकान्नचित्प्रतिकूलंकिंचिदापन्नामित्याशयेनाहचितेति १५ १६
१७ प्रतिकूलाप्रसिद्धेश्चितोनित्यानुकूलप्रथमानतालक्षणाआनंदात्मतास्वतएवपरिशिष्यतइत्याशयेननित्यानंदमयात्मकइत्युक्तिः १८

चिदस्तीहाद्वितीयाहिकल्पनैवनविद्यते द्वित्वस्यासंभवाद्दत्रोकेकः शत्रुः कश्चवासुहृत् १३ बलिनाम्नः शरीरस्यछिन्नेशिरसिभासुरे
चितः किंतद्भवेच्छिन्नंसर्वलोकावपूरणात् १४ चितासंचेतितोद्वेषोद्वेषोभवतिनान्यथा तस्माद्वेषादयः सर्वेभावाभावाश्चिदात्म
काः १५ नचितोव्यतिरेकेणप्रविचार्योपिकिंचन आसाद्यतेकिलस्फारादस्मात्त्रिभुवनोदरात् १६ नद्वेषोस्तिनरागोस्तिनमनोनास्य
वृत्तयः चिन्मात्रस्यातिशुद्धस्यविकल्पकलनाकुतः १७ चिदहंसर्वगोव्यापीनित्यानंदमयात्मकः विकल्पकलनातीतोद्वितीयांशा
विवर्जितः १८ चितश्चिदितियन्नामनिर्नामायाः ननामतत् शाब्दात्मिकैषाचिच्छक्तिःपरिस्फुरतिसर्वगा १९ दृश्यदर्शननिर्मुक्तके
वलामलरूपवान् नित्योदितोनिराभासोद्रष्टास्मिपरमेश्वरः २० कल्पनाविकलाकारःकालकांतकलामयः आभासमात्रमुदितोनि
त्याभासविवर्जितः २१ भारूपैकस्वरूपेस्मिन्स्वरूपेणजपाम्यहं चेत्यरंजनरिक्तायविमुक्तायमहात्मने २२

जगद्रूपनामकल्पनावच्छितःस्वना
मकल्पनापिस्वविवर्तएवेत्याहचितइति सर्वगासर्वनामरूपकल्पनाधिष्ठानचिच्छक्तिरेवस्वनामशाब्दात्मिकेवपरिस्फुरतीत्यर्थः १९ एवंचको
हमितिप्रश्नोत्तरमपिस्वयमेवमयावगतमित्याहदृश्येति २० ईदृशोभारूपैकस्वरूपेअस्मिन्मायिनिसस्वात्माबभासविवर्जितःकेजलेअलकांत
तेकेशाग्रमिवप्रतिबिंबितचंद्रकलाप्रायःशुक्लपक्षकालेउपचयात्कांताःकालायस्यचंद्रस्यतत्प्रायोवास्वकल्पनारूपोविकलाकारःपरि
छिन्नजीवभावोपनतोदितःस आभासमात्रंभ्रांतिरेवनवास्तवइत्यर्थः २१ अतएवतंजीवभावंचरमसाक्षात्कारवृत्त्यातोद्धिनस्वरूपेणेवाहंजया

वा॰दी॰ प॰ ६

योगपयायुक्ताप्रत्यक्परामेदान्वययोगेनारखंडाभेदेनयुक्तायसाक्षात्कारयोग्यप्रामननिदिध्यासनयुक्तायुक्तायेति वामस्यं प्रत्यग्रूपायते
ब्रह्मणेनमोस्तु २३ २४ २५ वर्तमानविषयेसंवेदनंअसंवेद्यं अतीतानागतविषयेष्वपे अचेत्यंचेतनंउभयत्र चासुखादिवृत्तीनांस्मृत्यादिवृ
त्तीनांचप्रागभावे असंवेद्यमचेत्यमितिचविशेषणे २६ परिच्छेत्तुं देशतः कालतो वाद्यत्वेप्यवस्थापपितुं शक्ताः भावाभाववयोः प्रसुप्तसाक्षिप
रिच्छेद्यत्वादिनिभावः यद्विभूयाः नवयामियत्वे व्यवस्थापनंपरिच्छेदं ब्रूमः किंतुतत्वावधारणं तदनुकूलाश्च प्रमाणादयोजगद्भावस्तत्तः परि
छिंदंत्येवात्मानमितितत्राह अथचेतिप्रकारांतरद्योतनार्थोथितुशब्दः २७ एवंपरिच्छेदनंममयथाभिमतंसंमतमेव यतस्तेमत्स्वरूपपरिच्छेद

प्रत्यक्केतनरूपायस्वरूपायनमोस्तुते चिंतयेचेत्समुक्ताप्ययुक्तायुक्तायपयोग्यया २३ सर्वावभासदीपायमत्स्वमेवनमोस्तुते चेत्यनिर्मुक्तम
चिद्रूपंविश्वग्विश्वावपूरकं २४ संशांतसर्वसंवेद्यंसंविनात्रमहंमहत् आकाशादप्यनंतोहमप्यणोरणुरानतः २५ भासादयंति मामेताः सुख
दुःखदृग्दृश्यः संवेदनमसंवेद्यमचेत्यंचेतनंतत २६ नशक्तामांपरिच्छेत्तुंभावाभावाजगद्गताः अथचैतेजगद्भावाः परिच्छिंदंतुमामिमं
२७ यथाभिमांतमेवैतेमत्तोनव्यतिरेकिणः यदिस्वभावभूतेनवस्तुनावस्तुनीयते २८ क्षिप्यतेदीयतेवापितत्किंकस्याकिलक्षतिः सर्वदा
सर्वमेवाहंसर्वकृत्सर्वसंगतः २९ चेतसमस्म्यहमेवैतन्नाकिंचिदपिचोदितं किंसंकल्पविकल्पाभ्यांचिंतनं चिंदियमेकिका ३० संक्षोभयाम्यहं
तावदाभ्यामात्मनिपावने इतिसंचिंतयन्नेवबलिः परमकोविदः ३१

एवंभूतेश्चपरिच्छेदेवामहस्तगतस्यधनस्यदक्षिणहस्तेननयनेहरणेपरावृत्तस्यदानेवाहस्तद्वयाभिन्नस्यदेहात्मकस्यदेवदत्तस्ययथानधन
क्षतिस्तद्वन्नकाचित्क्षतिरित्याहयदीति २८ वस्तुतस्तुतत्वबोधात्पूर्वमपिजगत्त्वयमेवेति प्रागपिनकिंचिदुदितंक्षतंवेत्याशयेनाह सर्वदे
ति २९ अहमेकिकाचित्चिद्रूतस्यचममसंकल्पविकल्पाभ्यांकिंचितंउपचितमपचितंवा ३० अज्ञानात्संक्षोभयामितत्वबोधाच्छुद्धाभ्यामिदानिं
संचिंतयन्बलिः ॐकारात्स्थूलसूक्ष्मसंक्षोभाभ्यांत द्वीजाज्ञानेनचसंवलितंचैतन्यंबोधयदकारादिमात्रात्रयविहायपरंअर्द्धमात्रार्थंतु

त्मात्रेणमत्तोनव्यतिरेकिणोमदेकपरिशेषाः अहमेवसंपद्यंतइत्यर्थः

५६

३२ दूरे अस्तानि चेत्यचिंतकचिंतनानि येन त्रिपुरीमात्रत्यागोपलक्षणमेतत् तत्र हेतुः ध्यात्रिति ३३ ३४ उपलेसमुत्कीर्णः टंकच्छेदनिष्पादि
तः पुरुषइव बलिः प्रशामितैषणया अत एव परिपूर्णया अत एव विषयमननदोषदशाभिरुज्झितया एतया निर्मलब्रह्मभावप्राप्तिलक्षणयास
त्ताविधनं गतमेघं शारन्नभ इव अराजत ३५ इति श्रीवासिष्ठतात्पर्यप्रकाशे उ० प्र० सप्तविंशतितमः सर्गः २७ निश्चेषं बलिमालोक्य विषयेभ्यः
नवैः स्मृतः शुक्रस्तच्छिनिमाख्यापनेषां शोकमिहाहरत् तस्य बलेर्गृहं आश्रयभूतं सौधं १ अनुचरानेव नामभिरुद्दिशति डिंभाद्याद्यानि

ॐ कणात् दूर्मात्रार्थं भावयन्मौनमास्थितः संशांतसर्वसंकल्पः प्रशांतकलनागणः ३२ निःशंकमपि दूरास्तचेत्यचिंतकचिंतनः ध्यातृध्येयध्यान
हीनो निर्मलाः शांतवासनः ३३ बभूवावातदीपाभोः बलिः प्राप्तमहापदः उपशांतमनास्तत्र रत्नवातायने बलिः ३४ अवसद्बहुकालं सस
मुत्कीर्णइवोपले प्रशामितैषणापापरिपूर्णयामननदोषदशोज्झिततयैतया बलिरराजत निर्मलसत्तयाविधनमच्छतपेवशारन्नभः ३५ मो

१०५७

क्षोपाये सूपशमप्रकरणे बलिविश्रांतिर्नामसर्गः २७ श्रीवसिष्ठउवाच अथ ते दानवास्तत्र बलेरनुचरास्तदा तद्गेहं स्फाटिकं सौधमुच्चैरारु
रुहुः क्षणात् १ डिंभाद्यामंत्रिणोधीराः सामंताकुमुदादयः करटाद्याश्ववराजानो वृत्राद्याबलिहारिणः २ हयग्रीवादयः सैन्याश्चक्रजाद्याश्च बां
धवाः लडुकाद्याश्चसुहृदो वह्नूकाद्याश्चलाजकाः ३ कुबेरयमशक्राद्याउपायनकराः सुराः यक्षविद्याधरानागाः सेवावसरकांक्षिणः ४ रंभा
तिलोत्तमाद्याश्च चामरिण्यो वरांगनाः सागराः सरितः शैलादिशश्च विदिशस्तथा ५ सेवार्थमाययुस्तस्य तं प्रदेशं तदा बलेः अन्येचबहवः सि
द्धास्त्रैलोक्योदरवासिनः ६ ध्यानमौनसमाधिस्थं चित्रार्पितमिवाचलं नमत्किरीटावलयो ददृशुर्बलिमादृताः ७ तं दृष्ट्वा प्रकृतकर्तव्यप्रणामा
स्तेमहासुराः विषादविस्मयानंदभयमंथरतां ययुः ८
द्रनाः २ ३ ४ दिशो विदिशश्च दिगाधिदेवतास्तास्वधिरूढाजनाश्च ५ सिद्धाः देवयोनिविशे
षाः ६ शिरोनमनान्नमंत्याः किरीटावलयो येषां आदृताः सादराः ७ कृतअवश्यकर्तव्यः प्रमाणो यैः सुहृदो विषादमंथरतां उदासीनाः विस्म
यमंथरतां नत्वविरक्ताः नंदमंथरतां अनभिज्ञोपजीविनस्तु भयमंथरतां ययुः अथवा प्राणसंशयाद्विषादमंथरतां सुखप्रसाददर्शनाद्वि
स्मयमंथरतां रोमांचाद्यानंदलिंगदर्शनादानंदमंथरतां विरमत्वान्नेत्राणां दर्शनात् भयमंथरतां ययुरित्यर्थः ८

वा॰टि॰ उप॰
५७

९ कल्पितं सप्तर्षिसभागतेनैव भार्गवेण योगबलाद्बलिसौधदेशे प्राप्तत्वेन कल्पितं १० ११ दूरत्वाद्बलेर्विश्रांतेरपि कल्पितत्वद्योतनार्थं १२ क्षिपन् प्रसारयन् अस्मिन्निंदिरावासभांतस्थान् दैत्यान् हसन् अनभिज्ञताख्यापनायोपहसन् १३ हे दैत्याः अयं बलिः स्वविचारणयैव संप्राप्तः विमलज्ञावासः सर्वाधिष्ठानं ब्रह्मरूपेण तथाविधप्रतीयत तत् अतिमात्रं अतिशयोस्य सुखविश्रांतेरित्यर्थः १४ ततस्मादयमेवमेव समाहितस्तिष्ठन् निरतिशयानंदस्वात्मनिष्ठितिं चिरावस्थानमाप्नोतु १५ न वाचनीयः न संभाषणीयस्तूष्णीमासतेति यावत्

मंत्रिणः प्रविचार्यात्र किं प्राप्तमिति दानवाः भार्गवं चिंतयामासुर्गुरुं सर्वविदां वरं ९ चिंतनानंतरं दैत्या भार्गवं भास्करं वपुः ददृशुः कल्पितं प्राप्तं गंधर्वनगरं यथा १० पूज्यमानोसुरगणैर्निविष्टो गुरुविष्टरे ददर्श ध्यानसौनस्थं भार्गवो दानवेश्वरं ११ विश्रम्यत्क्षणमिव प्रेमवानवलोक्य च बलिं विचारयन्नष्टपापं परिक्षीणभवभ्रमं १२ देहरात्रिमशातैर्दंतदीप्तिभिः क्षीरसागरं क्षिपन्निव सभामाह हसन्वाक्यमिदं गुरुः १३ अतिमात्रमिदं दैत्याः स्वविचारणयैव तत् संप्राप्तविमलावासः सिद्धोयं भगवान्बलिः १४ अयं तदेवमेवेह तिष्ठन् दानवसत्तमाः स्वात्मनिष्ठितिमाप्नोतु पदं पद्मपत्ननामयं १५ श्रांतो विश्राममायातः क्षीणचित्तभवभ्रमः शांतसंसारनीहारो वाच्यनीयो न दानवाः १६ स्वएवालोक एतेन संप्राप्तोऽज्ञानसंकरे शांते त्वसंभ्रमे सौरो दिनेनेव करोत्करः १७ स्वयमेव हि कालेन प्रबोधमुपमेष्यति बीजकोशात्तत्त्वसंवित्सा सुप्तमूर्तिरिवांकुरः १८ कुरुध्वं स्वामिकार्याणि सर्वे दानवनायकाः बलिर्वर्षसहस्रेणासमाधेर्बोधमेष्यति १९ इत्युक्ते गुरुणा तत्र हर्षामर्षविषादजां दैत्याश्चिंतां जहुः शुक्रं मंजरीमिव पादपाः २०

५७

१६ अत्र भुवि रात्र्यंधकारनिद्रादिसंभ्रमे शांते सति दिनेन दिवसेन सौरः करोत्करः किरणसमूह इव एतेन बलिना अज्ञानसंकरे शांते सति स्वएवालोकः संप्राप्तः १७ बीजकोशाद्बीजपुटात् तत्त्वसंवित्ता मूर्छितावस्था प्रसुप्ता अंकुरादिभावप्रबोधेनेति यावत् १८ स्वामिकार्याणि राज्यतंत्राणि १९ दैत्यग्रहणं देवानामप्युपलक्षणं अत एव दुर्वृत्तरोहर्षजां हि षामर्षजां सुहृदुपजीविनश्च विषादजां चिंतां जहुः २० श्रीरा

प्राग्व्यवस्थया पूर्ववत्स्वराज्यतंत्रव्यवहारक्रमेण २१ आगंतुका नरनागादयस्तदा किंचक्रुस्तदाह नरा इति ययुरिति सर्वत्र संबध्यते
अद्रयः कुलाचलादिदेवताः दिक्पतयो दिक्पालाश्च स्वास्वादिश्रोपययुः वनेचराः ऋक्षवानरादियूथपतयः किष्किंधादिकंदरान् ययुः गग
नचरा गगरुडसंपातिजटायुःप्रभृतयः २२ इतिश्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे ऽष्टाविंशः सर्गः २८ जीवन्मुक्तस्य राज्यश्रीः पा
तालरोधनं बलेः रामाय बलिवृत्तपूर्णास्थितिश्चात्रोपदिश्यते वर्षसहस्रेणेति समाधेर्वर्षसहस्रेणासंततसंयोगादपवर्गेणतीया १ बले

वैरोचनिसभासंस्थां विधाय प्राग्व्यवस्थया स्वव्यापारपरास्तस्थुः सर्व एवं सुरास्ततः २१ नरा महीं महिपतयो रसातलं प्रहानभस्त्रिद
शगणाः त्रिविष्टपं दिक्षु दृष्यो दिक्पतयश्च कंदरान्वनेचरा गगने नचराचराश्चैवं ययुः २२ मोक्षोपायेषूपशमप्रकरणे बलिसमाधा
नवर्णनं सर्गः २८ श्रीवसिष्ठ उवाच अथ वर्षसहस्रेण दिव्येनासुरसत्तमः देवदुंदुभिनिर्घोषैर्बुबुधे भगवान्बलिः १ बलौ प्रबुद्धे तत्
द्बालं विरेजे नगरं तदा वैरिंच इव सूर्यौघ उदिते कमलाकरः २ बलिः प्रबुद्ध एवासौ यावन्नायांति दानवाः तावत्संचिंतयामास स
माधिसदने क्षणं ३ अहो नु रम्या पदवी शीतला पारमार्थिकी अहमस्यां क्षणं स्थित्वा परां विश्रांतिमागतः ४ तदेतामेव पदवी
मवलंब्य करोम्यहं भवतीहोपभुक्ताभिः किं मे बाह्यविभूतिभिः ५ ऐं दैव एवापि बिंबेषु न तथानंदवीचयः तोषयंति यथांतर्मे सं
सिद्धिभवभूतयः ६ इति भूयोपि विश्रांतौ सेकुर्वाणं गलितं मनः बलिमावारयामासुर्दैत्याश्चं द्रुमिवांबुदाः ७ (रि दं बालं नगरं वैरिंचे

रायतनभूत गगने सूर्यौघे सूर्यकिरणप्रवाहे उदिते सति कमलाकरः पद्माकरवद्विकासश्रीमानित्यर्थः सूर्यौघे सूर्यौघे इति पाठयो
स्तु सर्वपदार्थजातं सर्गं वा ओघपतिसमर्थयतीति व्युत्पत्त्या सूर्य एवग्राह्यस्तस्मिन्नुदिते सतीत्यर्थः ओघसामर्थ्य इति धातोर्णपंताल्कर्मण्य
ण् २।३ समाधिसदने प्रागुक्तसमाधिसुखमग्नस्य दिव्यवर्षसहस्रमपि क्षणवत्कृतमिति क्षणं स्थित्वेत्युक्तिः ४ करोमि विश्रांतिमिति शेषः बाह्य
विभूतिभिरुपभुक्ताभिर्मे किं भवति न किंचिदीदृशी विश्रांतिसुखमित्यर्थः ५ तदेवाह ऐं दवेषिति संसिद्धिः समाधिपरिपाकस्तज्जा भू
तय आनंदाः एकस्मिन्नेव द्वयतया अपरिछेद्यत्वात् बहुत्वकल्पनया बहुवचनं ६ अवारमासुरागत्य परिवव्रुः ७

पुनःशब्दः पूर्वसमाधिसंकल्पपरावृत्तिद्योतनार्थः ८ अनुपादेयबुद्ध्या हि बाह्यार्थदर्शने मनस्तदभिपातित्वात्तद्रागितालक्षणं मलं याति नदर्शनमात्रेणेत्यर्थः ९ ननु मोक्षेच्छयास्य माधवलंबनियमोऽस्तु तत्राह मोक्षमिति तानेनंत्रैकालिके अविघातकार्यबाधे सति बंधस्य वादर्शनादिति भावः बालानां मूर्खाणां विडंबनाचेष्टानुकृतिः १० ११ संप्रसन्नपूर्णं पुंसं आत्मतत्त्वं दृष्ट्वा स्वभावादेव बहिरण्यौदासीन्येनावलोकयत्सत् यद्यद्वस्तु प्रति आयाति तत् आयातु स्फुरतु नाम नैतावता मे ज्ञानामिव देहादिताद्यात्म्याध्यासात्तद्बुद्धिक्षेपप्रयुक्तो वृद्धिः।

नानालोकपुनर्दृष्टोऽनन्तभ्रमणमाकुलेक्षणः नेकुलाचलसंकाशोः परिवीतवपुस्त्विदं ८ चितः क्षीणविकल्पस्य किमुपादेयम। स्तिमे मनस्तदभिपातित्वाघातितद्रसतामलं ९ मोक्षमिच्छाम्यहं कस्माद्बद्धः केनास्मि वै पुरा अबद्धो मोक्षमिच्छामि किं यं बालविडंबना १० न बंधोऽस्ति न मोक्षोऽस्ति मोरर्थमिक्षयमागतं किं मे ध्यानविलासेन किं चाध्यानेन मे भवेत् ११ ध्यानाध्यानभ्रमोत्सत्वापुंस्वस्वमवलोकयन् यदायातु तदायातु न मे वृद्धिर्नवाक्षयः १२ न ध्यानं नापि चाध्यानं न भोगान्नाप्यभोगितां अभिवांछामि तिष्ठामि सममेव गतज्वरः १२ न मे वांछा परे तत्त्वे न मे वांछा जगत्स्थितौ न मे ध्यानदृशा कार्यं न कार्यं विभवेन मे १३ नाहं मृतो न जीवामि न सन्नासन्न सत्समः नेदं मे नैव चान्यन्मे नमो मह्यमहं ब्रुवन् १४ इदमस्तु जगद्राज्यं तिष्ठाम्यत्रतु संस्थितः नेह चास्तु जगद्राज्यं तिष्ठाम्यात्मनि शीतलः १५ किं मे ध्यानदृशा कार्यं किं राज्यविभवश्रिया यदायाति तदायातु नाहं किंचन मे क्वचित् १६ न किंचिदपि कर्तव्यं यदि नाम मयाधुना तत्कस्मान्न करोमीदं किंचित्प्रकृतकर्म वै १७ इति निर्णीय पूर्णात्मा बलिर्हरितवरांवरः दैत्यानालोकयामास पद्मानीव दिवाकरः १८

९ क्षयो ह्रासो येनानर्थः स्यादित्यर्थः अयं श्लोकः क्वचिदेवास्ति न सर्वत्र १२ १३ देहसंबंधाभावान्न मृतः प्राणासंबंधाभावान्न जीवामि सन्न असन्न सत्समः सन्मयप्रलब्धिकारः इदं देहभुवनादि अन्यद्देहांतरभुवनांतरादि १४ १५ १६ कर्तव्यं कर्तव्यत्वाख्यानिर्वर्तनीयं न तर्हि किंचित् अनाख्यितचेष्टासाध्यं प्रकृतं कर्म राज्यपरिपालनं किं कुतो न करोमि १७ १८

दृष्टिपातानां विभागेन तत्तदुचितवैचित्र्येण १९ ध्येयो वासनात्यागः प्राग्वर्णितस्तन्मयात्मना तद्विलासप्रचुरेण २० पूजा पाद्यार्घ्यादि उचितदानसंभावनादि सत्कारः संमाननमिति भेदः २१ २२ असौ बलिः सकलानां देवासुरादीनां शासने आज्ञापनविषये राज्ये वद्धधे राज्यंगायुभिर्वृद्धिं प्रापेत्यर्थः अथ कदाचन यत्नं प्रति अस्पमतिरिच्छा बभूव २३ महामखं अश्वमेधं २४ २५ भोग एकस्मिन्नेव आसक्तता लम्पणाय अतएव व्याख्याय कार्यं अवश्यकर्तव्यं शक्रसुकृतफलप्रदातं वेत्तीति कार्यवित् भिक्षणचातुर्यविद्या २६ बलेन मायाबलेन क्रममाणस्त्रो

दृष्टिपातविभागेन सर्वेषां दनुजन्मनां शिरःप्रणामाञ्जग्राह पुष्पामोदानिवानिलः १९ अथ वैरोचनिस्तत्र ध्येयत्यागमयात्मना मनसा सविकल्पेन राजकार्याणि संदधात् २० द्विजान्देवान्गुरूंश्चैव पूजयामास पूजया संमानयामास सुहृद्बंधुसामंतसज्जनान् २१ अर्थैनापूरयामास त्यानर्थिगणांस्तथा लालयामास विविचित्रविभवार्पणैः २२ इत्यसौ वद्धधे तस्मिन्राज्ये सकलशासने यत्ने प्रति बभूवास्य मतिरस्य कदाचन २३ तर्पिताशेषभुवनं देवर्षिगणपूजितं सहशुक्रादिभिर्मुख्यैः सचकार महामखं २४ बलिभोगभरस्यार्थ्यानेतिनिर्णीयमाधवः बलेरहितसिद्ध्यर्थं सिद्धिदस्तन्मखं ययौ २५ भोगैकलम्पणायेदं जगज्जंगलखंडकं दातुं व्याख्यायशक्रायवपोज्येष्ठायकार्यवित् २६ क्रममाणो बलेनात्र वंचयित्वा बलिं हरिः बबंध पातालतले भूगेहद्ववानरं २७ अद्यासौ संस्थितो राम पुनरिंद्रत्वहेतुना जीवन्मुक्तवपुः स्वस्थो निसंध्यानविषमधीः २८ पाताळकुहरे तिष्ठन्जीवन्मुक्तगतिर्बलिः आपदं संपदं दृष्ट्वा समये वसपत्रपति २९ नास्तमेति न चोदेति तत्सुखासुख दुःखयोः समास्थिरकरा चित्रलेख्यास्येव बलिर्यथा ३० आविर्भावतिरोभावसहस्राणां हजीवतां तन्मनश्चिरमालोक्य भोगेषु विरतिंगतं ३१

न लोकानि तिरोषः २७ अद्य अद्यापि असौ बलिः पाताले पुनरिंद्रत्वहेतुना प्रारब्धेनोपलक्षितः इति शेषः स्थितः ध्याने निर्विकल्पकसमाधौ विषण्णा गलिता धीर्यस्य २८ २९ समान्तरदया समयरहिता स्थिराः कराः मरीचयो यस्याः चित्रस्थलेन चित्रलेख्यातत्सं बांधिनी सूर्या बलिः सूर्यमंडलं यथा तयेत्यर्थः ३० जीवतां जीवनास्थावतां भोगलंपटानां विभवानां जन्मादीनां चाविर्भावतिरोभावसहस्राणि चिरं आलोक्य तस्य वै मनः विरतिं वैराग्यगतं ३१

३२ सुखदुःखयोरूहापोहयोरागमापायोः सहस्राणिभावाभावयोः संपद्विपदोः शतानिच सहस्रशतशब्दोऽसंख्येयपरो ३३ सप्तपातालानां मध्येरसातलाख्येपातालकोटरे यावद्विपत्स्थपांस्थितः ३४ अनुशासंस्वामिभावेन अतःप्राप्यं भविष्यतीत्यर्थः ३५ ३६ उदितानुशयः संतुष्टचित्तः संप्राप्तं प्रारब्धोपनीतं आहरन्नुपभुंजानः ३७ बलिचरित्रमुपसंहृत्यतं रामायोपदिशतिबलेरित्यादिना अभ्युदितः जीवन्मुक्तअभ्युदयवान् ३८ प्रविवेकेनस्वविचारेण ३९ द्वेचाष्टौचदशकोटीरितियावत् ४० अवश्यं वैरस्यंदुःखपर्यवसानंयस्य अवैरस्यं निर्दुःखं ४१ कांत

दशकोटीश्चवर्षाणामनुशास्यजगत्त्रयं अंतेविरक्ततांप्राप्तमुपशांतंबलेर्मनः ३२ ऊहापोहसहस्राणिभावाभावशतानिच बलिना परीदृष्टानि कसमाश्वासमेत्यसौ ३३ भोगाभिलाषंसंत्यज्य बलिः संपूर्णमानसः आत्मारामस्थितोनित्यंमध्येपातालकोटरे ३४ पुनरेते नबलिनाजगदिंद्रतयाखिलं अनुशास्यमिदंरामबहून्वर्षगणानिह ३५ नतस्येंद्रपदप्राप्त्यातुष्टिःसमुपजायते नतस्यतत्पदभ्रंशादुद्वेगउपजायते ३६ समःसर्वेषुभावेषुसर्वदैवोदिताशयः संप्राप्तमाहरन्स्वस्थआकाशइवतिष्ठति ३७ बलेर्विदितानसंप्राप्तिरेषानेकार्थितामया एतादृशीमवष्टभ्यत्वमप्यभ्युदितोभव ३८ बलिवत्प्रविवेकेननित्योहमितिनिश्चयात् पदमासादयाद्वैतंपौरुषेणैवराघव ३९ द्वेचाष्टौचैववर्षाणांकोटीर्भुक्त्वाजगत्त्रयं अंतेवैरस्यमापन्नोबलिरप्यसुरोत्तमः ४० तस्मादवश्यवैरस्यंभोगाभोगमरिंदम संत्यज्यसत्यमानंदम वैरस्यपदंव्रज ४१ इमाहृद्यपदृशोरमनानाकारविकारदाः नेहकांततयाज्ञेयादूराच्छैलशिलाइव ४२ धीमानमिहामुत्रलुठितंलोकवृत्तिषु संस्थापयनिबध्नीतच्चेतोहृदयकोटरे ४३ चिदादित्योभवानेवसर्वत्रजगतिस्थितः कःपरस्तेकआत्मीयःपरिस्वलसिकिंमुधा ४४

तयारम्यतया तत्रदूरस्थाःपर्वतारम्याइतिप्रसिद्धंदृष्टांतमाह दूरादिति ४२ इहऐहिकभोगेषु अमुत्रपारलौकिकभोगेषुधावमानंलोकवृत्तिषुपामरचेष्टासुलुठितंप्रवृत्तं ४३ ननुशत्रुमित्रयोःकथंसमेदृष्टिःस्यात्तत्राह चिदादित्यइति आदित्यइवसर्वावभासिकाचित्सचिदादित्यः तथाचत्वमेवशत्रुदेहादावपिप्रकाशकआत्मेतिनवैषम्येहेतुरस्तीतिभावः ४४

ननुजीवस्यममकथमीश्वरात्मसमदर्शनंतत्राहत्वमिति जडवैषम्यमप्यानंत्येनैवनाशंकामित्याशयेनाह त्वंपदार्थज्ञानाकारैरिति ५५
तत्संभावनार्थमाहत्वयीति ५६ कालकृतवैषम्याण्यपिपरिहर्तुमाह नजायसेइति ५७ तस्मात्त्वद्दृष्टेर्जन्मादिरोगाणांप्राबल्यंतस्मात्प
स्यषांदौर्बल्यमित्यन्वयव्यतिरेकाभ्यांपरीक्ष्येत्यर्थः भोगानांतस्मामुत्सृज्यभोक्ताभोगसाक्षिचिन्मात्रमेवभव ५८ त्वदीयचिद्बलादे
वजगत्सिद्धमित्याहत्वयीति ५९ शुद्धचित्तःप्रबुद्धचित्त ६० यद्यशुद्धचित्तोसितथापितच्छुद्ध्येकर्मादुपायंशृण्वित्याहपूर्वमिति यद्य

त्वमनंतोमहाबाहोत्वमाद्यःपुरुषोत्तमः त्वंपदार्थज्ञानाकारैःपरिस्फूर्जसिचिद्वपुः ५५ त्वयिसर्वमिदंप्रोतंजगत्स्थावरजंगमं बोधेनि
त्यादितेशुद्धेसूत्रेमणिगणायथा ५६ नजायसेनम्रियसेत्वमजःपुरुषोविराट् चित्शुद्धाजन्ममरणभ्रांतयोमाभवंतुते ५७ सम
स्तजन्मरोगाणांप्रविचार्यबलाबलं तस्मात्सुत्सृज्यभोगानांभोक्तेवभवकेवलं ५८ त्वयिस्थितेजगन्नाथेचिदादित्येसदोदिते इदमा
भासतेसर्वंसंसारस्वप्नमंडनं ५९ माविषादंकृतामर्थंसुखदुःखेषणानते शुद्धचित्तोसिसर्वात्मासर्वबाह्यवभासकः ६० पूर्वमिष्ट
मनिष्टंत्वमनिष्टंचेष्टमित्यपि परिकल्प्यतदभ्यासात्तत्तापिपरित्यज ६१ इष्टानिष्टद्वयत्यागेसमतोदेतिशाश्वती तयाहृदयवर्तिन्या
पुनर्जंतुर्नजायते ६२ येषुयेषुप्रदेशेषुमनोमज्जतिबालवत् तेभ्यस्तेभ्यःसमाहृत्यतद्भूतत्वेनियोजयेत् ६३ एवमभ्यागतोभ्यासंमनो
मत्तमतंगजः निबध्यसर्वभावेनपरंश्रेयोधिगम्यते ६४ मात्वंशरीरयथार्थतैर्मिथ्यादृष्टिहताशयैः धूर्तैःसंकल्पविक्रीतैर्विमृष्टःसमंततो
व्रज ६५

दिष्टंमनःप्रियंतदनिष्टमनर्थसाधनंपश्चादनिष्टंअप्रियंमनसस्तपःक्लेशेंद्रियसंयमप्राणायामादितत्सर्वमिष्टंआवश्यकंममेतिप
रिकल्पससमभूमिकापरिपाकपर्यंतंतदभ्यासात्तज्जयेसतितत्तांकल्पनामपिततःपरित्यजेत्यर्थः ६१ तत्त्यागफलमाहइष्टेति हृदय
वर्तिन्याअभ्यासाद्धृदयेस्थिरीकृतया ६२ तत्वेनतदधिष्ठानचिन्मात्रेतथाचभगवताप्युक्तंयतोयतोनिश्चरतिमनश्चंचलमस्थिरं ततस्त
तोनियम्यैतदात्मन्येववशंनयेदिति ६३ सर्वभावेनसर्वप्रयत्नेनसर्वात्मभावेनचनिबध्यनिरुध्य ६४ शरीरमेवयथार्थंपरमार्थइतियेजा
नंतितैःभोगसंकल्पेभ्योविक्रीतैरिवतत्परवशैः ६५

वा॰ टी॰ पु॰
६०

पराधीनप्रज्ञानां स्वयंविचारासमर्थानां मौर्ख्यमेव महानर्थ इत्याह अकिंचनादिति स्वस्यात्मतत्त्वस्यानिर्णीतो निर्णयविषये अकिंचना
त् विवेकवैराग्याद्युपायदरिद्रात् परेषां प्रतारकाणां मूर्खाणां चोक्तिषु अंधगोलांगूलन्यायेनावलंबमानात् ५६ एवं मौर्ख्यलक्षणायावि
वेकाद्धरणाय विवेकाभ्र ५७ मौर्ख्यनिरासहेतुर्विचारः स च बहुजन्मसंचितसुकृतपरिपाकजादात्मानुग्रहादेव भवतीत्याह आत्मनैवे
ति प्रयत्नेन श्रवणवैराग्यादिपुरुषप्रयत्नेन ५८ सत्यपि वैराग्यविचारश्रवणादौ बहिर्मुखदृष्टेस्तन्नानुदयात्प्रत्यग्दृष्टिरपि आवश्यका
स्मात्तद्द्वारेणाह वेदेति तथा चोक्तं वार्त्तिके अपामार्गलतेवायं विरुद्धफलदो भवः प्रत्यग्दृष्ट्या विमोक्षाय निबंधाय पराग्दृशामिति ५९ त
र्हि प्रत्यग्दृष्टिरेव कान्तानायास्तु किं गुरूपदेशेनेत्याशंक्याह मद्वचस्येवेति मदुपदेशे सत्येवेत्यर्थः बलवत्पित्रा शिक्षितानामात्मन्यप्रत्ययं

अकिंचनात्त्वनिर्णीतोऽवलंबमानात्परोक्तिषु न मौर्ख्यादधिको लोके कश्चिदस्तीह दुःखदः ५६ त्वमेनं दृविवेकाभ्रमुदितं लब्ध्वा बरे विवे
कपवनेनाशु दूरं नय महाग्मते ५७ आत्मनैव प्रयत्नेन यावदात्मावलोकने न कृतोऽनुग्रहस्तावन्न विचारोदयो भवेत् ५८ वेदवेदांतशास्त्रा
र्थतर्कवृष्टिभिरप्ययं नात्मा प्रकटतामेति यावन्न स्वमवेक्षितं ५९ त्वमात्मन्यात्मनाराम प्रसादे समवस्थितः प्राप्तोऽसि विततं बोधं मद्वच
स्येव बुध्यसे ६० विकल्पांशविहीनस्य तवैषा विद्धि स्वतः गृहीता विततव्याप्तिर्मद्वत्परमात्मनः ६१ विलीनसर्वसंकल्पः शांतसंदे
हविभ्रमः क्षीणकौतुकनीहारो जातोऽसि विगतज्वरः ६२ यदुपगच्छसि पासि निहंसि वा पिबसि विस्मयमेषि विवर्द्धसे तदपि ते न तदास्तु
यदा मुने विगतबोधकलंकविशंकितः ६३

॥ पंचेत्त इति स्पष्टा गुरुशास्त्रोक्तिसंवादे सत्येव स्वप्रत्यये विश्वासात्सदृढबोधसिद्धिरितियोत
नायैवकारः ६० अमुमेवार्थं स्पष्टमाह च विकल्पेति संदेहादिचित्तविकल्पैरविषयीकृतस्येत्यर्थः विततव्याप्तिस्त्रैधापरिच्छिन्नता ६१
कौतुकं बाह्यार्थचमत्कारकृतं हृल्लमात्मेनलजिज्ञासाकृतं हलं च स एव नीहारोऽवृतपायः ६२ हे मुने मननशील राम त्वं यदा विगतो बाध
स्य बाधकरस्स्यात्मतत्त्वस्य कलंक आवरणविशंकितं तावि शेषपश्य यस्य तथाविधोऽभविष्यसि तदा ते यदं प्राप्तं तदानंतसाधनं च विचारगु
रुशास्त्रोपदेशाद्युपगच्छसि मोक्षार्थं स्वीकरोषि यच्च विवेकवैराग्यादि पासि यत्नेन रक्षसि यच्च आलस्यप्रमादादिदोषजातं निहंसि यत्नेन जे
यसि यच्च समाधिसुखामृतं पिबसि यच्चोत्तरभूमिकाधिरोहणेन विस्मयस्य पदं सत्सभूमिकाविश्रांत्या पूर्वपूर्वावस्थाधिकसुखोत्कर्षी

इति श्रीवासि॰ प्र॰ उपशमप्रकरणे एकोनत्रिंशः सर्गः २९ ~~लिसम्पचं वनानि विद्युल्लताजालानि भासुराणि हि जानीहि तानां मंडला~~
~~निवस्य दिक्प्रोन्नतकलात् इत्याह दिक्कोटरेषु कुंतलकुड्मलानि यस्य २६ समस्तानां कुलशैलेन्द्राणां पिंडपोरंडपिंडाकारसंस्था~~
~~नविबोद्धव्यं भीषणं दुरंतं यस्य सोर्णुभाप्यमाधूतैः परिक्तनिर्विर्धूतं भवन एकस्फुरत्वं तन्निर्दीर्यमाणं शतमंडलस्वर्परं यस्य २५ वसनेन~~
~~उदरानिलैः श्वासवातैरुत्सारिताः पर्वता यस्य २६ २७ कुलाचलैरुत्पातैर्महाकुड्मलस्य घटमायांस्च नामामिव उद्धृतानि कुकानि~~
हिरण्यकशिपोर्वीर्यं प्रह्लादादिसुतोद्भवः नरसिंहेन वधः शोको दैर्घ्यं देहिकमुच्यते इत्थं केवलकाकतालीयन्यायप्रवृत्तात्स्वविचाराल्ला
भाचार्योपदेशानुग्रहीतुस्तानोदयक्रमो निरूपितः इदानीमुपासितेश्वरानुग्रहजन्याद्विचाराज्ज्ञानोदयप्रकारं वर्णयितुं प्राह्लादोपाख्या

यो॰ उप॰ सर्गः ३० श्रीवसिष्ठ उवाच अथेमं परमं राम विज्ञानाभिगमक्रमे शृणु दैत्येश्वरः सिद्धः प्रह्लादः स्वात्मना यथा १ आसीत्पातालकुहरे विद्रावितसुरा
सुरः हिरण्यकशिपुर्नाम नारायणपराक्रमः २ आक्रांतभुवनाभोगः स हि हारहरेर्जगत् षट्पदस्पष्टहस्तंत्रं राजहंस इवांबुजं ३ चकारा
गतं राज्यं समाक्रांतसुरासुरः दंतीनिरस्तहंसौघो नलिन्यामलिनामिव ४ अथासावसुराधीशः कुर्वंस्त्रिभुवनेशतां कालेन सुषुवे पुत्रान्नंकु
रानिव माधवः ५ ते वर्द्धिताश्चिरेणैव तेजस्स्फूर्जितबालकाः दृशार्कांशुजालानीव व्योमाक्रांतिविलासिनः ६

१ नमाचिरव्यासुर्वसिष्ठस्तज्ज्ञवणे
राममवधापयति अथेति विज्ञानस्याभिगमे आभिमुख्येन प्राप्तो निःश्रेयस इह प्राप्तो विति यावत् तथा च भगवते वोक्तं जरामरणमोक्षाय मा
माश्रित्य यतंति ये ते ब्रह्म तद्विदुः कृत्स्नमिति १ नारायणस्य पराक्रम इव पराक्रमोऽस्य पूर्वपदलक्षणया वर्तते उद्भुसुखः स्वरसुख इस्तत्रोष्ट्रशाब्दस्त
न्मुखसदृशार्थ इवेति बोधयंस्तार्थ इति मध्यमपदलोपी वा बहुव्रीहिः २ नारायणपराक्रमत्वोपपादकं विशेषणं आक्रांतभुवनाभोग इति
भुवनपदेन त्रीण्येव भुवनानि गृह्यन्ते स हि हिरण्यकशिपुर्हरेर्हरिदुर्दण्डस्य जगत् त्रिभुवनैश्वर्यं जहार षट्पदस्पष्टार्थोऽत्र हस्तं प्रातर्विकासे
न हृहस्तत्रं अंबुजं राजहंस इव ३ सुरासुरराज्यस्तत्र दधिपातियरः नलिन्यां अलिनां भ्रमराणां राज्यं निरस्तहंसौघो दंती वेत्युपमानुरोधाज्ज
गदुद्वेजकता गम्यते ४ माधवो वसंतकालः ५ तेजस्स्फूर्जिताः वयसा बालकाः दृशासंख्यानि अर्कस्यांशुजालानीव व्योमाक्रांति एकाराम्या

वा॰ १ उपा॰
६१

तेषांमध्ये प्रल्हादनामा प्रधानात्मा युवराजो बभूव हे त्यैतिह्ये ७ ८ त्रीणि गौरोपलक्षितमुखाश्रितानि मद्धारयस्य तथाविधोयं इभस्तद्
त् यद्यपि ससमदस्थानानि प्रसिद्धानि तथापि प्राधान्यात्त्रीण्युपात्तानि उक्तास्त्रिगंडगलितोयोगजः षष्टिहायनइत्यभियुक्तवचनात् ष
ष्टिहायनेभवेदिति वा ९ विकासिना विजृंभमाणेन आक्रांति रास्कंदनं तत्प्रयुक्तेन तापेन पीडनेन नवया तरुणया नितांभिनवया चक्र
राश्रिया किरणकांत्या करग्रहणप्रयुक्तसंपदा च १० तेन आक्रांतितापेन ११ पौनःपुन्येन पुनःपुनर्भावेन कृतां दुष्क्रियां अपराधं १२ ततस्त
दनंतरं माधवः प्रलयपर्यस्तेत्यादि विशेषणविशिष्टनारसिंहं वपुः कृत्वा महासुरं हिरण्यकशिपुं अहन् इति सप्तमेन संबंधः प्रलयेपर्यस्त

प्रल्हादनामा बलवान् प्रधानात्मा बभूव ह तेषां मध्ये महार्हाणां मणिनामिव कौस्तुभः ७ तेनाराजत पुत्रेण हिरण्यकशिपुर्भृशं सर्वसौंद
र्ययुक्तेन वसंतेनेव वत्सरः ८ अथ पुत्रसहायोसौ बलकोशसमन्वितः आजगाम मदं दैत्यस्त्रिगंडगलितं भवेत् ९ ततापाक्रांतितापेन
त्रिजगंति विकासिना कल्पांतसूर्यगणवन्नवयैव कराश्रिया १० अविषंतास्य तेनाथ सुरेंद्रप्रमुखाः सुराः दुर्विलासविलोलस्य बालस्ये
व स्वबांधवाः ११ प्रार्थयांचक्रिरे याजं दैत्येंद्रेभपतेर्वधे नसमं तेमहांतोपि पौनःपुन्येन दुःक्रियां १२ ततः प्रलयपर्यस्तजगद्दुर्घरस्तं
भितं दिगंतदिग्दानप्रख्यनखवज्रादिजृंभितं १३ स्फिराविद्युल्लताजालभास्करद्विजमंडलं दशदिक्कोटरस्फूर्जत्ज्वलज्ज्वलनकुंडलं १४
समस्तकुलशैलेंद्रपिंडिपीठाद्भुतोदरं दोर्दुमाधूतनिर्धूतस्फुरद्ब्रह्मांडखर्परं १५ वदनोदरनिष्क्रांतवातोत्सारितपर्वतं त्रिजगद्दहनोद्यु
क्तकोपकल्पाग्निगर्वितं १६ जगदिघर्घरंधनलजृंभितं गात्रविनमनं यस्य तत् दिगंतदिग्दानप्रख्यैर्नखैर्वज्रादिभिर्विजृंभितं यत्र १३ स्फि
राण्यचंचलानि विद्युल्लताजालानीव भासुराणि द्विजानां दंतानां मंडलानि यस्य दिक्श्रोत्रकलात् दशसु दिक्कोटरेषु स्फूर्जंत्ज्वलज्ज्वलनाः
कुंडलानि व यस्य १४ समस्तानां कुलशैलेंद्राणां पिंडपीठं पिंडाकारसंस्थानमिवोद्भुरं भीषणं उदरं यस्य दोर्दुमाणामाधूतैः परिवर्त्तनैर्नि
र्धूतं भग्नं एकस्फुरत्संचलत् विदीर्यमाणं ब्रह्मांडखर्परं यस्य १५ वदनेन उदरान्निष्क्रांतैः श्वासवातैरुत्सारिताः पर्वता यस्य १६ क्षीरो

६१

१७ कुलाचलैरुत्तरौतैर्महाकुड्यसमघट्टनायांरचनायामिव उद्भटानि उद्युक्तानि दिक्तटानि यत्र सर्वावयवेभ्यो निष्क्रांतानि परिदितप्रास तोमराण्यायुधविशेषा यस्य १८ तथाविधं नारसिंहवपुः कृत्वेत्यर्थः अहन् हतवान् दुहं तैर्लडि तिपः हलो लोपे हल्ड्यादि लोपः लसत्कटक टारावमिति क्रियाविशेषणं तेन विदार्याहन्निति गम्यते तुरंगमस्यापि द्विपेन विदारणं युद्धेषु प्रसिद्धं १९ आसुरपौरपुरवासिजनस्य सर्वजंतुपुरो पकरणं वा ईक्षणं वन्हिभिर्नेत्रानलैः २० विस्फूर्जितस्य वृत्तघोरास्फोटैर्बाहुध्वनिभिः प्रलयपक्षे घनानां संवर्तमेघानामास्फोटैर्गर्जितैः ए

सटाविकटपीनांसस्पंदप्रेरितभास्करं रोमकूपलसद्वन्हिपुंजापिंजरपर्वतं १७ कुलाचलमहाकुड्यघट्टनोद्भटदिक्तटं सर्वावयवनिष्क्रांतप दितप्रासतोमरं १८ नारसिंहं वपुः कृत्वा माधवो हन्महासुरं लसत्कटकटारावं तुरंगममिव द्विपः १९ पौरमासुरसुध्वांतैर्ददाहे सणव न्हिभिः ससर्व भूतं कल्पांते जगज्ज्वालमिवानलैः २० नृसिंहमारुते तस्मिन्भंगसंक्षोभमुपागते विस्फूर्जितघनास्फोटैरेकार्णववड्वा कुले २१ दुद्रुवुर्दानवौघास्ते दिग्ज्वलन्मशकाइव नृपायपुरद्रपतंगदीपाद्वगाललिषः २२ अथ विद्रुतदैतेंद्रदग्धांतःपुरमंडलं बभ्र वपाताललंकल्पक्षुब्धजगत्समं २३ अकालकल्पांतविधौ हत्वा रैसंशने विभौ कपियाते समाश्वस्तसुरसंरंभपूजिते २४ मत्तत्रिशस्ता दनुसुताः प्रह्लादपरिपालिताः दग्धं तं देशमाजग्मुः सरःशुष्कमिव डाजाः २५ तत्र काम्लोचितां कृत्वास्वनाम्नापरिदेवनां और्ध्वदैहिक सत्कारं चक्रुः प्रेतेषु बंधुषु २६ हतबंधुजनं दुष्टबंधु बांधवमंडलं शनैराश्वासयामासुर्मतनिष्टसकंजनं २७ ।

कार्णवे जलप्रलये २१ दिक्षु ज्वलंतो मशकाइव २२ कल्पेन प्रलयकालेन क्षुब्धं चूर्णितं यज्जगत्तत्समं २३ अकाले कल्पांतविधानसह शेऽपुद्धे दैत्यं हिरण्यकशिपुं हत्वा समाश्वस्तैः संरंभेणादरनिर्भरेण पूजिते विभौ नृसिंहे क्वापि वा धामगोचरे स्वपदे याते सति २४ अंडजाः पक्षिणः २५ स्वानां बांधवानां नाम्ना प्रयुक्तां परिदेवनां विलापं २६ दुष्टं दग्धं सप्राणं बंधूनां तद्बांधवानां च मंडलं समूहं २७

निरीहाश्चिंतयानिश्चेष्टाः अतएव चित्रार्पितोपमादुःखिताआकृततपो येषां ते प्रह्लादादयोसुरनायकाः दग्धादग्धपत्रशाखाद्रुमा इव नि
रस्तविकारं निश्चेष्टं आसन् स्थाणूनां वायुना चलनाभावः प्रसिद्धः २८ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रिंशत्तमः सर्गः
हरिविक्रमचिंतनं स्वजनक्षेमचिंतनं प्रह्लादस्य हरेर्भक्त्यागमावश्योपवर्ण्यते हृतावदानवा यास्मिंस्तथाविधे पातालकोटरे १ उपेतौ सु
पोपः सहायः तीक्ष्णाग्रः संपत्स्वबोधमक्षमोय एव असुरवृक्षाणां अंकुरप्रायस्तेजस्वी जायते तं तं दुंक्ते हरिपदस्पर्शागरवाम्लगपदेन व्या

चित्रार्पितोपमदुराकृतयो निरिहादीनाश्चायाः हिमहतांबुरुहोपमानाः शोकोपतप्तमनसोऽसुरनायकास्ते दग्धद्रुमा इव निरस्तविकार
मासन् २८ मोक्षोपाये उपशमप्रकरणे प्रह्लादपरिविश्रान्तौ हिरण्यकशिपुवधः सर्गः ३० श्रीवसिष्ठ उवाच अथ दुःखपरीतात्मा हरिणा
हृतदानवे प्रह्लादश्चिंतयामास मोनी पातालकोटरे १ कोन्वस्माकमुपायः स्याद्य एवेहासुरांकुरः तीक्ष्णाग्रो जायते तं तं भुंक्ते शाखामृगो
हरिः २ न कदाचन पाताले दैत्याः दोर्दंडशालिनः स्थिराः बभूवुरुद्विग्नाः पश्चाद्वह्निमोचले ३ जलस्त्रोतस्तनत्रपति भासुराकारघर्घराः
क्षणप्रस्फुरितारंभास्तरंगा इव वारिधेः ४ सबाह्याभ्यंतरं कष्टं समग्रालोकहारिणः रिपवः प्रौढिमायाता अपूर्वतिमिरभ्रमाः ५ तमःप्र
पूर्णत्सृदयाः संकुचत्पत्रसंपदः सुहृदः खेदमायांति निशीथकमलाकराः ६ नातस्यमलिनेनूनं पादपीठोपमर्दकैः सुरैर्विषय आक्रांतो
मृगैरिव महावनं ७ निरुद्धमार्गनश्रीकादीनः प्रकटिताशयाः बांधवा न विराजंते पद्माः शुष्कस्रजा इव ८ स्थानं अंकुरविनाशकलोपादा

नार्थमाधिक्षेपार्थं च २ उद्विग्नाः अंकुरिताः वीर्यविकारिताश्च ३ नत्रपंत्यसुरा इत्यनुषज्यते ४ कष्टमिति खेदे आलोकं तद् इत्यालोकाबाह्यराज्या
दिसंपदः आभ्यंतराः उत्साहहर्षप्रसादसुखविश्रांत्यादिसंपदस्त्व तएव आलोकाः प्रकाशाः तेषां हारिणो पहरणशीलाः अतएव अपूर्वास्तिमि
रभ्रमो येषु तथाविधा रिपवो देवाः प्रौढिमुत्कर्षं ५ तमसा कृत्स्नमलांधकारेण प्रपूर्णत्सृदयाः संकुचंत्यः पत्रलक्ष्मीरूपाः संपदो येषां तथाविधाः
सुहृल्लक्षणाः निशीथकमलाकराः ६ मलिनैर्द्वेषकलुषैस्तात तस्य प्रणामकाले पादपीठोपमर्दकैः सुरैः विषयः देशः आक्रांतो नूनं इति वि

प्राक्मरकतस्य प्रभा इव सांप्रतं यवानां न
अविरतैरनिलैरुत्पातवातैः कीर्यमाणाः भस्मलक्षणा नीहाराः प्राक्तनधूपधूमभरा इव स्फुरंति ८ प्राक्मरकतस्य प्रभा इव सांप्रतं यवानां न
वांकुरा जाताः ९ त्रिलोक्याः नाभिनलिनी मेरुस्तदुपमर्दे मत्तेभभूता अपि दानवः प्रागेवाड्ववदैन्यमायाताः किमित्याक्षेपे असाध्यं नास्ती
त्यर्थः ११ वध्वः दैत्यसीमंतिन्यस्त्रस्यंति त्रुट्यंति १३ रत्नमयाः गुलुछकास्तबकायेषां तथाविधा द्रुमा दिव्यवृक्षाः १३ दिव्यान्यंबराणि येषु तथा
स्फुरंत्यसुरवीराणां गृहेष्वविरतानिलैः धूसरा भस्मनीहारा धूपधूमभरा इव ९ दृतद्वारकपाटासु दैत्यांतःपुरभित्तिषु प्रभा मरकतस्येव
जाता नवयवांकुराः १० त्रिलोकीनाभिनलिनीमत्तेभा दानवा अपि दैववदैन्यमायाताः किमसाध्यमहो विधेः ११ मनाक्कलतिपर्णेपि दृष्ट्वा
रिभयभीतयः वध्वस्त्रस्यंति विध्वस्ताम्लग्रोग्रामगता इव १२ आसुरीकर्णपूरार्थं फुल्लाः रत्नगुलुछकाः नरसिंहकरालूनाः स्थाणुतामा
गता द्रुमाः १३ दिव्यांबरलतापत्रा रत्नस्तबककंदुराः पुनरारोपिता स्तत्र नंदने कल्पपादपाः १४ पुरा त्वमरबंदीनामसुरैः संलक्तं मुखं अद्य
त्वसुरबंदीनां स्फुरैरालोकितं मुखं १५ मन्ये दानमहानद्यः सुरेभकटभित्तिषु प्रवृत्तास्ता भविष्यंति शैलसानुष्विवापगाः १६ अस्माकमिभ
गंडेषु दानदाहाविभूतयः लसंति मरुखंडेषु संस्थ श्वेकाविवधूलयः १७ विकसासितमंदारमकरंदारुणानिलाः ते मेरुशिखरास्तल्पादैत्यादु
र्लभतांगताः १८ सुरगंधर्वसुंदर्यो दानवांतःपुरोचिताः अद्य मे रोमाक्छितिं यान्तामंजर्य इव पादपे १९ कच्चं तातपुरंध्रीणां अश्रुप्रक्लांबुरुहश्रीनी
त रसा विलासाः सुरनारीभिर्नर्त्यैर्लास्यलीलया २० पूर्वं यैरेव मत्तात श्वामरैरुपवीजितः सहस्रनयनः सर्गकिष्टतैरेव वीज्यते २१ ॥ श्री ॥

विधाः लताः शाखाः पत्राणि च येषां रत्नस्तबकैः कंदुरः दंतुरः उन्नत उरन्नपुनरिप्सनेन पूर्वं ततः आनीता इति गम्यते १४ वंदीनां वंदीकृतस्त्रीणां सं
लक्तं संप्रशंसं दृष्टं १५ दानानि मधधारास्तल्लक्षणा महानद्यः मन्ये इति वितर्के १६ दानस्य मस्य पदाहस्तस्य युक्ता विभूतयो भस्मानि १७ वि
कासितानां सितमंदाराणां सपरागैर्मकरंदैररुणाः रंजिताः अंगस्पर्शिनः अनिला येषां अत एव मेरुशिखरे लुल्पाः १८ १९ लास्यलीलया न
त्यपुविडंबनलीलया २० २१

टी॰कुप॰
६३

अस्माकं महाप्रभावाणामपि दुःखापौरुषगतिः पराक्रमस्मरणमपि यस्य २२ तेन वयमिव संतप्यंते २३ शौरेर्हरेः शौर्यं पराक्रमस्तदेव पराक्रम
स्तदेव गिरेस्तस्य शौर्यशिखरस्याग्रं अग्रशिखरं तत्संश्रितेन आश्रिता श्रियः प्राप्तसंपदो देवाः गिरितरुशिखरसंश्रयाः शाखामृगा मर्कटाः श्व
नः कुक्कुरा गनिवासान्बलवतोऽपि समुपरुंधंति पातालेनियच्छंति २४ मंडनानां अलंकाराणामपि मंडनभूतमुखे पद्मे बाष्पं आस्रं तेन शौरि
शौर्येण हेतुना निलीनास्थितं अब्जिनीनां मुखभूते पद्मे हिममवस्थाय बिंदुर्यथा तद्वदित्यर्थः २५ अथ दिसुरविक्रमैः शीर्णैः विदारितैः मत

इयमस्माकमप्यापदागता दैन्यदायिनी तस्यैकस्य प्रसादेन दुःपौरुषगतेर्हरेः २२ तद्दोर्वनघनच्छायालब्धाविश्रांतयः सुराः न कदाचन तप्यं
ते हिमाद्रेरिव सानवः शौरेः शौर्याग्रशिखरसंश्रयेणाश्रितश्रियः अस्मान्समुपरुंधंति श्वानः शाखामृगा इव २४ तेनासुरपुरंध्रीणां नित्यं
मंडनमंडने मुखपद्मे स्थितं बाष्पमब्जिनीनां हिमं यथा २५ शीर्णभिन्नलुठद्भित्तिर्जगज्जरठमंडपः अयं नीलमणिस्तंभैस्तद्भुजैरेव धार्यते
२६ स धर्त्ता स्फारसैन्यस्य मग्नानां विपदार्णवे क्षीरोदोदरमग्नस्य मंदरस्येव कच्छपः २७ एते तातादयः सर्वे तेनैवासुरसत्तमाः पातिताः क्षुब्धक
ल्पांतवातेनेव कुलाचलाः २८ स एक एव संहारकर्मक्षमभुजानलः सुरसार्थगुरुः श्रीमान्विषमो मधुसूदनः २९ दैत्यदोर्दंडपरत्रोणस्तस्य
वीर्येण वीर्यवान् दानवान्बाधते शक्रो बालकानिव मर्कटः ३० दुर्जयः पुंडरीकाक्षः प्रविमुक्तायुधोऽपि सन् नास्त्रोशस्त्रास्त्रविच्छेदैर्वज्रसा
रो विदीर्यते ३१ अभ्यस्ता बहवस्तेन मिथः प्रेरितपर्वताः भीमाः समरसंरंभाः सममस्मत्पितामहैः ३२ अभ्यस्ता बहवस्तेन मिथः प्रेरितपर्व
ताः भीमाः समरसं

एवं लुठद्भित्तिः जगल्लक्षणो जरठमंडपो जीर्णालयः नीलमणिस्तंभप्रायैस्तस्य शौरेर्भुजैरेव धार्यते अवष्टभ्यते २६ क
च्छपः कच्छपावतारः स इव स शौरिः धर्त्ता धारयिता २७ २८ विषमः आक्रामितुमशक्य इति यावत् २९ दैत्यदोर्दंडेन परश्च प्रभूतस्य यथा महा
मर्कटवीर्यवान्मर्कटो बालकान्बाधते तद्वत् ३० शस्त्रास्त्रकृतैर्विच्छेदैः खंडनैः वज्रादपि सारः दृढतरः ३१ प्रेरिताः क्षिप्ताः पर्वता यत्र तथावि
धाः समरसंरंभाः युद्धकौशलविशेषाः अस्मत्पितामहैः समयुध्या अभ्यस्ताः शिक्षिताः इत्युत्प्रेक्षा ३२

६३

भयमेष्यति का कथा कः प्रसंग इत्यर्थः ३३ आक्रमणे वशीकरणे प्रतिक्रिया तत्कृतपीडाप्रतीकारः ३४ कुतो न विद्यते तत्राह सर्वात्मिनेति
इह जगति सर्वात्मना सर्ववस्तुस्वभावेन सर्वधिया सर्वबुद्धिभेदेन सर्वसंरंभं रंहसा सर्वक्रियायोगेन च चारणार्थिनां स एवं चारणं नान्यथा गति
रस्तीत्यर्थः ३५ ननु भेदशरणं किं न स्यात्तत्राह नेति ३६ इति निश्चित्य सर्वभावेन तत्प्रतिपत्तिं संकल्पयति अस्मादिति किं देशवस्तुभेदेन प्रपंच्य
सेनेत्याह सर्वदेशकालवस्तुष्वहं नारायणमयः ३७ निरंतरतत्प्रतिपत्तिधारणानुस्मरणजपसाधनं श्रोतं तन्मंत्रमनुस्मृत्य निरंतरं तज्जपं संक

तासु तास्वतिघोरासु विततास्वतिराजिषु यो न भीत इदानीं स भयमेष्यति का कथा ३३ उपायमेकमेवेमं हरेराक्रमणे स्फुरं मन्ये तद्व्य
तिरेकेण विद्यते न प्रतिक्रिया ३४ सर्वात्मिना सर्वधिया सर्वसंरंभरंहसा स एव शरणं देवो गतिरस्तीह नान्यथा न तस्माद्दाधिकः कः
श्चिदस्ति लोकत्रयांतरे प्रलयस्थितिसर्गाणां हरिः कारणं तां गतः ३६ अस्मान्निमेषादारभ्य नारायणमजं सदा संप्रसन्नोऽस्मि सर्व
त्र नारायणमयोऽस्म्यहं ३७ नमो नारायणायेति मंत्रः सर्वार्थसाधकः नापेति ममत्लक्लेशादाकाशादिव मारुतः ३८ हरिराशा हरि
र्व्योम हरिरुर्वी हरिर्जगत् अहं हरिरमेयात्मा जीतो विष्णुमयोऽस्म्यहं ३९ अविष्णुः पूजयन्विष्णुं न पूजाफलभाग्भवेत् विष्णुर्भू
त्वा यजेद्विष्णुमयं विष्णुरहं स्थितः ४० हरिः प्रह्लादनामायं मत्तो नान्यो हरिः पृथक् इति निश्चयवानंतर्व्यापको हं च सर्वतः ४१ अनं
तमिदमाकाशमापूर्य विततास्म्यतः कनकांगो ममांगानां मयमासनतां गतः ४२ (त्यतिनमो नारायणायेति सप्रणवोऽयं श्रुतेः शुद्धदशादा

वेव जपाहर्निनिरंतरमिति निष्प्रणवोपादानं ह्लेशादित्युक्तिर्मानसजपमुख्यताद्योतनार्था ३८ सर्वत्र नारायणमयोऽस्म्यहमित्युक्तं विषदयति
हरिरिति आशा दिशः विष्णुमयो भावेन विष्णुप्राप्तः स्त्रीमयो जाल्म इतिवद्भावनाकृततद्भावलक्षणे प्राचुर्ये मयट् ३९ किमर्थं कल्पयसि अ
विष्णुरिति न अविष्णुः पूजयेद्विष्णुं नाशिवः पूजयेच्छिवमिति विध्यनुरोधादित्यर्थः ४० यः हरिः स एव प्रह्लादनामा नान्यात्मेत्युक्ते स्यादिश्रुतेः
मत्तः प्रतीचश्चान्यो हरिः पृथक् आत्मांतरभूतो नास्ति ४१ इदानीं हरेर्बहिरायुधाभरणशरीरादीनि स्वात्मनः कल्पयति अनंतमित्यादि

टी॰ उप॰
६५

करार्णानूराखा स्वंगेषु एकविश्रांताः नित्यविश्रांताः सर्वे हि तपश्चक्रगदानंरकाद्यायुधलक्षणा विहंगमाः पक्षिणो येषां नखकांतिलक्षणमंजरी
भिः कीर्णाः अत एव महामरकतद्रुमभूताः ५३ मद्रुमंदारमदिग्धेअंसमंडले मूल प्रदेशौ येषां समुद्रमथनकाले मंदरेणाधृष्ट केयूरा ममहरे श्व
त्वार एते बाहव इति द्वयोरन्वयः ५४ ५५ हेलया अयत्नेनैव विलुब्धानि विलोभितानि श्रवणास्पृही कृतानि भुवनानि भुवनानि तत्स्छाजनाय

करप्रशाखैकविश्रांतसर्वहेतिविहंगमाः नखांशुमंजरीकीर्णा महामरकतद्रुमाः ५३ इमे ते मद्रुमंदारदाममदिग्धांसमंडलाः मंदराघृष्ट
केयूराश्चत्वारो मम बाहवः ५४ चलच्छ्रीकलापूर्वचारुचामरधारिणी इयं मे पार्श्वगा लक्ष्मीः क्षीरोदकुहरोत्थिता ५५ हेलाविलुब्ध
भुवना त्रैलोक्यतरुमंजरी इयं मे पार्श्वगा कीर्तिरचलामलभासिनी ५६ अनारतजगज्जालनवनिर्माणकारिणी इयं मे पार्श्वगा माया पार्श्वे
न्द्रजालविलासिनी ५७ इयं सा हेलयाक्रांतत्रैलोक्यतरुषंडिका जया स्फुरति मे पार्श्वे लता कल्पतरोरिव ५८ इमौ मे निस्त्रिंशौ तो स्मो देवो
श्रीतांशुभास्करौ प्रकटीकृतसंसारौ मुखमध्ये विलोचने ५९ मम पश्य समुत्पन्नपापापीनां भोधासुंदरी रूपामीकृतककुब्चक्रा देहदीप्तिर्वि
सर्पिणी ६० अयं मम करे शंखः पांचजन्यः स्फुरद्ध्वनिः मूर्तं रविमिव द्राक्षात्मा क्षीरोद इव संस्थितः ५१ अयं मे कर्णिकाकोशो निलीनभ्रम
षट्पदः पद्मः करतले श्रीमान्स्वनाडीकुहरोद्भवः ५२ इयं मे रत्नचित्रांगी सुमेरुशिखरोपमा हेमांगदा गदा गुर्वी दैत्यदानवमर्दिनी ५३ अ
यं मे भास्वराकार उग्रदंष्ट्रः सुदर्शनः ज्वालाजटिलपर्यंतः परिपाटलदिक्तटः ५४ इयं मे केतुमद्वह्निसुंदरो ज्वलितोऽसितः कुठारो दैत्यवृक्षा
णां नंदयन्नंदकस्थितः ५५ एषा अत एव त्रैलोक्यलक्षणतरोर्मंजरीव विराजमाना हरेः कीर्तिर्मूर्तिमती मे पार्श्वगा वर्तते ५६ पार्श्वगा पार्श्वां
तरे स्थिता ५७ जयानाम्नी लक्ष्मीसखी ५८ ५९ देहदीप्तिः शरीरकांतिः ६० क्षीरोद इव शुभ्र इति शेषः ५१ स्वस्य नाडीकुहरं नाभिस्तदुद्भ
वः तथा च नाभिपद्ममेव कदाचित्करेण धार्यते कदाचिन्नाभाविति गम्यते ५२ हेमांगदा हेमपिनद्धा गदा ५३ परितः पाटलावर्णानि दिक्तटा
नि यस्मात् अनेनासुररुधिररक्ततागम्यते ५४ केतुमान्धूमरेखावान्वह्निरिव सुंदरः अत एवासितः दैत्यवृक्षाणां कुठार इव छेत्ता रिवान्

६५

इंद्रकार्मुकमिवसुंदरंनानामणिचित्रं ५६ सांप्रतंआतानिचिरनष्टानिचिरजातवर्त्तमानानिचभविष्यतामप्युपलक्षणमेतत् ५७ इदानींहरे
विराड्रूपमपिस्वस्यैवेत्याहइमावितिमहीमेद्मौचरणावितन्वयःकुक्षयइति बहुत्वंदिग्बहुत्वादादितिःप्राग्गानितिवत् ५८ ५९ तार्णाःराज्ञा
यःश्रुक्षेतणाराज्ञ्यः ६० ६१ विरुद्धात्माद्विषन्एतियुद्धायगच्छतिपआगच्छतिसयतःस्वनाज्ञापैवागच्छतिनान्यत्रयागमनफलमित्यर्थः
६२ तेजसीस्थिते तेजोज्वालाप्रसरंसंरोद्धुंप्रशमयितुंसोढुंवा ६३ ६४ अजितोविश्वमुत्तराकृतिःपरमेनमहिम्नाप्रभावेणपरमार्थस्वभावेनच

इदंमेशरधाराणांपुष्करावर्त्तकोपमं शार्ङ्गंधनुरहींद्राभमिंद्रकार्मुकसुंदरं ५६ इमान्यहमनंतानिजगंतिजवरेचिरं विभर्मिजातनष्टानिव
र्त्तमानान्यनेकशः ५७ इमौमहामेचरणाविदंमेगगनंशिरः इदंवपुर्मेत्रिजगदिमेमेकुक्षयोदिशः ५८ साक्षादयमहंविष्णुर्नीलमेघोदरद्यु
तिः सुपर्णपर्वतारूढःशंखचक्रगदाधरः ५९ एतेमत्तःपलायंतेसमग्रादुष्टचेतसः तार्णास्तिरश्चसंचाराःपवनादिवराज्ञ्यः ६० अयंनी
लोत्पलश्यामःपीतवासागदाधरः लक्ष्मीवान्गरुडारूढःस्वयमेवाहमच्युतः ६१ कोमामेतिविरुद्धात्मात्रैलोक्यदहनंक्षमं स्वनाज्ञापत
तःशुष्कंकालाग्निंशलभोयथा ६२ इमेमेतेजसीस्थितिंममायत्ताःसुरासुराः नशक्नुवंतिसंरोद्धुंचस्सुमेंदाःप्रभाइव ६३ (अयंनीलोत्पलश्या
~~मःपीतवासागदाधरः लक्ष्मीवान्गरुडारूढःस्वयमेवाहमच्युतः ६१ कोमामेतिविरुद्धात्मात्रैलोक्यदहनंक्षमं स्वनाज्ञापतत्~~) इमंमामी
श्वरंविष्णुंबलेंद्राग्निहरादयः स्तुवंत्यनंतयावाचाविकुर्वक्रमसमुत्थया ६४ अयंविजंभितेश्वर्योजातोहमजिताकृतिः सर्वद्वंद्वपराती
तोमहिम्नापरमेणहि ६५ त्रिभुवनभुवनोदरैकमूर्त्तिप्रसभविभिन्नसमस्तदुष्टसत्वं घनगिरितृणकाननांतरस्थसकलभयापहरंवपुः
प्रणोमि ६६ मोक्षोपायेषूपशमप्रकरणप्रज्ञादनिर्वाणेनारायणकरणंनामसर्गः ३१ १२३६ (तोमहिमेतिश्रुतेः ६५ त्रिभुवनेभुवनत्रदर
यस्यातथाविधैकामूर्त्तिर्यस्यतंघनामेघाःगिरयस्तृणपर्णानिकाननानिचेतेतदादिसर्ववस्तूनांआंतरेआधिष्ठानभावेस्थितं अतएवतत्वतःसा
क्षात्कारमात्रेणसकलभयापहरंवैष्णवंवपुः विराड्रूपंपरब्रह्मात्मकंचाहमेवेतिप्रणोमीत्यर्थः ६६ इतिश्रीवासिष्ठता०उप० एकत्रिंशःसर्गः

विष्णोर्मानसपूजात्र बाह्यपूजा॰ सुरैः सह श्रुत्वा विस्मितदेवानां हरेः पृच्छा च वर्ण्यते स तनुं भावनया नारायणीं नारायणात्मिकां कृत्वा १ अ
स्मान्मया परिकल्पिता त्रिविधा देहसंवाद्य पुष्पैः अन्या परा समाधिरूपा अवराद्य हि देवता रूपा वा मा भूत् किंतु यमेवमद्भुपो विष्णुर्दयात्माणप्रवा
हेण पुष्पांजलिभावनया बहिरावितः सन्यावत्पूजाकालं अपरद्ववस्थितः कल्पतरु इत्यर्थः २ स कीदृशः तमाह वैनतेयेति द्वाभ्यां स्फुरत् क्रिया तत्ताने
छानुग्रहाख्यं शक्तिचतुष्टयं यस्य ३ कांतेन नंदके न खड्गेन नंदनः स्वजनानंदनः ४ परिवारैः संकर्षणप्रद्युम्नादिव्यूहैः पार्षदैश्च समन्वितं ५ महा

श्रीवसिष्ठ उवाच प्रह्लाद इति संचिंत्य कृत्वा नारायणीं तनुं पुनः संचिंतयामास पूजार्थं मकरद्विषं १ वपुषो वैष्णवादस्मान्मा भून्मूर्त्तिः परावरा
अयं प्राणप्रवाहेण बहिर्विष्णुः स्थितोपरः २ वैनतेयसमारूढः स्फुरच्छक्तिचतुष्टयः शंखचक्रगदापाणिः श्यामलांगश्चतुर्भुजः ३ चंद्रार्कन
यनः श्रीमान्कांतनंदकनंदनः पद्मपाणिर्विशालाक्षः शार्ङ्गधन्वा महाद्युतिः ४ तदेनं पूजयाम्याशु परिवारसमन्वितं सपर्ययामनोमय्यास
र्वसंभाररम्यया ५ तत एनं महादेवं पूजयिष्याम्यहं पुनः पूजया बाह्यसंभोगमहत्ताबहुरत्नया ६ प्रह्लाद इति संचिंत्य संभारभरभारिणा म
नसा पूजयामास माधवं कमलाधवं ७ रत्नौघपात्रपटलैश्चंदनादिविलेपनैः धूपैर्दीपैर्विचित्रैश्च नानाविभवभूषणैः ८ मंदारमालावलनैर्हैमा
ब्जपरलोत्करैः कल्पद्रुमलतागुच्छै रत्नस्तबककमंडलैः ९ पत्त्रैर्वैदूर्यदृक्षाणां नानाकुसुमदामभिः किंकिरातैर्बकैः कुंदैश्चंपकैरसितोत्पलैः
१० कल्हारैः कुमुदैः काशैः खर्जूरैश्चूतकिंशुकैः अशोकैर्मदनैर्बिल्वैः कर्णिकारैः किरातकैः ११ कदंबैर्बकुलैर्निंबैः सिंदुवारैः सयूथकैः पारीभद्रै
र्गुग्गुलिभिर्बिंदुकैः पुष्पकोत्करैः १२ प्रियंगुपटलैः पाटैः पाटलैर्धातुपाटलैः आम्रैराम्रातकैर्गव्यैर्हरीतकबिभीतकैः १३ शालताल तमालानां
लताकुसुमपल्लवैः कोमलैः कलिकाजालैः सहकारैः सकुंकुमैः १४ (देवं पूज्यं देवं स्वकुलदैवत शिवाभिन्नं वा बाह्यैः संभोगैः संभारैर्महत्ता विस्त

ताया ६ कमलालक्ष्मीस्तस्याः धवं पतिं ७ रत्नौघखचितानां पात्राणां पटलैः आतेरभिषेचवैरितिशेषः नानाविभवैर्भूषणैरलंकारैः ८ ९ किं
करातादयो यथायोगं पुष्पजातिभेदाबोध्याः १० ११ १२ १३ सकुंकुमैः काश्मीरद्रवाक्तैः १४

सर्वैर्धूपदीपनैवेद्यतांबूलदर्पणछत्रचामरनीराजनपुष्पांजलिप्रदक्षिणानमस्कारादिभिः सौंदर्ययुक्तैः संमानैरुपचारैः १५ जगतियेयेविभवाः
प्रसिद्धास्तैस्तैरुपकरणीकृतैर्भक्त्यायाभक्त्यापतिंजगत्पतिंस्वस्वामिनंवा १६ अथामानंसपूजानंतरं तस्मिन्नंतः पुरस्थितेदेवगृहे १७ अनेनमान
सपूजोक्तेनेवक्रमेण १८ १९ राजाहीतिराज्ञिधर्मिणीधर्मिष्ठाः पापेपापाः समेसमाः तद्धर्ममनुवर्तंतेयथाराजातथाप्रजान्यायादित्यर्थः वार्ता

केतकैः शतपत्रैश्चतथैलामंजरीगणैः सर्वसौंदर्यसंमानैः स्वपमात्मार्पणैरपि १५ हरिंपरमयाभक्त्याजगद्विभवभव्यया मनसापूज
यामासप्रल्हादांतःपुरेपतिं १६ अथदेवगृहेतस्मिन्बाह्यार्थैः परिपूर्णया पूजया पूजयामासदानवेशोजनार्दनं १७ सेहिर्द्वैरनेनै
वक्रमेणपरमेश्वरं पुनःपुनः पूजयित्वातुष्टिमान्दानवोभवत् १८ ततस्ततः प्रभृत्येवप्रल्हादः परमेश्वरं तथैवंप्रत्यहंभक्त्यापूजयामा
सपूर्णया १९ अथतस्मिन्पुरेदैत्यास्ततः प्रभृतिवैष्णवाः सर्वएवाभवन्भव्याराजास्याचारकारणं २० जगामवार्तागगनंदेवलोकमथा
रिहन् विष्णोर्द्वैषंपरित्यज्यभक्तादैत्याः स्थिराइति २१ देवाविस्मयमाजग्मुः शक्राद्याः समरुद्गणाः गृहीतावैष्णवीभक्तिर्दैत्यैः किमिति
राघव २२ क्षीरोदेभोगिभोगस्थंविबुधाः विस्मयाकुलाः जग्मुरंबरमुत्सृज्यहरिमाहवशालिनं २३ तत्रैनंदैत्यवृत्तांतंकथयामासुरस्य
ते पप्रच्छुश्चैनमासीनमपूर्वाश्चर्यविस्मयं २४ विबुधाऊचुः किमेतद्भगवन्दैत्याविरुद्धायेसदैवतं तेहितन्मयतांयातामायेयमितिभा
यते २५ क्वकिलास्यंतदुर्वृत्ताः दानवाद्दलिताद्रयः क्वपाश्चात्यमहाजन्मलभ्याभक्तिर्जनार्दने २६ प्राकृतोगुणवान्जातइत्येषाभगव
न्कथा अकालपुष्पमालेवसुखायोद्वेजनायच २७ नोपपन्नंहियद्यत्रतत्रतन्निविराजते मध्येकाचकलापस्यमहामूल्योमणिर्यथा २८

जगामचारुमुखादित्यर्थःद्भिम्पते २१ किंकस्मात्हेतोइति २२ अंबरंअमरावतीं २३ अस्यअस्मैहरये एनंहरिं २४ तेविरुद्धास्त्वांद्विषंतइतियावत्
तन्मयतांत्वन्मयतां २५ द्वेषाद्दलिताअद्रयस्त्वद्भक्तदेवमुन्यावासाःयैः २६ प्राकृतःपामरःएषाकथा औत्पातिकीअकालपुष्पमालेव २७ न
उपपन्नंयुक्तं २८ ७७

यो॰ उप॰
६६

ननु कथमपवर्गफलत्वाद्युष्मत्समदृशा एव ते इति चेद्गुणवैषम्यान्नेत्याशयेनाह यो य इति नाम सत्तामसी राजसो राजसी सात्विकस्तु सात्विकी संस्थितिं
मेनीतीति युक्तमित्यर्थः २९ वैसादृश्येन अनौचित्येन तथाच हरिणो कंठाग्रो दिवससधूसरो गलितयौवना कामिनी सरो विगतवारिजं मुखम्
नक्षरं स्वाकृतेः प्रभुर्दहनपरायणः सततदुर्गतिः सज्जनो नपांगणागतः खलोमनसि समस्तशल्यानि मे इति ३० क्रमो योग्यता तया संप्राप्तं ३१
हीनजातिस्तामसयोनिः ३२ कमलिनी पुरुषाणां तत्सायां तत्परभुविगता इति कथाय यथाश्रोत्सुखयाति तथाहे इन्द्रादितेः सुतः संततरा प्रिमा

यो यो याद्दग्गुणो जंतुः स्वां स्वामेवैति संस्थितिं सदृशो ग्रष्यजेषु श्वानमध्ये रमते क्वचित् २९ न तथा दुःखयं संगे मज्जंत्सो वत्रसत्वयः वैसा
दृश्येन संबद्धा यथैतावत्कदृष्टयः ३० यद्यत्क्रमसंप्राप्तमुपपन्नमनिंदितं तदेव राजते तत्र जले भोजनतुच्छले ३१ क्वाधमः प्राकृतारं
भो हीनकर्मरतिः सदा वराको दानवास्तुच्छजातिर्भक्तिः क्व वैष्णवी ३२ कमलिनीपरुषोखर भूगानासु खयर्तीहय थानदुराश्रया
दितिसुतोपि हि माधवभक्तिमानिति कथानतथेत्य सुखायनः ३३ मोक्षोपायेषूपशमप्रकरणे विबुधवाक्यं नाम सर्गः ३२ श्रीवसि
ष्ठउवाच गर्जितमतिसंरब्धं सुरलोकमथारिहा उवाच माधवो वाक्यं शिखिवृंदमिवांबुदः १ श्रीभगवानुवाच विबुधा मा विषण्णाः
स्थ प्रह्लादो भक्तिमानिति पाश्चात्यं जन्म तस्येदं मोक्षार्हो सावरिंदमाः २ अनंतरमेतेन गर्भतादनुजन्मना न कर्तव्याप्रसंगेन बीजे
नेवांकुरक्रिया ३ गुणवान्निर्गुणो जातः इत्यनर्थक्रमं विदुः निर्गुणो गुणवान्जातः इत्याहुः सिद्धिदं क्रमं ४ (धवो भक्तिमानिति दुराश्रया

अधमाश्रयविषयाकथापिनः तथैव न सुखाय सैषर्थः ३३ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्र॰ द्वात्रिंशः सर्गः ३२ हरिभक्ताथ देस
स्य विकारादि गुणोदयः हरिं प्रसन्नं दृष्ट्वा ग्रस्तवक्ष्ये वोपवर्ण्यते अनुचितदर्शनादति संरब्धं कुपितं अत एव गर्जितं प्रागुक्तं प्रकारेण उच्चै
राक्रुश्यप्रवृत्तं तं सुरलोकं माधव उवाचेत्यन्वयः १ स्वत एव बलिनोदैत्यस्य प्राह्लादस्य पापुपरस्तनाबलवत्तराभविष्यतीति कुतो न विषादस्तत्रा
ह मोक्षार्ह इति यतो मोक्षार्हस्ततो नवस्तु च्छं राज्यसुखं स वांछतीत्यर्थः २ एतेन तदनुजन्मना अतोऽस्माज्जन्मनन्तरं कालं गर्भतामातृगर्भे
वसतिर्नकर्तव्या ३ देवैरुक्तेन तस्य भगवद्भक्तानौचित्यदोषं परिहरति गुणवानिति जातः यैश्चेदिति शेषः अनर्थक्रमं अनर्थे पर्यवसितं पुरु

१२६९

६६

प्राल्हादी प्रह्लादसंबंधिनी मद्भक्त्यादिगुणिना वः असुखायन ५ तरोरुत्पन्नाः तापिछस्य नीलगुच्छं यथा तन्नता सुवीचिषु व्यवधाना दंतर्द्धानं याति तद्वत् ६ पूर्वमंबरादर्णवे पतितं कणजालं मंदरानिर्धूतादर्णवात्सु नरंबरमिव ७ स्निग्धत्वं सौहृदं यत्र यस्मिन्पुरुषे विषये वामहां तः स्वपूज्याः चित्रार्पादयो नोद्विग्नास्तत्र तास्मिन्बालानामपि मनो विश्वासवत्प्रसिद्धमित्यर्थः ८ ९ आनंदः यथा प्राप्ते न संतोषः १० लोकमहिषु जनाकीर्ण भूमिष्विव ११ लोकचर्यासु अशास्त्रीय लोकवृत्तेषु वृत्तपे दर्शनार्हे समाजोत्सवादि कौतुके १२ भोगरूपाणां रोगाणां विषयापथ्यसेवने

आत्मीयानि विचित्राणि भुवनान्यमरोपमाः प्रापते नासुखायैषा प्राल्हादीगुणिते हवः ५ श्रीवसिष्ठउवाच इत्युक्त्वा विबुधास्तत्र क्षीरोदार्णववीचिषु अंतर्द्धानं ययौ रेवस्तरुतापिछगुछवत् ६ सोपि संपूजितहरिः सुरौघो व्रजदंबरं पुनर्मंदरानिर्द्धूतात्कणजालमिवार्णवात् ७ प्रल्हादप्रतिगीर्वाणास्ततः स्निग्धत्वमाययुः महांतो यत्र नोद्विग्नास्तत्र विश्वासवन्मनः ८ प्रत्यहं पूजयामास देवदेवं जनार्द्दनं मनसा कर्मणा वाचा प्रल्हादो भक्तिमानिति ९ अथ पूजापरस्यास्य समवर्द्धत कालतः विवेकानंदवैराग्यविभवप्रमुखा गुणाः १० नाभ्यनंदत्स भोगपूगं स्त्रक्कमिवद्रुमं न चारमत कांतारमृगो लोकमहीष्विव ११ न रमे लोकचर्यासु शास्त्रार्थकथनादृते न जायते रतिस्तस्य रूपस्खलइवाब्जिनी १२ न विशश्राम चेतोस्य भोगरोगानुरंजने मुक्ताफलमसांश्लिष्टं मुक्ताफलइवामले १३ त्यक्तभोगादिकलनं विश्रांतिमनुपागतं चेतः केवलमस्यासीद्दोलायामिव योजितं १४ प्राक्क्रांदीतां छिंतिविष्णुर्देवः क्षीरोदमंदिरात् विवेदसर्वगतया धियापरमकांतया १५ अथ पातालमार्गेण विष्णुराल्हादितो ग्रतः पूजादेवगृहं तस्य प्रल्हादस्य समाययौ १६ ‹नानुकूलोचरणे असंश्लिष्टमग्रथितं अछि-द्रितं वा १३ कथं तर्हि चेत आसीत् तदाह त्यक्तेति दोलायां योजितमिव नैकतरभागविश्रांतमंतरालंबीत्यर्थः १४ परमकांतया स्वहृत्सत्वामिकायाधियाहानन्यानया विवेद विदितवान् १५ आह्लादितो भक्ताल्हादकर्त्ता एतस्यैवानंदस्यान्यानि भूतानि मात्रासु पजीवंतीति श्रुतेः तं सर्वानंदकर्त्ता पूजादेवगृहं गत्वा प्रल्हादस्याग्रतः समाययौ १६

भा॰टि॰नृ॰पू॰
६७

द्विगुणेनोपकरणेनोपचारेण द्विगुणया दीक्षया १७ पुष्टया हर्षोपचितया १८ त्रिभुवनस्य पद्मवनं सुरसितस्थितिसरदनुकूलमभिरामं कोऽसावाश्रयहं स्वा-
तात्रिभुवनस्य सुखेनैव पालनात् सकलस्य बाह्यस्याभ्यंतरस्य कलंकस्य तमसः हरं अपहर्तारं परं सूर्यचंद्राग्निवाक्करणप्रकाशेभ्यो प्युत्कृष्टं
स्वयंज्योतिः प्रकाशं नविद्यते ऽन्यच्छरणं येषां ते अशरणास्तेषां शरणं रक्षकं अविनाशित्वाच्छरण्यं शरण्यार्हं ईशं सर्वसंसारक्लेशसंपन्नं अतएव
रजसा अजं सत्वेनाच्युतं तमसा चेश्वरं सर्वदुःखहरत्वाद्धरिं त्वां प्रपद्ये इत्यर्थः १९ कुवलयदलेनोपमलेन नीलमणिना च सन्निकाशं समानकांतिं २०
अलिकलापमिव कोमलानि सुंदराण्यंगानि यस्य सितदलपंकजस्य पुंडरीकस्य कुड्मलमिव आभातीति सितदलपंकजकुड्मलाभः शंखो यस्य

वित्तायाभ्यागतं देवं पूजया द्विगुणेद्धया दैत्येंद्रः पुंडरीकाक्षमादरात्पर्यपूजयत् १७ पूजागृहगतं देवं प्रत्यक्षावस्थितं हरिं प्रल्हादः परमप्रीतो गि
रानुष्टावपुष्टया १८ प्रल्हाद उवाच त्रिभुवनभवनाभिरामकोशं सकलकलंकहरं परं प्रकाशं अशरणशरणं शरण्यमीशं हरिमजमच्युतमीश्व
रं प्रपद्ये १९ कुवलयदलनीलसन्निकाशं शरदमलांबरकोटरोपमानं भ्रमरतिमिरकज्जलांजनाभं सरसिजचक्रगदाधरं प्रपद्ये २० विमलम
लिकलापकोमलांगं सितदलपंकजकुड्मलाभशंखं श्रुतिरणितविरंचिचंचरीकं स्वहृदयपद्मदलाश्रयं प्रपद्ये २१ सितनखगणतारकाचकी
र्णं स्मितधवलाननपीवरेंदुबिंबं हृदयमणिमरीचिजालगंगं हरिशरदंबरमाततं प्रपद्ये २२ अविरलकृतसत्वसर्वलीनं सततमजातमव
र्द्धनं विशालं गुणशतजरसाभिजातदेहं तरुदलशायिनमर्भकं प्रपद्ये २३ (श्रुतयएवरणितानि गुंजारवा यस्य तथाभूतो विरंचिनामा चंचरी

कोनाभिपद्मभ्रमरो यस्य स्वानां स्वभक्तानां हृदयपद्मदलान्याश्रय आधारो यस्य तं २१ हरिं लक्षणं शरदंबरं शरत्कालाकाशं प्रपद्ये शरदंबरत्वोपपाद
नाय विशिनष्टि सितनखेत्यादि स्मितेन धवलं आननलक्षणं पीवरं पूर्णमिंदुबिंबं यस्य हृदयमणिः कौस्तुभस्तन्मरीचिजलान्येव गंगा मंदाकिनी यत्र
२२ अविरलानि निबिडान्यतास्तैः सर्वापि असंबाधं लीनानि विशायास्मिन् स्वयं तु सततं अजातं अनुत्पन्नं अतएव अवर्द्धनं वृध्यादिविकारशून्यं
तर्हि कथं तस्य देहित्वं तत्राह गुणेति सत्वादिमायागुणप्रयुक्तैर्गुणशतैरनंतकल्याणैर्जुरसः अतिचिरंतनः अभिजातः सुंदरो देहो यस्य तथा

६७

नवविकसितनाभिपद्मस्परेणुभिर्गौरीकृतं अर्थात् दुदुरदेदीप्यस्फुरितेनप्रकाशमानेनकमलायाललक्ष्म्याः वपुषाविभूषितंअंगंवक्षोयामोरुवयिसपरि
नद्यामसमयः सायंकालइवअरुणः रक्तचंदनकाश्मीरादिअंगरागोयस्य २४ कमलजोब्रह्मा। नलिन्याः जलेनावपूर्यतद्युतिजलावपूरस्तडागस्त
दूपंतद्दिप्रसिद्धानलिनीहृत्पद्ममितियावत् २५ त्रिभुवननलिन्याः सितेअरविंदे करेयस्यसूर्यस्यतथाभूतं अतएवतिमिरसमानस्यविमोहस्यदी
पश्रेष्ठंश्रेष्ठं किंभोतिकप्रकाशोसौनेत्याहस्फुरत्तरमितिस्फुरत्तरंनित्यप्रकाशं अतएवाजडंचिद्रूपमात्मतत्वं अतएवसाक्षात्कारमात्रेणजगतां

नवविकसितपद्मरेणुगौरस्फुरत्कमलावपुषाविभूषितांगं दिनद्याम समयारुणांगरागंकनकनिभांबरसुंदरंप्रपद्ये २४ दितिसुतनलिनी
तुषारपातंसुरनलिनीसततोदितार्कबिंबं कमलजनलिनीजलावपूरंहृद्दिनलिनीनिलयंविभुंप्रपद्ये २५ त्रिभुवननलिनीसितारविंदंति
मिरसमानविमोहदीपमग्र्यं स्फुरतरमजडंचिदात्मतत्वंजगदखिलार्तिहरंहरिंप्रपद्ये २६ श्रीवसिष्ठउवाच इतिगुणबकुलाभिर्वाग्भिर
भ्यर्चितोसौहरिरसुरविनाशः श्रीनिषण्णांसदेशः जलदइवमयूरंप्रीतिमान्प्रीयमाणंकुवलयदलनीलः प्रत्युवाचासुरेंद्रं २७ मोक्षोपा

येषूपशमप्रकरणेनारायणागमनंनामसर्गः ३३ श्रीभगवानुवाच वरंगुणनिधेदैत्यकुलचूडामहामयो गृहाणाभिमतंभूयोजन्मदुःखो
पशांतये १ प्रल्हादउवाच सर्वसंकल्पफलदसर्वलोकांतरस्थित यदुदारतमंवेत्सितदेवादिशमेविभो २ श्रीभगवानुवाच सर्वसंभ्रम
संशांत्यैपरमायफलायच ब्रह्मविश्रांतिपर्यंतंविचारोस्तुतवानघ ३ ॥ जगद्गतजीवानामखिलार्तिहरं २६ इतिउक्तप्रकाराभिर्गुणैर्बकुला

भिः स्तुतिवाग्भिरभ्यर्चितः पूजितः श्रियानिषण्णः आलिंगितः अंसंदेशोयस्यतथाविधोहरिः जलदोमयूरमिवअसुरेंद्रंप्रल्हादंप्रत्युवाच २७ ॥
इतिश्रीवा०प्र०उप० त्रयस्त्रिंशः सर्गः ३३ हरेर्वरादिहप्राप्यप्रल्हादः सुविचारणां निरस्यमानात्मवर्गस्वमपश्यच्चित्सदद्वयं हेदैत्यकुलहेचूडाम
णेत्वं वरंगृहाण १ सर्वेषांलोकानांप्राणिनांअंतरस्थितउदारतरंसर्वकार्पण्यनिवारकमितियावत् आदिशआज्ञापयेतिविनयोक्ताया
चनं २ एवंप्रार्थितोविष्णुः स्वविचारोत्पन्नब्रह्मात्मतत्वसाक्षात्कारविश्रांतिंमंतरेणनात्यंतिककार्पण्यनिवृत्तिरितिमन्यमानस्तदनुरूपंवरं
दिशतिसर्वेति सर्वसंभ्रमेत्यागतिरात्यंतिकानर्थनिवृत्तिः परमंफलंनिरतिशयानंदावाप्तिः ३

सं

यो॰ उप॰
६८

४ ५ वरासने उपविश्य पद्मासनस्थः सन् स्तोत्रपाठविधानकाले अंतर्वक्ष्यमाणप्रकारेण चिंतयामास ६ भवः संसारस्तरत्‍ हरिणा तन्निवारके
पातेन हेतुना ७ तत्र सर्वस्य दृश्यस्यात्मार्थत्वादात्मन एव प्राधान्यं निश्चित्य स एवास्मिन्कः स्यादिति विचारयति किमित्यादिना प्रयत्नेन सर्वो
योगेन आहरामि विषयानुपभुंजे ८ तत्र देहाद्बाह्यं तावन्नात्मेत्याह जगदिति ९ देहोपि नाहमित्याह असन्निति मूकः अनभिव्यक्तत्वादेव वक्तु
समर्थ पवनैः प्राणवायुभिः स्पंदस्वसंचारक्षणे स्फुरितः संचलितः १० एवं शब्दादिविषया अपि नात्मेत्याह जडयेत्यादिना जडया अचिद्रूपया

श्रीवसिष्ठ उवाच इत्युक्त्वा दितिपुत्रेंद्रं विष्णुरंतरधीयत कृतघर्घरनिर्ह्रादस्तरंगस्तोयधेरिव ४ विष्णावंतर्हिते देवे पूजयाकुसुमांज
लिं पाश्चात्यं दानवास्त्यक्त्वा मणिरत्नपुरस्कृतं ५ पद्मासनस्थो तिसुदान्तुपविश्य वरासने स्तोत्रपाठविधावंतश्चिंतयामास चेतसा
६ विचारवानेव भवान्भवतीति भवारिणा देवेनोक्तोस्मि तेनांतः करोम्यात्मविचारणं ७ किमहं नाम तावत्स्यां योस्मिन्भुवनडंबरे व
निष्ठतया नष्टसंविन्मात्रपरो भव ३१ वर्तमानभविष्यंत्योः स्थित्योरादेहमेकधीः स्वसंवित्त्यानुसंधानसमाधानपरो भव ३२ बाल्ययौ
वनवृद्धेषु दुःखेषु च सुखेषु च जाग्रत्स्वप्नसुषुप्तेषु स्वसंवित्तिपरो भव ३३ मलसंवेद्यमुत्सृज्य मनो निर्गलयत्यरं आशापाशामलं छित्वा
स्वसंवित्तिपरो भव ३४ शुभाशुभस्वसंकेतसंस्थांताशाविषूचिकः नष्टेष्टानिष्टदृष्टिस्त्वं संवित्सारपरो भव ३५ स्वकर्मकरणान्यस्य
र्थानींतरास्तरान् निर्विकल्पनिरालंबः स्वचिन्मात्रपरो भव ३६ जाग्रत्येव हि संसुप्तां भावयन्सुस्थिरां स्थितिं सर्वमस्मीति संचिंत्य सन्नै
कं तव पुर्भव ३७ नानानानारसासुक्तेषु कोऽमुक्ततया समे समग्रकलनारोपस्वचिन्मात्रपरो भव ३८ आत्मतापरते त्यक्त्वा निर्विभा
गो जगत्स्थितौ बाह्यस्तंभवदात्मानमवलंब्यास्थिरो भव ३९ स्थितांतर्मानसान्याश्चनाचारूपानुदारया धिया धैर्यैकधर्मिण्या निर्द्वं
न्द्वधर्म तां व्रज ४० समास्वादय तत्त्वं स्वसंवेदनधर्मिणः विषं हलाहलामपि यास्यत्यमृततामयं तदोदेति महामोहः संसृतिभ्रम
कारणं निर्मलायां निरंशायाः संवित्तेः भ्रमति यदा ४२ तदा संक्षीयते मोहः संसारभ्रमकारणं निर्मलायां निरंशायां स्वसंवित्तौ स्थि
तिर्यदा ४३

तर्क

प्राणिसहितान् स्वं न स्वं वर्तीति खास्पदानि वंविधसंसारान्स्वस्यांतरामध्ये मणिः स्वांतर्गतप्रतिबिंबानि वस्तूनि प्रथयय
न् ३६ संसुप्तां सुषुप्तवन्निर्विकल्पां ३७ नानादेशाजाग्रत्स्वप्नोऽभनानारसासुषुप्तिस्ताभ्यां स्पष्टप्रलयपदशाभ्यां वामुक्तः समग्रस्य दृश्य
स्य कलनायां प्रथायां दीपः समस्तानां कलनानां बुद्धिवृत्तीनां दीपवत्प्रकाशकं मतिशा ३८ आत्मता स्वतापरता तदन्यता ते त्यक्त्वा ३९ निर्द्वं
द्वं मधिधर्मतां धर्माधर्मरहिततां ४० सर्वस्यामृतत्वेन संपन्नविषयस्यापि अमृततायाअर्थसिद्धत्वादिति भावः ४१ भ्रमति विस्मृतिरस्ता

निर्विकल्पविषये ४२ ४३

९६

तीर्णस्येति स्वरूपताप्राप्तस्यैवाशामहार्णवतरणात् इत्सोप्यस्य परं दृष्ट्वा निवर्त्तत इति भगवद्वचनादिति भावः ४४ मुक्तस्यान्यत्राशासंभावनाद्
रेप्रत्यक्तामृतादिरसायनास्वादेप्यात्मानंदास्वादविघ्नत्वसंभावनया विषबुद्ध्यैतान् बलाद्दयादित्याशयेनाह स्वभावमिति प्रतिकूलं विषमिवा
चरति प्रतिविषायते ४५ येपुरुषाः न अस्माकं स्वभावं प्रत्यगात्मभावमुपागताः जीवन्मुक्ताः पुंजन्मसार्थकीकरणात् पुरुषार्थसाधनात्सफलपौर
षत्वाच्च पुंभिस्तैः पुरुषधौरेयैः सह भजामहे सदा मैत्रीमिति शेषः अन्ये तु पुरुषार्थयोग्यपि पौरुषरहितत्वात् नाममात्रेण पुरुषा नार्थलेशेना
पीति गर्द्दभवृषपेक्ष्या एव न दर्शनादियोग्या अपीत्याशयेनाह शेषा इति ४६ नन्वन्येपि योगिनः उपासकाश्च जगति महान्तः सन्त्येव तेभ्योपि नत्व
दएवकउत्कर्षस्तत्राह पर्वतादिति स्वसंवित्त्या सर्वोन्नतास्थितैरतएव परां कोटिमुत्कर्षकाष्ठां प्रयातस्य तत्वविदः पुरः योगिप्रभृतयः नानार्थेनां

स्वरूपमनुयातस्य तीर्णस्याशामहार्णवं प्रसरिष्यति ते संवित्सूर्यांशुरिव सर्वतः ४४ स्वभावमालोकयत आनंदाद्वयसंस्थितेः रसायनैरम
पि स्वादु राम प्रतिविषायते ४५ तैर्नृभिर्भजामहे पुंभिर्ये स्वभावमुपागताः शेषाः पुरुषनामानो नरा इभा दीर्घबाहवः ४६ पर्वतात्पर्वतं यान्ति
पुरोद्रेखि दंतिनः परां कोटिं प्रयातस्य स्वसंवित्फलनाश्रितेः ४७ अदृष्टा दृश्यसीमान्तः सूर्यादीन्यखिलान्यपि न ते जांसि उपकुर्वंति स्व
संविद्दिव्यचक्षुषः ४८ अवस्तुतां व्रजंत्येते मध्याह्ने इव दीपकाः अर्काद्यो महालोका विषयाधिगतात्मनः ४९ तेजोंशुषु प्रभावेषु बलि
ष्वपि महत्स्वपि सर्वेषून्नतियुक्तेषु तत्वतः परमोन्नतः ५० भांतीह भासा यस्यार्कवह्नीन्दुमणितारकाः तथा जगति राजन्ते ज्ञाततत्त्वान
रोत्तमाः ५१

स्तान्महतः उपसर्पंतः अद्रेर्मेर्वादेः पुरः दंतिनः यस्युं न पर्वतात्पर्वतं तान् तरं यांति तद्भासं तेन मेरुरिव सर्वोन्नतात् दृढविश्रांतात् इत्यर्थः ४७
स्वसंवित्त्या उन्नतास्थितिमुपपादयति अदृष्टेति प्राक् केनाप्यदृष्टाः सांप्रतमग्रेच अदृश्याः दृश्यमर्यादायाः सीमान्तोऽवधयो यस्य तथाविधस्य स्वसंवित्त्यैव
दिव्यं चक्षुर्यस्य तस्य तत्वविदः अंतःकल्पितानि सूर्यादीन्यखिलान्यपि तेजांसि नोपकुर्वंतीति स्वसंवित्त्यैव तस्योन्नतास्थितिरित्यर्थः ४८ न केव
लं नोपकर्तुं शक्नुवंति किंतु तत्पुरतो वस्तुतामेव न गच्छंतीत्याह अवस्तुतामिति ४९ अनुक्तं सिद्धमित्याह तेजोंशुष्विति तेजसः अंशुषु कार्येषु
प्रकाशनेषु योगसिद्धिवशित्वादि प्रभावेषु शचीरादिबलवत्सु ऐश्वर्यपुरादिना महत्सु अन्येष्वपि वाग्मित्वादि उन्नतियुक्तेषु मध्ये परमोन्नतः सर्वोन्न
तानामेतास्मिन्न्यस्तत्वादिति भावः ५० यस्य जगदीश्वरस्य भासा भाति तथा तत्तुल्यतया इत्यर्थः ५१

तुच्छतरामूढ तराः तत्वज्ञानाभावेन तेप्यधमयोनिकोटिप्रासे दृष्टीरित्वादिति भावः ५२ सतोप्यात्मनः अज्ञानेनासत्वापादनादनात्मवान् अन
एवासौ च चेतनः इति आत्मज्ञ एव चेतनेन संयुक्त इति निष्कृष्टआकृतिरिति दोषः ५३ दुःखदाहार्थाई हा चेष्टायस्य एवार्थे तु शब्दः ५४ चित्तेपीव
रतां स्थौल्यं गतेसति आत्मतत्ताई षत्संपादि नापि दूरापाति ५५ अतः कारणात्मनः प्रासानां भोगानां विषयाणामाभोगैः सर्वतस्तिर
स्कारैर प्राप्तानां सस्याभिलाषस्यापहारैश्च चिराभ्यस्तैः कालेन अजीर्णपर्णविल्काद्रूपमपचयं नेयामित्यर्थः ५६ केनेमनः पीनताहेतवो

धराविवरकोटरेभ्यो गर्दभेभ्योपि मानवाः तिर्यग्भ्यश्चाप्यतत्त्वज्ञा राम तुच्छतराः स्मृताः ५२ तावत्तं मोहवेतालो देहीयावदनात्मवान्
आत्मज्ञ एव संयुक्तश्चेतनेनेति तद्विदः ५३ अनात्मज्ञो हि दुःखेहः प्रस्फुरन्नपि भूतले शव एव भवत्युच्चैरात्मज्ञस्तु सचेतनः ५४ दूरादात्म
तत्ता याति चित्ते पीवरतां गते आलोकेनक्ष्मोरभिनामहामेघ इवोत्थिते ५५ भोगाभोगतिरस्कारैः कार्श्यं नियं शनैर्मनः रसापहारैस्तद्व
नकालेनाजीर्णपर्णवत् ५६ अनात्मन्यात्मभावेन देहमात्रास्थयानया पुत्रदारकुटुंबैश्च चेतो गच्छति पीनतां ५७ अहंकारविकारेण म
मतामलहेलया इदं ममेति भावेन चेतो गच्छति पीनतां ५८ जरामरणदुःखेन व्यर्थमुन्नतिमीयुषा दोषाशीविषकोशेन चेतो गच्छति
पीनतां ५९ आधिव्याधिविलासेन समाश्वासेन संसृतेः हेयादेयप्रयत्नेन चेतो गच्छति पीनतां ६० स्नेहेन धनलोभेन लाभेन मणियोषि
तां आपातरमणीयेन चेतो गच्छति पीनतां ६१ दुराशाक्षीरपानेन भोगानिलबलेन च आछादनेन चारेण चित्ताहिर्याति पीनतां ६२
आगमापायवपुषा विषवैषम्यशंसिना भोगाभोगेन भीमेन चेतो गच्छति पीनतां ६३ शरीरकुश्वभ्रे चिरप्ररूढं चिंताचयोच्चाकृति संनरी
कं जरामृतिव्याधिफलौघनम्रं कामोपभोगोघविकारि पुष्पं ६४ [पिष्टर्जनेनतत्कार्श्यं स्यात्तान्नाह अनात्मनीत्यादिना ५७ विकारेणावि

कासेन ममतालक्षणे मले हेलया लीलया आसक्त्या तिपावत् सर्वममताभिलमाह इदमिति इदं शरीरं मम आत्माभोगायतनं चेति भावेने
त्यर्थः ५८ नमेरभावं विदित्वा नापि जरेति ५९ संसृतेः समाश्वासेन रम्यताचिरस्थायित्वादिविश्वासेन ६० ६१ चारेण नानाविषयसंचारेण
६२ आगमापायौ वपुः स्वभावौ यस्य विषेणेव वैषम्यं दाहमूर्छादिव्याकुलतां शंसिना तात्पर्यवृत्तितेने नियावत् भोगानामाभोगेन प्राग्व्याख्या
तेन ६३ शरीरलक्षणे दुष्टश्वभ्रे चिराय प्ररूढं एनं चित्तविषद्रुमं त्वं अत्र सकं विचारसारककचेन छिंधीति परेणान्वयः चिंताचय एव उच्चाकृ

९७

विकल्पा एव पत्रं यस्मिन् ६५ इदानीं तदेव चेतोगजत्वेन वर्णयति मत्तेक्षणमिति द्वाभ्यां हे राघव राजसिंह त्वं ठक्कदशाविशेषण विविधं चेतोगजमुत्तीक्ष्ण
धीकरजाग्रपंक्त्या विदारयेति द्वितीयेनान्वयः मत्ते स्वविवेकप्रमादवती मदघूर्णे च आगमानुमानलक्षणे ईक्षणे यस्य तं एकस्मिन् बहिर्मुखलक्षणे
संसाराद्रितटे उपवेशनमुपवेशो यस्य तं अत एव अंतर्मुखविश्रांतिसौख्येषसमर्थं दृषास्यादिभीषणलाद् उग्रं सुजनैः क्रम्यं तद्दशति सुजनक्रमः ग्राम
रमतीति ग्रामरम्यलत्वलक्षणस्य अनुरखंडस्य पपवनस्य आलोकनेन उल्कं सोल्कं गंपरं नु चंडं अतिकोपनं तद्दक्षणा योग्यमिति यावत् सुखदुःखे एव शीतोष्म
बाष्पमदसा आविर्णो गंडो यस्य ६६ आदीर्घाः कामादिविकारा एव दंतो यस्य अनुएव धयादिवप्रविदारणक्रियाकरं ६७ असातिकुत्स्तितेस्थीव्यंजन
वमत्तनादिप्रदेशेषु रतिमासक्तिं गतं शरीरलक्षणस्य मांसस्य ग्रसनेन वांतभावापादनेन पुष्टं उपचितं दुष्टक्रियापरमपं तोदनं तत्र कर्कशाम्रं चुदंड

विचारसारकंककचेन चित्तविषद्रुमं त्वद्दुतमद्रिकल्पं आशामहस्ताखमरांकमेनं छिंधि प्रसह्यात्र विकल्पपत्रं ६५ मत्तेक्षणं चैकतटोपवेशं वि
श्रांतिसौख्येषसमर्थमुग्रं आलोकनोल्कं सुजनाक्रमाजरखंडस्य चंडं सुखदुःखगंडं ६६ चेतोगजं कायकुकाननस्थं सुतीक्ष्णया धीकरजाग्रपंक्त्या
विदारयादीर्घविकारदंतं क्रियाकरं राघवराजसिंह ६७ रतिं गतं नित्यमसत्प्रदेशे शरीरमांसग्रसनेन पुष्टं दुष्टक्रियाकर्कशचंचुदंडमेकेक्षणपु
ष्टमोंऽग्रकृष्णं ६८ दूरे समुत्सारय भारभूतं श्लेषितं कर्कशमारटंतं गंधोद्धृतं कायकुलायकोशाद्दोषापकारं त्यज चित्तकाकं ६९ तृष्णापि
शाच्याः परिचर्यमाणं विश्रांतमज्ञानमहावटेषु भ्रांतं चिरं देहशतेषु रव्यां संसारनीचे तनवर्जितेषु ७० विवेकवैराग्यगुरुप्रयत्नमंत्रैः स्वतंत्रैः
स्वचिदात्मगेहात् नोत्सारयेच्चित्तपिशाचमेनं यावत् कुतस्तावदिहात्मसिद्धिः ७१ (स्नोऽयमग्रं तत्सदृशोऽव्यापारो यस्य एकस्मिन् स्वार्थ एव ईक्षणं स्वा
नं यस्य पुष्टे रक्तमांसभिन्नामसहजतिभिः कृष्णं मलिनं काका यसे च तारि विशेषणानि स्पष्टानि पुष्टात् मोंऽशाः सांधकाराभागा इव कृष्णं निजचित्तकाकं
कायकुलायकोशात् दूरे समुत्सारय उत्तरेणान्वयः ६८ बोद्धुरात्मनो रक्षादि श्व घथाश्र महतुलादारभूतं गंधे भूपादुर्वासनाभ्युत्खतं आविर्भूतं प्र
स्थितं च ६९ तदेव चित्तं पिशाचत्वेन रूपयन् तदनुत्सादने मोक्षासिद्धिमाह तृष्णेति द्वाभ्यां अज्ञानलक्षणेषु महत्सु वटेष वटेषु वादेह शतेषु अनंतकोटि
देहलक्षणायामरव्यामिति व्यस्तरूपकं स्वस्य चितस्य संसृतो अपसरणे चेतनवर्जितेषु भ्रत्यक्षमचेतनेषु इति यावत् ईदृशमेनं चित्तपिशाचं स्वचि
दात्मनो गेहे भूतात् हृदयाद्यावन्नोत्सारयेत् तावदात्मस्वभावभूतात्मसिद्धिर्मुक्तिः कुतः इत्युभयोरन्वयः ७०।७१

६

वा॰टी॰नुप॰
१०

इदानींमनोमहाहिंभयदत्वेनरूपयंस्त्वाम्जयतिशुभेतिद्वाभ्यांशुभाशुभलक्षणमास्येभवमास्यंशारीरावयववाघत् दंष्ट्राद्वयंयस्यअछःश्मनादि
दोषपराम्रष्टःश्वसनःप्राणावायुरत्रानंयस्यपवनाशनत्वात्नानाविधंभयंनाशंमरणंचइदानीतिनानाभयनाशदं ७२ इदृशंमनोलक्षणंमहाहिं
अमोघया।चित्तगस्यचिदेकरसगरुडस्यबोधकायेसत्यंज्ञानमनंतंब्रह्मेत्यादिमंत्रालेषांशात्याशमंमुलात्तानेनमहोछेदंनीलाभयंभ्रशांनिःशो
षांप्रोद्दस्यंविहायअभवाऽभयोवाआत्माभवेत्यर्थः ७३ तदेवचित्तंगध्रत्वेनरूपयतिअमंगलेतिद्वाभ्यांशारीरलक्षणानांशवावलीनांसंततंसेवने
नानुसंधानेनानुसंधानेनभक्षणेनचकाककंकवंचुप्रहारैरुपमानव्यपशोकभयादिभिश्चक्षतेनैववपुषासुषुप्तोश्मशानरूपंतत्सदृशासुसदेहंवसे
यतेतच्छीलः ७४ अधीरःविरुद्धश्चगर्द्धोऽभिलाषोयस्यईदृशाश्चितगध्रोयदितेदेहडुमादुड्डीयगछतितन्नाहितेनिपुणंनितरांजयइत्यर्थः ७५

शुभाशुभास्यंहतमानवीर्यंचिंताविषंकायकुकंचुकंच अस्रमच्छ्वसनाशनंचसर्वस्यनानाभयनाशदंच ७२ त्वदङ्कदुःशात्मालिकोटरस्थममोघ
याचित्तगमंत्रशक्त्या नीलत्रासमंरामममनोमहाहिंभयंभ्रशांप्रोस्तभवाभवात्मा ७३ अमंगलाकारधरःशरीरशवावलीसंततसेवनेन दिगावली
संभ्रमणश्रमार्तःश्मशानसेवावपुषाक्षतेन ७४ भोगामिषोदिस्वभिधावमानत्कंधरोधीरविरुद्धगर्द्धः उड्डीयगछेद्यदिचित्तगध्रोदेहद्रुमात्तन्नि
पुणंजयत्त्वे ७५ भ्रांतंवनांतेषुदिगांतरेषुफलार्थिनंचंचलमाकुलांगं जन्मावनेर्जन्ममहीप्रयातंसंसारबंधंजननंतांहसंतं ७६ द्रुमोक्षिनासा
कुसुमेभुजाद्रिशारवेविलोलांगुलिजालपत्रे समुल्लसंतंपरिमारयांतंमनोमहामर्कटमंगासिद्धौ ७७ अभ्युत्थितंसत्फलसंक्षयायजंसन्मुखवासंगि
तडित्प्रकाशं वर्षंतमासारमनर्थसार्थमांदोलितंवासनवात्मयांतः ७८ [तदेवमनइदानींमर्कटत्वेनरूपयतिभ्रांतमितिद्वाभ्यांएकस्याजन्मभू
म्यंतरंप्रयातंजननंतांजनसमूहंतदीयसंसारबंधंचहसंतंखचेष्टितैःविडंबयंतं ७६ आक्षिनासयोःसमाहाराअक्षिनासंतदेवआसमंताकुसुमानियु
स्मिन्नभुजकराद्दयःशारवायस्मिन्विलोलांगुलिजालंपत्राणियस्मिन् ईदृशेदेहवृक्षेसमुल्लसंतंमनोमहामर्कटंपरितोनिरोधनेमारयेत्यर्थः
७७ इदानीतदेवचित्तंमेघत्वेनरूपयति अभ्युत्थितमितिद्वाभ्यांसत्फलस्यपरमार्थसुखस्यपक्वस्यफलस्यचक्षयायअकालेसमुत्थितंमुखेमु
खसदृशाबहिर्मुखवृत्त्यग्रेआसंगीप्रानाविंबनेनविषक्तःतडित्सदृशाश्चिदाभासप्रकाशोयस्यअनर्थसार्थरूपंअसारंवर्षंतंवासनानिवास
नालक्षणयावात्ययाअंतःआंदोलितंपरिवर्तितं ७८

१८

तद्दयांबरस्थं ईदृशं चित्तमेघं संकल्पानां यानि सम्यक्कल्पनानि पुनः पुनः समर्थनानि तेषां वर्जनिरूपात् उग्रमंत्रप्रभावात् सोत्साहं तत्सादयतेन
च इह हृतं जीवन्मुक्तिफलं प्राप्य आद्यः पूर्वसिद्धस्वभावो नित्यमुक्तात्मैव अलं सम्यग्भवेत्यर्थः ७९ इदानीं तदेव चित्तं पाशत्वेन रूपयति ग्रंथीकृतं मि
तिहाभ्यां आश्रात्मसत्वे आत्मोपादानकं कल्पादिसर्गमर्यादि कृत्य अद्यतनकालपर्यंतं कृतैः सुकृतदुष्कृतकर्मभिर्निरंतरं ग्रंथीकृतं ग्रंथिदानेन
दृढीकृतं अत एव समस्तानां जात्यंतराणां नानायोनिजन्मभेदानां क्रमाद्बंधनाय दीर्घमेवास्थितं ८० अत एव संप्रोतानिःसंख्यशरीरमालाय
मिन अत्तशंकः पुनर्जन्मशंकाशून्यः ८१ इदानीं तत्संकल्पमजगरत्वेन रूपयंस्तद्धोपायमाह फूत्कारेति द्वाभ्यां फूत्कारेण क्रोधादिरूपस
विषश्वासेन दग्धाः पांथा लोका दाक्षिणोत्तरमार्गगाः जीवा येन आशीविषं विषधरं अत एव शोषितो संतापितालोकखंडाभुवनभेदा येन व्याप्ता

संकल्पसंकल्पनवर्जनोग्रमंत्रप्रभावाद्द्दयांबरस्थं सोत्साहमुत्सादयचित्तमेघं प्रहृत्फलं प्राप्य भवामलाद्यः ७९ ग्रंथीकृतं कर्मभिरात्मसत्वैर्मं
वैरभेद्यं ज्वलनैरदग्धं पीडांपरामात्मनि कल्पयंतं समस्तजात्यंतरदीर्घदाम ८० संप्रोतनिःसंख्यशरीरमालं बलादसंकल्पनमात्रशस्त्रैः
छित्वा स्वयं राय वचित्तपाशं यथासुखं त्वं विहरात्तशंकः ८१ फूत्कारदग्धाखिलपांथजीकमत्यंतदुःप्रापपरप्रबोधं आशीविषं शोषितलोक
खंडं व्याप्ताखिलाद्भुतशरीरदंडं ८२ आमंथरं देहगुहासु गुप्तं संकल्पघोराजगरं जवेन अकामनानाममहानलेन बलेन दग्ध्वा विभवो भवत्वं ८३
चित्तेन चेतः शममाशु नीत्वा शुद्धेन घोरास्त्रमिवास्त्रयुक्त्या विराग्यसाधोत्थजयं लयेचेत्वं विमर्कटो वृक्ष इवाश्रितश्रीः ८४ अमलामितिचकृत्वा
चेतसा वीतशंकमुपशामितमनोंतः सर्वमारेहमेव तृणलवलघुपद्यस्लीलया हे पदस्थापि विहर रमस्व प्राप्तसंसारपारः ८५ (तृष्णालता

णामुखव्यादानेन विषयामिषार्थमुद्धतः कंपितश्च तु विधिशरीरदंडोयेन ८२ मोक्षोद्योगालस्यलासामंथरं मंदगतिं ईदृशं संकल्पघोराजगरं अ
कामनापरवैराग्यं तन्नाम्ना महता अनलेन वह्निना दग्ध्वा भस्मीकृत्य निजे पूर्णानंदविभवे लभवेत्यर्थः ८३ वैराग्येण संकल्पजयं चित्तशुद्धो सत्यांत
थैव बाध समाधिक्रमेण चित्तजयोपि सिद्ध्यतीत्याह चित्तेनेति सहसाकृता श्रितावुद्धापयत्नापरभोमा भूदिति विरागोति तत्फलमाहात्म्यजेति ८४ आ
तिकाचित्तोपशमेनिःशेषं रहा दाव हं मम ताभिमानत्यागासिद्ध्यो जीवन्मुक्तिविहारसुखं सिद्ध्यतीत्याशयेनोपसंहरति अमलमिति इति उक्तप्रकारे
णाचकारान्मागुपदिष्टत लावबोधनचे अंतः प्रत्यगात्मन्युपशामितमनाविमलो निरस्तरागादिमलं कृत्वा तादृशेन चेतसा आदेहं स्थूलसूक्ष्मका
रणदेहपर्यंतं सर्वमिव इदं पदं हेयदृश्यात्यजन्वादपि लघुतृणतरसा प्रशरीरादिव दत्यनापेक्षार्ह असदेवेति पदरूपेण प्राप्तसंसारपारः स प्रारब्ध

वा॰टी॰नु॰प॰५
१०५

शेषभोगार्थं या आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति श्रुतिदर्शितलीलया लोकसंग्रहाय सोमादि पिबन् त्विगादिभिर्यज्ञेषु वि
हरन् शास्त्राविरुद्धे लौकिकेऽपि रमस्व तेन न नत्वपुनर्बंधप्रसक्तिरित्यर्थः ८५ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चोद्दालकः स
र्गः ५० उद्दालकमुनेः शांते पदे विश्रांतिमिच्छतः युंजानस्य मनोदोषैर्विक्षेपो बहुधा यतः श्रवणमननाभ्यामवधारिते प्यात्मतत्त्वे चित्तविश्रां
तिमंतरेणानिर्विक्षेपजीवन्मुक्तिसुखाप्रासिरिति तदर्थं समाध्यभ्यासेष्वप्रमादेन बाध्यवर्धनमावश्यकमित्युद्दालकचरित्रवर्णनमुखे
नोपदिदिक्षुस्तत्रस्वतारापप्रथमं चित्तचरित्रे चाविश्वसनीयतामाह परिदीर्घा स्वितिरिति हि कामुष्मिकदूरस्थविषयासंगात्पुरिदीर्घासु वा
सनाप्रचुरत्वात्तन्वीषु प्रमाद्यतो झटिति समाधिसुखविच्छेदसततहेतुत्वात्सुतीक्ष्णासु आत्मप्रतिबिंबग्रहणयोग्यतालक्षणेन मल्यात्मिता
सु अत एव सुरधारोपमानासु चित्तस्य वृत्तिषु चारित्रेषु प्रमादाद्दिश्वस्तामा तिष्ठेत्यर्थः १ सत्कुलक्षेत्रजातायां कायलतायां चित्तशुद्धिश्रवणा

२२२५
कसे२

मोक्षोपायेषु पञ्चमप्रकरणे राघवाश्रायविनियोगो नाम सर्गः ५० श्रीवसिष्ठ उवाच परिदीर्घासु तन्वीषु सुतीक्ष्णासु सितासु च क्षुरधा
रोपमानासु चित्तवृत्तिषु तिष्ठ मा १ कालेन महता क्षेत्रे जातेयं बुद्धिवल्लरी वृद्धिं विवेकेन नयैतां नयकोविद २ यावन्मायुतिनो कायलति
काकालभास्वता भूतले पतितां वैतोदेनामुद्धत्य धारय ३ महावाक्यार्थकितत्त्वमहावाक्यार्थकभावनात् सुखमाप्नोषि संपारिर्यथाऽभ्ररभ
भावनात् ४ उद्दालकवदालूनां विशीर्णं भूतपंचकं कृत्वा कृत्वाधियाधीरधीरयां तं विचारय ५ श्रीराम उवाच केन क्रमेण भगवन्मुनिनोद्दा
लकेन तत् भूतपंचकमालूनं कृत्वांतः प्रविचारितं ६ श्रीवसिष्ठ उ॰ शृणु राम यथा पूर्वं भूतदं दविचारणात् उद्दालकेन संप्राप्ता परमा दृष्टिरस्तुता

दिरोपायैरियं परमात्मपरिचयलक्षणा बुद्धिवल्लरी तत्र जातां तां बाल्यदूरूपव्यावृत्तिलक्षण विवेकाम्भसेकेन वृद्धिं नयेत्यर्थः २ सा च बाल्यात्प्रभृति सिच्य
माना बहुकालेन कायलतया नातपनसभावनात् दुष्कारोप्यनाको दूरेत न्मंजरी बहु नमित्याशयेनाह यावदिति भूतले आपतितां एनां कायलतां गुरुशुश्रू
षाश्रवणादिनाउद्धृत्य बुद्धिवल्लरीं पालयेत्यर्थः ३ विवेकसेकश्रवणस्यमोपाख्यानस्तम्भमहावाक्यार्थस्यैवश्रुतावधार्य पुनःपुनर्भावनं तत्रैव सर्वमननयुक्ती
नां सत्त्वादिश्रात्रायेनाह महाको तिसर्पारिमंयू रः यथा अभ्ररवस्य मेघगर्जितस्य भाव नात्सुखमाप्नोति तद्वदित्यर्थः ४ तामेवाख्यायिकामवतार्य तदर्थं
विचारकर्त्तव्यतामाह उद्दालकवदिति देहाद्यारंभकं बाह्यप्रपंचारंभकं च भूतपंचकं तत्त्वंपदार्थशोधनयाधियाअन्नेन सोम्यशुंगेनापो मूलमन्विच्छेति
श्रुतिदर्शितयुक्त्या कारणव्यतिरिक्तकार्यांकुरापलापादालूनं मूलाविद्याविशरणाद्विशीर्णं च कृत्वा तदधिष्ठानसन्मात्रान्वेषणेन धीरेप्यापि धारयाधि

४
५
...उद्दालकविश्रांतिः

१०९

भूत एवन्यु ज्झीकृतभांडानितैः समाकुले इति गृहकोणसाम्योपपादकं विशेषणं ८ पुष्पितादु मा एव कर्पूरसदृशा परागैः केसरैश्च सर्वतो व्याप्तत्वात्कर्पूरकेस
रायस्यां ९ १० सरस्यो महासरांस्येव दर्पणानि यस्यां ११ सानौ प्रस्थप्रदेशे १२ मानी अव्यवस्थप्रपत्तैः पुरुषार्थं साधयिष्यामीत्यभिमानवान् आगमानुमान
दिमानकुशलश्च महामतिरसुद्धमनाः १३ शुभाशयः प्रबोधानुकूले सुकृते संभृतान्तःकरणः १४ क्रमैरभ्यासपरिपाकक्रमैः नवर्तुराद्यैर्तुर्वसंतः १५ इमं

जरज्जीर्णतर हस्यास्यकोणेकस्मिंश्चिदातते भूमेरनिलदिग्नाग्निभङ्गुरसमाकुले ८ गंधमादनशैलेंद्रनाम्नीका चिल्किलस्थली विघृते कीर्णकुसुमाद्रु
मकर्पूरकेसरा ९ विचित्रवर्णविहगानानावल्लीविलासिनी वनेचरव्याप्तनरीपुष्पकेसरभासिनी १० क्वचित्स्फीतमहारत्नाढ्यविल्लोलांबुजोत्प
ला क्वचिन्नीहारकबरीसरसीदर्पणाढ्यकचित् ११ तत्र कास्मिंश्चिद्ददितेसानौ सरलपादपे आगुल्फाकीर्णकुसुमे स्निग्धच्छायामहाद्रुमे १२ उद्दा
लकोनाम मुनिर्मौनी मानी महामतिः अप्राप्तयौवनः पूर्वमुवासोद्दामतापसः १३ प्रथमं तु बभूवासावल्पप्रज्ञो विचारवान् अप्राप्तपदविश्रांतिरप्र
बुद्धः शुभाशयः १४ ततः क्रमेण तपसा शास्त्रार्थनियमैः क्रमैः विवेक आजगामैनं नवर्तुरिव भूतलं १५ अथेमं चिंतयामास संसारामयभीरुधीः ए
कांत एव निवसन्कदाचित्क्रांतमानसः १६ किं तत्प्राप्यप्रधानं स्याद्यद्विश्रांतो न शोच्यते यत्प्राप्य न जन्मनाभूयः संबंधो नोपजायते १७ कदाहं त्यक्त
मननेपरे परमपावने चिरं विश्रांतिमेष्यामि मेरुशृंगइवांबुदः १८ कदा शाम्यमुपेष्यंति मम शांतभोगसंविदः आलोलकल्लोलरवाः कर्मयोंबुनिधा
विव १९ इदं कृत्वेदमप्यन्यत्कर्तव्यमिति कल्पना कदांतर्हि सिष्यामि पदविश्रांतयाधिया २० कदा विकल्पजालं मे न लगिष्यति चेतसि स्थि
तमप्यस्थितासंगपयः पद्मदले यथा २१ कदा बकुलकल्लोलां नौपापरमयाधिया परितीर्णोभविष्यामि मत्तात्तृष्णातरंगिणी २२ कदेमां जागतैर्भ
हे तैः क्रियमाणामसन्मयीं कीर्यमाणां प्रेक्षिष्यामि बाललीलामिवाकुलां २३ कदा विकल्पपर्यस्तं मनो दोलावदोलनं श्रममेष्यति मे शांतवातोजस्रव
भ्रमः २४

वक्ष्यमाणप्रकारं चिंतयामास कं तमानसः शुभचित्तः क्रांतमानस इति पाठे स्पष्टं १६ प्राप्यानां पुरुषार्थानां मध्ये प्रधानं प्राप्यं मोक्षाख्यं किं तत्स्यात् १७
त्यक्ताभिमननानि मनोव्यापारा यत्र १८ भोगसंविदो भोगलक्ष्म्याः १९ २० आभासमात्रे सास्थि तमप्युपेक्ष्यमाणत्वाद्दास्थितासंगं २१ मत्तां अविवे
कप्रवृद्धां २२ क्रियां बाह्यप्रवृत्तिं आकुलां व्यग्रचित्तां २३ विकल्पैः पर्यस्तं विक्षिप्तं दोलेव अवदोलनं अविश्रांतं शांतवातोजस्रः प्रशांतोत्पातवात
रोगस्य भ्रमो विक्षिप्त सव २४

वा॰टी॰ जु॰ प॰ ५
११२

तुदितवपुषा आविर्भूतस्वरूपस्य भासा स्वप्रकरणस्फुरणेन विराट् ब्रह्मांडशरीर आत्मैव स्वांतः पूर्णधीः २५ समेन परमात्मना साम्य एकरसः समेन मास
हितेन विष्णुना समः सश्लोक स्फुआकारो यस्य सर्वैर्वर्धितुधर्मार्थकामेषु अमृतकौतुकभारिषु निस्पृहः मंथेन विक्षेपेण मुक्तोऽमृताब्धिः क्षीरार्णव
स्तद्वत् २६ सुषुप्तवत्सन्मात्रात्मना पश्यन् २७ भावयिष्यामि तद्भावं यास्थिरो भविष्यामि २८ परां चित्तं चिरैकरसतां परं परमात्मानं पुरः
स्थितं पुरुषांतरं चजात्युत्पत्तिभावप्रधानो निर्देशः जात्यंधतासहज्ञानादिमूलाज्ञानाद्युपगमादि इति भावः २९ तन्वी बाधितानुवृत्तिरू
पत्वात्तुच्छां भत्याविशिष्टं चायुः शेषलक्षणां कालकलां आत्मस्थिरैला दूरा दृरे वालोकयिष्यामीत्यर्थः ३० ३१ जाड्येन मोहेन हिमेन च

कदोदितवपुर्भासा विहसज्जगतीगतिः अंतः संतोषमेष्यामि विराडात्मेव पूर्णधीः २५ अंतः समसमाकारः सौम्यः सर्वार्थनिःस्पृहः कदो
पशममेष्यामि मंथमुक्तामृताब्धिवत् २६ कदेमामचलां दृश्यश्रियमात्रात्मताभिकं सर्वं सुषुप्तवत्पश्यन्भविष्याम्यंतरात्मनः २७ सबाह्या
भ्यंतरं सर्वं तूर्णं तत्कल्पनयाधिया पश्यं शून्यमात्रमखिलं भावयिष्याम्यहं कदा २८ कदोपशांतचित्तात्मा चित्तासुपगतः परां परमालोकमे
ष्यामि जात्यंधविगमादिव २९ कदाभ्यासोपलभ्येन चित्यकांतेन चारुणा दूराद्दालोकयिष्यामि तन्वीं कालकलामिमां ३० ईहितानीहि
तैर्मुक्तो हेयोपादेयवर्जितः कदांतस्तोषमेष्यामि स्वप्रकाशपदे स्थितः ३१ कदा शाकौशिकीकीर्णाजाड्यजीर्णतृदंबुजा स्वयमेष्यति कस्मै
यं कदा मे दोषयामिनी ३२ कदोपशांतमननो धरणीधरकंदरे समेष्यामि शिलासाम्यं निर्विकल्पसमाधिना ३३ कदा मे मानमातंगः स्वाभिमा
नमहामदः सत्त्वावबोधहरिणा हतो नाशमुपैष्यति ३४ निरंशध्यानविश्रांतेर्मूकस्य मम मूर्द्धनि कदा तार्णं करिष्यंति कुलायं वनपूर्णिकाः
३५ कदा निःशंकमुरसि ध्यानधीराधियः खगाः ममविश्रांतिमेष्यंति शैलस्थाएवचलास्थितेः ३६ (जीर्णजरितं दृढं बुजं यया दोषोऽविद्या

मलस्त्वलक्षणा यामिनी रात्रिः ३२ निर्विकल्पसमाधिनाशांतमननः चिदैकरस्यविगलितमनोवृत्तिः ३३ मानोऽहंकारस्तल्लक्षणो मातंगः
स्वेस्वांशाभेदनाः अभिमानवृत्तयएव महांतः मदप्रवाहायस्य सत्त्वं परमार्थसन्मात्रं तद्ववबोधलक्षणेन हरिणा सिंहेन ३४ निरंशो निर्विकल्पैर्ध
ध्यानेन विश्रांतिर्यस्य मूकस्य मौनव्रतिनो मम मूर्द्धनि तार्णं तृणमयं कुलायं नीडं पूर्णिकाः पक्षिभेदाः ३५ ध्यानेधीरा स्थिरा धीर्यस्य उरसि तु

ले बितरागैरचितनीडे इतियावत् ३६

११०

तस्माल्लक्षणोल्लीरुहैः करंजैर्जरिलां जन्मान्येव कामादिमृगसंचारजर्जराणि गुल्मांतराणि यस्य ३७।३८।३९ प्रत्याहारेण बाह्यानां विषयसंस्प
र्शानां त्यागादनंतरं सत्वगुणप्रधानसमाधिसंस्थितो प्रसक्तायां रजसा क्षोभ्यमाणं भयारत्यालस्यादिरूपं प्रोद्वेगमगमत् अथवा संस्थितो सात्वि
कदेवादिभोग्ये विषये सात्विकवृत्तिषु देवाप्रोद्वेगं मनोरथैश्चलनं अगमत् ४० आंतरान् समाधिसुखस्पर्शान् निविषेणादग्धो मृत्तो यथालोकां
तरं प्रयाति तद्वत् पक्षे आंतरान् जागराभिसंबंधिनः स्पर्शान् देहोष्मणः ४१ आंतरे हार्दांतर्ब्रह्माणि उदितार्कभितेजो दृष्ट्वा तथा च श्रुतिः
नीहारधूमार्कानिलानिलानां खद्योतविद्युत्स्फटिकः शशीनां एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे इति ४२ आंतरं

तस्माकरंजजरिलां जन्मजर्जरगुल्मिकां संसारारण्यसरसीं त्यक्त्वा यास्याम्यहं कदा ३७ इति चिंतापरवशो वनेतु द्वालको द्विजः पुनः पु
नरुत्पविग्नध्यानाभ्यासं चकार ह ३८ विषयैर्नीयमानेतु चित्ते मर्कटचांचले न स लेभे समाधानप्रतिष्ठां तिरायिनीं ३९ कदाचिद्बाह्य
संस्पर्शविरित्यागादनंतरं तस्यागलक्षित कपिः प्रोद्वेगं सत्वसंस्थितो ४० कदाचिदांतरान् स्पर्शान् स्पृष्ट्वा त्यजन्मनः कपिः लोलत्वान्
स्य संयातो विषपं विषदग्धवत् ४१ कदाचिदुदितार्कभं तेजो दृष्ट्वांतरे मनः विषयोन्मुखतां याता तस्य तामरसेक्षणं ४२ आंतरं ध्वांतमु
त्याग कृत्वा विषयुलं परं तस्योदीयमनो याति कदाचित् त्रिस्तपासिवत् ४३ बाह्यानाभ्यंतरान् स्पर्शान् त्यक्त्वा निद्रां च तन्मनः न मलं जो
ति केलेनि कदाचिच्छाम्यंती स्थिति ४४ इति पर्यकुलस्यांतः सखलु ध्यानरत्तिषु दरीष्वन्महन्नु ग्रामसु वात मभ्रद्रुतद्रुम ४५ अतिष्ठन्मु
नसंस्रूमननः संकटे यथा दोलायितवपुस्तस्मात् तस्मातीरतरंगके ४६ अथ पर्यकुलमना विजहार मुनिर्गरौ प्रत्यहं दिवसार्धीनो

श्री

स्यांधतमसः अज्ञानांधकारस्य ईषद्भ्रस्ताभिव्यक्त्यात्यांग ईषत्प्रत्याग्रमं कृत्वा तदानीमेव विषयपाशसनो ह्योधात्तलं परं भूत्वेत्यर्थः ४३ बाह्या
भ्यंतरस्पर्शौ व्याख्यातौ तमसः अज्ञानस्य तेजस आत्मज्योतिष अंतराले संधौ लीनं सन्निद्रूपवर्त्म अश्वर्ती च विरानुवृत्ता स्थितिर्लेभे ४४
दरीषु ध्यानसहूरुमननः सः पर्यकुलस्य मनसः मध्येमध्ये वाते न सन्निहितजले मग्ना माङ्गितो द्रुमः पश्चात् तथा तस्मात् लक्षणेस्तीरतरंगके
दोलायितवपुः सन् संकटे अतिष्ठदिति परेणसहान्वयः ४५।४६ विजहार संचचार महामौलसदेवार्कपादसंबंधदर्शनात् तत्रार्कविहर
णकल्पनया उपमोक्तिः ४७

वा॰टी॰ उप॰ ५
१११

समस्तभूतदुःप्रापामत एव संश्रांतसर्वसंचारां कंदरां मोक्षदशासाधारण्यो विशेषणे आसर्गसमाप्तेः कंदरे वा विशिष्यते ४८ परमाकाशशोभ्र लेखशोभमानां ४९ ज्योतिरूपे रसश्वंद्रस्तदश्मभिश्चंद्रकांतैः सहसंप्रोते घटिते मणिभिः कृतामिव ५० द्युतिसुस्निग्धशीतलच्छायां ५१ कैश्चूरभस्मौलंबं तेप्रसरंती तिकुलं वनाः अहिमाः शीतनिवारणमात्रक्षमाः आलोकाः यस्यां अत एव नात्युष्मां नातिशीतलां नुदितार्कस्य बालसू र्यस्य हेमवद्गौरीं दीप्तां ५२ बालेन आलोकेन परिम्लानां शुष्कां अनेन गुहाप्राङ्मुखीतिगम्यते कोमलः अल्पः शाद्वलमारुतो यस्यां तेन प्रत्यग्भा मे पिगवाक्षवातागम्यते मंजरीजटिले स्तरुभिरुपेतां अनेन सुरभितागम्यते स्वयंवरोद्युक्तां मालावतीं बालां राजकन्यामिवालंकृतामित्य

समस्तभूतदुःप्रापामेकांतसप्रायकंदरां संश्रांतसर्वसंचारां मुनिमोक्षदशामिव ४८ अपर्याकुलितां वातैरप्राप्तमृगपक्षिणीं अदृष्टां दे वगंधर्वैः परमाकाशशोभना ४९ पुष्पप्रकरसंछन्नां मृदुशाद्वलकोमलां ज्योतीरसाश्मसंप्रोतैः कृतां मरकतैरिव ५० सुस्निग्धशीत लच्छायां प्रकरां रत्नदीपकैः सुगुप्तां वनदेवीनामंतःपुरकुटीमिव ५१ कुलं वनाहिमालोकां नात्युष्मां नातिशीतलां शारदस्योदिता र्कस्य हेमगौरीप्रभामिव ५२ बालालोकपरिम्लानां कोमलानाश्वमारुतां मंजरीजटिलोपेतां बालां मालावतीमिव ५३ नृपश्रामपद वीमिवानुरूपां कमलजविश्रमणायोग्यरूपां कुसुमनिकरकोमलाभिरामां सरसिजकोटरकोमलां समंतात् ५४ मोक्षोपायेषूप शमप्रक॰ उद्दालकमनोरथो नाम सर्गः ५१ श्रीवसिष्ठ उवाच सतां विवेकधर्मात्मा गंधमादनकंदरात् चित्रभ्रमणसंप्राप्तामलिः पद्मकुटीमिव १ समाधानोत्सुखतपाप्रविश्रान्तविराजते सर्गव्यापारविरतावात्मपुर्यामिवाब्जजः २ (र्थः ५३ सरसिजकोटर मिव कोमलां अत एव कमलजस्य धातुर्विश्रमणाय योग्यरूपां समंतात्कुसुमनिकरैः श्लक्ष्णकोमलां रम्यां उपशमपदवीमिव सदैवाश्रयि तुमनुरूपां कंदरां प्रापेति पूर्वत्र संबंधः ५४ इति श्रीयोगवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकपंचाशः सर्गः ५१ गुहायामासनस्थेन समाधिं प्रविविक्षिता चित्तप्रबोधनोपायाः श्रितिनाड्यवर्णिताः चित्रेण बहुविधेन भ्रमणेनान्वेषणेन पद्मकु टीमिवेत्यनेन प्रविष्टस्य तत्र निरतिशयानंदरसपानाविश्रांतिर्भविष्यतीति गम्यते १ आत्मनः पुर्यामित्यलोकस्याप्यामपराजितारव्यो

२२७८

घ

अंतर्मध्ये खंजरीरं गुच्छमिव यस्मिन् भासेत तथाविधं अंतेषु खानि तत्र तत्र संबध्धानि पुष्पगुच्छानि वा यस्मिन् तथाविधं आसनं मेघान्वि
द्धानीतिमेघैः विधि रिद्धः अंभोदमेघवृंदं बितामिव तत्र स्थे अंतेषु प्रसक्तानि स्वगुच्छानीव विद्युतो यस्मिन्निति योज्यं ३ ततस्यासनस्य
एष्ठे उपरि तत्र कृष्णालंमृगाजिनामिति वारा एव साराः बहुमूल्य रत्नानि यस्मिन् अनेन तत्र स्थ तारा जिनमिति गम्यते ४ चेतसः हृतोर्जडवि
षयत्यागेन ततनुतां यथा अबुदः वृष्य वृष्यास्वजाड्यं विहाय शुद्ध वपुः शुभ्ररूपः मृको निर्गर्जनः सन् गिरिशृंगे उपविश्यातेन हृत वृष्य
त्यसमासेत्य पृच्छादसः ऋष्यमृकद्रतिपार्श्वे ऋष्यमूकाख्ये सत्युशृंगे ५ प्रबुद्धवत् प्रबुद्धकापिलादिवत् पद्मासनग्रहणं सिद्धासना

चकारासनमम्लानैः पत्रैरंतः खपुच्छकं मृदुमेघविधिर्दंदमंभोधामिव तत्र सः ३ स तत्प्रस्तारयामास पृष्ठे चारुमृगाजिनं नीरंध्रे
तटे मेरुस्तारासारमिवांबरं ४ स तत्रोपाविशद्धृतीक्ष्णेतसस्तनुतां नयन् आंतः शुद्धवपुः शृंगे ऋष्यमूकमिवांबुदः ५ बुद्धव
त्तु दृढं बद्धपद्मासन तरस्सुखः पाणिभ्यां वृषणोध्ध्वं त्वा चकार ब्रह्मांजलिं ६ वासनाभ्यः समाहृत्य मनो मृगमुपप्लुतं निर्वि
कल्पसमाध्यर्थं चकारेमं विचारणं ७ अयि मूर्खमनः कोर्थस्तव संसारवृत्तिभिः धीमंतो नानिषेवंते पर्यंते दुःखदाः क्रिया ८
अनुधावति या भोगात्यक्त्वा समरसायनं संत्यज्य मंदारवनं संपाति विषमंगलं ९ यदि यासि महीं रं ब्रह्म स्वलोकमथापि वा
तन्नानिर्वाणमायासि विना प्रशमनामृतं १० आशाशातावपूर्णत्वेव मेवं सर्वदुःखदं त्यज्य पाहि परं श्रेयः परमेकांतसुंदरं ११
इमा विचित्राः कलनाभावाभावमयात्मिकाः दुःखायैव न वा प्राप्य सुखाय कदाचन १२ शब्दादिकाभिरेताभिः किं मूर्खहितव
तिभिः भ्रमस्यविरतं व्यर्थं मेघमं

पद्मलक्षणं पाणिभ्यां वृषणोध्ध्वे त्युक्ते स्तेस्तत्रैवोपपत्तेः ब्रह्मसमंजलिं ब्रह्मादिगुरुपरंपराप्रणामांजलिः ६
उपसमीपे विषयेषु प्लुतं धावितं ७ अयी तिकोमलामंत्रेण ८ मंदाराः देवतरुभेदाः तेषां वनं ९ महीरं ध्रपातालं निर्वाणं निरतिशय सुख
विश्रांतिं १० त्वंभोगाशा शातेनापूर्णत्वेसति एवं प्रागुक्तरीत्या सर्वदुःखदं भवसि अतः परं भोगाशात्यज्यस्य कांत्य एछांदसः नित्य
निर्दुःखनिरतिशयानंदरूपत्वादेकांतसुंदरं परं श्रेयो निर्वाणं पाहि ११ इष्टसंपादनभावः अनिष्टनिवारणमभावस्तन्मयत्वसुखभा
वाः विचित्राः कलनाविषया १२ हत शब्दो निरार्थः मंडूकिकाय यथा मेघे शब्दादिकाभिर्व्यर्थं वृत्तिभिर्भ्रमतितथेत्यर्थः १३

वा॰टी॰ न्ठ॰प्र॰५
११२

तदेवस्पष्टमाहमनइतिभुवनंजगज्जालंच २५ किंचिदवाप्तनसगम्यंदेहकैवल्यसुखंनिर्वृतिंजीवन्मुक्तिविश्रांतिसुखंवहसिप्राप्नोषि तासिनत्रामेसर्वत्रसुपरमलक्षणेसमाधौ हेचेतः पदंव्यवसायंकिंनानुबध्नासि २५ कलनाःदुःखीयेवतियदुक्तंतन्नत्वेकंदृष्टांतोदाहरणेःप्रपंचयति आगत्येत्यादिनाव्यर्थेनबाहिर्मुखतालक्षणेनोत्थानेनतत्पदंहितामुपचितांश्रोत्रेंद्रियताद्रात्म्यापत्तिरूपांश्रोत्रता मेत्यप्राप्य प्राणान्त्वेवप्राणोनामभवतिवदन्वाक्चक्षुःशृण्वन्श्रोत्रमितिलिंगादात्मनःश्रवणादिकालेश्रोत्रादिभावश्रुतेरिति भावः लुब्धगीतयंत्रारवनमोहितमृगवत् २६ त्वक्त्वगिंद्रियतांगनीकरेणुस्तस्पांतस्यत्रिलुब्धगजेंद्रवत् सुष्ठितयाकरिण्यावन

मनोमंडुकिकेव्यर्थमियंतंकालमंधया भ्रमत्याभुवनेक्षिप्रंकिंसमासादितंत्वया २४ यस्माल्किंचिदवाप्नोषियस्मिन्वहसिनिर्वृतिं तांसिंध्वेतःत्रामेमूर्खनानुबध्नासिकिंपरं २५ आगत्यश्रोत्रतांमूर्खव्यर्थेत्थानेपदंहितं धियात्रशब्दानुसारिण्यामृगवन्मासुपत्र ज २६ त्वक्तामागत्यदुःखायस्पर्शोन्मुखतयाधिया मूर्खमाबद्धतामेहिगजोलुब्धगजेंद्रवत् २७ रसनाभावमागत्यगर्द्धनांध दुरंधसां मानात्रामेहिबडिशापिंडलंपरमत्स्यवत् २८ चाक्षुषींवृत्तिमाश्रित्यप्रभारूपचयोन्मुखी मागच्छदग्धतांमुग्धकांति लुब्धपतंगवत् २९ घ्राणमार्गमुपाश्रित्यशरीरांभोजकोटरगंधोन्मुखतयाबंधमालंसंश्रयभृंगवत् ३० कुरंगालिपतंगेभमीनास्त्वेकैकशोहताः सर्वयुक्तैरनर्थैस्तुव्याप्तस्यात्कुतःसुखं ३१ हेचित्तवासनाजालंबंधायभवतोहितं स्वात्मनःसह ९ जःफेनस्ततःकुसुममित्यापयो

गजेंद्रप्रलोभ्याकृष्यगर्तपातादिनाहास्तिपकाबध्नंतीतिप्रसिद्धं २७ हेअंधकुरंधसांदुरन्नानांगर्द्धे नाभिलाषेण २८ चाक्षुषींवृत्तिंचक्षुःप्रभाकांतिस्तत्संबंधीयोरूपचयोनानारूपभेदस्तदुन्मुखीतत्प्रवणा २९ गजोन्मदिन पद्मगर्भस्थभृंगवत् ३० एकैकसतस्याप्येवमनर्थेसर्वसक्तस्यतवदुर्वारमेवनिरतिशयदुःखमित्याहकुरंगेति अनर्थैरनर्थसा धनैःशब्दादिभिर्युक्तैर्मिलितैः हेअततेतिचित्तसंबोधने ३१ कुत्सितेनकर्मिणाकर्माकारकोटकेनसहजःस्वाभाविकस्वनालाफेनः स्वात्मनोबंधायपयथाकोशात्मनातंतोविस्तारितस्तथा वासनाजालस्वात्मनोबंधायकृहितंकुवितर्कनिर्मितमित्यर्थः भवतःआहि

११२

कथं तर्हि प्रकारः तस्यास्य बंधस्य जयस्तस्येह शारदभ्रमिति प्रथमं कर्मोपसनादिभिः शारदभ्रवत् कुह्मिागत्य ततः श्रवणादिपरिपाकाद्वा
नोदयेन निर्मूलपरिशाम्यासि तत्तदा अनंतो जय इत्यर्थः २३ वक्तव्यं सर्वोपि इंडीकृत्यो कोत्र्याह क्षयेति क्षयोदयो जन्ममरणे तृष्णा बाल्यादारिद्र्या
घाश्च तासां धात्री पर्यंते मरणोत्तरमपि नरकस्थावरादिगतिपरितापनत्रीणां जगत्सृष्टिं आगतां प्रवृत्तिं २४ अथवा अहितस्य चित्तस्य नानु
शासनं कार्यं किंतु बलान्निग्रहस्य विचारेणोच्छेद एव कार्य इत्याशयेनाह करोमीति अनुशासनं हितोपदेशं २५ अथवा न चित्तोच्छेदपर
यत्नः तस्य मूलात् तानान्वयव्यतिरेकानुविधायित्वात् तदुच्छेदनेवोच्छेदः साध्य इत्याशयेनाह यावदिति त्रिभिः २६ उत्तरो यावत्तावदिति नि

शारदभ्रवदागत्य शुद्धिं तक्रभवामयां यादिशाम्यसि निर्मूलं तदनंतो जयस्तव २३ क्षयोदयदृशाधात्री पर्यंतपरितापिनीं जानन्न
पि जगत्सृष्टिं नत्र क्षपासि विनक्ष्यसि २४ करोम्यथ किमर्थं वा न वैतदनुशासनं विचारणवतः पुंसश्चित्तमास्ते हिनानय २५ यावद्दृता
न घनता तावत्प्रघनचिंतना यावत्प्राद्रुकदंता नावल्ली हारभूरिता २६ यावद्दृताननतनुता तावद्धि तस्य तानवं प्रादुरूपारिक्षया
यावत्तावल्ली हारसंक्षयः २७ यावत्तानवमायाति शुद्धचित्तविचारतः तावत्तत्क्षीणमेवाहं मन्ये शारदमेघवत् २८ अनुशासनमेत
द्य दसतो नश्यतो थवा क्रियते तन्नभोचारिपवनाहननैः समं २९ तस्मात्त्वं क्षीयमाणत्वात्त्यजामि त्वामसन्मयं मौर्ख्यं परममेवा
रुः परित्याज्यानुशासनं ३० निर्विकल्पोस्मि चिद्दीपो निरहंकारवासनः त्वयाहंकारबीजेन न संबद्धोस्म्यसन्मय ३१ अपराधो हमि
ति व्यर्थं दुर्दृष्टिरवलंबिता त्वया मृत्यु विनाशाय पराकाविषविषूचिका ३२ {पातो यावंस्तावानित्यर्थकौ २७ तानवं वासनाक्षयेन सो

क्षय २८ अविवेकिनश्चित्तमनुशासनमयोग्यमेव विविकिनस्तु नश्यदवस्थं नष्टं वा तत्सुतरां न तथेत्याशयेनाह अनुशासनमिति नभसोचारिणः
पवनस्य च आहननैस्ताडनैः समं व्यर्थमित्यर्थः २९ उक्तमेवानुवादेनोपसंहरति तस्मादिति ३० आत्मनस्तदसंबंधदर्शनमेव तत्त्याग
इत्याशयेनाह निर्विकल्प इति ३१ मम कोपराधो येन मां विनाशाय वृत्तं संपद्यसे त्वं अपरां परित्यजसीति चेद्दाहादावहं नादुर्दृष्ट्यावलंबनमे
वेत्याह अपराधमिति मम दुर्दृष्टिः शोका विषप्रयुक्ता विषूचिकेव मिथ्याहेतुकापि मृत्यवे विनाशायैव संपद्यत इति अपराध इत्यर्थः ३२ ७॥

कुतो मिथ्यात्वमिति चेदनुपपन्नत्वादेवेत्याह अनंतस्येति इति एवंरूपे परिच्छिन्ने मनसि तन्वी परिच्छिन्ना स्थितिर्देहाद्यहंभावेनास्थितिर्न
संभवति नोपपद्यत इत्यर्थः वासितान्तःकरणो इदं तनोश्चतयो बिल्वान्तःस्थितिर्यथा न संभवति तथेत्यर्थः ३३ चित्तस्यत्यागन्यत्वे हेत्वंतरमप्याह महा
श्वभ्रीति हे चित्त त्वया महत्या श्वभ्री जीर्णकूपादिरिव गंभीरा अदृश्यतला कामक्रोधलोभादिसर्पवृश्चिकपिशाचालयत्वाद्दुःखदा दुर्वासनैव खा
लयत्वेनाश्रिना वर्ततेति खेदः अहं तु एनां नानुसरामीति तदनुसारिणं त्वां त्यजामीत्यर्थः ३४ किंचायं देहः स आत्माहमिति भ्रांतिस्तत्रूपा त्वया अ
हंतापरिकल्पिता बालस्येवाविचारिणो मोहः विचारिणो मम कः किलन कश्चिदपि नास्त्येवेत्यर्थः ३५ तन्नास्ति त्वमेवाविमृष्टरूपा विचारदृष्टिपादां

अनंतस्यात्मतत्त्वस्य तन्वी तिमनसि स्थितिः नसंभवति बिल्वांतर्वासितारं तिनोर्यथा ३३ महाश्वभ्रीवगंभीरा दुःखदा वासनाश्रिता त्वये
षा बत चित्तेति नेनामनुसराम्यहं ३४ कः किलायं मुधा मोहो बालस्येवाविचारिणः अमसौ हमिति भ्रांतिस्त्वहंतापरिकल्पिता ३५ पा
दांगुष्ठाच्छिरो यावत्कणशः प्रविचारितं न लब्धोसावहं नामकः स्यादहमिति स्थितिः ३६ भरितारोषदिक्कुंजं यत्स्यामेकं जगत्त्रये संवे
दनमसंवेद्यं सर्वत्रविगतात्मकं ३७ दृश्यते यस्य नैतत्तानाम परिकल्पना नैकता नान्यता नेव ह न महत्ता न चाणुता ३८ वेद तत्त्वां स्वसंवे
द्यमात्तं दुःखकारणं विवेकजेन बोधेन तदिदं हन्यसे मया ३९ इदं मांसमिदं रक्तमिम्यान्यस्थीनि देहके इमौ तु श्वासमरुतः कोसावहमि
तिस्थितिः ४० स्पंदो हि वातस्त्वक्ती नाम बबोधो महाचित्तः जराम्रतिश्च काये स्मिन्कोसावहमिति स्थितिः ४१ ६ गुष्ठादित्यादिना कणशो वि

विच्येति शेषः ३६ यद्यहं पदार्थो नास्त्येव तर्हि कस्त्वं तत्राह भरितेति द्वाभ्यां भरिताशेषदिक्कुंजं दिक्कृतपरिच्छेदरहितं एकं वस्तुकृततद्रहि
तं असंवेद्यं क्रमसंवेद्यावस्थात्रयलक्षणकालकृतपरिच्छेदशून्यं अत एव सर्वत्र सर्वेषु प्रकारेषु विगतो व्यस्त्वंतरात्मा येस्य ईदृशं संवेदनमेवाहं
स्यामित्यर्थः ३७ दृश्यत्तापरिच्छिन्नं रूपं एकता एकत्वसंख्या अन्यता तदन्यसंख्या महत्ताणुत्वे परिणामे ३८ यतोहं संवेदनात्मा तत्तस्मात्साक्षिभूते
नत्वेन संवेद्यं त्वां चित्तं वेद पश्यामि ततो दुःखकारणत्वादेव दृश्यमाणां विवेकमारात्पहन्यसे ३९ विवेचन प्रकारमेव दर्शयति इदमित्यादि
ना ४० स्पंदात्मनः सर्वोपि वातस्त्वक्ती नां प्राणानां अवबोधात्मकमहाचित्तः परमात्मवः जराम्रतिश्च त्येते कायपकारो ४१ श्रीरामचंद्राय नमः॥

अन्यदहं पदार्थाद्व्यतिरिक्तं ४२ ४३ यथाभूततयापरमार्थतयाविचारे मनः अहं न न त्वं चित्तमहं वासनापि नाहं आत्मा तु सर्वथा अहं नयान स्य च
इत्याह आत्मेति ४४ नास्मिन्नात्मनि यद्यध्यारोपदृष्टिस्तर्ह्यहमेव सर्वत्राधिष्ठानमिति सर्वमेवाहं यद्यपवाददृष्टिस्तर्हि नाहं किंचिदपीति नैकदे
हमात्रपरिच्छिन्नाहंभावलक्षण इतरोहंकारक्रमो विद्यत इत्यर्थः ४५ अज्ञानलक्षणेन धूर्तेन किं तवेनाहं तयावंचनया चिरं पोथितः संक्लेशि
तोस्मि लब्धेनेति भावे क्तः विप्रलंभेनेत्यर्थः मृगपोतक इवेति शेषः लब्धेवेति पाठः साधुः पशुपोतको वत्सः ४६ त्वं पारमार्थिकं यद्रूपं तत्त्वस्य

मांसमन्यदसृक्चान्यदस्थीन्यन्यानि चित्तहे बोधोन्यः स्पंदनं चान्यत्कोसावहमिति स्थितः ४२ इदं घ्राणमियं जिह्वात्वगियं श्रवणे इमे २
इदं चक्षुरसौ स्पर्शः कोसावहमिति स्थितः ४३ यथाभूततया नाहं मनो न त्वं न वासना आत्मा शुद्धचिदाभासः केवलोयं विजृंभते ४४
अहमेव हि सर्वत्र नाहं किंचिदपीह वा इत्येव सन्मयी दृष्टिर्नेतरा विद्यते क्रमः ४५ चिरमज्ञानधूर्तेन पोथितोस्मि त्वहं तया वृकेनेव
नाटव्यां लब्धेन पशुपोतकः ४६ दिष्ट्येदानीं परिज्ञातो मयैवाज्ञानतस्करः पुनर्न संश्रयाम्येनं स्वस्वार्थापहारिणं ४७ निर्दुःखो दुःखयो
गस्य नाहं तस्य न चैष मे कश्चिद्भवति शैलस्य तत्स एव यथांबुदः ४८ भ्रष्टात्वहमिदं वच्मि वेद्मि तिष्ठामि यामि च आत्मावलोकनेनाहम
नहंकारतां गतः ४९ नूनमेवाहमेवैतमन्यः त्वाश्चक्षुरादयः यांतु तिष्ठंतु वा देहे ममैते न तु न किंचन ५० कष्टं कोयमहं नाम कथं केनोपक
ल्पितः जगद्वालक वेतालस्तालोत्ताला तुलाकृतिः ५१ एतावंतं चिरंकालं व्यर्थमालुठितो वरे अहमत्र तृणोन्मुक्ते दुरुद्रोहारिणोयथा ५२
स्वार्थमालोकने चक्षुर्यदि तत्सुखतां गतं तदहं नाम कोसौ स्याद्योस्मिन्दुःखेन मोहितः ५३ (स्वस्यार्थस्य धनस्यापहारिणं ४७ परस्परविरुद्ध

स्वभावयोः संबंधोपि नास्ति दूरे ऐक्यमित्याशयेनाह निर्दुःख इति शैलस्य अंबुदः यथा कश्चिदपि न भवति तद्वत् ४८ यदि ते सर्वथाहंकारादिर्ना
स्ति तर्हि कथं वचनादिना व्यवहरसि तत्राह भ्रष्टात्वेति नरेश्वतात्कालिकेन नष्टभावकल्पनेनाहंकारभ्रष्टा इदं तृणरूप देहादि वचनादि वच्मि चक्षुरादिना वेद्मि
४९ नूनं निश्चितमेवमन्ये इमे चक्षुरादयस्तत्वतो हमेव यदिमद्व्यतिरिक्तास्तर्हि ताजडाः देहे तिष्ठंतु यांतु वा नैते मम किंचनेत्यर्थः ५० तालात्प्युत्ता
लादीर्घा अतुला आकृतिर्यस्य ५१ इदानीं प्राक्तनीमविचारदशामनुशोचति एतावंतमिति ५२ इदानीं मनोइंद्रियविषयसंबंधमहंप्रत्ययास्पदं मगय

[illegible] ५३

वा॰टी॰तुप॰५
११८

निजे तत्वे विषये ५४ स्वकर्मेस्वविषये सामान्ये एकवचनं पदसंस्कारपक्षाश्रयात् ५५ शाब्दशक्तिं शाब्दलक्षणविषयं स्वार्थः श्रवणात्समाने
नपीडिनेवन्नीकृते आगमः प्रसंगः ५६ भरितयास्वोदरपूरकतयागार्द्धेनोतियावत्मात्ता त्राभिमंता ५७ एषातुक्तस्थलेषुप्रसिद्धाभावनाभ्र
हंताकल्पनातस्यांभावनायामसत्यायांसत्यामयंदेहः सः अहमितिभावः संभ्रमोभ्रांतिरेवेतिसर्वथादेहाहंभाववासनात्याज्येत्यर्थः ५८ न
नुवासनाभावेबाह्यप्रवृत्तीनांसर्वथोपरमः स्यादितिजीवनमेवपुरुषस्यनस्यात्तत्राहवासनाहीनमपीति एतच्छरीरंस्वार्थेजीवनहेतौ
कर्मणिवासनाहीनमपिप्रवर्त्ततेकराणांप्राग्युद्धादिप्रवृत्तिवर्णनादितिभावः ५९ यदिप्रवर्त्ततेतर्हितन्मूयुक्तंदुःखमपिभविष्यत्येवेति

स्पर्शनायनिजेतत्वेयदिजातात्वगुन्मुखी तत्कोयंस्यादहंनामकुपितश्चास्वरवोदितः ५४ रसेषभिनिषण्णोस्मिन्स्वकर्मेरसनेंद्रिये अहंमत्व
भुगित्येषकुतस्त्यः कुत्सितोभ्रमः ५५ शाब्दशक्तिंगतेश्रोत्रेवराकेस्वार्थपीडिते तदहंकारदुःखस्यनिर्बीजस्यकआगमः ५६ आत्मंभरि
त्वेननिजेघ्राणेस्वंगंधमागते अहंघ्रातेतियोमातातंचोरंनैववेद्म्यहं ५७ मगातल्मा क्रमेणेषाभावनाव्यर्थभाविनी भाववस्तस्यामस
त्यायांपुः सोयमितिसंभ्रमः ५८ वासनाहीनमप्येतच्चक्षुरादींद्रियैः स्वतः प्रवर्त्ततेबहिः स्वार्थेवासनानात्रकारणं ५९ वासनारहितंक
र्मक्रियतेननुचित्तहे केवलंनानुभूयंतेसुखदुःखदृशोग्रगाः ६० तस्मान्मुखर्याणींद्रियाणित्यक्त्वांतर्वासनांमिजा कुरुध्वंकर्महेसर्वेनदु
खंसमवाप्स्यथ ६१ भवद्भिरेवदुःखाप्यवासनावासितस्रुधा बालैः पंकक्रीडनकंविनात्रोर्नेवाखिन्नता ६२ वासनाद्याहृत्राः सर्वाव्यातिरिक्ता
स्तुनात्मनः जलादिवतरंगाद्यास्तस्यैवान्यस्यनानघ ६३ {वासनात्यागात्कोगुणस्तत्राहवासनेति तात्कालिकभोगाभासेअहंदुःखीतिना

भिमानअयगाः भाविन्यस्तसुखदुःखदृशोनानुभूयंतइतितत्प्रयुक्तशोकमोहभयविषादचिंतोद्वेगादिसर्वसंतापप्राप्तिरेवास्यगुणइतिभा
वः ६० इदानीमिंद्रियाणिसंबोध्यासमर्थेविविच्योपदिशति तस्मादित्यादिना ६१ बालैः प्रथमंपंकक्रीडनकामिवपश्चात्तद्विनाशेनाखिन्नतेव
चभवद्भिर्विषयार्जनेतद्विनाशेचदुःखाप्तेवभोगवासनात्तास्मानिवासितेत्यर्थः ६२ अतएवविद्वामतानबाधितानाः सहस्वकार्यैः शुद्धात्मवसं
पन्नाइतिनपृथक्संतीत्याहवासनाद्याइति आद्यपदेनतत्कार्यरागप्रवृत्त्यादिर्ग्रह्यते तस्यैवताः नसंतिनः अन्यस्यात्तस्येत्यर्थः ६३ श्रीः

११८

अतएवाखेलत्वन्मय्येवेंद्रियाणि नात्रिसाहं त्वन्मय्येवेति स्वयंभुवाखतएवोद्भूतया ६४ इहअधःसंसारशिलाकंटकभुविलुठथयथाशिखरिप
थिकाःपर्यवर्तशिखरेगच्छंतःपि तवत्राङ्मवत्राङ्मंस्ताहृष्ट्याशिखरत्सत्यतितोअधोविषमेलुठंतितद्वत् ६५ यथामुक्तानांभ्रन्येच्छिद्रितेआशये
गर्भप्रोताआततनादीर्घास्तुसंतुबंधनेहेतुस्तद्वत् ६६ कल्पनाभ्रांतिसन्मात्रेणकल्पितासंपादिताएषावासना ६७ भवतांचिंतेंद्रियाणांवृद्धमा
नाविमोहायक्षयायमरणादिदुःखायास्फुरंतितां तेजसां उल्कादीनामपि ६८ तस्मादुक्तहेतोःसर्वेंद्रियाणांकोशावदाधारहेचित्तत्वंसर्वेंद्रियेःस
हएकमेकमत्यमुपेत्यनूनंनिश्चयेनात्मानंस्वंअसत्त्वरूपंमिथ्याभूतमालोक्यस्वसाक्षिनिर्वाणामलबोधमात्रंतत्त्वतोभूत्वाआस्वनभूयश्च

तस्मायैववविनश्यःस्वव्यर्थमिंद्रियबालकाः कोशाकारःकुकुमयस्तंतुनेवस्वयंभुवा ६९ तस्मयैवेहलुठयजरामरणसंकटे भ्रमदृष्टेवुत्राशिख
रिपाथिकाःश्वभ्रभूमिषु ६५ वासनेवेहभवतांहेतुरेकत्रबंधने रज्जुःसूत्यामपृपातमुक्तानामाततायथा ६६ कल्पनामात्रकलितासत्येषाहि
नवस्तुतः असंकल्पनमात्रेणदीर्घयत्नेणवविलूयते ६७ एषाहिभवतामौतिविमोहायक्षयायच वातनेरेवदीपानांसुरतामपितेजसां ६७ हेचि
त्तसर्वेंद्रियकोशातस्मात्सर्वेंद्रियैरेक्यमुपेत्यनूनं आलोक्यचात्मानमसत्त्वरूपंनिर्वाणमेवामलबोधमास्व ६९ विषयविषावेषूचिकामनंतां
निपुणमहंस्थितिवासनामपास्य अभिमतपरिहारमंत्रयुक्त्याभवविभवोभगवान्भियामभूमिः ७० मोक्षोपा० ५० उद्दालकविचारःसर्गः ५२
उद्दालकउवाच अपारपर्यंतवपुःपरमाण्वणुरेवचे चिरस्वेत्यातदाक्रांतोननाक्तावासनादयः १ (तद्रूपमादत्स्वेत्यर्थः ६९ सर्वत्रगास्त्रतत्वतोभिम

तोयोद्वैतवासनापरिहारस्तल्लक्षणयायाअभिलाषितविषयत्यागलक्षणयावामंत्रयुक्त्याअनंतांअसंख्यदुःखांअहंस्थितिरहंकारस्तद्वासनालक्षणांविषस
दृग्गज्ञानप्रयुक्तांविषूचिकांनिपुणंअपास्यभवविभवः विसंसारःसन्भियांमरणादिसर्वभयानामभूमिरनास्पदंभगवान्पूर्णानंदात्मैवभवेत्यर्थः ७० इतिश्री
वासि०प्र०उप०द्विपंचाशःसर्गः ५२ वासनाभिरलेपित्वमहंकारेणचात्मनः शरीरमनसोर्वैरमित्याद्यत्रोपपाद्यते परिच्छिन्नास्तिलादिःकुसुमादिभिर्वास्य
ते आत्मचित्तुनुविद्युतपारःपरावधिःपर्यंताःपूर्वपश्चिमपार्श्वविधयश्चयस्यतथाविधस्वरूपातथास्थूलाःपार्थिव्यस्तेजोवायवःकस्तूर्यादिनावास्यंते
चित्तुपरमाणोपंचीकृताकाशादव्याकृताकाशाच्चाणुःसूक्ष्मतमाभूतस्तस्याआक्रांतोईषदपिस्यर्शोवासनादयोनत्राक्ता इत्यर्थः साक्षात्तस्य
शरीरात्मत्वपितेचेत्यस्यनाहारात्तत्संबंधप्रसक्तित्त्वंकावारणायविशिनष्टि अप्रेत्येति १

ब्र·टी·उप·५
११५

ननु त्वदप्रकाशितविषयेवासनो रथाद्दर्शनात्त्वयैव वितता स्तोः कथं त्वदस्यार्थोन्यमलत्राह मन इति नमयाता: किंतु जडेंद्रियैरुपात्तानां विषयाणां रोमु
ष्यां बुद्धौ अहंकारे च चित्प्रतिबिंबैर्हेतुभिः तत्क्ष्मा वस्तारूपा अत एव भ्रत्या असद्रूपा अपि वितताः इव त्रासनोद्युता:॥ वासनाः वितताविरला इति ता
मनः अनुभवतीति परेणान्वयः २ जागरे भूरिशः कृतेभ्यो विषयविचारेभ्यः अनुभूतेभ्यश्च विषयेभ्यः भ्रयोपि स्वप्ने अंतर्नाडीच्छिद्रं तं वासनामया
नेव विषयांस्तन्मनः अनुभवति न च बुद्ध्यहंकारकृतेन मननानुभूतेन वाममलेपः हि यस्मात् दलेपिका चिद्देवाहं न मन आदि संघाताः त्मेत्यर्थः तथा
च श्रुतिः स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति ३ एवं कृत्स्नदेहकृतेनापि न लेप इत्याह स्वदुर्भावेति दुर्भावादु

मनः रोमुष्यहंकारप्रतिबिंबैर्जडेंद्रियैः वासनाविताताः भ्रत्यावेतास्तत्रासनोद्युताः २ तत्कृतेभ्यो विचारेभ्योनुभूतेभ्योपि भूरिशः भयोप्यनु
भवत्यंतर्हं हि चिद्दलेपिका ३ स्वदुर्भावोपरि चितं देहः संसारसंस्थितिं गच्छत्वथ त्यजतु वा वाप्यहं हि चिद्दलेपिका ४ चितो न जन्ममरणे
सर्वगायाः स्थितेः किल किं नाम म्रियते जंतुर्मार्यते केन वापि किं ५ चितो न जीवितेनार्थः सर्वात्मा सर्वजीविनं किं प्राप्स्यति कदात्मैष प्राप्यता
यदि जीविते ६ जीवने म्रियते चेति कुविकल्पकमालिनी कल्पनामनसामेव नात्मनो विमलात्मना ७ योत्यहंभावनां प्राप्तो भावाभावैः स
गृह्यते आत्मनो नास्त्यहंभावो भावाभावाः कुतोस्य ते ८ अहंभावो मुधा मोहो मनश्च मृगतृष्णिका जडः पदार्थसंभारः कस्याहंकार
भावनो ९

ष्वेष्टाः स्ते रूपरचितां ४ अत एव जन्ममरणे अपि खल्वस्य न स्त इत्याह चित इति सर्वगत्वात् स्थितत्वाच्चेति हेतुगर्भविशेषणे इति द्योतना
य किलेति निपातः अविनाशाद्द्वितीयात्मदर्शनेन वध्यद्योतकबुद्धिर्निर्विषयैव संपद्य इत्याहत्यंतिकाभयसिद्धिरित्यभिप्रायेणाह किं नामेति ५ यस्य हि जी
वितेनार्थस्तस्य मरणाद्भयं स्यात् न त्वमोचितस्त्याह चित इति यतः सर्वात्मा चिदेव सर्वं वस्तु तां जीवितं एवमस्यास्सर्वदेशकालवस्तुप्रापनात्सु
रूपचिदेव यदि जीवितं तदा तेन जीवितेन केदा किमन्यदप्राप्तं प्राप्स्यति यदि च्छेदित्यर्थः॥ मरणजीवनयोर्मनःकल्पनामात्रत्वादपि न तद्द्वे
ष ६ वांछाप्रसक्तिरित्याह जीव्यत इति ७ यो हि देहाहंभावनां प्राप्तः स देहभावी भूस्वरूपे जन्ममरणे गृह्यते ८ देहाहंभावना किमहंकारस्य उ
त मनसः उत पदार्थवर्गस्य तत्राद्यो न प्रमाणवेद्योवित्युसद्रूपो पदार्थस्त्वं तं जडो नामाभिमानयोग्य इति निर्विषयानिराश्रया च सेत्याह अहंभा

१६

वक्रमेवार्थभंग्यंतरेणविस्तरेणाहकेत्यादिना ९८ आत्मंभरितयाखस्वविषयमात्रव्याप्ततालक्षणस्वोदरमात्रपूरकतयानाहंकारपुष्टिलक्षणपरोप
कारितयेत्यर्थः पदार्थत्वेपदार्थस्वरूपे ९९ गुणाःसत्वादयःगुणानामर्थःप्रकारःप्रवृत्तिमोहलक्षणस्वव्यापारेप्रकृतौगुणसाम्यावस्थालक्षणस्वभावेप्र
कृतिःप्रधानाख्यामायासद्भूतसतिस्वात्मभूतेसत्स्वभावेएवविश्रांतं ९९ इहास्मिन्देहेयश्चिदात्मासोपिसर्वगत्वादिविशेषणंपरमात्मानमेवाहमिति
संधायास्थितः सोपिनाहंकारास्पदमित्यर्थः ९९ एवंसतिअहमित्येतद्देहमात्राभिमानीकिमाकृतिः किंजातीयःकीदृशसंस्थानोवातत्वतःकोवा

दे

रक्तमांसमयोदेहो मनोनष्टंविचारणात् जडाश्चित्तादयःसर्वेकुतोहंभावभावना ९८ आत्मंभरितयानित्यमिंद्रियाण्यास्थितान्यलं पदा
र्थाश्चपदार्थत्वेकुतोहंभावभावना ९९ गुणागुणार्थेवर्तंतेप्रकृतौप्रकृतिःस्थिता सद्देवसतिविश्रांतंकुतोहंभावभावना ९२ सर्वगंसर्वदे
हस्थंसर्वकालमयंमहत् केवलंपरमात्मानंचिदात्मैवेहसंस्थितः ९३ एवंकिमाकृतिःकोवाकिमादेशश्चकिंकृतः किंरूपःकिंमयःकोहं
किंगृह्णामित्यजामिकिं ९४ तेनाहंनाममेनास्तिभावाभावोपपत्तिमान् अनहंकाररूपस्यसंबंधःकेनमेकथं ९५ असत्यत्वमहंकारसंबं
धःकस्यकेनकः संबंधाभावसंसिद्धौविलीनाद्वित्वकल्पना ९६ एवंब्रह्मात्मकेमिरंयत्किंचिज्जगतिस्थितं सदेवास्तितदेवास्मिपरित्याज्योवा
मिकिंमुधा ९७ एकस्मिन्नेवविमलेपदेसर्वगतेस्थिते अहंकारकलंकस्यकथंनामोदयःकुतः ९८ नास्त्येवहिपदार्थश्रीरात्मैवास्ती
हसर्वगः पदार्थलक्ष्म्यांसत्यांचसंबंधोस्तिनकस्यचित् ९९ इंद्रियैरिंद्रियैरंगैर्मनोमनसिवल्गति चिदलिप्तवपुःकेनसंबंधःकस्यकिंकृ

किमादेशःकइतिनिर्देशार्हःकेनहेतुनावाकृतः किंवर्णःकस्यविकारः॥तद्भावेनकिंगृह्णामिअतद्भावेनकिंवात्यजामि ९४ अतोनिर्वक्तुमयोग्यत्वान्मि
थ्यैवाहंकारइतिनात्मनस्तत्संबंधइत्याहतेनेति भावत्वेअभावत्वेवानुपपत्तिमान् ९५ द्वित्वकल्पनातं अहमितिद्वैविध्यकल्पना ९६ एवंसद्रूपव्य
तिरिक्तंपदार्थपरिमार्गणोपिनस्यमिथ्यात्वमेवपर्यवस्यतीतिसद्रूपाद्वैतसाम्राज्यंप्रतिष्ठितमितितन्मतेकस्यावकाशइत्याहएवमिति ९७ सद
द्वैतासिद्धिबलादप्यहंकारोनिरसितुंशक्यइत्यान्यथ्येनाहएकस्मिन्निति ९८ अस्तुवापदार्थलक्ष्मीस्तथापिसंबंधोदुर्वचइतिनतत्साधकप्रमा
णादिप्रसरतत्सिद्धिरितिप्रौढिनिर्भरयन्नाहपदार्थलक्ष्म्यामिति॥९९॥असंबंधमेवोपपादयतिइंद्रियैरिति अंगैःस्वावयवत्वेनकल्पितैरिंद्रि
यैरिंद्रियैःसर्वेंद्रियैर्मनःमनस्येववल्गनबद्धलातिनबाह्यार्थान्स्पृशंसमतेचित्तुइंद्रियैर्बाह्यार्थैश्चअलिप्ततनुरसंगत्वभावा एवंचकस्यकेनसह

१०८

असंबंधे दृष्टांतमाह उपलेति २१ कुतस्तर्हि लौकिकानामभेदं धनमित्यादिव्यवहारस्तत्राह असदिति विपर्यस्तं भ्रांतं २२ २३ इतिसेममप्री
तिचलत्वं पदनुभवन्निदं वातत्वं २४ इदानीमहंकारमार्जनोपायमाह अहंकारेति प्रागव्याख्यातं २५ शारत्वंशारदिखे निर्मलेखभाव २६
सतितास्मिन्कास्वतिस्तमाहददातीत्यादिना २७ सलिलात्मनि दुर्वासिनासलिलगर्भे २८ सरणंमरणादि पारलौकिकदुःखंजीवितं पुनर्जन्म
तदुपांतं तदवधिकं एवंजीवितं ऐहिकदुःखंमरणांतगं मरणावधिकं भावे भोगपवर्गः अभावान्नाशाद्यवच्छिन्नः खंडितः २९ अर्करत्ना

उपलायग्रशलाकानां संबंधो न यथा मिथः तथैकत्रापि दृष्टानां देहेंद्रियमनश्रितां २१ असदभ्युत्थिते व्यर्थमहंकारमहभ्रमे ममेदमि
दमस्येति विपर्यस्तमिदंजगत् २२ अलब्धालोकजाते यमहंकारचमत्कृतिः तापनहिमलेखेवतत्त्वालोके विलीयते २३ आत्मनोव्य
तिरेकेणान किंचिदपि विद्यते सर्वत्र हेतिमेनत्वमेतत्तज्ज्ञावयाम्यहं २४ अहंकारभ्रमस्यास्य जातस्याकाशवर्णवत् अपुनःस्मरणंम
न्येनूनं विस्मरणं वरं २५ समूलं संपरित्यज्य चिराय्याहं कृतिभ्रमं तिष्ठाम्यात्मनि शांतात्मा शारत्खंशारदोवखे २६ इरात्यनर्थनिच
यं विस्तारयति दुःकृतं विस्तारयति संतापमहंभावोनुसंहितः २७ स्फुरत्यहंकारघने तृष्णोम्मिसलिलात्मनि विकसत्यभितः कायदं
वेदोषमंजरी २८ मरणं जीवितोपांतं जीवितंमरणांतगं भावोऽभावाद्यवच्छिन्नः कष्टेयं दुःखवेदना २९ इदंलब्धमिदंप्राप्स्यामी
त्यानिर्दाहकारिणी तृष्णाम्यत्यर्करत्नानां ग्रीष्मेग्निरिवदुर्दिया ३० नालीदमिदमस्तीति चिंताधावत्यहंकृति जडाश्रयाजडग्भ्रमा
लान्तेलावलीमिव ३१ अहंभावे परिक्षीणेऽथ षः संसारपादपः भूयःप्रपच्छत्यरसोनपाषाणवदंकुरं ३२ खमहमारूक्षभोगिन्योदे
हद्रुमकृतालयाः क्वापि यांति विचारात्मन्यागते विनतासुते ३३ असदभ्युत्थिते विश्वे तज्जाते भ्रमसन्मये असन्मयपरिस्पंदे त्वहंत्वं चेतिकः

नांसूर्यकांतमणीनां ग्रीष्मकाले अग्निरिवनित्यमुद्वृत्येवेत्यर्थः ३० जडाश्रयाजडाश्रयाजलाश्रयाचधावत्यनुसरति शैलवलीपक्षेजडांगुरुत
रा ३१ नप्रयच्छतिनजनयतियतःअरसःरागलक्षणांकुरजननशक्तिशून्यः अतएवपाषाणतुल्यः ३२ विचारात्मनि विचाररूपे विनतासुते गरुडे
३३ असतोमिथ्याभूतादज्ञानादभ्युत्थिते अतएव भ्रमादध्यासादेवसन्मये विश्वस्यासत्वेपितद्व्यवहारःस्यादित्यत आह असन्मयपरिस्पं

अतएवाकारणांसत्यप्रयोजनशून्यमेवअकारणात्कारणत्वानर्हा द्दैवात्तानादुदेति ततः किंतत्राह यदिति ३५ एवंचोत्पन्नस्यतेत्वेः पुरादेहादेर्यदिदृशोस्थितिस्ताद्रूपेवस
र्वदेतिसित्यमित्याहअपर्यंतेति घटकुंभरूपाआकृति संस्थानमिव तुच्छत्वेयर्थः ३६ उक्तेर्थेदृष्टांतमाहमध्येतिपयावारिमध्येतरयोः पूर्वोत्तरकालयोरविकृतप
योमात्रंमध्येतुकंचित्कालंचलाचलंचंचलंसनुआद्यंतयोः पूर्वोत्तरकालयोः प्रसिद्धसौम्यतेत्यक्ताबीचितयास्थितं वार्येवनवस्त्वंतरंतद्वद्देहाद्यपिकालत्रयेपिब्र
ह्मैवनवस्त्वंतरमस्तीत्यर्थः ३७ क्षणपरिस्पंदेअस्मिन्देहेविसरणोन्मुखेत्तरंगेचयेअहंत्वेननिबद्धास्थास्तेकुबुद्धयस्तन्नाशेप्येवहताइत्यर्थः ३८ देशतः परिछिन्न
त्वादपिदेहादिवस्तुषुनास्थायुक्तेत्याहप्रागीति मध्येस्वाधिकरणावितस्त्यादिमितदेशमात्रेस्फुरत्वंविद्यमानत्वाप्रतीयमानत्वंतदपिकात्स्न्येकदेशाभ्यांवि
कल्प्यविमर्शेदुर्वचमेवेतितत्रापिनिर्विषयत्वाद्भ्रांतरूपिणीआस्थाकैव अनुचितैवेतिभावः ३९ उक्तंन्यायंलिंगेपिदर्शयंस्तस्यापितथात्वमाह चित्तमिति

इदंजगदुदेत्यादावकारणमकारणात् यदकारणमुद्भूतंतत्सदित्युच्यतेकथं ३५ अपर्यंतपुराकालेमटिकुंभइवाकृतिः देहोभवविदांनौनु तथैवास्तिभवि
ष्यति ३६ मध्येतरपयोमात्रंकंचित्कालंचलाचलं आद्यंतसौम्यतैत्यक्ताबारिवीचितयायथा ३७ अस्मिन्क्षणपरिस्पंदेदेहेविसरणोन्मुखे तरंगेचनिबद्धा
स्थायेहतास्तेकुबुद्धयः ३८ प्राक्पुरस्ताच्चसर्वाणिसंतिवस्तूनिनाभितः मध्येस्फुरत्वमेतेषांकेवास्थाहतरूपिणी ३९ चित्तंपूर्वंपुरस्ताच्चविदेहेशांतमित्य
पि सदसद्वास्वसंलीनंमध्येस्मिन्किंतवोदितं ४० यथासभवविकारेषुयथासंभ्रमदृष्टिषु यथावामदलीलासुयथानोपानसंभ्रमे ४१ यथाधातुविकारेषु
यथाचेंद्रियविक्लवे यथातिसंभ्रमानंदेदोषावेशादशासुच ४२

चित्तंचित्तापन्नास्तितंलिंगंसोत्पन्नेः पूर्वंपूर्वकालेपुरस्तात्तपुरोदेशेभविदेहंस्वसाक्षिचि
न्मात्रस्वभावंएवंअनंतरकालेदेशांतरेचशांतंनष्टमिति अनयेवदृष्टांतःपरिछिन्नमपिस्वसंलीनामिवात्यंततिरोहितंसदसद्वानिर्वचं एवंविधंचित्तंमध्येसां
प्रतमेतद्देशोसद्व्यतिरिक्तंकिमुदितंनकिंचिदित्यर्थः ४० यदिस्थूलसूक्ष्मदेहाद्यसद्रूपकाहृशास्तर्हितत्प्रतिभासस्तत्रआह यथेत्यादिना संभ्रमः
व्याघ्रचोरादिभयानितद्दृष्टिषु असत्स्वपिव्याघ्रादिषुसर्वत्रव्याघ्रादिशंकाभवतितद्वत् ४१ धातुविकारेषुवातपित्तादिसंनिपातेषु चक्षुरादींद्रियस्य
तिमिरादौविक्लवेदोषेद्विचंद्रादिभ्रमः अतिसंभ्रमहेतोअतिप्रियतमलाभादिप्रयुक्तेआनंदेविधुरादीनांकामादिदोषावेशादशासुचयथासद
सतोभावाभावयोरूपंचलंप्रतीतिकालमात्रस्थायिकिंचित्कामिन्यादिरूपंस्फुरितेवबाधासहीयतेच तथैवएषाभ्रांतिरितिपरेणान्वयः ४२ ॥ ७ ॥

वा॰टी॰उ॰प्र॰५
११७

योविशेषस्तमाह हत्विति स्वप्नादयोल्पकालाः जगद्भ्रमकृत्या । वन्मोऽस्मिनिति कालेन्यूनातिरिक्ते तेनविशेष इत्यर्थः ४३ हे चित्तसा कालेन्यूनाति
रिक्ततास्तयाव्यावहारिकवस्तुप्रसत्यभ्रांत्या वियोगसंयोगाभ्यां नित्यं सुखदुःखयोरुदयनिमित्तत्वम्प्राकृतासतीत्वाहं तिपीडयतितथाअसत्यपिभार्यापुत्रादि
मरणेप्रतारकवाक्यादुत्पन्नात्तन्मरणाभावेपि तत्कल्पितवियोगयामिन्यश्चरागिणं घ्नंतितद्वदित्यर्थः ४४ अथ त्वानायं तवापराधः किंतुत्वय्यहंभावाभ्यासि
नोममैवापराधः येनामिथ्याभूतोपि त्वं सदिवलक्ष्यसे तत्कृतं च सर्वं मत्कृतं संपन्नमित्यर्थः ४५ अतएव त्वदीयविवेकतानादेवमदपराधस्तपस्यतवस्वरूपं गतानि
रित्याहयदिदमिति ४६ त्वद्धेतुभोगवासनानामपि तत एव क्षयइत्याह अवस्त्विति ४७ अथवाचित्सानिबिंबग्रहणेन चित्वाद्वीतरागेण अनएव संत्यक्तम
ननव्यसनेनचात्मसाक्षात्कारवृत्त्याद्दृष्टात्मनामसाखयमेवस्वस्वरूपेणमोक्षविश्रांतिमताभूयतेनमया सदेकरूपत्वादित्याशयेनाह चित्वादित्यादिना ४८

दृश्यते क्षीयते चैवरूपं सदसतोऽखिलं तथैवेयमिहत्वेषा कालेन्यूनातिरिक्तता ४३ सा च त्वया कृता नित्यं चित्त दुःखसुखोदये यथा वियोगयामिन्योम
तपोहंतिरागिणं ४४ मयैवेहासदभ्यासान्मिथ्यासदिवलक्ष्यसे मतस्त्वं मे वतेनैनतत्कृतं मत्कृतं भवेत् ४५ यदिदं किंचिदाभोगि तत्सर्वं दृश्यम
तुलं अवस्त्विति विनिर्णीय मनोयात्यमनःपदं ४६ अवस्त्विदमितिस्फारेरूढेमनसिनिश्चये हेमंतखमंजर्यःक्षीयंते भोगवासनाः ४७ चित्वा दृष्टात्मना
नूनं संत्यक्तमननौजसा मनसावीतरागेण स्वपं स्वरूपेण भूयते ४८ परमात्मानले क्षिप्तं संवृत्यावयवं स्वयं दग्ध्वात्मानमलं चित्तं शुद्धतामेति शाश्वतीं
४९ देहमन्यतमादृष्ट्वा त्यक्ता विषयवासनां विनाशमुररीकृत्य मनो जयति वीरवत् ५० मनःशत्रुः शरीरस्य शरीरं मनसोरिपुः एकाभावेन नश्यते आधा
राधेयकार्यवत् ५१

चित्तं स्वयमेव बहिःप्रवृत्तं स्वावयवं इंद्रियादि संवृत्य तत्वबोधेन परमात्मानले क्षिप्तं सत आत्मानं चित्तस्वरूपं दग्ध्वा अलमत्यंतं शाश्व
तीं नित्यां शुद्धतामेतीत्यर्थः ४९ यथा वीरः पुरुषो युद्धे स्वदेहं स्वर्गगामित्वान्यतमादृष्ट्वा तद्देहसंबंधिगृहक्षेत्रधनादिविषयवासनां त्यक्त्वा मरण
मप्यंगीकृत्य ब्रह्मलोके जयति तद्वन्मनोपीत्यर्थः ५० इदानीं देहमनसोः परस्परतप्यतापकतया विरोधं परस्परतादात्म्याभिमानात्परस्पराभिवृ
द्ध्यापरस्परोपजीव्यतां एकतराभिमानोच्छेदेनोभयोच्छेदं च विस्तरेण दर्शयितुमुपक्रमते मनइति शत्रुरिपुशब्दौ तापकपरौ एकाभावेन एकतर
वासनोच्छेदेन यथा आधाराधेययोः जलघटयोः कार्यभूतः संयोगः एकतरनाशेन नश्यति तद्वत् ५१ श्रीरामचंद्रायनमः

११७

तथा च परस्य रोपजीविलात् रागवतोः परस्य पनापकत्वात् द्वेषवतोर्व्याघ्रयोः मनोर्वनहरिणस्येव ए तयोः सतोर्न जीवस्य सुखं किं त्वेतयोर्मूलकाषेण मूला हाननाशेन विनाश एव परमं सुखमित्यर्थः ५२ ननु मरणे न भोगापत्तनं देहनाशादेव सर्वदुःखपरिहारः किं न स्यात्तत्राह ए नयोरिति देहनाशेऽप्यकृत्य मनसः संस्थाने देहकल्पनाया अनिवार्यत्वान्मृतिरिति कथा व्योम्नि अपागच्छंत्यास्त्रियाधराभ्रमिर्भुक्ताग्रस्ता इति कथया समा असंभाविता इत्यर्थः अयतेः क्विपि यलोपे टापि सवर्णदीर्घे आत्या अया अयः स्त्रियेति पाठे तु अयोविकारभूतया स्त्रीप्रतिमया व्योम्नि धराभुक्तेति कथया समेत्यर्थः अयः प्रतिमायाः व्योम्नि गमनं धराभक्षणं च यथा अत्यंतासंभावितं तथा मनसि सति मरणमपीति भावः ५३ तयोः सतोः का क्षतिस्तत्राह अकृत्रिमेति युध्यतोरंतराले स्थितस्य देहे खङ्गधारादि धारा इव ५४ मिथो विरुद्धे देहमनसी संसृज्येते अस्मिन्निति विरुद्धसंसर्गो वैषयिकसुखभोगस्तासि
रागद्वेषवतोर्नित्यमन्योन्यातिविरुद्धयोः एतयोर्मूलकाषेण विनाशः परमं सुखं ५२ एतयोरेकसंस्थाने मृतिरित्येव या कथा साव्योम्नि अयाभुक्ताधरेति कथया समा ५३ अकृत्रिमविरोधस्थौ यत्र संघटितावुभौ धारा इव पतंत्येव तत्रानर्थपरंपरा ५४ मिथो विरुद्धसंसर्गे रतिमेत्य धमोहियः त्यक्तव्यः स पतद्गुरावग्निरागावलेपने ५५ संकल्पेन मनः पुष्णाति शरीरं बालयक्षवत् आपुरेवानानान्यसौ खदुःखानि प्रयच्छति ५६ तैर्दुःखैस्तापितो देहो मनो हंतु मथेच्छति पुत्रोऽपि दुष्टिपितरं माततनायिपदं गतं ५७ नास्ति शत्रुः प्रकृत्यैव न च मित्रं कदाचन सुखदं मित्रमित्युक्तं दुःखदः शत्रवः स्मृताः ५८ देहो दुःखान्यनुभवन्स्वमनो हंतुमिच्छति देहं मनः स्वदुःखानां सके नंकुरुते क्षणात् ५९ (नृपः अधमः रतिं आस्थामेति
स पुरुषः अलेपने निरावरणे पतद्गुरोपतं तीति शरीराणि समुद्रोदका नियास्मिंस्तथाविधे अग्निरागौ वनदानले त्यक्तव्यः स तत्रापि रागलिप्सेर्न्नत्वर्थः ५५ रागद्वेषवतोरिति यदुक्तं तत्र मनसो देहरागद्वेषौ संत्योदर्शयति संकल्पेनेति मनः स्वसंकल्पेन बालो यक्षमिव शरीरं परिकल्प्य असे आ आयुः यावदायुः कालं अज्ञानं परिकल्प्य पुष्णाति सा अभिनिवेशनिमित्तानि सर्वदुःखानि प्रयच्छतीत्यर्थः ५६ देहस्यापि मनामिद्वेषं तं सहनिमित्तेन दर्शयति तैरिति दुर्विषयसेवनेन मनसि रागद्वेषरोगकमोहपापादिजननेन तसोऽपि तु मिछतीत्यर्थः ननु मनोज्ञानिकासु पुत्रप्रायो देहः पितृस्थानीयं मनः कथं हंतुमिच्छतीति तत्राह पुत्र इति उद्यता सिविषाग्निं च रणपोद्युत कर तथा अथर्वणेन हंता रापिशुनं चैव राज्य सुभार्यानिक्रमिणं चैव दियाकात तायिन इति विष्णुकात्यायनोक्तानामाततायिनां पदं स्वपीडाद्यवस्थां गतं प्राप्तमित्यर्थः ५७ नस्य रात्रुत्वं लोक प्रसिद्धन्यायेनोपपादयति ना।

५८

विरोधमुपपादितमनूद्यतत्रसुखदौर्लभ्यमुपसंहरतिएवमिति ६० मनसिक्षीणेतुनदेहस्यदुःखप्रसक्तिरस्तीत्याहमनसीनैष्टेनाशितमनोनाशितेवा
शेति अनस्तत्स्वेयेउक्तत्तयासोक्तंरुतया ज्ञानतत्साधनोपायेषुपरिधावितियतते इतियावत् ६१ नहिमनोपिदेहनाशायेवकुतोनयतनतेतत्राह
नष्टेति अलब्धात्मविवेकेनमनसानष्टंनाशितमनाशितंवाशरीरंआपदांपदंमदनर्थायैवसुप्रजायतेइतितन्नाशात्मनसोनेष्टसिद्धिरित्यर्थः ६२
मिथः अनुग्रहादितिशेषः सरस्यपिहविर्युत्तादिनिष्पत्तिद्वारापयोदानुग्राहिकाकचित्संभवेदित्युपमोपपत्तिः ६३ मिथोविरुद्धयोरन्ययोःकिमर्थंस
हभावइतिचेद्वारिवन्ह्योःपाकार्थमिवपुरुषस्यभोगमोक्षोपायव्यवहारार्थमित्याशयेनाहमिथइति विरुद्धतयाद्विधास्थितेअप्यन्तेअन्योन्य

एवंमिथोदुःखदयोःश्लिष्टयोःकःसुखागमः एतयोर्देहमनसोर्जात्यैवातिविरुद्धयोः ६४ मनस्येवपरोक्षीणेनदेहोदुःखभाजनं तत्क्षयो
त्कतयानित्यंदेहोपिपरिधावति ६५ नष्टानष्टमनर्थायशरीरंपरमापदं अलब्धात्मविवेकेनमनसाक्षप्रजायते ६६ एतेमनःशरीरे
हिमिथःपीवरतांगते जडरूपेहिवर्षासुपयोदसरसीयथा ६७ मिथोदुःखायसंपन्नेएकरूपेद्विधास्थिते व्यवहारपरेसाद्धेलोकेवायेन
लाविव ६८ चित्तेक्षयिणिसंक्षीणेदेहेत्यामूलितोभवेत् वर्द्धमानेतरुरिवश्रातत्रशाखश्चवर्त्तते ६९ क्षीयतेमनसिक्षीणेदेहःप्रक्षीयवा
सकः मनोनक्षीयतेक्षीणेदेहेतत्संपयेन्मनः ७० संकल्पपादपंतृष्णालतंछित्वामनोवनं विततांभुवमासाद्यविहरामियथासुखं ७१
प्रक्षीयमाणमेवेदंनमेमनोमनसिस्थितं प्रशाम्यद्वासनाजालंप्राचडंतइवांबुदं ७२ धातूनांसन्निवेशगेयंदेहनामारिपुर्मम प्रक्षीयमाणे
मनसिगलत्वेषावतिष्ठतु ७३ यदर्थंकिलभोगश्रीर्वांछितेस्वकलेवरं तन्मेनाप्तिनतस्याहंकोर्थःसुखलवेनमे ७४ श्रीरामायनमोनमस्ते॥

तादात्म्याध्यासादेकरूपेसतिदुःखायदुःखानिभोक्तुंपरिहर्त्तुंचसाकंभोगमोक्षव्यवहारसाधनपरेसंपन्नेइत्यर्थः ६८ देहस्यचित्ताधीनतोक्तेः
फलमाहचित्तइति ६९ ७० अतोमनएवनाशयामीत्याहसंकल्पेति ७१ संकल्पनाशेचमनःमनसिमनःस्वभावेनास्थितमविप्रशाम्यद्वासनाजालं
सत्प्रावृडंतेंबुदइवनंक्ष्यतीत्यर्थः ७२ त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राख्यानांधातूनांसन्निवेशात्मकोयंदेहःमनसिप्रक्षीयमाणेगलतुतिष्ठ
तुवानकाचित्क्षतिरित्यर्थः ७३ तिष्ठतिदेहेसुखदुःखमपिकिंनस्यादितिचेत्तत्संबंधहेतोर्मनसोनाशात्संबंधएवनास्तिकुतोदुःखप्रसक्तिरित्या

नाहं देह इत्यस्मिन् कम्यते बुध्यत इति क्रमो व्रतस्य तात्पर्यार्थस्तस्मिन्युक्तिमुपपत्तिं वल्गाति दर्शनश्रवणादिनाव्यवहरति ७१ तस्माद्देहस्य बोधायुदर्शी
नात् यः विभूत्वेन सूर्यमंडलेपि सत्ताङ्गास्वतासंगप्राप्य व्योमनिभास्करं वेद्मि स एवचिद्रूपोहमित्यर्थः ७२ ७३ भूमितुमन आदेः प्रसक्तिरेवनास्तीत्या
हयत्रेतिश्रेष्ठसन्निधौ सुडाणांमनवस्थानेलोकप्रसिद्धमुदाहरति पामरा इति महीभृतोरान्तः ७४ तत्पदं अनुयातः प्राप्तोस्मि ७५ किंचप्रारब्ध
शेषभोगलीलया स्वात्मरूपात् परवराद्य व्यवहाराभासे बलितस्य पूर्ववासनया रथकृतमतेः अयं देहेंद्रियामे परिवारः परिजन इव विनोदहेतुरित्य

नाहं देह इति तस्मिन्युक्तिमाकर्णय क्रमे सर्वांगे वापि सत्त्वे वृथावः कस्मान्न वल्गाति ७१ तस्माद्देहादतीतोहं नित्योनस्तमितद्युतिः यः संगं भास्व
तां प्राप्य वेद्मि व्योमनिभास्करं ७२ नातोहं न च मे दुःखं नानर्थो न च दुःखिता शरीरमलकमावाल्का स्थितास्मि विगतज्वरः ७३ यत्रात्मा तत्र न मनो
नेंद्रियाणि न वासनाः पामराः परितिष्ठंति निकटेन महीभृतः ७४ पदं तदनुयातोस्मि केवलोस्मि जयाम्यहं निर्वाणोस्मि निरंशोस्मि निरीहोस्मि नि
रीप्सितः ७५ इदानीमस्य संबद्धो मनो देहेंद्रियादिभिः रथकृतस्य तैलस्य तिले विगलिते रिव ७६ स्वसात्परवरादस्मान्नीलयाचलितस्य मे ष
थ कृतमतेः किंचपरिवारोहय शुभः ७७ स्वच्छतोर्जिततास्तताद्घतासत्यताज्ञता आनंदितोपितामितास्सदानुसुभाषिता ७८ पूर्णतोदारता
सत्या कांतिमत्तैकतानता सर्वैकतानिर्भयता सौम्याद्वित्वविकल्पता ७९ नित्योदिताः समाः स्वच्छाः सुंदर्यः सुभगोदयाः ममैकात्ममते निर्त्यकां
ताल दयवत्प्रभाः ८० सर्वथा सर्वदा सर्वं सर्वस्मिन्संभवत्यतः सर्वप्रतिमसौम्येवांछावांछे सुखासुखे ८१ विगतमोहतया विमनस्तया गततवि
कल्पनचित्ततया स्फुटं उपरमाम्यहमात्मनि शीतले घनलवः शरदीव नभस्तले ८२ मोक्षोपायेषूपशमप्रकरणे उद्दालकविलासो नाम सर्गः।

र्थः ७७ तस्यां लीलायां स्वच्छतादिगुणासंपदः स्वस्य दरयवत्प्रभाः कांता इति रूपयति स्वच्छतेत्यादित्रिभिः ऊर्जितता पूर्णकामता ततात्रिदिता
त्मता ७८ उदारता निर्लोभिता सत्या अवाधितावभावता ७९ ८० एताः ममनित्यमुदिताः अभ्युदयपरा लेख्याः कांताः ८० संभवतिकल्पनयेतिशेषः
अतः सर्वविषयजातं प्रतिवांछावांछे रागद्वेषौ सुखासुखे तत्फले सुखदुःखे ८१ अतो हं शरदि नभस्तले घनलवो मेघखंड इव शीतले निस्तापे आत्म
निदृश्यभावं परित्यज्य विश्राम्यामीत्यर्थः इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे टीकायां त्रिपंचाशः सर्गः ५३

येनॐकारमुच्चारितः तेन परामंपरं आसंभासेमेव पलोपासिद्धैः संधिरार्षः २ ॐमित्येतदक्षरं परस्य ब्रह्मणः अभिधान

वा॰टी॰ उ॰प्र॰५ ११८

रहनाभावनाद्यैः स्वां भावयन्वेदमवीतनुं धूताविकल्पान्विश्रांतः समाधौ सत्तीर्यते धवलपाविश्रुद्धैतत्तयाअस्तुद्रष्याधियाइतिउक्रीत्यानिर्णीय १ स मुनिरुद्गलकः स्वात्मप्रतीकत्वात्सुपरमेव ब्रह्मा इति निर्णायिता रुच्चैः स्वरो यस्य तथाविधं ऊर्ध्वगतः ध्वनिर्यस्य तथाविधं ॐकारं अकरोत् उच्चारि तवान्सम्यगाहतं लांगूलं लंबमान जिह्वाकारलोहं यास्मिंस्तथाविधं घंटायाः कुंडमुखाकारां आरवं नादमिव ३ किंपर्यन्तं सोंकारमकरोत्तत्राह ॐमिति ॐकारं पुनःपुनरुच्चार्य तत्तत्सोद्दालकस्य मूलाधारमारभ्य ब्रह्मरंध्रपर्यंतं प्रसिद्धयाम स्योंकारस्य मूर्द्धस्ले अर्द्धमात्रोपरमोर्ध्वमभिव्यक्ते वित्तेजमलात्मनि ब्रह्मणि संविदोंकाराकारवृत्युत्पहिते चैतन्यं तत्कुरस्कुंजीवचैतन्यं यावत्तदुन्मुखे अखंड ब्रह्मचैतन्योन्मुखे भवत्तस्मात्कालें ओंकार

श्रीवसिष्ठउवाच इति निर्णीयतत्तयाधियाधवलपामुनिः बद्धपद्मासनस्तस्थावर्द्धोन्मीलितलोचनः १ ॐमित्येतत्परं ब्रह्म निर्णीयसमुनिस्तदा ॐ कारोच्चारितो येन तेनासंपरमंपरं २ ॐकारमकरोत्तारस्वरमूर्ध्वगतध्वनिं सम्यगाहतलांगूलं घंटाकुंडमिवारवं ३ ॐमुच्चारयतस्तस्य संवित्तत्वे तदु न्मुखे यावदोंकारमूर्द्धस्थे वित्तेविमलात्मनि ४ सार्द्धत्र्यंशात्ममात्रस्य प्रथमेंशोस्फुटारवे प्रणवस्य समाप्तुन्धप्राणाराणितदेहके ५ रेचकारव्या खिलं कायं प्राणानिःक्रमणक्रमः रिक्तिं चकारपीतांबुरगस्त्य इवसागरं ६ अतिष्ठत्प्राणपवनश्चिद्रसापूरितांबरे त्यक्तदेहः परित्यक्तनीडः खग इवांबरे ७ तदद्याग्निर्ज्वलन्ज्वालोदह्यहनिखिलं वपुः उत्पातपवनोद्भूतो दावः शुष्कमिवद्रुमं ८ यावद्धित्थमवष्ठे षा प्रणवप्रथमक्रमे बभूव नहठादेव हठयोगो हि दुःखदः ९ मकरोदितिपूर्वेणसंबंधः ४ तत्र निर्विकल्पकसमाधिप्रतिष्ठायोग्यतासिद्ध्यर्थं प्रथमं तेनैव प्रणवेन स्थूलदेहस्य शोषणदहनदुःखं असांगनिरसनाद्भावनदिव्यदेहांतरनिर्माणाद्यपि प्रथमं तद्भावनयाद्वतमित्याह सार्द्धत्र्यंशात्मेत्यादिना सार्द्धत्र्यंशा अर्द्धमात्रासहिताः अ कारोकारमकाराख्या आत्ममात्राः स्वावृपवा यस्य तथाविधस्य प्रणवस्य प्रथमे रोउरसाते अकरभागे स्फुटारवे उच्चैः स्वरेणाभिव्यक्तनादभावे अतएव सम्यगाप्तुन्धे बहिर्निर्गमनोद्युक्ते प्राणे मूलाधारमारभ्य ओष्ठपुटान्तं धारणीतदेहके जातसति रेचकाख्यः प्राणनिष्क्रमणक्रमः अखिलं रिक्तीचका रसनेनत्राशोषयामासेतिदूयोरर्थः ५ ६ तस्यरेचितः प्राणपवनः क्वातिष्ठत्तत्राह अतिष्ठदिति चिद्रसेन ब्रह्मभावनाभिव्यक्तहार्दरसेन आपूरिते अं बरे बाह्याकाशे ७ तदानीं भावनया यहृत्तं तदाहतदग्निरिति प्राणानां निष्क्रमणासंघर्षणाद्धृदये भावनयोद्भूतो वन्हिः दवे अरण्ये भवो दावाग्निः ८

११८

इतरोंकारनुकारभागस्तस्य अनुदात्तमंद्रोच्चारणावसरे कुंभस्थजलनिश्चलत्वात्कुंभकोनामक्रमः १९ उक्तं कुंभकनाम विशदयति न बहिरिति ११ अत्रानिव
द्दैद्युताग्निवत् १२ यत्र यस्यामवस्थायां शारीरास्थीनि कर्पूरधूलिरचितपांशव्यायांसुमानी विभावनादृशालस्यंते १३ वात्यापवनेरूर्ध्वमानी तंसास्थि
आस्थिसाहितं तद्भस्म वायुरूर्ध्वप्रवाही चंडपवनः त्रिनेत्रस्य रुद्रस्य व्रतं आस्थिभस्मधारणं तद्धानिबभ्रमैत्रीत्रोत्तसन्नेतपः रुद्राद् बालस्य स्वदेहे अपो
जयत् ध्वनयामासेति यावत् १४ ततः आस्थिमद्भस्म क्वापि ययौ १५ प्रणवस्य मध्यभागसाध्ये कुंभकाख्ये क्रमे इत्थमेषाप्यवस्थावनयैव बभूवुन
तुहठात् १६ तृतीयभागोच्चारणावसरे यद्यपि रेचकपूरककुंभकेषु समग्रस्यैव प्रणवस्य साधनत्वं प्रसिद्धं तथापि रेचके आदिभाग एव जायते कुं

अथेतरांशावसरे प्रणवस्य समाप्तितो निःकंपकुंभकोनाम प्राणानामभवत्क्रमः १९ नबहिर्नांतरेनाधोनोर्ध्वेनाशासु तत्र ते संक्षोभमगमन् त्राणा
आपः संस्तंभिताइव २० दग्धदेहपुरो वह्निः शाशमाशानिवसाणात् अस्त्रत्पुनासितं भस्मशरीरं हिमपांडुरं १२ यत्र कर्पूरशय्यायां समानीवसु
स्त्रोचितं शारीरास्थीनि लक्ष्यंते निष्पंदानि सितानि च १३ तद्भस्म पवनानीतं सास्थि वायुरयोजयत् स्वर्देहेभ्रत्रासुतसन्नेत्रिनेत्रव्रतवानिव १४
तच्चंडपवनोद्धूतमावृत्य गगनं क्षणात् शारदीवाभ्रमंमिहिकाक्वापि भस्मास्थिमय ययौ यावदित्थमवस्थेषा प्रणवस्यापरक्रमे बभूवन हठादेव
हठयोगो हि दुःखेदः १६ ततस्तृतीयावसरे प्रणवस्योपक्रांते तिद्देपूरणात् पूरकोनाम प्राणानामभवत्क्रमः १७ अस्मिन्नवसरे प्राणाः खलनाम्न
तमध्यगाः व्योम्नि शीतलतामीयुर्हिमसंस्पर्शसुंदरीं १८ क्रमात् गगनमध्यस्थात् चंद्रमंडलतां पपुः धूमागगनकोशस्थाः शीतलांबुदतामिव
१९ कलाकलापसंपूर्णे तास्मिंश्चंद्रमंडले पुण्यराशाविवापूर्णे रसायनमहार्णवे २० रसायनमयाधाराः संपन्नाः प्रणवायवः मणियष्टिसमा
काराजालस्थिदीर्घांशवः २१

भके मध्यमभाग एव पूरके चरमभाग एव कंठान्निर्गच्छता प्राणेन कंठ्यभागस्यैवाभिव्यक्तेः संकुचद्भ्रामोष्ठाभ्यां तु कारभाग
स्यैवाभिव्यक्तेः ओष्ठसंपुटितेन मकारभागाभिव्यक्तौ पुनः प्रविशत्यपि प्राणे तत्संस्कारस्यैवानुवर्तनादिति तद्भावावसरविभागोक्तिरितिबोध्यं १७ चेतना
जीवश्चित्तस्यां भावित्वं यस्यैतं ततमध्यगाः व्योम्नि बहिराकाशे १८ गगनकोशस्थाधूमाः नीहारभागाः शीतलांबुदभावमिव १९ अमृतमयानां क
लानां कलापैः संघातैः संपूर्ण अत एव रसायनमहार्णवे तास्मिंश्चंद्रमंडले पुण्यराशौ धर्मे मेघाख्यसमाधाविवाप्लुंदेनापूर्णे तत्प्राणावयवः रसायनम
अमृतमयाः किरणाधाराः संपन्ना इति परेणान्वयः २०

[illegible] २४

र

वा॰टी॰उप॰५
१२०

श्लेषपवनाधूतावनीरुहरसानामयनीप्रवहणी २२ तयाधारयामपनेनप्रस्फुरन्मंदरोयस्मिंस्तत्पाविधारब्धेःपारिजातोद्रुम इव २३ नारायणत
यानारायणशरीरतया २४ मधौवसंतेपल्लवोऽङ्कुरहेतवोभोमारसावृक्षमिवचेतिपरमोपमा २५ चक्रानुवर्तैःप्रसृतांपवहंतीसरिद्वरां
सरिद्वत्यानिलिति पाठप्रसक्तमितिपाठः २६ दहनप्लावनादिनाविष्णुनाशरीरात्मनोत्पादितकृत्स्नस्यप्रयोजनमाह प्रकृतस्थमिति यथाअव
नेरुत्थलंशरादिचरमवृष्ट्याधौतसंघःशोषितंवसत्त्वावृद्कालप्रसिद्धस्यपक्वैवलादिदूषितस्यशरीरस्यस्वाकारस्यविगमेप्रसन्नानिर्मलंच
सत्त्वव्यवहारिणांप्रकृतयात्रादिकार्ययोग्यंभवतितथाअस्यतत्त्वशरीरमपिदहनप्लावनादिभावनाधौतंविकलुषंसत्त्वकृतंसमाधिकार्यक्षमं

सापपातांबराद्दूराच्छोषेनशरीरभस्मानि रसायनीहरत्नीरःपातितेवसुरापगा २२ तद्दुग्धेंदुबिंबाभं चतुर्बाहुवपुस्तथा प्रस्फुर
न्मंदराद्ब्धेःपारिजातइवद्रुमः २३ उद्दालकशरीरंतन्नारायणतयोदितं प्रफुल्लनेत्रवक्त्राब्जमाबभौदीप्तिसुंदरं २४ रसायनम
याःप्राणास्तच्छरीरमपूरयन् सलिलौघाइवसरोवृक्षंमधुरसाइव २५ अंतःकुंडलिनीप्राणाःपूरयामासुरादृताः चक्रानुवर्त
प्रसृतांपथांसीवसरिद्वरां २६ प्रकृतस्थंबभूवास्यतच्छरीरंद्विजन्मना प्रावृट्शरीरविगमेधौतंनलमिवावनेः २७ अथपद्मास
नगतःकृत्वादेहास्थितिंदृढं आलानइवमातंगेनिबद्धेंद्रियपंचकं २८ निर्विकल्पसमाध्यर्थंव्यवसायमुपाददे स्वभावंस्वच्छतांने
तुंशरत्कालइवामलं २९ प्रशांतवातहरिणमात्रादिगणगामिनं चिंतयात्स्वदृयान्निन्येदूराज्ज्वेवकीलकं ३० धावमानमभोम
तंचिंतंविमलमाकुलं बलात्संरोधयामाससेतुर्जलमिवद्रुतं ३१

(भवेत्यर्थः २७ पद्मासनबंधेनास्थितिंकृत्वादेहेंद्रियपंचकंदृढंबध्वा
२८ स्वभावंस्वात्मानंस्वमनोवा २९ स्वभावमेवविशिनष्टिप्रशांतेति प्राणायामाभ्यासात्प्रशांतानाःप्राणादिवातहरिणायस्मित् आन्तरान्
द्मालेभतत्कलिकाप्रतिस्पर्शात्यादिभेदप्रसिद्धगणेनबहिर्गमनशीलंस्वभावंप्रशांतवातहरिणंकृत्वास्वच्छतांनेतुंव्यवसायमुपाददेइतिप
र्वेणान्वयः एवंकुर्वतोयद्वृत्तंतदाहचिंतयेति तस्यतदृयंमनःपूर्वानुभूतगृहक्षेत्रपुत्रमित्रादिचिंतयानिन्येयथाअदृढनिखातमश्वादिबंधन
कीलकंतदाकृष्टयारज्ज्वावाप्यपनीयतेतद्वत् ३० तदाशयचक्रंकरतदाहधावमानमिति धावमानंचित्तंविवेककेवलाद्धिमलंकृत्वासंरो

स

ततः सैकिंचकारतदाह निमिमीलेति परस्पराग्रग्रथनात्परितउभयतः पक्ष्मलानिपक्ष्मवंतीवपक्ष्माणियस्योस्तथाविधे निस्पंदाभ्यांताराभ्यां
कनीनिकाभ्यांमधुरेसुंदरेदृशौअर्द्धंनिमिमीलनिमीलतवान् अंबुजपक्षे निस्पंदेतारेकनीनिकेइवमधुरातःपिबतइवइतिमधुरौभ्रमरौ
ययोस्ते ३२ तस्यप्रथमंराजयोगानुकूलंबाकुंभप्राणापाननिरोधमाहसौम्यनामिति यथाचक्रवर्तिनांजन्मादिनिमित्तभूतःप्रशस्तःस
मयःजगच्छ्रेयसेसूचनायशैत्यमांद्यादिगुणाश्वसनंवायुंतज्जन्मदेहसमास्तिमितंनयतितद्वत् तथाचोक्तंभगवताप्राणापानौसमौकृत्वा
नासाभ्यंतरचारिणा[illegible]विति ३३ तस्यप्रत्याहारक्रममाहतिलेभ्यइत्यादिनाइंद्रियाणीत्यनेनगोपयन्नित्यत्रापिसंबध्यते ३४ प्रत्याहारफल

निमिमीलदृग्गवर्द्धंपरिपक्ष्मलपक्ष्मके निस्पंदतारामधुरेसंध्याकालइवांबुजे ३३ सौम्यतामनयन्मौनीप्राणापानजवंमुखे श्वसनंश्रे
यसेदेशेप्रशस्तःसमयोयथा ३४ तिलेभ्यइवतैलानियथुक्केप्रयत्नतः इंद्रियाणींद्रियार्थेभ्यःकूर्मोगानीवगोपयन् ३४ बाह्यान्स्पर्शा
नतोवेणजहौदूरेसधीरधीः सहसाकुंडकच्छन्नोमणिदूरत्विषोयथा ३५ विलीनानांतरांश्चक्रेस्पर्शानुसितदर्शनात् रसान्विरपके
गस्थान्मार्गेतोर्षेइवद्रुमः ३६ दुरोदंगुदसंकोचान्नवद्वारानिलानथ मुखसंस्थगितःकुंभोरंध्रकेशानिवेतरान् ३७ स्वात्मरत्नप्रका
शदीपांस्पर्शांकुसुमलांछितां दधारकंधरांधीरोमेरुःशृंगमिवाखामिव ३८ बभारहृदयाकाशेमनःसंपूर्णमागतं विंध्यखातइवोन्मत्तं
गजंयुक्तिवरत्राकृतं ३९ शरन्नभोवदासाद्यनिर्मलानिसौम्यतां जहारपरिपूर्णाब्धेर्निर्वातस्याचलांश्रियं ४० दुधावातिविकल्पोघान्स

माहबाह्येतिकुंडकेनअल्पपिवरेणछन्नःपिहितोमणिदूरप्रसृतात्विषोरश्मीन् ३५ अंतरात्मनोवासनारूपान्स्पर्शान्विषयानाधिष्ठानतले
आकर्षणेनबाधाद्विलीनांश्चक्रे ३६ पार्ष्णिनामूलाधारावष्टंभेनगुदसंकोचान्नवद्वारानिलानथइतरेरुरोधयथाअधोमुखपूर्णकुंभोमुखेद
ढंसंस्थगितःपिहितोंतर्वायुप्रवेशाभंतरेणाछिद्रांतरेभ्योजलस्रवणायोगादितरान्रंध्रकोशानरुणद्धितद्वत् ३७ स्वात्मैवरत्नंतत्प्रकाशोन
स्वात्मनोरत्नानांप्रकाशोश्चआप्यारनस्तमोभ्यामनावरणात्स्पष्टां प्रसन्नमुखपद्मकुसुमेनकल्पद्रुमकुसुमेश्चलांछितांयथामेरुःशृंगमिति
धांखशृंगलक्षणांतरोखांधारयतितद्वत् ३८ धारणामाहबभारेति एकविषयेधारणाध्यानसमाधयःसंयमस्तत्प्रतिआतंउन्मुखंयुक्ति

ब्रह्माकारवृत्तिमयचिन्मयतिथ्याराविकेदिनोमः व्योमव्योमुक्ति तेरक्षकाका व्याप्तरा कुसुमसोठिता दृष्टारकं धरो धीरो मेरुः शंसशिखा व ३१ ब्रनार ३ ३ मत्कारेसेमन संसममागारं लिं अरखातरतोन्मतं गर्जयुक्तिवपीरतं इ रे चास्मिन्नो) तिभासमुपेयुषो दिपरीतभावनाविकल्पो घानदुधावनिरस्तवान् ५१ ५२ तमस्तमोगुणोद्रेकप्रयुक्तमंधकारं ५३ सत्वगुणोद्भावनप्रबोधसम्यग्ज्ञानोदितेनखरांतं मनस्तद्रूपेण दिवसतारस्पेण ५४ सत्वगुणोद्भावनव्यग्रस्यतरनुरूपत्वेनः पुनभ्रमस्तस्याभूदित्याह तमसीति अंबुजं कर्तुउपदर्कापलाशितं प्रातः संध्यामिव ५५ तर्तिकं तद्विरोधिजोगुणापुंडवेनलुलावनेत्याह अपिवादिति अधिष्ठानतत्वदर्शनेन बाधादयसदित्यर्थः अस्तक्रूरंरक्तप्रवाहंतेजसो लोहितवर्ण

दुधावातिविकल्पौघान् प्रतिभासमुपेयुषः पुरः परिस्फुरद्रुपान्मशकानिवमारुतः ५१ आगच्छतोयकोयोमं प्रतिभासान्तु नः पुनः अच्छिनन्मन साभ्ररंः खड्गेनेवरणेरिपून् ५२ विकल्पौघपरालूनसोपत्रयुद्दपांवरे तमश्छन्नविवेकार्कलोलकुज्जलमेचकं ५३ तदप्युन्मार्जयामासस म्यक्त्वांतविवस्वतः सम्यग्ज्ञानोदितेनाशु पेपवनेनेव कुज्जलं ५४ तमस्युपरते कांतं तेजःपुंजरजोदिसः उगर्वरातिमिरत्वांते प्रातः संध्यामिवां बुजं ५५ तच्चुलावस्वलाञ्ज्ञानावनं बालस्वाद्विपः अपिवंच्याप्यसत्क्रूरं वेतालइववेगतः ५६ तेजस्युपरते तस्य घूर्णमानं मनोमुनेः निशाज्ववर गात्रिङ्लोलं क्षीववदेववा ५७ मेघमालामिवमरुद्यालोनीलाज्जिनीमिव यामिनीमिवनीहारश्रुत्वाममपाश्रुलुलावसः ५८ निद्रायपरामेन स्पभावयामासतन्मनः व्योमश्यामलदृप्तंतुर्नभसीवशिखंडकान् ५९ पयोदइवतापिच्छंनीहारमिवमारुतः दीपत्वमइवाछात्मतदप्याशुममा र्जसः ५० व्योमसंविदितस्त्यांमूढंतस्याभवन्मनः निद्रायांतुविलीनायां मेरेयमदवानिव ५१ (त्वादस्तगुपमा ५६ रजसासमाधिध्यानाच्चालित स्यचित्तस्यविषयालाभेनविलपान्निद्रामज्ञानमाह तेजसीति लोलंतरंगैर्निद्रानुकूलतया आंदोलितं क्षीवोमदिरामत्तस्तद्वदेववा ५७ व्यालइाव्देनभु जंगनागपर्यायेणाविंगो गजोवालस्यते लुलावविवेकप्रबोधेनेतिभावः ५८ व्योमश्यामलंपश्यतीति व्योमश्यामलदृक्पदास्सूर्यानिपसंमुखे व्योम्नि प्रसारितादृष्टिर्जंतुः कोश्रांडु बरका भासमयूरशिखंड काकारान् विभावयतितद्वन्मनोनानावासनापरिकल्पितरूपवद्व्योमभावयामासेत्यर्थः ५९ तापिच्छं तमालपुष्पं तद्विद्रश्यात्रौर्यतेश्यामतां च नहातीति अच्छात्मस्वच्छस्वभावंतद्व्योमापिममार्ज ५० मूढं कर्तमलोपहतं ५१ अरी

ममार्जेति चित्तोध्यापनिन्ये ५२ कामपि वाचामगोचरां निर्विकल्पसमाध्यवस्थां चिराश्रामविश्रांतिं प्राप क्षणमल्पकाले ५३ विक्षेपसंस्कारप्राबल्यात्तत्र
स्थैर्यं न प्रापेत्याह विश्रम्येति संगेति संबोधने विश्वरूपिणीं बाह्यप्रपंचसमाकारां वृत्तिसंविदं पपात प्रापेति यावत् प्राग्बाह्याकाराद्राकृष्य पूर्णात्म
नि निरुद्धस्य परावृत्त्य पुनर्बाह्याकारापत्तावनुरूपं दृष्टांतमाह सेत्विति यथा सरोवारि कुल्याद्वारा केदारे प्रवाहितं केदारमापूर्य तत्सेतुरुद्धं सत्कुल्या
द्वारा परावृत्य प्रतीपं प्रतिकूलं सत्पुनः स्वास्यं सर एव प्रविशति तद्वदित्यर्थः ५४ बाह्यसंविदः परावृत्य पुनः स्वसंविदं प्रतिनीयमानस्य अंतराले सवि
कल्पकसमाधिप्राप्तिमाह चिरेति प्राक् ध्यानादिना चिरानुसंधानवशात्समाधौ आनंदानुभवेन स्वदनाद्युहेतोस्तत्संस्कारेण पुनस्तत्राकृष्यमाण
मनस्ततः अंतराले चिन्मयतां चित्प्रचुरसविकल्पसमाधिरूपतां आगात् यथा हेमरयावलयनानुरूपां नूपुरतां याति तद्वदित्यर्थः ५५ एवं सविक

मोहमप्येषमनसस्तं ममार्ज महाशयः यामिनीजनितं नाड्यं भुवनादिव भास्करः ५२ ततस्तेजस्तमोनिद्रामोहादिपरिवर्जितं कामप्यव
स्थामासाद्य चिराश्रामम नः क्षणं ५३ विश्रम्याशु पपातांग संविदं विश्वरूपिणीं सेतुरुद्धं सरोवारि प्रतीपं स्वमिवास्पदं ५४ चिरानुसंधा
नवशात्स्वदनाद्यु स्वसंविदः ततश्चिन्मयतामागाद्धेमनूपुरतामिव ५५ चित्तत्वमथ संत्यज्याचिरेण चित्वतां गतं अन्यदेव बभूवास्य पंकः कुंभ
स्थितो यथा ५६ चेत्यं संत्यज्य चिद्रुद्धा चित्सामान्यमथाययौ त्यक्तवीच्यादिभेदोब्धिर्वाः सामान्यमिवैकधीः ५७ त्यक्तभूतौघमननं ततो
विश्वंभरं महत् चिदाकाशं ततः शुद्धं सोभवद्बोधमागतः ५८

ल्पसमाधिनाक्रमेणानिरिंधनाग्निवत्प्रक्षीयमाणं क्षीणेदकवच्चित्तैकास्यं
जगामेत्याह चित्तत्वमिति चित्तं स्वीयं चित्तत्वं संत्यज्य चिदेव यत्तत्वं तद्भावं गतं सत्पूर्वावस्थातो न्यदेव बभूव यथा कुंभस्थितः पंकिलजलपंको
जलशोषे कुंभभावमिव गच्छतीति तद्वदित्यर्थः ५६ चित्तस्य चित्तभावापगमे तत्प्रतिबिंबचैतन्यस्य बिंबचित्सामान्यैकात्म्यमाह चेत्यमिति चे
त्यं स्वभावं भास्यं वृत्त्याकारं संत्यज्य प्रतिबिंबचिच्छुद्धा सती सर्ववृत्तिसाधारणसाक्षिचित्सामान्यभावमुपाययौ यतः साएकधीः एकरसीभू
ता स्वोपाधिबुद्धिर्यस्यास्तथाविधेत्यर्थः ५७ एवं निर्विकल्पसमाधिप्रतिष्ठितस्योद्दालकस्य तत्परिपाकात्तत्साक्षात्कारं तत्फलं ब्रह्मवेद ब्रह्मैव
भवतीति श्रुतिनिदर्शितं ब्रह्मभावं च दर्शयति त्यक्तेति ततस्तदनंतरं स उद्दालकस्तत्सारहत्तासमाधेर्बोधं तत्साक्षात्कारमागतः सन् विश्वंभरं
सर्वजगदधिष्ठानं त्यक्तभूतौघमननं द्वैतप्रतिभासरहितं शुद्धं महच्चिदाकाशसमभवत् ५८

तद्भावए वनिरतिशयानंदावासिरितिदर्शयितितत्रेति अत्रमेर्ब्रह्मादिभिरास्वाद्यत इत्युक्तमास्वादं रसानीसर्वविषयसुखकणानां अयनंआधार भूतमर्णवमिवाह्वितं ५७ तामेवदशांवर्णयतिशरीरादिना शरीरात्तम्युगर्वगत्यइतःनिर्गतइवशोथितइतिपावत् ६० उडुपश्चंद्रः ६१ पूर्वंशेषःपश्चाद्धरिमूकःनिर्गतिजलश्चयोंबुदस्तस्यइवास्थितिः ६२ तत्पदंगरूढाब्रह्मलोकांतासिद्धिगणान् पादपातेनप्रार्थयंतोपिकदाक्षे णापिनपश्यतीत्येतदर्शयतिअयेत्यादिना ६३ ६४ ६५ आनंदस्यमंदिरेतास्मिंल्लोकेइत्रासमाधौ उत्तरायणाधारेदिक्करेर्केइवषण्मासं

तत्रांप्रापरत्थानंदंहृदयदर्शनवर्जितं अनंतमुत्तमास्वादंरसायनामिवार्णव ५७ शरीरात्तमवेतोसौकामप्यवनिमागतः सत्तासा मान्यरूपात्माबंभूवानंदसागरः ६० द्विजचेतनहंसोसावानंदसरसिस्थितः अतिष्ठच्छरदब्देखेकलापूर्णइवोडुपः ६१ बभूवावातदी पाभोलिपिकर्मार्पितोपमः वीतवीच्यंबुधिप्रख्योदृष्टमूकांबुदास्थितिः ६२ अथैतास्मिन्महालोकेतिष्ठन्तुद्दालकोचिरं अपश्यद्धाम गान्सिद्धानमुरानपिभूरिशः ६३ आगतानिविचित्राणिसिद्धिजालानिवाभितः शक्रार्कपदद्दर्शीनीरभ्राण्यसरांगणेः ६४ तानि नादरयांचक्रेसिद्धिर्वृंदानिसद्विजः गंभीरमतिरक्षुब्धोविलासानिवशोत्वान् ६५ सिद्धिसार्थमनादृत्यतास्मिन्नानंदमंदिरे अतिष्ठ दथषण्मासान्दिकरेर्कइवोत्तरे ६६ जीवन्मुक्तपदंततयावत्संप्राप्तवान्द्विजः तत्रासिद्धाःसुराःसाध्याःस्थिताब्रह्महरादयः ६७ आनंदेपरिणामित्वादनानंदपदंगतः नानंदेननिरानंदेततस्तत्संविदाबभो ६८ क्षणंवर्षसहस्रंवातत्रलब्धास्थितिंमनः रतिमे तिनभोगौघेदृष्टस्वर्गइवावुनो ६९ तत्पदंसागतिःशांतातत्तुपःशाश्वतंशिवं तत्रविश्रांतिमासस्यभूयोनोबाधतेभ्रमः ७० तत्पदंसाधवःप्राप्यदृष्टपदृष्टिमिमांपुनः नायांतिखदिरोग्धानंलब्ध्येवेत्ररयाइव ७१ ६६ ततनउत्तरोत्तरोत्कृष्टं सप्तमभूमिकाप्रति ष्ठं सुरादेवाःसिद्धाःदेवयोनिभेदाः साध्याःगणदेवताः सुरेभ्यस्तेषांपृथग्ग्रहणंगोबलीवर्दन्यायेन ६७ तास्मिंश्चानंदेरसास्वादलक्षणाचि तपरिणामश्चस्यत्वान्नवियुतेआनंदोःस्येतिव्युत्पत्त्यमनानंदपदंगतःप्राप्तःततस्तस्माद्वेतोस्तस्यसंविदात्मचेतन्यंनविषयिण्यामिवसु द्धानंदेबभोनापिनिरानंदेदुःखेकिंतुस्वप्रकाशैकरसपूर्णमिवतस्थेइत्यर्थः ६८ तत्रासौनपुनःशुद्धानंदस्यहोदृव इत्याहक्षणमिति

श्रवणमननसमाधिपरिक्षीणचित्तादासाद्य अपरे स्वतयाप्राण्याविनादि पाशेविचारितन्त्रणस्मात् ७२ बुद्धं चित्तं दन्वपदन्तं संसमाधिव्युत्थानद
न्तं प्रतिकरर्यातिपरेषांमहतः प्रपन्ना द्बोधमायाति "षष्ठभूमिकायां भायात्येवसप्तमभूमिकायां ७३ अंभोदकोत्पन्नीहार पर लातसधो
चैत्रे ७४ प्राग्दृष्टाएवरमणीषुविमानपरंपरांश्चपुनर्दर्शतीतिपरेणान्वयः ७५ गौरमंदाररेणुच्छन्नाः भ्रमराश्चामराश्चयासां स्फुरंतिपता
कापटैः ला निवाखिलतिवसाधारणविशेषणे ७६ विद्याधरपतीनापिदर्शयेत्यनुकृष्यते ७७ तेवैमानिकामुनयश्चतमुद्दालकमूचुर्हेभगव

तांमहानंदपदवीचित्तादासाद्यदेहिनः दृश्यनबहुमन्यंतेराजानोदीनतामिव ७८ चेतस्तत्पदविश्रांतं बुद्धं रूपदन्तं संप्रति कथंद्बोध
मायातिनायात्येवाथवानघ ७९ उद्दालकोत्रषण्मासान्द्रोत्साहिताविद्धिनुः उषितोनिमिषितोभोदकोत्पादकोमधाविव ८० ददृशेसंप्र
बुद्धात्मापुनः परमतेजसः प्रणामलालसाः स्निग्धाश्चंद्रबिंबवपुर्द्गराः ८१ रमणीगौरिमंदाररेणुभ्रमरचामराः स्फुरत्पताकपटला
द्युविमानपरंपराः ८२ अस्मदादीन्मुनीन्दर्भपवित्राकेकरांबुजान् विद्याधरीभिर्ललितान्विद्याधरपतीनपि ८३ तेतमूचुर्महात्मानमुद्दा
लकमुनिंतदा प्रसादेनप्रणामान्नो भगवन्नवलोकय ८४ आरुह्येदंविमानंत्वमेहित्रैविष्टपंपुरं स्वर्गएवहिसीमांतो जगत्संभोग
संपदां ८५ आकल्पमुषितान्भुंक्ष्वभोगानाभिमतान्विभो स्वर्गादिफलभोगार्थमेवाशेषतपःक्रियाः ८६ हारचामरधारिण्योविद्याधर
वरांगनाः पश्यैमास्त्वामुपासीनाः करिण्यः करिणंयथा ८७ कामोधर्मार्थयोः सारः कामसाराः सुयोषितः वसंतइवमंजर्यः स्वर्गएवभवंतिताः
८८ एवं कथयतः सर्वानितिथीनित्य सौमुनिः परिपूज्यपथान्यायमतिष्ठद्गतसंभ्रमं ८९ नाभ्यनंदन्नतस्याजतांविभूतिंसधीरधीः भोगिद्धु
व्रजतेस्तुल्यस्वव्यापारपरोभवत् ९० अथस्वधर्मनिरतंभोगेष्वरतिमागतं तमुपास्यययुःसिद्धादिनेःकतिपयैःस्वयं ९१ जीवन्मुक्तःसचमु
निर्विजहारयथासुखं यावदिष्टंवनांतेषुमुनीनामाश्रमेषुच ९२ (नः अस्मात्प्रणामात्प्रसादेनानुग्रहदृशाअवलोकय ८४ एहिआगच्छस्वर्ग
स्यानुपेक्ष्यत्वेहेतुमाहुः स्वर्गएवेति ८५ आकल्पंद्विपरार्द्धविमानानांनकालंअनेनैवसर्वेषांतपःकृच्छ्रादिसार्थकमित्याहुः स्वर्गादीति ८६ ८७ धर्मार्थयोःफलत्वात्सारः ८८ गतसंभ्रमंमिथ्यात्वादिनिश्चयाद्विगतकुतूहलंयथास्यात्तथाअतिष्ठत् ८९ स्वव्यापारःसमाधिस्तत्परोभवत् ९०
उपास्यचिरप्रतीक्षाप्रणामप्रसादेनोपचर्य ९१ ९२

८७ संप्राप्तपदं यथास्यात्तथा अवसत् ध्यानलीलयेत्यनेन ध्यानमपि तस्य लीलयैव नेनापि तु न तस्य साध्यमलीनि समचित्तं ८८ ध्यानासक्तः समा
हितः ८९ व्यवहारकालेऽपि स समाहित एव ना तत्र विक्षेपवानित्यर्थः ९० चित्तं अंतःकरणं तत्तु त्यनुगतं तत्सामान्यं चिन्मात्रं तस्यैव विविच्य दर्श
नधारालक्षणात्समाधिरूढाभ्यासान्महाचित्त्वमपरिच्छिन्नचिद्भावं सर्वत्र सर्वभूतेषु स्नेहद्वेषवर्जनात्करुणया द विषमब्रह्मभावदर्शनाच्च स
मः अनेन तस्य क्रमात्सप्तमभूमेः षष्ठभूमिकाप्राप्तिरुक्ता ९१ अथास्य सप्तमभूमिकाविश्रांतिं दर्शयति चित्सामान्येति सर्वप्रपञ्चरूपस्य नत्त्व
स्कारस्य चोच्छेदेन तत्र यारूपत्वेन लक्षणं चित्तव्यवहारस्याप्युपरमात्तत्त्वप्रकाशानिरतिशयानंदसन्मात्रपरिशेषात्सत्तासामान्यं एत्य प्राप्य चि

मेरुमंदारकैलासहिमवद्विंध्यसानुषु द्वीपोपवननदीकुंजजंगलारण्यभूमिषु ८७ ततः प्रभृति संप्राप्तपदमुद्दालको द्विजः गुहासु गि
रिकुक्षीणामवसद्ध्यानलीलया ८८ कदाचिदन्हां मासेन कदाचिद्वत्सरेण च कदाचिद्वत्सरौघेन ध्यानासक्तोऽप्यबुध्यत ८९ उद्दाल
कस्तदारभ्य व्यवहारपरोऽपि सन् स समाहित एवासौ चित्तत्वैकत्वमागतः चित्तत्वैकमपाभ्यासान्महाचित्त्वमुपेत्य सः बभूव सर्वत्र समस्ने
जःसोरामविवस्वतो ९१ चित्सामान्यचिराभ्यासात्सत्तासामान्यमेत्य सः दृश्यतोऽस्मिंश्चिरविश्रान्तोऽस्तमायान्निवोदयं ९२ शमपदप्र
रलाभप्राप्तिसंशांतचेतसः गलितजननपाशः क्षीणसंदेहदोलः शरदिखमिव शांतं व्याततं चोर्जितं च स्फुरममलमचेतस्तद्वपुः संब
भार ९३ मोक्षोपायेषूपशमप्रकरणे उद्दालकविश्रांतिः सर्गः ५४ २५२३ (चिरविश्रांतस्मिन्दृश्ये एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुवि
नश्यति न प्रेत्य संज्ञास्तीत्यादिश्रुतिनिदर्शितमाविर्भावतिरोभावलक्षणमस्तमयमुदयं च नायात् तद्धेतोः अविद्याकर्मवासनानामत्यन्तोच्छेदादिति
भावः ९२ एतामेव स्थितिं प्रपंचयन्नुपसंहरति शमेति सर्वविक्षेपोपशमान्निरतिशयानंदरूपपरपदलाभप्राप्तेश्च सम्यक्शांतं गलितं मनो
यस्य अत एव सर्वकर्मबीजक्षयाद्गलिताः जननपाशाः क्षीणाः संदेहदोलावस्थाश्च यस्य तथाविधः सन् शरदि खमिव शांतं प्रशांताविद्या
मेघडंबरं व्याततमपरिच्छिन्नं अत एव निरंकुशत्वादिह स्वान्निरतिशयस्वतःस्फूर्तिसुखोत्कर्षादूर्जितं निरावरणत्वात्स्फुरं भ्रान्तदृशा याऽस्तं
तद्विस्मरणादचेतनं ब्रह्मस्वभावमापन्नं वपुः स्वरूपं संबभार न प्रागिवोद्दालकवपुरित्यर्थः ९३ इति श्रीवा॰ उ॰ चतुःपंचाशः सर्गः ५४ ७:

सत्तासामान्यलक्ष्मास्य युक्त्वाद्देहोऽज्ञनक्रमः त्यक्तदेहेन खिं खिन्याभूषाङ्क्षिम्वर्ण्यते गुरुं स्कतिभिः प्रसाधाराम श्वरमपर्यायोक्तसत्तासामा
न्यलक्षणजित्तासमानः एच्छाति आत्मज्ञानेति अज्ञानप्रयुक्तत्तापत्रयलक्षणास्य दाहस्य संतापस्य प्रशीतांशो अज्ञानांधकारोच्छेदनस्य युक्तसं
शयविपर्ययाद्युच्छेदनस्य युक्तसर्वदुःखोच्छेदश्चत्वमेव समर्थ इति विशेषणत्रयतात्पर्यार्थः इंद्रोत्युक्तिर्गुराबीश्वरदृष्टिरेव सदा कार्या न साधारण
बुद्धिरिति द्योतनाय १ षष्ठभूमिकायां चिदचिदंतरभेदानपरिमृज्य चित्सामान्यस्वरूपभूतस्य चेत्याभावस्यात्यंतभावनाद्धेतुसंस्काराणामात्यं
तिकोच्छेदे सति यदा चिंतं संक्षीयते तदा स्वमात्रसत्तयास्वतःसिध्यंतीपरिशिष्टचिदचिदुभयानुगतसत्तैव सत्तासामान्यमित्यर्थः २ सर्व इति प्र

श्रीराम उवाच आत्मज्ञानदिनेकार्येकमर्त्संज्ञायतृष्णानल अज्ञानदाहशीतांशोसत्तासामान्यमीशकिं १ श्रीवासिष्ठ उवाच यदा संक्षीयते चि
त्तमभावात्यंतभावनात् चित्सामान्यस्वरूपस्य सत्तासामान्यता तदा २ नूनं चेत्यांशरहिता चिद्यदात्मनि लीयते असद्रूपवद्यत्स्वच्छा सत्तासामा
न्यता तदा ३ यदा सर्वमिदं किंचित्सबाह्याभ्यंतरात्मकं अपलप्य वसेच्चेतः सत्तासामान्यता तदा ४ यदा सर्वाणि भूतानि सत्तासामान्यवेदनं स्व
रूपेण स्वरूपाभ सत्तासामान्यता तदा ५ कूर्मोऽगानीव दृश्यानि लीयंते ह्यात्मनात्मनि अभावितान्येव यदा सत्तासामान्यता तदा ६ दृष्टिरेषा हि प
रमा सदेहादेहयोः सदा मुक्तयोः संभवत्येव तुर्यातीतपदोपमा ७ व्युत्थितस्य भवत्येषा समाधिस्थस्य चानघ तस्य केवलमज्ञस्य न भवत्येव बो
धजा ८ अस्यां दृशि स्थिताः सर्वे जीवन्मुक्ता महाशयाः सिद्धाः रसाः स्वभुवि व्योमवीथ्यामिवानिलाः ९ इति बिंबितावित्सर्वदृश्यबाधे चेत्यांशेर्ध्व

तितद्विषयैः रहिता सतीयदा स्वात्मनि बिंबचैतन्ये लीयते तदा तस्य बिंबस्य असद्रूपं यस्मिंस्तदसद्रूपमाकाशस्तद्वदत्यच्छासत्तासामान्यताबोध्येत्य
र्थः ३ चेतश्चित्तवृत्त्यभिव्यक्तास्वं चैतन्यं ४ यदा सर्वाणि भूतानि स्वपारमार्थिकरूपेण स्वरूपमेव आभाख्यप्रथा नान्या न तथाविधं सत्तासामान्या
त्म कं कं वेदनं चिन्मात्रं भवतीति शेषः ५ अभावितानि भावनयत्नं विनैव सहजत्वेनेत्यर्थः ६ एषा सप्तमभूमिकारूढदृष्टिर्यतस्तुर्यातीतपदोपमा
अतः सदेहादेहमुक्तयोः समानस्वरूपा स्थितौ विशेषोऽस्तीत्यर्थः ७ संप्रदर्शिविः पंचमादिभूमिकास्वापि समाधिस्थ भवति सप्तमभूमिकारू
ढस्यतु व्युत्थितस्यापि केवलमज्ञस्य न भवत्येवेत्यर्थः ८ सर्वेऽपि जीवन्मुक्ताः अस्यां दृशि स्थिताः संतः भुवि सिद्धाः समाः पारदादयः स्वव्योमवीथ्यां

पा॰टी॰नृप॰
९२४

नतिवोदाहरन्तिअस्मल्लाभनयोभु विनारदाद्याव्योमवीथ्यांत्रतायाः तदर्थलोके विल्यर्थः ९६ यावदिछं यावत्पाप्त्यासंपं ९९ निश्चलाहृदा ९८ चिंतितवान्चिंतितार्थं हृदनिश्चयवासनं ९३ मात्रास्पन्दनिरोधस्पर्शादि गोचरहृत्ती विनिन्ताम् बदराणि चैकैकशउपसंहृत्य तदेनिवेशयन् तदि निविष्ठानां चतेषां परमार्थरूपःभावितः स्वांगमि वस्वात्मनैकीकृतस्थिरूपोघनः संघवघनवदेकरसोयेन ९४ समसंस्थानांकधराकंगपस्य तालुमूलतले आलग्नं नकुवत्धिदूरूपावेनिवेशीते नाजिह्वामूलेन उन्नामे वलसन्मुखं यस्य ९५ अर्थहृत्पादि विषयेन संयोजितमनोहृदयेयेनप्राणादि प्रवाहायांसंरोधेनसमस्तक्रियाकृतदेहमनः करणचांचल्यरूपः स्वच्छाननछविः प्रसन्नवदनः ९६ अंगेतिसंबो

अस्मल्लाभनयः सर्वैर्नारदाद्यास्वरायव ब्रह्मविद्यांस्वरायाश्च हृद्यावस्थांयवस्थितः ९७ एतामालंब्यापदवींसमस्तभयनाशिनी ग्रहालको सावदवस्थावदिछं जगद्गुरु ९९ अथकालेन बहुनाबुद्धिस्तस्यबभूवह विदेहमुक्तस्तिष्ठामिदेहस्त्यक्तेतिनिश्चला ९२ एवंचिंतितवानेष गुहायां पद्मवासने बद्धपद्मासनः स्वस्थावर्ध्वोन्मीलितलोचनः ९३ संयम्य पुरसंरोधात् द्वाराणिनवचेतसः मात्रास्पर्शान्विविच्यान्तोभावितस्वांगचिद्धनः ९४ संरुद्धप्राणपवनः समसंस्थानकंधरः तालुमूलतलालग्नजिह्वामूलोद्धसन्मुखः ९५ नबहिर्नान्तरेनाधोनोर्ध्वेनार्थं नम्रस्तके संयोजितमनोदृष्टिर्दृष्टेंतीनसंस्थितः ९६ प्राणप्रवाहसंरोधसमः स्वच्छाननछविः अंगंचिसंविदुत्तानरोमकंरकितांगभूः ९७ अंगंचित्संविदाभ्यासाच्चित्सामान्यमुपारदे तदाभ्यासादवाप्तांतरानंदस्पंदमुत्तमं ९८ तदास्वादनतोनीनंचित्सामान्यपदक्रमं में विश्वंभरमनं तात्मसत्तासामान्यमापयौ ९९ (घनेचित्संविदाचिद्रूपब्रह्मानंदानुभवेन उत्तानैरूर्ध्वजंतुभिः रोमाभिः कंरकितासंजातकंर.काअंगभूर्यस्य ९७ तस्यानंदाविर्भावपूर्वोक्तमेवक्रममाह अंगेति अंगेघंतः करणेकदेशभूतव्रत्तिभेदेषुप्रतिबिंबितानाचित् अवाच्छिन्नासंविदास्वरूपोपाधिभूतवृत्तिभेदानांविलयाभ्यासाद्धिंबभूतचित्सामान्यमुपारदे प्रविवेशगाबिंबभूत चिन्मात्रानुसंधानाभ्यासाच्च अंततर्हृदिततमंसर्वोत्कृष्टमानंदस्पंदं अवाप अन्वभूदित्यर्थः ९८ तस्यपूर्वचित्सत्तासामान्यानुप्रवेशमाह तदास्वादनतइति यावन्नानिरातिशयानंदास्वादनं तावदेवचित्तनिरोधक्लेशासहिष्णुतया बाह्यैः प्रवर्तनेआस्वादितेत्वानंदेतत्रैवगुडपिपीलिकान्यायेनासक्तस्वरूपमपिविस्मृत्यस्वानुगतं चित्सामान्यं निरतिशयस्वप्रकाशसत्तासामान्यभावं नयतिसएवचित्सामान्यपदक्रमस्पलयत्तस्यसत्तासामान्यप्राप्तिश्चेतिभावः ९९

९२४

नयैवतस्यापुनराववर्तिनीस्थितिमाहनस्थाविनिसमेभ्योपिसमः आत्यंतिकविक्षेपवैषम्यशून्यआभोगःस्वरूपंयस्यनविघ्नेआनंदाःसमायस्य
तथाविधानंदेनप्रसन्नतमत्वान्मुग्धेभ्यःसुंदरेभ्योपिमुग्धामुखद्युतिर्यस्यतथाविधःसन् २० आनंदाविर्भावलिंलिंगरोमांचादीनामपिक्रमादुप
रममाहसंक्रांतेति॥जीवन्नेवपदंप्राप्यप्रारब्धभोगहेतुमलंनोपक्षयादमलंगतः २१ कलाभिरवपूर्णेन २२ नतस्यप्राणाउत्क्रामंत्यत्रैवसम
वलीयंतेइतिश्रुत्युक्तरीत्यातत्रैवतत्प्राणानांतत्सोदकोहम्यवक्रमादुपशममभिप्रेत्याहउपशान्तमिति शारदंतेहेमंतेनरूपणांरसःरविकरौजसी
वविमलेस्वपदेउपशान्तम २३ प्राणाद्युपशममेपरिनिष्ठंतत्तत्पंचवर्णायतिगमेत्यादिना अग्निविस्फुलिंगवत्प्राणुपाधिभिर्विगलितानिनिःस्यतां
निहैरण्यगर्भांतविषयसुखानियस्मात्तेनतथाविधंआद्यंतद्वाचामगोचरंसुखंप्रापयास्मिन्सुखेशाकलक्ष्मीरब्धोतपामिवकल्प्यतेतनकर्तिवातद्‌.
मध्य
तस्थौसमसमःभोगःपरांविश्रांतिमागतः अनानंदसमानंदमध्यमुखद्युतिः २० संक्रांतानंदपुलकःपदंप्राप्यामलंगतः चिरकालपरिक्षी
णमनन्नादिमवभ्रमः २१ बभवसमहासत्वोलिपिकर्मार्पितोपमः समःकलावपूर्णेनशारदछांबरेंदुना २२ उपशान्तमशानैर्दिवसैरसौकतिपु
यैःस्वपदेविमलात्मनि तरुरसःशारदंते इवामलेरविकरौजसिजन्मदशांतिगः २३ गतसकलविकल्पानिर्विकारोभिरामःसकलकलाविंसोपाधि
निर्मुक्तमूर्तिः विगलितमुखमाद्यंतत्सुखंप्रापयास्मिंस्त्वामिवजलराशगवूह्यतेशाकलक्ष्मीः २४ अपरिमितनभोंतव्यापिदिग्व्यापिपूर्णंभुवन
भरपात्रीलंभूरिभूव्योपसेव्यं कथनगुणमनीतंसत्यमानंदमाद्यं परमसुखमनंतंब्राह्मणोसौबभूव २५ गतवतिपदमाद्यंचेतसिस्वच्छभा
वेंद्विजतनुरथमासैःसोपविष्टेवषड्भिः रविकरपरितप्ताब्जातभांकाररम्यातनुतरुभुजतंत्रीशीलवीणाबभूव २६ (निःभिरित्यर्थः २७ असौ

ण ब्राह्मणउद्दालकःप्रतिब्रह्मांडभेदादपरिमितान्यनंतानिनभांसिअंतःस्वोदरेव्याप्नुवंतियादिशास्ताअपिव्याप्नुवंशीलमस्यपौ अनेनदेशकृतपरि
छेदनिरासःसर्वदासर्ववस्तुषुपूर्णंसर्ववस्त्वाधारभुवनानांभरणंधारणंपोषणंचशीलंयस्य अनेनसर्वाधिष्ठानतोक्ता वस्तुकृतभेदनिरा
सःभूरिभिर्भव्यैर्भाग्यैःस्तमजनैश्चोपसेव्यंकथनंगुणंवाक्यमतीतं निमित्तधर्मानि अतीतंअनंतमाद्यंकालकृतपरिछेदहीनमतएवसत्यादि
लक्षणंआनंदयतिसुखेकरसीकरोत्याखिलमित्यानंदंभूमाख्यंपरमसुखंबभूवेत्यर्थः २५ अथतद्ब्राह्मणसिनीवेस्वच्छभावंनिर्मलस्वरूपंआ
द्यंपदंगतवतिसतितस्यद्विजस्यतनुःशरीरंतत्रोपविष्टेवसतोषड्भिर्मासैःरविकरैःपरितप्ताश्रुष्कासतीप्रबहद्वातघनजेभांकारैःक्वणितैःरम्यात

अथ बहुतरकालेन षण्मासेनेति यावत् एतत् वृत्तांतं नामदेहे भुवं खानन् भस्त्रात् अगकन्यासंयुताः परस्परसहचारिता नियमान्सर्वाः संयु
ताः भरामिलिताः एव स्थिताः आस्या धामा तरः कस्यचिद्धकस्याभिमतफलसिद्धौ शिखानां ज्वालानां पंक्तयः अनलमिव तां अद्रेर्भुवं उपययुः २७
तासां मातृणां मध्ये निशिरात्रौ न वनवभूषा वैचित्र्यान्न वनराणि तास्या दिवृत्ता नियस्यास्तथा विधास कलैः अस्मादिभिर्विबुधैर्वर्याद्देवानामपि प्रि
या पूज्या खिंखिनी चामुंडा दिनकरस्य करैः श्रुकं नत् विप्रस्यो हालकस्य कंकालकं हा वं स्तरि तिनिधनयोः खड्गखट्वांगयोर्मध्ये अंतेण लसछाया
समुकुरस्य किरीटस्य कारो कांतकांतिभूषणं चकारेत्यर्थः २८ यस्य मूर्द्धनि कल्पितामल मांसादिमयः स्थूलदेहो पित्रिजगद्धाय्या देव्याः शि
रोभूषणतया सवत्किर्षं प्राप्तस्तेन सर्वोत्कृष्टपदं प्राप्तमिति किं वाच्यमिति स्नानमाहात्म्योक्तिः षंदिर्शपिन्नाह रत्नीति उक्तरीत्या उद्दालकस्य

अथ बहुतरकालेनैतदद्रेर्भुवं तामुपययुरगकन्यासंयुतामानरः स्यात् अभिमतफलसिद्धौ संयुताएव सर्वा अनलमिव शिखानां पंक्तयः पिं
गकेशपः २७ दिनकरकरस्थं कं विभ्रकंकालकं नज्ञरितेमुकुरको रोखड्गखट्वांगमध्ये सकलविबुधवंद्या खिंखिनी देवदेवी नितिन वनरत्न
तां कांतकांतिचकार २८ इत्कहालकदेहकं सुविलसन्मायूरबर्हव्रजव्यालोलाब्दलवेन नवैर्विवलितेमंदारमालागणैः शोते खिंखिणिकाम
हा भगवती लीलाललामेलाः ताजालेभंगइवांतपुष्पपरस्पेपश्चादुपागच्छति २९ एषोहालकचित्तवृत्तिकलनावृत्ती विवेकस्फुरत्स्वानंदप्र
विकस्वरा भासिकुसुमात्सत्कानने विस्तृता रूढा यस्य कदाचिदेव विहरन्नेप्ये वसंछोपया नामावेति वियोगमेतिसफले नोद्धैस्तरां सगमं ३०

कान्तिमतो देहो देहकं सुष्ठु विलसति विराजमाने मायूरबर्हाणां व्रजः समूहः तस्य खण्डाः आलोलाः कंपमानाः अब्दलवा मेघखंडा यस्मिन् नवैः प्रत्यग्रै
र्मंदारमालागणैर्विवलिते चित्ते खिंखिणिकाख्या या महती भगवती सा लीलार्थं ललामे शिरोभूषणा माल्यं अंते पुष्पपरं ला नियस्य तथा विधे
वे यो खलात् पश्चात् सृष्ट तं उपागच्छति लतानाले भंगार बन्धेन सुखावि श्रांतिं भजते इत्युक्ता ३९ मुकुमुहालकाख्यानमुपसंहरन् तत्परिसीलन
पराणां संसारतापोपन्नमं परमपुरुषार्थफलमाभं चदर्शयति एषेति सर्व हृदयविवेकस्फुरन्त्यः स्वानंदः स एव प्रविकासे भासी ति कुसुमानि यस्या
स्तथाविधा एषा दृढ़ीनम्रकाराउद्दालकचित्तस्य रतेर्विदेहकेवल्यप्राप्त्यंतस कलचारित्रस्य कजनाभादरनेरंतर्याभ्यासमृस्थिताततस्तपाक
ल्पवृत्ती यस्य तत्कानने रूढा प्रादुर्भूता सती उत्तरोत्तरभूमिकाधिरोहणक्रमेण विस्तृता असौ पुरुषस्तापत्रकोर्थे याकर्मसंकुले व्यवहारकांतो
रे विहरन्संचरनापि सत्यत्वगीतिशं त्यादिगुणसुरभिन्नी तलापासं तोषलक्षणया छायया अप्यर्थे एवकारः कदाचिदपि वियोगं नैति न प्राप्ते

९२५

इतिश्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे पंचाशः सर्गः ५५ निर्दग्धमायातिमिरः प्रबुद्धो ध्वस्तवासनः व्यवहारप्रसक्तोपि समाधिस्थ इतीर्पिते अ
नेनउक्तप्रकारेण विचारवैराग्यसमाध्यभ्यासक्रमेण विहरन् १ शास्त्रश्रवणेन अर्थतत्वपरीक्षणेन गुरुवचनं विश्वासेन स्वचित्तशोधनेन च सर्वंर
दृश्यबाधेन परमपदविश्रांतिपर्यंतं अवश्यं विचारः कर्तव्य इति तात्पर्यार्थः २ ३ प्रज्ञास्वरूपमाह संप्रबोधवतीति प्राप्नोति प्रापयति ४ कश्चित्प्र
बुद्धः व्यवहारपरोपि सन् जातसमाधिकः एव विश्रांत इत्यन्वयः ५ ६ अंतःशीतलतापूर्णकामनाशात् प्रतिष्ठाफलं तत्लाभे विक्षेपप्रसक्त्याभावा

२५५३ मोक्षोपाये षूपशमप्रकरणे उद्दालकनिर्वाणं सर्गः ५५ श्रीवसिष्ठ उवाच क्रमेणानेन विहरन् विचार्यात्मानमात्मना विश्रांतिमेहि वितते परे पद्म
दलेक्षण १ शास्त्रार्थगुरुचेतोभिस्तावत्तावद्विचार्यते सर्वदृश्यक्षयाभ्यासाद्यावदासाद्यते पदं २ वैराग्याभ्यासशास्त्रार्थप्रज्ञागुरुपराक्रमैः
पदमासाद्यते पुण्यं प्रज्ञयैवैकया थवा ३ संप्रबोधवती तीक्ष्णा कलंकरहिता मतिः सर्वसामग्र्यहीनापि परं प्राप्नोति शाश्वतं ४ श्रीराम उवाच
भगवन्भूतभव्येश कश्चिज्जातसमाधिकः प्रबुद्ध इव विश्रांतो व्यवहारपरोपि सन् ५ कश्चिदेकांतमाश्रित्य समाधिनियतस्थितः तयोः कतमः
तरः श्रेयानिति मे भगवन्वद ६ श्रीभगवानुवाच इमं गुणसमाहारमनात्मत्वेन पश्यतः अंतःशीतलता यास्य समाधिरिति कथ्यते ७ दृ
श्येर्मनसि संबंध इति निश्चित्य शीतलः कश्चित्संव्यवहारस्थः कश्चिद्ध्याने व्यवस्थितः ८ द्वावेतौ राम सुखितौ यावंतश्चेत्परिशीतलौ अंतःशीतल
तायास्यात्तदनंततपःफलं ९ समाधिस्थानकस्थस्य चेतश्चेद्वृत्तिचंचलं तत्तस्य तत्समाधानं सममुन्मत्ततांडवैः १० उन्मत्ततांडवस्थस्य चेत
श्चेत्क्षीणवासनं तदस्योन्मत्तनृत्तं तत्सममंबुधसमाधिना ११ व्यवहारी प्रबुद्धो यः प्रबुद्धो यो वनस्थितः द्वावेतौ सुसमौ नूनमसंदेहपदं गतौ
१२ अर्तं कुर्वदप्येतत्तच्चेतः प्रतनुवासनं दूरंगतमना जंतुः कथासंश्रवणे यथा १३ अकुर्वदपि कर्त्रैव चेतः प्रघनवासनं निस्पंदांगमपि स्वप्ने
श्वभ्रपातास्थितालिव १४
त्से व समाधिरभिधीयत इत्यर्थः ७ मनसि सति दृश्यैर्विक्षेपहेतुभिः संबंधः स्यात्तन्नु मम नदस्तीति निश्चित्येत्यर्थः दृश्यै
र्मनसंबंध इति पाठस्तु स्पष्ट एव ८ ९ १० ११ असंदेहं सर्वसंदेहोच्छेदि परमपदं गतौ तत्र प्रतिष्ठितौ चेदित्यर्थः १२ व्यवहारिणि कर्तृत्वप्रयुक्तो
बंधः किं न स्यात्तत्राह अकुर्वितिति प्रतनुवासनं निर्वासितं यथा कांतादिकथासंश्रवणे अन्यत्र प्रसक्तमनाः कुर्वन्नपि रागादिविकारानुदयात्तत्प्रयुक्ते
र्दोषैर्न बध्यते तद्वदित्यर्थः १३ निस्पंदानि अंगानि देहावयवा यस्य तथाविधमपि सुप्तस्य मनः श्वभ्रपाते तत्रास्थितो च यथा कर्तृ तद्वत् १४

वा. टी. उप.
१२६

निर्वृतिः सुखविश्रांतिः १४ ध्यानाध्याने समाध्यसमाधी तद्रूपयोः अनंकुरं अंकुरबीजवासनाशून्यमितियावत् १६ १७ ननु वासनं चतुर्थ्यादिभूमिकासु क्षीयमाणवासनं अवासनं क्षीणवासनं परं सप्तमभूमिकाप्रतिष्ठा १९ प्रशांतजगतिदेहादिदृश्ये आस्थाअहंममताभिनिवेशो यस्य स्वस्थः स्वस्थप्रतिष्ठः येन तु पायेन भवति २० सर्वेषु भावेषु आत्मभावनां अहंममताध्यासं त्यक्त्वा लेसमाहितः गृहेव्यवहरन्वा २१ २२ इह नित्यापरोक्षप्रत्यगात्मनि भूतानां स्थितानां महतामाकाशादीनामपि २३ शांतचित्तमहाभ्रस्य शरदाकाशकल्पस्येत्यर्थः २४ रा

चेतसो परकर्तृत्वं तत्समाधानमुत्तमं तं विद्धि केवलीभावं साशुभानिर्वृतिः परा १५ चेतश्चलाचलत्वेन परमं कारणं स्मृतं ध्यानाध्यानद्वयं त्यक्त्वा तेन तदेवानंकुरं कुरु १६ अवासनं स्थिरं प्रोक्तं मनो ध्यानं तदेव तु स एव केवलीभावः शांतते वच सा सदा १७ ननु वासनमप्युच्चैः पदायोग्यमुच्यते अवासनं मनो कर्तृ पदं तस्मादवाप्यते १९ घन वासनमेतत्तु चेतः कर्तृत्वभाजनं सर्वदुःखप्रदं तस्माद्वासनां तनुतां नयेत् १९ प्रशांतजगदास्थों तर्वीतशोकभयैषणः स्वस्थो भवति येनात्मा स समाधिरिति स्मृतः २० चेतसा संपरित्यज्य सर्वभावात्मभावनां यथा तिष्ठसि तिष्ठ त्वं तथा शैलगृहे यदा २१ गृहमेव गृहस्थानां सुसमाहितचेतसां शांताहंकृति दोषाणां विजनावनभूमयः २२ अरण्यसदनेतुल्ये समाहितमनोहृदा भवतामिह भूतानां भूतानां महतामिव २३ शांतचित्तमहाभ्रस्य जनजालोज्ज्वलान्यपि नगराण्यपि शून्यानि वनान्यवनिपात्मज २४ वृत्तिमच्चित्तमत्तस्य विजनानि वनान्यपि नगराणि महालोकपूर्णानि परवीरहन् २५ व्युत्थितं चित्तमभ्येति भ्रमस्यां ते सुषुप्ततां निर्वाणमेति निर्वाणं यथेच्छसि तथा कुरु २६ सर्वभावपदातीतं सर्वभावात्मकं च वा यः पश्यति सदात्मानं स समाहित उच्यते २७ ईहितानीहिते क्षीणे यस्यांतर्वितताकृतेः सर्वभावाः समा यस्य स समाहित उच्यते २८ सदात्मना सदेवेदं जगत्पश्यति नो मनः यथास्थेनैव वास्मि आत्मन्यपि जनेश्वर २९ रागादिवृत्तिमता चित्तेन मत्तस्य २५ व्युत्थितं रागादिविक्षिप्तं चित्तं नानाविधविषयभ्रमस्यां ते लयेन पुनर्व्युत्थानसहत्वबीजभूतां सुषुप्ततां एति निर्वाणं शांतरागादिवासनं तु चित्तं निर्वाणं मोक्षमेति २६ तर्हि प्राकृतं व्यवहार्यव्यवहारिणोस्तत्त्वविदा त्वं कल्प्यः समाधिरुक्तस्तत्राह सर्वेति तत्त्वविन्समाधौ सर्वभावपदातीतं पश्यति व्यवहारे तु सर्वात्मकं पश्यत्येकपिंडमात्राहंमानाभावान्न तस्य रागादिरिति न विक्षेपप्रसक्तिरिति भावः २७ उक्तमेवार्थं फलत आह ईहिते ति ईहितानीहिते रागद्वेषौ २८ कथं सर्वभावाः समास्तद्दृष्टान्तपातिसदात्मनेति

१२६

नगराण्यपि शून्यानीति यदुक्तं तदुपपादयति यथेति विपाणि कापण्यवीथिका तत्र समवेता अपि वहवो जनाः स्वस्वकार्ये व्यवहरंतोप्युदासीन स्यानुपकारित्वादसत्प्राया स्तद्वत् ३० ३१ भूतैः प्राणिभिः पार्थिव्यादिभिश्चाकुलमपि बाधितत्वादाकाशतां शून्यतां ३२ आजीवितस्थितेः याक जीवं ३३ यस्मात् अंतर्यन्त्रयादत्रांतसंज्ञीतलं वा चित्तं तदेव बहिर्जगदाकारेणास्थितामित्यर्थः ३४ तदेवाह घोरेति ३५ ३६ अध्यारोपदृष्ट्योक्ता अपवाददृष्ट्या आह न बहिष्ठमिति कथं तर्हि तत्र जगदाकारभानं तत्राह यदिति यद्वस्तु प्राग्वासनाबलाद्यथा कचितं तत्तथा तद्रूपेण परमार्थतत्व मेवोत्थितामित्यर्थः ३७ आत्मतत्वरूपं परमांतरं वस्तु तदेव बहिष्ठत्वेन जगत्तया भाति तत्तदुपाध्यनुसारि संकोचेपि सति प्रविकासि च भवति यथा।

यथा विपाणे कालोका विहरंतोप्यसत्समाः असंबंधात्तथा तस्य ग्रामोपि विपिनोपमः ३८ अंतर्मुखमना नित्यं सुप्तो बुद्धो व्रजन्नपि पुरं जनपदं ग्राममरण्यमिव पश्यति ३९ सर्वमाकाशतामेति नित्यमंतर्मुखास्थितेः सर्वथानुपयोगित्वाद् आकुलामिदं जगत् ४० अंतःशीतलतायां तु लब्धायां शीतलं जगत् दिव्याराण्यामिवन्दग्धां भवत्याजीवितास्थितेः ४१ भवत्यखिलजंतूनां यदंतस्तद्बहिःस्थितं अंततस्तो पतप्तानां दावदाहमिदं जगत् ४२ द्यौः क्ष्मा वायुराकाशं पर्वताः सरितो दिशः अंतःकरणतत्वस्य भागा बहिरिवास्थिताः ४३ बहुधानावर वयरश्मुसंतरात्मनः तद्बहिर्भासते भास्वद्धिकास्वपुष्पगंधवत् ४६ न बहिष्ठं न बाह्यस्थं किंचिल्लिंगं न विद्यते यद्यथा कचितं चित्ता तत्तथात त्वमुत्थितं ४७ आत्मतत्वांतरं भाति बहिष्ठत्वेन जगत्तया कर्पूरमिव गंधत्वेन संकोचेपि विकासि च ४८ आत्मैव स्फुरति स्फारं जगत्त्वेनाप्यहंत या बाह्यत्वेनांतरत्वेन सर्वनाम्नस्वविभुः ४९ बहिष्ठेनांतरं बाह्यमतस्थेनांतरस्थितं यथाविदितमात्मायं स्वचित्तमनुपश्यति ५० स बाह्याभ्यंतरं शांतमात्मनो भेदितं जगत् अहंत्वादिस्थिते भेदे भरिभिंगभयं तु तत् ५१ (संपुटांतस्थं कर्पूरं गंधरूपेण तथा भाति भवति चेत्यर्थः

३८ असन्नेव सुरासुरत्वमहंकारादिरूपः नापि सन्मात्रस्वरूपः किंतु विभुरुभयानुस्यूतसन्मात्ररूप इत्यर्थः ३९ अत एवायमात्मा आंतरं स्वचित्तमेव यथाविदितं पूर्ववेदनानुसारेण बहिष्ठेन बहिर्मुखेन चक्षुरादिना बाह्यं जगदाकारमनुपश्यति अंतःस्थेन त्वग्रहासनादिना आंतरं तद्दास्थितं स्वप्नमनोराज्याद्यनुपश्यतीत्यर्थः ४० न बहिष्ठं न मध्यस्थमिति यदुक्तं तद् युक्त्यानुभावयति सबाह्येति सबाह्याभ्यंतरं स्थितं विधुमापि जगद् भय नुस्मृतस्वात्मनः सकल्पशाद्भेदितं पश्य कृतं सत् असदेवेति शांतमात्मतमेवेत्यर्थः तत्र पृथक्करणाभावे तु तत्सत्तयैव बाह्याभ्यंतरभेदस्थितेः सा नित

पु॰
वा॰टी॰उ॰प॰
१२७
प्र॰

भूरिभंगमयमुपयात्यपतियौरिति तनरार्धिभिर्हतात्मनोयुस्समादिसर्वं वस्तुनापत्रपञ्चाला ज्वलितं सत् तथाविधः कल्पादिः प्रलयारंभसमयए वसरासंपत्पैंघतइत्यर्थः ४२ सन्मात्रात्मदर्शनेनुकर्मेंद्रियैर्व्यवहारेपि अभिमानाभावान्नहर्षशोकादिविक्षेपलेशस्यापिप्रसक्तिरितिसहासमा धिस्स्थतुल्यतेवफलतीत्याशयेनाहयस्मित्यादिना ४३ ४४ पूर्वपर्यंतिउत्पत्तिरपरपर्यंतोनाशस्तत्सहितां एतामुमूरुजनप्रति शास्त्रहंममनाह छिषु ४५ किमर्थंहिसतीतिचेदहंममेतिदृष्टिगोचरयोरभिमानाभिमंतव्यलक्षणयोरहंताजगतोराश्रयस्येवासिद्धामिथ्यात्वादित्याहसमे इतिनहिसर्वानुभवासिद्धप्रत्यक्त्वभावेमयिवास्यानांश्रुतिसिद्धब्रह्मस्वभावेवानतावन्मयिदृशोदृश्यप्राश्रयत्वायोगान्नापिपरेब्रह्मणिअसं गादृग्यकूटस्थस्वस्वरूपेसमेतस्मिन्नहंताजगज्जन्मादिवैषम्याधारत्वायोगात् यथाशरदातपसंभिन्नेषुदूरादृश्यमानेषुवीचिवृंदेषुदृश्यमा

घोःक्षमावायुराकाशांपर्वताःसरितोदिशः कल्पादिरेवज्वलितंसर्वमाधिहतात्मना ४२ यस्त्वात्मरतिरेवांतःकुर्वन्कर्मेंद्रियैःक्रियाः नवशोह र्षशोकाभ्यांससमाहितउच्यते ४३ यःसर्वगतमात्मानंपश्यन्समुपशांतधीः नशोचतिनध्यायतिवासससमाहितउच्यते ४४ सपूर्वापरपर्यंतायःपश्य न्जागतीयति दृष्टिधीतासुहसतिससमाहितउच्यते ४५ समेपरेपिनाहंतानजगज्जन्मनामयि वीचिवृंदेष्विवानस्मिनाकाशफलधानवः ४६ य स्यांतरस्थितिनाहंत्वंनविभागादिनोमनः नचेतनाचेतनतेसोस्तिनास्तीनराजनः ४७ योमसस्थोबहिष्ठोहासम्यगाचरतीहयः हर्षामर्षविकारेषुक्ष इलोष्टसमःशमः ४८ आत्मवत्सर्वभूतानिपरद्रव्याणिलोष्टवत् स्वभावादेवनभयाद्यःपश्यतिसपश्यति ४९ अर्थातनुत्तनुर्वापिनासद्रूपेण चेत्यते सद्रूपोनानुभूतो.तेनतेनैवतुन्नतया ५० (नाआतमापस्ते तत्र तरजनपापाविस्फुरंतीपुंजीभूताकांतिर्नवीचिवृंदेष्वंतरास्तिसमीपोपसर्पणे तेषुनिमज्यान्वेषणेचादर्शनात् नापितदंतर्वहिष्ठेआकाशेप्यसंगकूटस्थेचतुर्विधक्रियाफलधालदर्शनेनवोचिक्रियाजन्यफलाश्रयत्वस्यदूरनिरस्त त्वात् अतःसाकांतिरिवाहंताजगती अपिनिराश्रयत्वान्मिथ्यैवेत्यर्थः ४६ अहंताजगद्देरनिरस्यतद्दृष्टभेदंनिरस्यतियस्येति यस्यअंतःआंतरं प्रत्यगा त्मस्वरूपंनास्थितंअहंत्वंयास्मिस्तथाविधंसंपन्नंदृश्यजगद्विभागादिकंमनश्चनास्तितस्यतदधीनकल्पनेचेतनाचेतनतेअपिनस्तःअतःसएकएवसर्वा त्मा आस्तितदिः तरोजनश्चेतनधातुनास्तिनान्योतोस्तिद्रष्टेत्यादिश्रुतेरित्यर्थः ४७ तस्यलक्षणान्याहद्वाभ्यामेतिद्वाभ्यांसम्यक्शास्त्रशिष्टाचाराविरोधेन शमःशांतिस्वभावः ४८ ४९ तत्वतस्यैवसमदर्शित्वेनुपपत्तिमाह अर्थइति अतेनमहेनअतनुर्महान्नहिरण्यगर्भश्चयांतिस्ततनुरल्पःकाकिनी मात्रोपिवाकनककामिन्यादिरर्थोविषयःअसद्रूपेनमिथ्यात्वेननचेत्यतेनदृश्यतेअधिष्ठानसद्रूपश्चनानुभूतइति तत्रयासन्मात्रस्वभावेनापिन

१२

यस्याश्रये समदर्शनं विरूढं स सर्वत्र सर्वावस्थ्यप्य वस्थासु न हर्षविषादादिना लिप्यत इत्याह ईदृशोत्यादिना तिष्ठतु किं च नः उदेतु ऐश्वर्यार्धम्युदयं प्राप्नो
तु वा मृतिं पुत्रबांधवादिमरणं ततस्थितां अभ्युदयस्थितिनैतु ५१ त्वद्दाममनन्मथमिति क्रियाविशेषणं समं निर्विकारं ५३ ५४ ५५ असौ समदर्शी
किंचिन्मरणदुःखादिविकारि मन आदि रहंताश्रयः अत एव तेन किंचित्कृतं ५६ अतेषु तर्हि कस्य कलंकस्तद्दर्शयति संविदिति सकलंकैः शास्त्रान
भ्यनुज्ञातसेवनदूषितैः वासनारूपैः ऐंद्रियकसंविद्भिरस्तपतनेन पुरुषेयादेहे न तद्भोग्यैः शब्दार्थरूपैर्विषयैश्च अहंत्वं अहंकारप्रधानलिंगात्मा ५७

ईदृशाश्रयसंपन्नो महासत्वपदं गतः तिष्ठतु देतु वा यातु मृतिमेतन न तत्स्थितां ५१ वसतु तमभोगाढ्ये स्वगृहे वा जनाकुले सर्वभोगोज्झिताभो
गे रूम महत्यथवा वने ५२ नृत्यमममन्मथं यानं तत्परो वापि निरत्ययु सर्वसंगपरित्यागी समभापातु वा गिरौ ५३ चंदनागरुकर्पूरैर्वपुर्वापरि
लिपतु ज्वालाजलविस्तारे निपततत्वथवानले ५४ पापं करोतु सुमहद्दुष्कुलं पुण्यमेव च अद्यावाम्मृतिमायातु कल्यांतनिचयेन वा ५५
नासौ किंचिन्न तत्किंचित्कृतं तेन महात्मना नासौ कलंकमाप्नोति हेमपंकगतं यथा ५६ संवित्पुरुषशब्दार्थैः सकलंकैः कलंक्यते अहंत्वं
वासनारूपैः शुक्तिकारजतोपमैः ५७ समस्तवस्तुप्रशमात्सम्यग्ज्ञानात्यथास्थितैः स्वभावस्योपशांतेतः कलंको मत्तयास्वतः ५८ अहंत्व
वासनानर्थप्रसूते संविदात्मनः पुरुषस्य विचित्राणि सुखदुःखानि जन्मानि ५९ रज्ज्वां सर्पभ्रमे शांते अहिर्नेति निर्वृतिर्यथा अहंत्वभावसं
शांतौ तथांतः समतामना ६० यः करोति यदश्नाति यद्ददाति जुहोति वा न तद्भूस्यं न तत्र सोमा करोतु करोतु वा ६१ कर्मणास्ति न तस्यार्थो
नार्थस्तस्यास्त्यकर्मणा यथास्वभावावगमात्स आत्मन्येव संस्थितः ६२ इच्छास्तेतः समुद्यंति न मंजर्य इवोपलात् याश्चोद्यंति च ताः सर्वाः
सएवास्तिवर्वीचयः ६३

कस्मादुपायादंतः कलंकोपशम इत्याह समस्तेति स्वभावस्य चित्तस्य कलंकः बाधादसत्त्वाख्यतः प्रशीतो भवती
ति शेषः ५८ संसारदुःखप्रासेस्तर्हि किं कारणं तदाह अहंताध्यासाद्वासनालक्षणानामनर्थानां प्रसूतेरुद्बोधात्पुरुषस्य जन्मानि सतीत्यर्थः ५९
अत एवाहंत्वशांत्या संसारदुःखनिवृत्तिरित्याह रज्ज्वामिति समतासर्वदुःखवैषम्यशून्यता ६० दुष्कृतफलमिव सुकृतफलमपि तस्य नास्तीति तस्य स
र्वकर्तव्यहानिरित्याह यदित्यादिना ६१ अकर्मणाकर्मत्यागेन ६२ फलेच्छया हि तदुपायकर्मणि प्रवृत्तिः स्यात्सैव तस्य पूर्णत्वान्नोदेतीत्याह इच्छा इ
ति कदाचिद्वासनाभासादुदिताः अपीच्छाः परमार्थदृष्टौ ज्ञानस्य स्वात्मभूता एवेत्याह याश्चेति ६२ ६३ श्रीरामः॥

वा॰टी॰उप॰५
१२५

तस्यसर्वात्मतांसर्वस्यतदात्मतांचद्रष्टयन्नुभयोर्निष्प्रपंचचिन्मात्रत्वेपरमार्थतःफलितेतिदर्शयतिसकलमिति आखिलंअखंडंयतः अत्रजगति विभागितात्रिविधपरिछेदशून्यलिताकाचिन्नास्ति एवंभेदकानांकार्यकारणोपाधीनांनत्त्वात्साक्षीचिन्मात्रत्वेसततत्वविदूसर्वजगदधिष्ठान सन्मात्रमेवयतोसौपरमःपूर्णत्वात्पुरुषःसर्वदोषास्पर्शाच्छिपावनोयःपरमात्मानदेकरूपीइतिअनयारीत्याआकिंचित्सर्वद्वैतबंधानिर्मुक्तस्वरूपमात्रपरिशिष्टोसौनित्यमुक्तःसंपन्नइत्यर्थः ६५ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेषट्पंचाशःसर्गः ५६ अततत्स्वभावाचिद्रूकारतत्स्वभावतां यांधत्तेसाचिदेवनिचिदन्यन्नेतिवर्ण्यते एवंसर्वजगतःशिवादभेदेपरमार्थतःसिद्धेव्यवहारेपिजंगद्धिक्त्यंततत्त्व

सकलमिदमसावसौचसर्वजगदखिलंनविभागितात्रकाचित् परमपुरुषपावनेकरूपीसदितितत्त्वदर्शिविदेवनासौ ६७ मोक्षोपायेषूपशमप्रकरणेध्यानाचारोनामसर्गः ५६ श्रीवासिष्ठउवाच यदात्ममरिचस्यांतश्चित्वातीक्ष्यत्ववेदनं तदहंतादिभेदादिदेशकालाद्विवेत्यतः १यदात्मलवणस्यांतश्चित्वात्तवणवेदनं तदहंतादिभेदादिदेशकालादिमात्स्थितं २ स्वतोयदंतरात्मेक्षोश्चित्वान्माधुर्यवेदनं तदहंतादिभेदादिजगत्सत्वादिर्जितं ३ स्वतोयदात्मदृषदश्चित्वात्काठिन्यवेदनं तदहंतादिभेदादिदेशकालादितागतं ४ स्वतोयदात्मशैलस्यांतस्तया जाड्यवेदनं तदहंतादिभेदादिभुवनाद्यौतिसंस्थितः ५ स्वतोयदात्मतोयस्यांचिद्द्रवत्वादिवेदनं तदावृत्त्यहंतादिभेदाद्याकारिताइव ६ स्वतोयदात्मवृक्षस्यरसस्वादित्वस्यवेदनं तदहंतादिभेदादिभुवनादौवसत्स्फुरत् ७ यदात्मगगनस्यांतश्चित्वाशून्यत्वमेवेदनं तदहंतादिभेदादिभुवनादीनिभावनं ८ यदात्मगगनस्यांतश्चित्वासौषिर्यवेदनं तदहंतादिभेदादिशरीरादिचरोपितं ९ स्वतोयदात्मकुड्यस्यनैरंतर्यनिरंतरं तदहंतादिभेदेनचित्वाद्बहिरिवास्थितं १० स्वतोयदात्मसत्तायाश्चित्वात्सत्वेकवेदनं तदहंतादिभेदादिचेतनानीतिवास्थितं ११ ७

द्रूपचित्स्वभावएवेतिफलितमित्याहयदित्यादिना आत्मैवस्वप्रकाशात्मेक्ष्यरूपमरिचतस्यचित्वात्तैक्ष्ण्यप्रधानरूपंयद्वेदनंतत्त्वानीयं अमात्तत्स्वस्वभावएवअहंतात्वंतादिरूपंघटकुड्यभेदादिरूपंतदाधारदेशकालादिरूपंचजगदितिअतश्चिदभेदसाधनात्सुलितमित्यर्थः १ २ तत्वादिनातत्तदाकारभेदेनजृंभितंआविर्भिव्यक्तं ३ ४ जाड्यंगौरवं ५ आकारितात्तत्तदाकारवत्ताइवास्थितमित्यनुषज्यते ६ सत्त्ववर्तमानंतथास्फुरद्भासमानं ७ भावनंकल्पनं ८ द्रव्यद्बहिःशून्यतंमूर्तद्रव्यंताछिद्रतानुसौषिर्यमितिभेदः ९ नैरंतर्यंनिबिडताबहिर्द्रव्यत्वाछिद्रातिरिक्तमिवेत्यर्थः १०

१२८

चित्वं वृत्तिभेदभिन्नचिदाभासेष्वनुगतं सामान्यं वेदकल्पयन्निसः जीवः १२ रसायनममृतं स्वत आस्वादितं स्वप्रकाशतयाऽनुभूतं उदितमाविर्भूतं
१३ अंतरे स्वात्मन्येव १४ चेतनारूपे आत्मपदे स्वरूपे १५ माधिकजगदाकारानुभवस्य स्वप्रकाशस्वात्मानुभवमात्रत्वेऽनुसारं नायपत्रपातिवेत्याख्या
दयेत्यास्वाद्यते इति कर्मकर्तृभावव्यपदेशो न तद्भेदसाधनायेत्याह नचेति १६ विनोतिचैतन्यांतरात्मनाविकारोऽति वेद्यलभ्यस्य १७ अस
न आभासत इत्याभासो जगदाकारोऽयस्मिंस्तथाविध एव १८ तर्हि यदात्ममरिचस्येत्याद्युक्तेः कोऽभिप्रायस्तमाह अनपेति १९ पूर्वं दिष्टवान्यश्वा

अंतरात्मप्रकाशस्य स्वतो यदवभासनं तदहंतादि चित्वादिजीवइत्येव वेदसः १२ अंतरात्तिय दात्मेंदोश्चिद्रूपश्चिद्रसायनं स्वतआस्वादि
तं तेन तदहंतादिनोदितं १३ परमात्मगुडस्यांतर्यष्टित्वादृश्यात्मकं तदेवास्वाद्यते तेन स्वतोऽहंतादिनांतरे १४ परमात्मप्रणेश्चिता
यदंतः कचनस्वयं चेतनात्मपदे चांतरहमित्यादिवित्यसौ १५ नचकिंचनवेत्यंत वैदृश्यस्यासंभवादिह नचास्वादयति स्वादस्वाद्यस्यासंभ
वादयं १६ नचाकिंचिच्चिन्नोत्यं तस्वेत्यस्यासंभवेऽसाति विंदतेनचवाकिंचिद्वेद्यस्यासंभवाइसौ १७ असदाभास एवात्मा अनंताभरिता
कृतिः स्थितःसदैवैकघनो महाशैलइवात्मनि १८ अनयातु वचोभंग्या समयाते रघुनंदन नाहंतादि जगत्तादि भेदोऽस्तीति निदर्शितं १९
नचित्तमात्तिनाचेतान जगत्तादिविभ्रमः दृश्यमूकं बुदासितं चान्तं तत्राप्यति केवलं २० यथावत्तादितामेति द्रवत्वाद्धारि वारिणि तथाहंता
दितामेति तत्साक्षातो तत्वात्मनि २१ यथाद्रुवत्वं पयसि यथास्पंदः सदागतौ अहंतादेस्तथाकालादितथात्तेतासिमात्रके २२ तोतत्नया
[illegible]वं ज्ञानं जानाति ज्ञानत्वं हया ज्ञायते हंतयाऽसेनजीवादीत्याभिजीवनैः २२

(च्छरदिमूकत्वञ्चमीभूतं बुदवसितं शुद्धं आधिष्ठानसन्मात्रत
यापरिशिष्टं बाधितं जगत् चांतमेव तत्रान्यतीत्यर्थः २० तत्स्वमायावीसर्वतः स्वमायावृते तेऽपिरूपे आत्मनि अहंतादिरूपतां जीवजगद्भावमि
ति यावत् २१ सदागतौ वायौ परमार्थतोऽसिमात्ररूपे तत्सर्वतः ईश्वरे २२ यदि जीवजगद्रूपेण स एव नान्ये तर्हि तत्त्वतः जीवेश्वरभावयोः को विशेषस्त
माह स इति स ईश्वरः तनयाईश्वरभावेन जीवं निराति ज्ञायानंदरूपं स्वस्वरूपं ज्ञानं ज्ञानत्वं हया अनावरणापरिच्छेद लक्षणया ज्ञाता नाभि दृश्यासद
व जानाति अहंतादिभिः अहंकारस्थूलदेहरूपजीवभावेतु तेन चेतनभ्रांतेनापि आभिजीवनैः जीवहेतुभिः प्राणकरणविषयसंबंधाध्यासैर्जी
वादिरूपएवात्मेतिज्ञायते नतत्वेन इति विशेष इत्यर्थः २३

या

वा॰ टी॰ उप॰ १९६

अत एव जीवस्य यथा यथा भ्रांतिस्तथा तथेश्वरो विवर्तत इत्याह यथेति यथा यया कार्मैः कर्मवासनया यादृशी विषयता नेन अज्ञस्य यथा येन दर्श
नलाभोपभोगवैचित्र्यप्रकारेण यादृशी प्रियमोदप्रमोदादिनाम्प्रकारस्तृप्तिरूपभोगऋद्धेति अनन्येश्वरूपे भोक्तृभोगवैचित्र्यरूपता अन्यता
चाज्ञेन बुद्धा सपरमेश्वरस्तथा तथा तद्रीयकामादिवासनया तथाज भतेस्वगात्राणि विनामयति विवर्तते वा चिर्मंघते इति यावत् २४ यदा लं
नेन सच्छास्त्रसद्गुरूपदेशाद्योगपुस्य जगतो ज्ञातता अधिष्ठानसन्मात्ररूपास्फूर्तिरेव जीवत्वं सारः परमार्थस्तिलिता जीवानां सर्वेषां पद
धीनं जीवत्वं तादृशमात्मं दृष्टमेव जीवत्वं भोक्तुः सारो ज्ञानस्तदा भोग्यभोक्त्रधिष्ठानयोर्द्वयोरपि चिद्रूपत्वे परिशिष्टे तज्जीवयोः जीवेश्वरयोर्भे
दः अस्तं तेनास्ति सर्वथैव निवर्तत इत्यर्थः २५ जीवेश्वरभेदकाज्ञाने नष्टे प्राज्ञतुरीयभेदोपि निरत इत्याह वेदपूर्णानंदैकरसचिन्मात्रसाम्राज्ये

यो

पदेति यथा ज्ञस्य तत्पिर्ज्ञानेनयादृशी अनन्येश्वरान्यता बुद्धा सतथाजं भतेतथा २६ जीवत्वं ताततताज्ञातजीवत्वं जीवजीवत्वं अत्यंतमास्तिनो नो
भेदश्चिद्रूपत्वेन जीवयोः २५ यथा ज्ञजीवयो नास्ति भेदो नाम तथैतयोः भेदोस्ति न ईश्वराद्यो विद्विज्ञांतमखंडितं २६ सर्वप्रशांतमज
मेकमनादिमध्यमाभास्वरं स्वरनमात्रमचेत्यचिन्नं सर्वप्रशांतमिति शाब्दमयातु दृष्टिबोधार्थमवहितमुधैवतदाममितीदं २७ ॥ मोक्षोपाये

२६४४

षूपशमप्रकरणे भेदनिरासो नाम सर्गः ५१ श्रीवसिष्ठ उवाच अत्रैवोदाहरंतीममितिहासं पुरातनं किरातेशस्य सुरघोः ख्यातं तं विस्मया

स्पद १८

सिद्धमित्याह यथेति २८ निष्कृष्टार्थमनूद्योपसंहरति सर्वमिति सर्वे जगत् आसमंतात् भास्वरं पूर्णस्वप्रकाशात्परं स्वरनं स्वानंदैक
रसं चेत्यैर्विषयैश्छिन्नं स्वव्यावर्तकधर्मेण चरहितं प्रशांतं ब्रह्म तदेव सर्वप्रशांतमिति ताकालिकं ब्रह्म यौपदवाच्यार्थाभेदसंसर्गगोचरा आहा
र्याभेददृष्टिः साक्षात्प्रयोजनशून्यत्वान्मुधैव हि यस्मात्कारणात् विरोधप्रतिसंधानेभागत्यागलक्षणाश्रयद्वारा लभ्यार्थखंडबोधार्थमेव तत्
वाक्यबोध्यमखंडार्थस्तत्तु ॐ इति ॐकारं जगद्यत्तेकीकृत्य विराड्हिरण्यगर्भव्याकृततनुरीयात्मकान् कारोकारार्द्धमात्रापादसंस्थतुद्योविनज्य
पूर्वपूर्वपरानुत्तरेषु प्रविलाप्यार्द्धमात्रया यदद्वयं पूर्णानंदैकरसं नित्यापरोक्षप्रत्यक्चिन्मात्ररूपं लक्ष्यते इदमेव सत्यमित्यर्थः २७ इति श्रीवा

१२९

सिष्ठतात्पर्यप्रकाशे उपशमप्र॰ करणे टीकायां सप्तपंचाशाः सर्गः ५१ किरातेशस्य सुरघोर्निर्वेदोत्र पवर्ण्यते मांडव्येनोपदेशाच्च स
र्वत्यागाद्युपायतः अत्रास्मिन्नाब्रह्मयादृष्टिबोधार्थमेवेतिनकेर्षे १

व

सुरथोर्निवासदेशं वकुंतस्मिन्निहितं हिमवद्भंगं वर्णयति उत्तरस्यादिशः इत्यादिनामेदः सारइतियावत् भुवः संभृतं निर्गतं कर्पूराणां परलं राशीः शार्व हेसनं चांद्र आतपो वेतिप्रत्येकमुत्प्रेक्षाः अथवादिशोमेदस्त्येशार्वहेसनं चांद्र आतपो भुवः भूमिंप्राप्य कर्पूरपटलं संभृतमित्युत्प्रेक्षिकवे कल्पिक नानाहेतूपपाद्याएकैव विशिष्टोत्प्रेक्षाः २ हिमाद्रेः शृंगमितिविशेषणान्मेरुसन्निहितप्रसिद्धरजताद्रेरयमन्य इतिगम्यते शैलकुंजरेण पर्वतश्रेष्ठेन हिमवता निर्मुक्तस्यध्वस्य शृंगपरंपरालक्षणस्य मुक्ताकलापस्य नायकोमाणिरिवास्थित इत्यर्थः शैलश्च कुंजरश्च योनिर्गलितस्य मुक्ताकलापस्य नायकः संग्राहकोराशिरिवेतिवा ३ नाभ्यब्जं विष्णुनाभिकमलं गृहं श्वशुरकल्पितमित्यर्थाद्गम्यते ४ रुद्राक्षस्य वृक्षेषुलंबमानाभिर्दोलाभिः प्रे

उत्तरस्यादिशोमेदः कर्पूरपटलं भुवः संभृतं हसनं शार्वं शुक्लोवाचांद्रआतपः २ हिमाद्रेः शृंगमस्तीह कैलासोनामपर्वतः शैलकुंजरनिर्मुक्तकला पस्येवनायकः ३ विष्णोः क्षीरोदकइवस्वर्गः सुरपतेरिव अब्जजस्येवनाभ्यब्जं गृहं यः शार्वमौलिनः ४ रुद्राक्षवृक्षदोलाभिः साप्सरोभिर्विभातियः लोलरत्नशलाकाभिर्लहरीभिरिवार्णवः ५ गणांगनानामनिशंमननांचरणेर्हताः अकोंशोश्वराजंते पत्रशोकाविलासिनः ६ संचरन्त्वाक रोदिक्षु भृगुबिंदुमणीडवैः प्रवर्तंते यतिवर्तंते यत्राजस्रं तु निर्झराः ७ योलतावृक्षगुल्मेश्च वापीहृदनदीनदैः भर्गोर्भृगणै भूतैर्ब्रह्मांडवदिवा वृतः ८ तस्य हेमजटानाम किराताः संस्थिताः स्थले पिपीलिकावत्तरोर्मूलकोशमागताइव ९ कैलासपादारण्यानां रुद्राक्षैस्तरुगुल्मकैः वसं तियूकवस्तुद्वास्तैवैनिकरजीविनः १० आसीत्तेषामुदारात्माराजापरपुरंजयः जयलक्ष्म्याभुजइवयः प्रजायाश्चदक्षिणः ११ [margin: स्वर्णालिकाभिः]

लोलरत्नशलाकाभिरितिलहरीणामपिविशेषणं ५ गणांगनानांप्रथमस्त्रीणां ६ यत्रयासुदिक्षुसंचरन्भवतितत्रभृगुषुप्रथंपातस्थलेषुप्रवर्तंते अन्यासुनिवर्तंते ७ ब्रह्मांडवदिवेतिउक्तार्थानामपिप्रयोगोदृश्यतेयथाद्वावपूपावानयेतिमहाभाष्योक्तिदर्शनात् यूनिकानाबहूनामप्युपधंत वा आदित्यमग्निरनुसमारोहतीतिवत्सहप्रयोगसंभवाद्धातिनोक्तपिसाहृदश्यस्वरचाद्वप्रयोगः अंडवत्विराडाकारं विशेषं ब्रह्मलेवेतिमतुवंतंवा योज्यं ८ तस्यहिमवतः शृंगस्यस्थलेमजदेशे ९ तेषां जीवनोपायमाह कैलासेतिकैलासाख्यस्यशृंगस्यपादाः प्रत्यंतपर्वतास्तदोपानमरण्यानां संबंधिभिः रुद्राक्षैरन्यैश्चतरुगुल्मकैः फलपुष्पकाष्ठमूलाद्युपजीवनेननिकरजीविनः १० जयलक्ष्म्याभुजइवपरपुरंजयः प्रजयाः पालनेचदक्षिणः रा जावक्ष्यमाणविशेषणैर्ब्रह्मविद्याधिकारदर्शनाच्चासौक्षत्रियइतिगम्यते ११

पराक्रमे अर्क इवेति योजना १२ राज्यविभवैर्द्धनैश्वर्यगुरुः नायको राजराजो धनेश्वरो ऽपि जितस्तेनेति शेषः काव्यैः रसालंकारादिशालिप्रबंधरचनै र
सुरदेशिकः शुक्रः १३ १४ १५ दुःखवृत्ताश्चिंता शोकायुद्द्वंदं दर्शयति किमार्त्तमिति एनं प्रजानां १६ कर्त्तव्यसंशयं प्रथमं कोटिं दर्शयति धनामीतिन
तस्माद्धेतोः आर्त्तयाम्यैर्जनायैधनं प्रयच्छामि अतिनिग्रहैश्च अलं प्रयोजनं नास्तीत्यर्थः १७ द्वितीयां दर्शयति अथवेति तेन निग्रहेण विना प्रजानां वर्त्त

सुरधुनीमिव लवानू सुरघोरादिरिरपहा अर्कः पराक्रमरश्मूर्त्तिमानिव मारुतः १२ जितो वैराज्यविभवैर्धनैर्गुरुः नायकः ज्ञातकृतु गुरुर्बोधैः
काव्यैरस्फुरदेशिकः १३ स वृत्ते राजकार्याणि निग्रहानुग्रहक्रमैः यथा प्रातान्यखिन्नां गोदिनानीव दिवाकरः १४ तज्ञाभ्यां सुखदुःखाभ्यामथ तस्या
भ्यभूपत स्वगतिर्वगिरा बधैः स्मिथ्यापस्येव पक्षिणः १५ किमार्त्त पीडयाम्येनं तिलान्यंत्रमिवैजसा सर्वेषामेव भूतानां मम वृत्तिः प्रजापते १६
धनमस्मै प्रयच्छामि धनेनानंदवान्नरः भवत्यहमिवात्रोषस्तदलं मे तिनिग्रहैः १७ अथवानिग्रहं प्रासं करोम्यतेन वाविना वर्त्तंते न प्रजैवेयं विना
वारिसरिद्यथा १८ हा कष्टमेष निग्राह्यो नित्यानुग्राह्य एष मे दिष्ट्याद्यसुखवानास्मि कष्टमद्यास्मि दुःखवान् १९ इति दोलायितं चेतोन चिरास्त्रा
मभूपतेः एकत्रां बुमहावर्त्ते चिरतष्टामिव भ्रमात् २० अथैकदा गृहं तस्य मांडव्यो मुनिराययौ भ्रांतात्रोषककुब्जो वासवस्येव नारदः २१
तमसौ पूजयामास पप्रच्छ च महामुनिं संदेहं हृदुर्दुमस्तं भपरश्चसवक्रो विदं २२ मुरघुरुवाच भवदागमनेनास्मि मुनेनिर्वृतिमागतः परमां वसुधा
पीठं संप्राप्त इव माधवे २३ अद्यनिष्ठाम्यहं नाथ धन्यानां धुरि धर्मतः विकाशिरविणेवाब्जं यत्त्वपास्यवलोकितः २४ भगवन्नस्वधर्मस्थाचिरं विश्रां
तवानास्ति तदमुं संशयांडिं धिममाकांतिमिरं यथा २५ महतां संगमे नार्त्तिः कस्य नाम न नश्यति संदेहं तु परामार्त्तिमाकुरार्त्तिविदो जनाः २६ मत्रि
ग्रहानुग्रहजामद्भुत्पवपुषिस्थिताः कथं तिमामलं चिंतागजेंद्र हरिनखा इव २७ (तएव स्वस्वमर्यादायामिति शेषः १८ निग्राह्यो वधबंधादिना दंड्यः
१९ एकत्र न विश्रामं पप्यात पितानि द्राणस्य चिरं तस्य मनः अंबु महावर्त्ते भ्रमति तदिव २० भ्रांतान्यशेषाणि ककुपकुंजानि दिङ्मंडलानि २१ २२ प
रमां निर्वृतिं सुखं माधवे वसंते विष्णौ वा २३ २४ यदि विश्रांतवानू गतश्रमोसि तर्हि अथवा परमपदे चिरं विश्रांतवानासि तत्तस्माद्धेतोः २५ २६
भत्यग्रहणं शत्रुमित्रादिसंबोपलक्षणं । विपुषि विषये स्थितानि रूढाः कथं तिपीडयंति २७

श्री

समनासमदृष्टिः अन्या विषमदृष्टिर्यथा नोदेति तथा २८ वैराग्यत्यागादिरूपेण स्वल्पेन श्रवणमननादिना स्वव्यंजकोपायेन स्वसंस्थेन स्वात्मबोधपर्यवसितेन
न पेलवताम् दुनाहर्षविषादस्तीव्रानर्कटकसहस्रवेधार्ह नेति पावत् २९ ३० स्वानि स्वीयानि पुत्रमित्रादीनि स्वशरीरगतानीन्द्रियाणि वा दन्यानि च तत्त्वनः
कानि युक्तितः कौदृगानि चेति विचारयेत्यर्थः ३१ अविचाराध्यपरिछिन्नापगामान्महतां ३२ स मनः परमार्थवस्तुभूतस्य तव चेतः न तोलयिष्यति तुलाया
मिव नोन्नमनानमनाभ्यामानियतास्थितिं करिष्यतीत्यर्थः ३३ विज्वरं तेमनः स्वमनोरूपमुत्सृज्य भूतपूर्ववपुः पूर्वसिद्धब्रह्मस्वभावं भूत्वागमं निर्विक्षेपता

नयथा समनोदेति सूर्यश्चित्रिव सर्वदा मत्तौ मम भुनेनान्यानुथा करुणया कुरु २८ मांडव्य उवाच स्वल्पेन स्वसंस्थेन स्वेनोपायेन भूपते एषा मनः पेल
वता हिमवत्प्रविलीयते २९ स्वविचारणयैवाशु त्वमाप्स्यसि तं मनोज्वरः त्वरदा ममम आत्मेणामिहिकामहतीयथा ३० स्वेनैव मनसा स्वानि स्वशरीरगतानि
च विचारयेंद्रियाण्यंतः कौदृशान्यथ कानि च ३१ कोहं कथमिदं किं वा कथं मरणजन्मनी विचारयांतरेवत्वं महतामलमेष्यसि ३२ विचारणापरि
ज्ञातस्वभावस्य सतस्तव हर्षामर्षदृशाश्चेतस्तोलयिष्यंति नाचलं ३३ मनः स्वरूपमुत्सृज्य परामेष्यति विज्वरं भूतपूर्ववपुर्भूत्वा तरंगः पयसीव ते ३४
तिष्ठेदेवमनोरूपं परित्यक्ष्यति तेन न य कलंकविकलं कालं मन्वंतरागतानिव ३५ अनुकंप्या भविष्यंति श्रीमिनः सर्व एव ते दृष्टतत्त्वस्य तुष्टस्य जनाः
पितुरिवावनौ ३६ विवेकदीपदृष्टात्मा मेरुर्वाब्धिनभसामपि अयाकरिष्यसि तूर्णमहतामुत्तमार्थदः ३७ महामतामागते चेमस्तव संसारवृत्तिषु न
निमज्जति हे साधो गोष्पदेष्विव वारणः ३८ कृपणं तु मनो राजन्ये लवेपि निमज्जति कार्ये गोष्पदतोयेपि जीर्णा गोमशकोयथा ३९ येनो वासनया पंके
कीटवत्परिमज्जति स्वरूपमात्रावलंबिन्या स्वयादीनतया तया ४० मेष्यति ३८ तर्हि किं मनसः सनैवनंक्ष्यतीत्याह तिष्ठेदेवेति यथा पूर्वं मनोरं नेकालि
कालं प्राप्य कलंकैः पापैर्विकलं भुवनं पुनर्मन्वंतरगतोसत्यां तिष्ठेदेव कलंकं त्यजति तद्वन्मनोपि जीवन्मुक्तव्यवहारक्षमतया तिष्ठेदेवपूर्वतनं मनो
रूपं त्यजतीत्यर्थः ३५ न केवलं दुःखनिवृत्तिरेव ज्ञानफलं किं तु निरतिशयानंदसाम्राज्यमपि यत्र ब्रह्मादयोप्यनुकंप्या इत्याह अनुकंप्या इति
३६ यदा आकाशादीनामपि महत्तानंतत्वाधानात्तदा तस्य निरतिशयं महत्त्वं किं वाच्यमित्याशयेनाह विवेकेति विवेकजन्येन ज्ञानदीपेन दृष्ट आ
त्मा येन ३७ ३८ कृपणं काम कार्पण्यदूषितं पेलवे क्षुद्रेपि कार्ये निमज्जति मुह्यतीति ३९ तथा प्रसिद्धया ४०

तर्हि किं पञ्चसु विषयेषु किंयत्कालं वा वैराग्यं कर्तव्यमिति चेत्तत्राह नावदिति स्वयंज्योतिरात्ममात्रपरिशेषानुभवपर्यन्तमित्यर्थः ५१ नानाश्रुतिशास्त्रप र्यालोचनमध्यात्मदर्शनपर्यन्तमेवेत्याह तावदिति धातुः स्वर्णाकर धातुः सर्वं अध्यात्मशास्त्रं ५२ सार्विकियासर्वं वस्तुभूतपाबुध्यासर्वदा सर्वत्र देशेषु सर्वं दृश्यं सर्वथा परित्यज्य सर्वः पूर्णआत्मा स्वात्मनैव उपलभ्यते न कदाचित्कुत्रचित्कथंचित्केतिपयविषयत्यागमात्रेणेत्यर्थः ५३ तत्क्रमेवा र्थव्यतिरेकमुखेनापि द्रढयति यावदिति तत्कुतस्तत्राह सर्वैरिति ५४ सामान्यं लोकव्यवहारसाधारणं गोधनादि अप्यर्थे एवकारः यावदत्यन्तद्धि रोधि वस्तु न संत्यक्तं तावत्न्नासाद्यते ५५ यत्र यस्मिन्विषये न तत्तं विषयं ५६ यत्र यस्मिन्विषये न तत्तं विषयं ५६ सर्वं दृश्यं परित्यज्य पश्चात्किंचित्सर्वथा परित्यक्तुमशक्यं रखं तदेव परं पदमित्यर्थः ५७ मनः सकलकारणकार्यपरंपरामये जगति मणिषु सूत्रमिवानुगतं सन्मात्रे स्वकल्पनया विजृंभितं

तावत्तावन्महाबाहो स्वयं संत्यज्यते ऽखिलं यावद्यावत्सरालोकः परमात्मैव शिष्यते ५९ तावत्परमात्मैव शिष्यते धातुर्यावद्धर्मैव शिष्यते तावदालोक्यते सर्वं यावदात्मैव लभ्यते ५२ सर्वः सार्विकया बुध्या सर्वं सर्वत्र सर्वदा सर्वथा संपरित्यज्य स्वात्मनात्मोपलभ्यते ५३ यावत्सर्वं न संत्यक्तं तावदात्मा न लभ्य ते सर्वावस्थापरित्यागे शेष आत्मेति कथ्यते ५४ यावदत्यन्तसंत्यक्तं तावत्सामान्यमेवाहि वस्तु नासाद्यते साधो स्वात्मलाभे तु का कथा ५५ यत्रास्ति मनो वात्मालाभाय यतति स्वयं त्यक्त्वान्यकार्यं प्राप्नोति तल्लाभमनन्यनेतरत् ५६ स्वात्मावलोकनार्थं तु तस्मात्सर्वं परित्यजेत् सर्वं किंचित्परित्यज्य यच्छिष्टं तत्परं पदं ५७ सकलंकारणकार्यपरंपरामयजगत्कृतवस्तुविजृंभितं अलमपास्य मनः स्वपुरस्ततः परिविलाप्य यदेति तदेव तत् ५८ मोक्षोपायेषूपशमप्रकरणे मुमुक्षुवृत्तान्ते मांडव्योपदेशो नाम सर्गः ५८ श्रीवसिष्ठ उवाच इत्युक्त्वा भगवानेनं सुरघुरघुनंदन पयोत्सवमेव चिरं मांडव्यो मो

नमंडलं १ गते वरमुनौ राजा जागतैकांतमनिंदितं धियास चिंतयामास को नामाहमिति स्वयं २ सद्व्यतिरिक्तं सर्वं रूपं अलं निःशेषमपास्य ततस्तदनंतरं स्वपुरं मनोस्त्वमपि मूलाज्ञाननाशाद्बाधेन परिविलाप्य यच्चिन्मात्रे कारसं वस्त्वेति प्राप्नोति तदेव तत् ब्रह्मरूपमित्यर्थः ५८ इति श्रीवासिष्ठतात्पर्य प्रकाशे उपशमप्रकरणे टीकायां षट्पंचाशः सर्गः ५८ बाह्यमाभ्यंतरं चैव दृश्यं संत्यजतो रहः इहरात्मो विचारेण स्वात्मलाभ उदीर्यते तत्काउ पदिश्य स्वंस्थीयं मौनमंडलं मुन्यावास देशं १ २

तत्रादौ बाह्ये दृश्ये आत्मतां आत्मीयतां च विचार्य निरस्यति नाहमित्यादि षड्भिः जगत्पुरेन ऊर्ध्वाधोलोकाः गृह्यंते ॥ ३ ॥ निजसंकेतः सर्वजन
संमत्या पट्टाभिषेकादिना अहं राजेति कल्पनातावन्मात्रेण ॥ ४ ॥ अत एव तस्मिन् नगरे ऽपि संकेतत्यागादि एव निश्चयः ५ तमेव निश्चयं स्फुटमाह प
ताकेति ६ व्यर्थेन संकेतेन संबध्यत इति संबंधः ७ आकुलः काकिनीकार्षापणसंबंधवद्बंधपरंपरा व्यवहारासिद्ध इति यावत् ८ संकेतमात्र
त्यागोपायेन बाह्यैः संबंधं निरस्य अचेतनत्वहेतुना देहेंद्रियादिभिरपि तं निरासितुमारभते देहमात्रमित्यादिना ९ संश्लेषसंबंधमपि नैति

नाहं मेरुर्न मे मेरुर्जगन्नाहं न मे जगत् नाहं शैला न मे शैला धरा नाहं न मे धरा ३ किरातमंडलं नेदं मम नाहं च मंडलं निजसंकेतमात्रेण केव
लं देशः एव मे ४ त्यक्तो मयैष संकेतो नाहं देशो न चैष मे ५ इदानीं नगरं शिष्टमेव एवात्र निश्चयः ५ पताकावनपंक्त्याढ्या भ्रस्तोपवनसंकुला
गजाश्वसामंतयुता पुरी नाहं न मे पुरी ६ व्यर्थसंकेतसंबंधसंकेतविगमे स्थितं भोगवृंदं कलत्रं च नाहं नैतन्ममाखिलं ७ एवं सभृत्यं सबलं स
वाहनपुरांतरं नाहं राज्यं न मे राज्यं संकेतो ह्यपमाकुलः ८ देहमात्रमहं मन्ये हस्तपादादिसंयुतं तदिदं तावदाश्वं तरत्नमालोकयाम्यहं ९ त
दत्र तावन्मांसास्थि नाहमेतदचेतनं न चैतन्मम संश्लेषमेत्यब्जस्य यथा जलं १० मांसमज्जनं तदहं वाने हं रक्तमप्यलं जडान्यस्थीनि नेवाहं न चैता
नि मम कुचित् ११ कर्मेंद्रियाणि नैवाहं न च कर्मेंद्रियाणि मे जडं यत्किल देहेस्मिंस्तदहं नैव चेतनः १२ नाहं भोगा न मे भोगा न मे बुद्धींद्रियाणि च ज

जडं

डान्यसत्स्वरूपाणि न च बुद्धींद्रियाण्यहं १३ मूलं संसृतिदोषस्य मनो नाहं हितं तत् अयं बुद्धिरहंकार इति दृष्टिर्मनोमयी १४ मनो बुद्धींद्रियाद्यं
तो भूतकोशः खलद्रुपुः नाहमेवं शरीरादिः शिष्टमालोकयाम्यहं १५ शेषस्तु चेतनो जीवः सह चेत्येन चेतति अन्येन बोध्यमानो स्मिन् नात्मित
त्ववपुर्भवेत् १६ ॥ ७ ॥

असंगत्वादित्यर्थः १० ११ १२ बुद्धींद्रियाणि ज्ञानेंद्रियाणि १३ अयं बुद्धिरहंकार इति या दृश्यत इति दृष्टिः सापि
नाहं न ममेत्यनुषज्यते यतः सा मनोमयी अंतःकरणावस्थाभेदरूपेति यावत् १४ शरीरादि मनो बुद्धींद्रियाद्यंतः भूतकोशः स्थूलसूक्ष्मभू
तसंघातः एवमुक्तरीत्या नाहं शिष्टं आलोकयामि दृश्यावि चारयामीति यावत् १५ चेतनः प्रमाता चेत्येन प्रमेयेन सह चेतति तथा च अहमि
दं चेतयामीति त्रिपुटीसाक्षिणा बोध्यमानः असौ प्रमाता न आत्मनस्तत्त्ववपुस्तात्विकं रूपं भवितुं संभाव्यत इत्यर्थः १६

एवमनयैवयुक्त्यासाक्षिसंवेद्यंप्रमितिप्रमेयंचत्यजामिहियस्माच्चेत्यंनाहंकिलेतिभासिइदं विशुद्धचिच्छुद्धसाक्षीअहंआत्मेतिस्थितः निष्प्रपे
प्रतिष्ठितइत्यर्थः १७ तद्दर्शनमात्रेणाकंचचामीकरवनत्वोभमाश्चर्यभूतंदर्शयानिचित्रमिति कालेन अनादिकालाहृगरभ्युपतमानोऽपिअ
घकार्यवान्परमपुरुषार्थफलवान्जातोऽस्मीत्यर्थः १८ एवंब्रह्मैषइद्रइत्यादिश्रुतिगाथाननुमेवेनसंवादयतिब्रह्मणीति १९ अस्तानांभय

एवंस्वजामिसंवेद्यंचेत्यंनाहंहितत्किल दोषोविकल्परहितोविशुद्धंचिदहंस्थितः १७ चित्रमेषोऽस्मिलब्धात्माजातःकालेनकार्यवित् एषसो
हमनंतात्मानांतोऽस्यपरमात्मनः १८ ब्रह्मपांडित्यमेवाप्तौसर्वभूतगणोतथा सएवभगवानात्मानंतमुर्कप्रवृस्थितः १९ चिच्छक्तिरम
लासैषाचेत्याभपविवर्जिता भूरितार्थोधावदेकंजाभैरवाकारधारिणी २० सर्वभावगतास्वस्माभावाभावविवर्जिता आब्रह्मभुवनांतस्था
सर्वत्रालिकमसुद्गिका २१ सर्वसौंदर्यसुभगासर्वप्राकाश्यदीपिका सर्वसंसारमुक्तानांनंनुरागतरूपिणी २२ सर्वाकारविकाराढ्यासर्वाकार
विवर्जिता सर्वभूतौघतांयातासर्वदासर्वतांगता २३ चतुर्दशविधान्येषाभूतानिभुवनोदरे एतन्मयीपंकलनाजागतीवेदनात्मिका २४
मिथ्यावभासमात्रंतुसुखदुःखदशामतिः नानाकारमयाभासःसर्वमात्मैवचित्परा २५ सोऽयमात्मामम व्यापीसेयंयद्वबोधनं सेयमाकुलितां
गाभाकरोतिनपविभ्रमं २६ अस्याएवप्रमादेनमनोदेहरथोऽस्थितं संसारजाललीलयासुयातिवलानिनस्यति २७ इदंमनःशरीरादिनाकिंचिदपि
वस्तुतः नष्टेनाकिंचिदप्यस्मिन्परिनश्यतिपेलवे २८ जगज्जालमयंनत्यमिदंचितनरैस्तनं एतयैवैकयावुध्याहृत्यतेदीपलेखया २९ कथंमुधै
वमेचिंतानिग्रहानुग्रहास्थिते बभूवदेहनिष्ठेहनकिंचिदपिदेहकं ३० अहोनुहंप्रबुद्धोऽस्मिगतंदुर्दर्शनंमम दृष्टंद्रष्टव्यमखिलंप्राप्तंप्राप्यमिदं
मया ३१

हेतुत्वाद्भैरवाकारधारिणीसर्वेषुभावेषुमनोरनिषुपनाप्रतिबोधविदितंमतमितिनिष्कृतेः २१ सर्वसौंदर्येनिरतिशयायानंदस्तेनसुभगा
पूर्णा संसारलक्षणानांमुक्ताफलानां २२ २३ भुवनसंख्ययाचतुर्दशविधानिभूतानिधनेष्वितिशेषः २४ २५ व्यापीजगदनुगतः अवबोधनंम
द्दृष्टसाक्षीसेयंचित् इष्टद्रष्टव्यभेदेनाकलितशरीरोरासतीनपोहमितिविभ्रमंकरोतिनिराकृतवनीत्यर्थः २६ २७ २८ एतयाजकयासाक्षिरूपया २९
३० ३१

चितोयोनिष्पंदः मायया जीवभावभ्रमत्तदंत्राः समस्तदृग्गकलिंगभ्रमत्तस्य मात्राः बाह्यांतःकरणभेदभ्रमात्तदंत्रो जायत्तत्वभ्रमस्तद्भ्रमत्तस्मा
दन्यत्किंचित्त्वाख्यतं कालत्रयाबाध्यं तद्रूपं न विद्यत इत्यर्थः ३२ एवं जगतोऽसत्त्वान्निग्रहानुग्रहलक्षणौ न तत्प्रयोजकहर्षामर्षक्रमौ वा निराश्रयौ
निष्प्रकारौ निर्विषयौ निस्स्वरूपौ च संपन्नावित्याह क्वेति ३३ स्वमोहेऽपगते सुखदुःखादिप्रसक्तिरेव नास्तीत्याह किमिति सांप्रतं अमूढः स्वरूपस्थितो
ऽस्मीत्यर्थः ३४ एवं आनंदैकरसपूर्णस्वभावेनालेक्यतेऽनुभूयत इत्येवमालोकस्तस्मिन् किं त्वाद्याः आक्षेपत्रयोऽवादिसंभावनैव नास्तीत्यर्थः ३५
किंचिदलौकिकचमत्कारं इदं चिदाकम्रं ३६ सम्यग्ज्ञाननोदयश्चाविर्भावो यस्य तथाविधाय चकारः पूर्वश्लोके नमस्कार्यसमुच्चयार्थः सम्यग्ज्ञानानल

नु

सर्वं किंचिदिदं दृश्यं दृश्यते यज्जगद्गतं चिन्निष्पंदांशमात्रं तन्नान्यत्किंचन शाश्वतं ३२ क्व तौ क्वो हर्षविधौ वापि किं निष्ठौ वा किमात्मकौ नि
ग्रहानुग्रहौ लोके हर्षामर्षक्रमौ तथा ३३ किं सुखं किं वा दुःखं सर्वं ब्रह्मेदमाततं अहमासं सुधामूढो दिष्ट्यामूढोऽस्म्यहं स्थितः ३४ कि
मस्मिन्नेवमालोके शोच्यते किं विमुह्यते किं प्रेक्ष्यते किं क्रियते स्थीयते वाथ गम्यते ३५ किंचिदेवमिदं नाम चिदाकम्रं विराजते नमो नम
स्ते नित्याय दिष्ट्या दृष्टोऽसि सुंदर ३६ अहो नु संप्रबुद्धोऽस्मि सम्यग्ज्ञानमलं मया नमो मह्यमनंताय सम्यग्ज्ञानोदयाय च ३७ विगत
रंजननिर्विषयास्थितिर्गतभवभ्रमरंजितवर्जिते स्थिरसुषुप्तकलाभिगतस्तनुः समसमं निवसाम्यहमात्मनि ३८ मोक्षोपायेषूप
शामप्रकरणे रघुविश्रांतिर्नाम सर्गः ५९ श्रीवसिष्ठ उवाच इतीह मज्जराधीशो लेभे परमनुत्तमं विवेकाध्यवसायेन ब्राह्मण्यमिव गा
धिजः १

२७३९

क्षणायाभ्युदयाय चेति वा ३७ विगतरंजनत्वादेव निर्मलत्वावस्थान्त्रयविषयास्थितिरिति निःशेषितनत्वंपदार्थनिर्देशः गतभवभ्रमत्वादेव वि
यदाद्यध्यारोपरंजितवर्जिते इति शोधिततत्पदार्थनिर्देशः भावेक्यः स्थिरया सुषुप्तिकलया स्वाप्ययपुरुषोपवृत्तपार्ध्य विगमादभिगत एकीभूतस्तनुरखंडैक्य
निर्देशात्तनस्तस्मादहं आत्मनि प्रत्यग्ब्रह्मणि सममं आसंतिकाभेदलक्षणं परमसामान्येन निवसामि न कदाचिदपि मे पुनर्वैषम्यप्रसक्तिरिति फलावस्था
निर्देशः ३८ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकोनषष्ठितमः सर्गः ५९ आदेहपातं सुरघोरसंगाचारज्यते जीवन्मुक्तस्य तस्या
थ देहपातं तोरवत्स्थितिः गाधिजो विश्वामित्रः १

भूयोभूयः पुनःपुनः प्रयुक्तासु अनुष्ठितासु धर्मार्थप्राप्त्युपायचेष्टासु कपरस्वेच्छितैर्देवादनर्थकाराणि विफलानि दुःखपर्यासितानि वाकार्याणि
फलानि यासां तथाविधासु सत्सु खेदवान्नासीदीश्वरो दिनेश्वरः सूर्यः २ समासमे अनुग्रहनिग्रहरूपेनिजे राजोचिते कार्ये यथा नदीमध्य
गतः पर्वतो निष्कंपा तिष्ठति तद्वत् ३ कार्यमायव्ययादि आहरन् कुर्वन् ४ सुषुप्ताविव निश्चलपेति यावत् ५ आमत्सरी तिपाठे अत्यंतनिर्मत्स
रत्वात्परदोषोपेक्षकः ६ अचापलधीरये तिच्छेदः परिपूर्णो योऽर्णवः तद्वत् ७ सदृत्यस्य समाधेस्तो भूदिति परेणान्वयः तत्र हेतुर्यतस्त
स्य परिपूर्णमितिर्बभाविति ८ उल्लसन्नपुष्पावि कसन्नचेतसा ९ १० आक्रांतः शोषितः रूपं मूर्त्ताकारं ११ सर्वेषामेवांतः करणानां हिरण्यग

अनर्थाकारकार्यक्लिन्नासीच्चेष्टासु खेदवान्भूयोभूयः प्रयुक्तासु रिनमालास्विवेश्वरः २ ततः प्रभृतिसोतिष्ठत्सर्वदा विगतज्वरः समास
मेस्वके कार्ये जलौघाग्रवाचलः ३ हर्षामर्षविनिर्मुक्तः प्रत्यहं कार्यमाहरन् उदारगंभीरवपुर्जहारांबुनिधेःश्रियं ४ सुषुप्तपदधर्मिण्याचि
त्तवृत्त्याथ्यराजत निष्कंपयाप्रकाशिन्यादीपः स्वशिखयेवसः ५ न निर्घृणो दयावान्नो नद्वंद्वी नाथ मत्सरी नसुधीर्नासुधीर्नार्थी नानर्थी स ब
भूवह ६ समदर्शनयानित्यं स्वत्याऽचापलधीरया अंतः शीतलया रेजे परिपूर्णार्णवेंदुवत् ७ सर्वचित्तत्वकलनं जगदित्यवलोकयन्सः प्रशांतसु
खदुःखश्रीस्तस्य पूर्णमतिर्बभौ ८ उल्लसन्विकसन्पूर्णास्तिष्ठनाछन्विशान्नस्वपन् अभूत्समसमाधिस्थः प्रबुद्धश्चिरन्नयं गतः ९ सकुर्वन्विगता
संगराज्यं राजीवलोचनः अतिष्ठत्स्वनाकारो भूरिवर्षशतान्यथा १० संविन्निवेशमिदं मेहनामकं तदनुस्वयं सजहौ तेजसाक्रांतोरूपं हिमक
णोयथा ११ विवेशपरमाद्यं तकारणं कारणेश्वरं प्रशांतपांसरितांवारिपरिपूर्णमिवांबुधिं १२ आधिगतविमलेकरूपतेजा विजनदशां समुपेत्य शां
तशोकः अलमभवदसौ परस्वरूपं घटस्वमिवांबरसंयुतं महात्मा १३ (गर्भादीनामीश्वरं नियंतारं सर्वजगतामाद्यंतयोः सृष्टिप्रलयोर्यपयोः कारणं

परं ब्रह्म प्रशस्यासा साक्षात्कारः कृत्याजन्मादिहेतुबीजनाशात्पाविद्यावरणबाधेन सरितांवारिकूलद्वयपरिच्छेदत्यागेन पूर्णमर्णवमिवविवेशेत्यर्थः १२
तत्प्रविष्टयासौ कीदृगभूत्तदाह आधिगतेति असौ रघुः प्रशस्तपाआधिगतं स्वात्मतयाप्राप्तं विमलं एकरूपमानंदैकरसं तेजः स्वप्रकाशात्मस्वरूपं ये
न तथाविधः सन् विजनां जन्मादिविक्रियाहीनां दशां समुपेत्य लक्षणं तसर्वशोकः सन् घटभंगे घटस्थखं अंबरेण महाकाशेन संयुतमेकीभूतमिव
परस्वरूपमेव अभवत्तदेवास्य निर्वाणमित्यर्थः १३

इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेषष्ठितमःसर्गः ६० सहजैकसमाधानलक्षणप्रतिपत्तयेपरिघेणात्रसंवादःसुरघोरूपवर्ण्यते हेराघ
वएवंसुरघुवत्त्वमपिअघुस्यहर्षशोकादिनिमित्तस्यपापस्यविपर्ययेतत्त्वबोधेनसमूलमुच्छेदेसति १ त्रिशुर्बालइवघोरेअज्ञानतमसिनिर्मग्नंमनःएतां
दृष्टिमवष्टभ्यलब्धदीपंप्राप्तप्रकाशंासत्तनपरितप्यते २ श्वभ्रेमोहांधकूपेपतन्मनः तयाताद्दृग्यासुरघूपवर्णितप्रकारयेवविवेकावष्टब्धयादृष्टस्यतत्क्षणप्रच

मोक्षोपायेषूपशमप्रकरणेसुरघुवृत्तांतेसुरघुनिर्वाणंनामसर्गः ६०॥ श्रीवसिष्ठउवाच एवमुत्पलपत्राक्षराघवापद्विपर्यये परमासादयाहं
दृष्टिंशोकोभवभूतये १ एतांदृष्टिमवष्टभ्यनमनःपरितप्यते घोरेतमसिनिर्मग्नंलब्धदीपंशिशुर्यथा २ विवेकावष्टब्धयाचेतस्तथैवाप्नोतिनि
र्वृतिं पतत्श्वभ्रेदृष्टत्क्षणप्रच्युयालंबनादिव ३ अथैनांपावनींदृष्टिंभावयित्वाप्युदाहृतम् नित्यमेकसमाधानोभवभूषितभूतलः ४ श्रीरामउ
कथमेकसमाधानंकीदृशंवामुनीश्वर वातोहतमयूरांगारुहलोलंमनोभवेत् ५ श्रीवसिष्ठउवाच शृणुतस्यैवसुरघोःप्रबुद्धस्यसतस्तदा
पर्णादिस्यचराजर्षेःसंवादमिममद्भुतं ६ राघवैकसमाधानबोधितायोजितात्मनोः परस्परंसमालापमिमंप्रकथयामिते ७ बभूवपारसीका
नांपार्थिवःपरवीरहा परिघोनामविख्यातःपरिघःस्पंदनेयथा ८ सबभूवपरंमित्रंसुरघोरघुनंदन नंदनोद्यानसंस्थास्यमदनस्येवमाधवः ९
कदाचित्परिघस्याभूदवर्षमंडलेमहत् कल्पांतइवसंसारेप्रजाक्रंदनदोषजं १० वितेशुर्जननास्तत्रबहवःक्षुत्क्षामजीविताः ज्वलितेविपिने
वन्हौयथाभूतपरंपराः ११ तदुःखंपरिघोदृष्ट्वाविषादमतुलंययौ तत्याजाखिलंराज्यंदग्धंग्रामामिवाध्वगः १२ प्रजानाशाप्तनीकारेषुसम
र्थोविरागवान् जगामाविपिनेकर्तुंतपोजिनमुनींद्रवत् १३ पौराणामपरिज्ञातेकस्मिंश्चिद्दूरकानने समुवासविरक्तात्मालोकांतरइवापरे १४

यस्यकक्षस्यआलंबनादिवनिर्वृतिंविश्रांतिसुखं ३ भावयित्वापुनःपुनःपरिशीलनेनस्वयंदृढीकृत्यान्येभ्योप्युदाहरन्नुपदिशन् ४ वातेराहतंमयूरां
गरुहंबर्हमिवलोलंचपलंमनःएकसमाधानंकथंकेनप्रकारेणभवेत् ५ ६ हेराघवएकसमाधानेबोधितआयोजितआत्मायय्योः ७ पारसीकादेशा
विशेषाः पार्थिवोराजास्यंदनेरथेपरिघोस्तदंडइवाधारभूताः ८ माधवोवसंतः ९ अवर्षअनावृष्टिं किंराजदोषात्नेत्याहप्रजेति १० ११ १२ अजिन
प्रधानाःमुनींद्रा अजिनमुनींद्रास्तद्वत् १३ अपरेद्वितीयेलोकांतरेपरलोकइवेत्युत्प्रेक्षा १४

अतिविरक्तत्वात्पर्णकुट्यादिपरिग्रहोप्यस्य नाभूदिति सच नायकं दरमंदिरे इत्युक्तं असौ परिग्रहः १७ आत्मप्रसादश्चित्तशुद्धिः ईश्वरानुग्रहश्च तस्माज्जातं तत्वज्ञानं प्रापत् प्राप्तवान् १८ १९ सिद्धैरारुरुक्षैः साध्यैरारुरुक्षुभिश्चकराविचारितरूतः हंसैः सहितः सहंसः अलिभ्रमरः अब्जिनीकमलिनी मेनि २० हेमचूडः स्वर्णजटाख्यो देशस्तन्महीपतेः सुरघोः २१ मोरव्यसंसारस्तस्माद्विनिर्गतौ जीवन्मुक्तावित्यर्थः २२ कल्याणेः फलितमितिभावेक्तः २३ २४ चितिशक्ति

तपश्चरंछांतमतिर्हूंतिः कंदरमंदिरे स्वयंशीर्णानि शुष्काणि तत्र पर्णान्यभक्षयत् १५ चिरं कृतात्रा वृक्षरुक्षं पर्णान्येवाभक्षयत् पर्णाद इति नामा सोप्राप मध्ये तपस्विनां १६ ततः प्रभृति पर्णाद नामा राजर्षिसत्तमः जंबूद्वीपे बभूवासौ विख्यातो मुनिसंसत्सु १७ ततो वर्षसहस्रेण तपसा दारुणात्मना प्रापदभ्यासवशात्तोज्ञानमात्मप्रसादजं १८ बभूव विगतद्वंद्वो निराशः शांतमानसः निरागो निरनुक्रोशो जीवन्मुक्तः प्रबुद्धधीः १९ विजहार यथाकामं त्रिलोकीमटवीकामिमां सिद्धैः साध्यैः समं साधो सहंसालिरिवाब्जिनीं २० एकदा तस्य सदनं हेमचूडमहीपतेः प्रापरत्नविनिर्माणं मेरोः शृंगमिवापरं २१ ते तत्र प्राक्तने मित्रे पूजामकुरुतां मिथः पूर्णाविज्ञाततद्विज्ञौ तयोमोरव्यगर्भाद्विनिर्गतौ २२ अहो नु वत कल्याणैः फलितं मम पावनैः संप्राप्तवानहं यत्त्वामित्यन्योन्यमथोचतुः २३ आलिंगितशरीरौ तावन्योन्यानंदिताकृती एकासने विविशतुः शृंगाकौ विवभूधरे २४ परिपृच्छ्वाच परमानंदमायातं चेतस्त्वद्दर्शनेन मे इंदुबिंबद्रवोन्मग्नं मनः शीतलतां गतं २५ अकृत्रिमसुखं प्रेम वियोगे शातशारवता प्रथातिपल्लवलतेक्षिन्नमूलश्च द्रुमः २६ विश्रब्धांत्साकथालापांल्लीलास्तच्चेष्टितं संस्तत्य प्राक्तनं साधो तृष्यामि च पुनः पुनः २७ ज्ञानमेतन्मया प्राप्तं तया ज्ञातं यथानघ मांडव्यस्य प्रसादेन परमात्मप्रसादजं २८ अथ कच्चिदद्वदुःखलकश्चिद्विश्रांतवानसि परमे कारणे मरावि विभूमंडलाधिपः २९ कच्चित्सरमकल्याणा आत्मारामतयातव प्रसादोज्जायते चित्ते शारदीव सरोंभसि ३० (प्रधाने आनंदाविर्भावः मनन्वद्यात्किंप्रधानेतापोपरमम

इति विशेषयोतनाय चेतो मन इति भेदोक्तिः २५ अच्छिन्नमूलश्छिन्नशाखो द्रुम इवेति मोरव्यं २६ विश्रब्धान् विश्वासगर्भान् तान् प्राक्तनान् सुखदुःखकथालापान् २७ त्वया यथा मांडव्यस्य प्रसादेन ज्ञातं तथैव मयापरमात्मनईश्वरस्य तपसाऽराधितस्य प्रसादजं एतज्ज्ञानं प्राप्तं २८ परमे कारणे विवर्तोपादानत्वोपलक्षिते ब्रह्मणि कच्चिदुत्तरोत्तरभूमिकापरिपाकेन विश्रांतवानसि २९ प्रसादारजस्तमोभ्यामनावरणं ३० श्रीरामः

कार्याणिसर्वजनहितत्वादवश्यकर्तव्यान्येवकार्याणिकर्माणिकरोषि ३१ जनताःप्रजासमूहाः ३२ धारापृथ्वीउद्दामफलिनीउत्कृष्टसस्यादिफलवती
फलैरानताफलिनीकल्पलतेवतवप्रजाःफलापूरैःकालेकालेतत्तदभिलषितफलपूर्त्याभरंअतिशयेनबिभर्तिपोषयति ३३ चंद्रस्यअंशुपंजरंकि
रणजालमिव ३४ सरोंभसातडागोदकेनअबाल्याःस्वांतर्गताःविसानांमृणालानांभृमयःबलयाःदिशाःगुणगणैर्यशोभिर्निर्विवरीकृताःपूरिताः
कच्चित ३५ कलमकेदाराणांकोणाश्चतुष्कसंधयस्तत्रत्येषासंदोस्थानेषुतृष्यतीःतृष्यंत्यःछांदसोविभक्तिव्यत्ययः ३६ ३७ इहऐहिकफलत्वेनचो

कच्चित्करोषिसमयासुप्रसन्नगभीरभीरया दृष्टयासुभगकार्याणिकार्याण्येवनराधिप ३१ निराधिव्याधयोधीराःकच्चित्संपन्नदृगलयःजन
तास्तवदेशेषुतिष्ठंतिविगतज्वरं ३२ कच्चिदुद्दामफलिनीफलिनीवफलानता धरातवफलापूरैर्भरंधारयतिप्रजाः ३३ कच्चित्तवदिगंतेषुचंद्रस्ये
वांशुपंजरं तुषारनिकराकारंप्रसृतंपावनंयशः ३४ कच्चिद्गुणगणैरेतादिशोनिर्विवरीकृताः त्वयासरोंभसाबाल्योबिसानामिवभृमयः
३५ कच्चित्कलमकेदारकोणस्थानेषुतृष्यतीः प्रतिग्रामंकुमार्यस्तेगायंत्यानंदनंयशः ३६ कुशलंतवधान्येषुधनेषुविभवेषुच भृत्येषुबांध
वेषुनगरेषुच ३७ आधिव्याधिविहीनेपंकच्चित्कायफलतातव फलंफलतिपुण्यास्यंयदिहामुत्रचोदितं ३८ आपानरमणीयेषुवर्त्तेतात्वंन
वैरिषु कच्चिद्विषयसर्पेषुसाविरागंमनस्तव ३९ अहोबतचिरंकालमावांविश्लेषमागतौ कालेनसेवितोभूयोवसंतादृतिरावयोः ४० ननाज
गतिवियंत्रेसुखदुःखदशाःसखे जीवद्भिःपानदृश्यंतेसंयोगजवियोगजाः ४१ तथैवात्रवतिदीर्घासुदशास्वन्यत्वमागताः भूयोवयमपिश्लि
ष्टाश्चित्रोहिनियतेर्विधिः ४२ सरघुरुवाच भगवान्नियतेरस्यागतिःसर्पगतेरिव दैवकाःकोहिजानातिगंभीरांविस्मयप्रदां ४३ त्वमहंचव्यपोह्य
तिदूरेदूरदशासुच अयसंघटितोभूयःकुमसाध्यमहोविधेः ४४ दितंकारीर्यादिअमुत्रपारलौकिकफलत्वेनचोदितंज्योतिष्टोमादि ३८ तवमनः
विषयसर्पेषुकच्चित्सविरागंवर्तेतवर्तते ३९ ४० इष्टानिष्टजनसंयोगजास्तद्वियोगजाश्चसुखदुःखदशाः ४१ अन्यत्वंवियोगमागताःप्राणिनियतेःप्रा
णिकर्मानुसारिण्याईश्वरेच्छयाःविधिर्विलासश्चित्रःअद्भुतः ४२ परियोक्रमयमनुमोदमानःसरघुरपितमेवाहभगवन्नित्यादिनादैविकाःदेवस्य
रतदिच्छात्मायाः ४३ देश्यातःदूरेकालतश्चदूरदशासुप्रतिएवंव्यपोह्यवियोज्य ४४

५५ तथाताद्दशाचित्तसमाधानात्मनाफलिनं यथावयंनव्याकुलाः सर्वव्याकुलतानिर्मुक्ताः कृतकृत्याः संपन्नाः ५६ शानशाश्वतांसर्वतः फलोन्मुख
तामितियावत् ५७ हे महानुभाव पुण्यं तव वचनं अवेक्षणं दर्शनं च परितो रसायनानाममृतानां निकरं विकिरति वर्षतीव हि यस्मात्साधूनां संगमः पर
मपदप्रतिमः मोक्षसुखप्राप्तितुल्य इत्यर्थः ५८ इतिश्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे एकषष्टितमः सर्गः ६१ अज्ञानावरणध्वंसे नित्यावि
स्फुरणास्थितेः सदैवैकसमाधानं विदुषामत्र वर्ण्यते आयुधस्याभिधानामयस्य आयुधाभिधः परिघः १ किमयं तत्त्वविदो व्यवहारसमाध्योः सुखता
रतम्यं वक्ष्यत्विति तेनेति परीक्षणाय प्रथमं स्वानुभवं तद्द्वारा पृच्छतिय द्यदिति अन्यस्य अतत्त्वस्य २ एवं स्वानुभवमुद्घाट्य तत्संवादं संवादीवेति परानुभवं नि

वयं त्वद्यमहासत्त्व भग्नशंकुशालिनः स्थिताः त्वदागमनपुरोपनपराः वे पीननां गताः ५५ पत्रपल्लवदागामक्षीणपापानां पुण्यपादपैः तथा फलि
तमस्माकं नेयथा वयमाकुलाः ५६ सर्वाः संपन्नयोऽस्माकं राजर्षे संस्थिता सुरे भवदागमनेनाद्य प्रपाताः शान्तशाश्वताः ५७ विकिरति परितो
रसायनानामिव निकरं महानुभाव तव वचनमवेक्षणं च पुण्यं परमपदप्रतिमो हि साधुसंगः ५८ मोक्षोपाये उपशमप्रकरणे सुरघुपरिघस
मागमः सर्गः ६१ श्रीवसिष्ठ उवाच अथैवं प्राप्य पात्रत्वविश्रंभकथयाचिरं प्राक्तनस्नेहगाभिर्व्यास्थितो वाचायुधाभिधः १ परिघ उवाच यथा
त्वं संसारजालेऽस्मिन् क्रियते कर्मभूमिप तत्समाहितचित्तस्य सुखायान्यस्य नानघ २ कच्चित्संकल्परहितं परं विश्रमणास्पदं परमोपशमं श्रेयः
समाधिमनुतिष्ठसि ३ सुरघुरुवाच एतन्मे ब्रूहि भगवन्सर्वसंकल्पवर्जितं परमोपशमं श्रेयः समाधिर्हि किमुच्यते ४ योऽज्ञो महात्मन्मननं नित्यं
त्यव्यवहरं स्थवा असमाहित

तासमानः समाधौ विश्रांत्याधिक्यमिव दर्शयिन्पृच्छति कच्चिदिति विक्षेपदुःखानां परममुपशमं संसारिकसुखेभ्यश्च श्रेयः प्रशस्यतरं सामान्येव्युत्पत्तये नेवा
ङ्गीकृता ३ समाहितचित्तस्य सर्वं कर्मसुखायेति पत्रपतत्स्ते समाधौ विश्रांत्याधिक्यदर्शनं व्यवहारसमाधिभेदाभ्युपगमेन प्रश्नश्च अनुपपन्न एवेति त्वदनु
भवसंवाद्येव ममाप्यनुभव इत्याशयेन सुरघुः संकल्परहितं परमोपशमं श्रेयः इति तदुक्तं शास्यात्मस्वरूपे पि संभवात्तावदभ्युपगच्छन्न विश्रमणास्पदं स
माधिमनुतिष्ठसीत्यंशस्य समाधेयस्याविश्रमहेतोर्मनसो बाधितत्वाद्देवसंभवं मन्यमान आक्षिपति एतदिति सर्वसंकल्पवर्जितं परमोपशमं श्रेयः इ
त्येतन्मे मत्पृष्टं त्वं ब्रूहि समाधिरनुष्ठेय इति कमर्थं त्वयोच्यत इत्यर्थः ५ यः सः तत्त्ववित्सः व्यवहरन्नपि कः किंस्वरूपः किंलक्षणः सदैवानादृतादृश

यदि तु निश्चलात्मस्वरूपावस्थितिरेव समाधिस्तेऽभिमतः स्यात्तर्हि स सदैवास्तीति नानुष्ठेयः किं चिरस्तीत्याह नित्यमिति ६ यदि त्वं मामसन्तं मन्यसे तदापि
समाध्युपदेशो नुपपन्न इत्याशयेनाह बद्धेति कथं केनोपायेन वा प्रत्रचित्तं समाधेयं तस्यैवापरिचयादित्यर्थः ७ तत्त्वावबोधदहनेन सम्यक् समूलं सर्वाशा
विषयबाधेन आत्मनः परमार्थस्वरूपे आधानं समाधिरिति व्युत्पत्तेरिति भावः ८ अबाधितात्मदर्शनरूपा पराप्रज्ञा ९ तामेव फलतो वर्णयति अ
सुब्धेति द्वाभ्यां १० ११ सा तु समसपूर्वमेवासिद्धेति नानुष्ठेयेत्याशयेनाह यत इत्यादिना १२ यथा दूरमाकृष्टो बिसतंतुः क्रीडनैः विमुक्तो हस्तादि छिद्यते

नित्यप्रबुद्धचित्तास्तु कुर्वंतोपि जगत्क्रियाः आत्मैकतत्त्वसंनिष्ठाः सदैव सुसमाधयः ६ पद्मपद्मासनस्यापि कृतब्रह्मांजलेरपि अविश्रांत
स्वभावस्य कः समाधिः कथंचन ७ तत्त्वावबोधो भगवन् सर्वाशातृणपावकः प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ८ समाहितानि भूत
छाय यथाभूतार्थदर्शिनी साधो समाधिशब्देन परा प्रज्ञोच्यते बुधैः ९ अक्षुब्धा निरहंकारा द्वंद्वेष्वननुपातिनी प्रोक्ता समाधिशब्देन मेरोः
स्थिरतरा स्थितिः १० निश्चिता विगताभीष्टा हेयोपादेयवर्जिता प्रोक्ता समाधिशब्देन परिपूर्णमनोगतिः ११ यतः प्रभृति बोधेन युक्तमात्यं
तिकं मनः तदारभ्य समाधानमव्युच्छिन्नं महात्मनः १२ नहि प्रबुद्धमनसो भूत्वा विच्छिद्यते पुनः समाधिर्दूरमाकृष्टो बिसतंतुः विनोरिव १३
समग्रं दिनमालोकाद्विरमत्यक्षियो यथा आजीवितांतं नो प्रज्ञा तथा तत्त्वावलोकनात् १४ अजस्रमंबुवहना यथा न ध्यानरुद्धते तथा वि
ज्ञानदृग्बोधात्क्षणमात्रं न रुध्यते १५ न विस्मरत्यविरतं यथा कालः कलागतिं न विस्मरत्यविरतं स्वात्मानं प्राज्ञधीस्तथा १६ नाविस्मरति म
र्त्यं यथा सततगा गतिं न विस्मरति निष्ठेत्यं चिन्मात्रं प्राज्ञधीस्तथा १७ (तद्वद्वितिव्यतिरेके दृष्टांतः १३ ननु ब्रह्माकारवृत्तिविच्छेदे व्युत्थानात्समा
धिविच्छेदस्तस्य स्यात्तत्राह समग्रमिति अक्षयः स्वर्यः उत्तरार्द्धं संनोऽस्तीति पदं सर्वत्रापि नो विरमतीति संबध्यते तथा प्रज्ञा ब्रह्माकारवृत्तिरपि आजीवितां
तं विदेहकैवल्यपर्यंतं तत्त्वावलोकनान्नो विरमति दृढसंस्कारबलादनुवर्त्तत एवेत्यर्थः १४ स्वरूपाच्छादकस्याज्ञानस्य सकृद्दर्शनया नष्टत्वान्निःशेषना
शे पुनरावरकाभावाद्वा तस्य न स्वरूपनिरोधलक्षणसमाधिभंगप्रसक्तिरित्याशयेनाह अजस्रमिति न रुध्यते आवरणेन न प्रतिबध्यते १५ परमप्रेमास्प
दत्वाद्वा सकलव्याप्यतस्य न विस्मरणप्रसक्तिरित्याशयेनाह न विस्मरतीति १६ १७

वा॰टी॰उप॰
१३६

भग्नावरण अग्नेमेव यावज्जीवं स्वाकारवृत्तिपरंपरां जनयन्नेवास्ते इत्याशयेनाह गतिमिति कालस्य कलामूर्तिः सूर्यादिः चिच्छितिः चैतन्यस्फूर्तिः राहोः
शिर इति वृद्धप्रचारः गतयः स्वाकारवृत्तीः छांदसो विभक्तिव्यत्ययः १९ बोधस्य तज्जीवन्कालधर्मत्वाद्धानविच्छेदप्रसक्तिरित्याशयेनाह यथेति १९
अस्याक्षस्य वृत्तत्वभावत्वाद्धानविच्छेदप्रसक्तिरित्याशयेनाह नसंभवतीति २०।२१ भेदो विच्छेदः मत्तसमाधेरात्मस्वरूपाद्व्यतिरेकेण हेतुनेत्यर्थः सदा
त्मतासत्ता सिद्धेत्यर्थः २२ यदि मनोस्तोति मन्यसे तर्हि सदा समाहितमेव यदि तु नास्तीति न तदा समाधेरपि मास्तु विक्षेपहेतोरेवाप्रसक्तेरित्याशयेनाप

गतिं कालकलायद्वच्छिन्दानासमवाल्लिता । चिच्छितिश्चेत्यरहिता चिन्मानागतयस्तथा १९ यथासत्ताविहीनात्मा पदार्थो नोपलभ्यते तथात्मसत्तान्
हीनात्मा कालोऽत्तस्य न लभ्यते १९ नसंभवति संसारे गुणहीनो गुणी यथा नसंभवत्यात्मसंविद्दूर्जितो प्यात्मवांस्तथा २० सर्वदैवास्मि संबुद्धः सर्व
दैवास्मि निर्मलः सर्वदैवास्मि शांतात्मा सर्वदास्मि समाहितः २१ भेदः केन समाधर्मे जन्यते कथमेव वा आत्मनो व्यतिरेकेण नित्यमेव सदात्मता २२
तस्मात्कदाचिदपि मे नासमाधिमयं मनः नवासमाहितं नित्यमात्मतत्वैकसंभवात् २३ सर्वगः सर्वदैवात्मा सर्वमेव च सर्वथा असमाधिर्हि कोमो
स्यात्समाधिरपि कः स्मृतः २४ नित्यं समाहितधियः सुमभाम हात्मनस्तिष्ठति कार्यपरिणामविभागमुक्तः तेनाऽसमाहितसमाहितभेदभंग्यासन्नो
२८०६
दितः क्वनु नित्यो समुत्तमवाक्प्रपंचः २५ मोक्षोपाः ३० समाधिनिश्चयः सर्गः ६२ परिघउवाच राजन्कृतं प्रबुद्धोसि प्राप्तवानासि तत्पदं सं?ाो
त्वलांतःकरणः पूर्णो दूरि विराजसे १ आनंदमधुसंपूर्णो लक्ष्म्याच परयाश्रितः शीतलः स्निग्धमधुरो राजीवमिव राजसे २ निर्मलो विततः पूर्णो
गंभीरः श्रकराशयः देलानिलविलासेन मुक्तोब्धिरिव राजसे ३ स्वच्छ आनंदसंपूर्णो नष्टाहंकारवारिदः स्फुटो विस्तीर्णगंभीरः शारत्स्वमिव राजसे ४

संहरतितस्मादिति २३।२४ सम्यक्स्थलबोधेनाहिताधीयैः तेनहेतुनाऽसमाहितसमाहितभेदभंग्या प्रवृत्तत्वाद्वाक्प्रपचः क्वनु कस्मिन्नर्थेव्यवृत्ति
षेत अतो मिथ्येवोदित इत्यर्थः २५ इतिश्री वासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे द्विषष्टितमः सर्गः ६२ परिघेण परीक्ष्यात्रसुतः ससुरघुर्नि[illegible]स
हजास्थितिमेवात्र वर्णयामास विस्तरात् नूनं निश्चयेन प्रबुद्धस्त्वं विदसि परीक्षणेन मया प्रबुद्धस्त्वमसीति वा १ आनंदेन मधुनामकरंदेन संपूर्णः रा
जीवं पद्ममिव राजसे २ निर्मलताः एव प्रकरः स्वेषं रूपः आशयः अंतःप्रदेशो मनश्चयस्य ३।४

१३६

सर्वत्रदृष्टानिष्टविषये ५ परिच्छेदो विचार्यनिर्णयस्तस्य पारगः अखंडितमपरिच्छिन्नब्रह्मस्वरूपं ६ नत्वमेत्यंतसंबोधनं उदितानन्दपामिति वोछेदः ग
मागमौ आरोहावरोहौ तत्प्रयोजिका भोगरागिनादन्तराग तयोस्तत्प्रयुक्तलोल्येन च युक्तं ७ न विद्यते वस्तु परमार्थवस्तु यस्मात्तथाविधेन वस्तुना स्वा
त्मना स्वांतस्थेन अमृतेन सागर इव परे स्वे महिम्नि तृप्तोसि ८ तदुक्तं सर्वं युक्तिभिः समर्थयन्ननुमोदमानः सुरघुरुवाच न तदित्यादिना न किंचन अ
न्तमित्यर्थः ९ उपात्तस्य त्यागो हि हानं तत्र प्रतियोगि हन्त प्रतिकूलं हानेन व्यवच्छेद्यं विनात्यंत उपादानं विना हेयामिति किं उच्यते वक्तुं शक्यते

सर्वत्र लब्धस्वसंस्थः सर्वत्र परितुष्यसि सर्वत्र वीतरागोसि राजन्सर्वत्र राजसे ५ सारासारपरिच्छेदपारगस्त्वं महाधिया जानासि सर्वमेवेदं
यथास्थितमखंडितं ६ भावाभावपरिच्छेदतत्त्वं समुदितात्मायां गमागमदत्त्वालोल्यमुक्तं नववपुः स्थितं ७ वस्तुना वस्तु नैवांतरस्थेनेव सागरः
अपुनःप्रसयायेव परितृप्तोसि सुंदर ८ सुरघुरुवाच न तदस्ति मुने वस्तु यत्रोपादेयतास्ति नः यावत्किंचिदिदं दृश्यं तावदेतन्न किंचन ९ नुपादे
यस्याभावाद्धेयमप्यास्ति किं किल प्रतियोगिव्यवच्छेद्यं विना हेयं किमुच्यते १० तुच्छत्वात्सर्वभावानामतुच्छत्वाच्च कालतः चिरं मम परिक्षीणे
तुच्छातुच्छे मनःस्थिती ११ देशकालवशादेव तुच्छास्यातुच्छतामिह अतुच्छस्य तु तुच्छत्वं वर्ज्यं निदास्तिनो बुधैः १२ रागान्निःशक्तितो लोकरा
गश्च परिवांछिते वांछ्यानेव महादारं वस्तु शोभनबुद्धिना १३ त्रैलोक्ये चास्ति यं शैलाः समुद्रवनराजयः भूतानि वस्तुशन्यानि सारो नास्त्यत्र व
स्तुनः १४ मांसास्थिदारुमृद्रूलमये जगति जर्जरे वांछनीयं विहीनोस्मिन शून्य किमिव वांछ्यते १५ वांछायां विनिवृत्तायां संक्षयो द्वेषराग
योः दिनलक्ष्म्यां व्यपेतायामालोकान्तपयोरिव १६ अलमतिविततेर्वचः प्रपंचैरियमुचितेह सुखाय दृष्टिरेका उपशमितरसं समं मनो तर्यदिमु
दितं तदनुत्तमा प्रतिष्ठा १७

न किंचिदित्यर्थः १० ननु तुच्छं हेयमतुच्छमुपादेयं किं न स्यात्तत्राह तुच्छत्वादिति यथाहुः बहुमत्को महीपालो ग्राममात्रे
ण तुष्यति स एव पूर्वं सिपूर्णो नरं राज्यं बहुमन्यत इति ११ इह मन्यते इति शेषः अतो न किंचित्तु च्छातुच्छबुद्ध्यानिर्धसनत्यं केवलं वर्ज्यं इति १२ १३ व
वस्तुत्वाख्यो भावप्रधानः सत्यत्वशन्यानीत्यर्थः १४ अध्यात्मं मांसास्थिमये अधिभूतं च दारुमृद्रूलादिमये रत्नादिः विलापरः १५ १६ यादिसर्वमिवा
सारं किं तर्हि सारभूतं सेवितुमुचितं तदाह अलमिति यदि मनः उपशमितरसं सर्वतो नीरागं विक्षेपवैषम्यरहितं स्यात् अंतः स्वात्मन्येव मुदितं तत्तर्हि
सैवोत्तमा प्रतिष्ठानिरियमेवैका दृष्टिः सुखाय सदा सेवितुमुचितेत्यर्थः १७ श्रीरामः

वा॰टी॰उप॰

१३०

इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे त्रिषष्टितमः सर्गः ६३ ये रूपाये रूपायतो मनो दोषैर्न बाध्यते आत्मा चोद्विजते दुःखात्तउपाया
इहोदिताः इति वर्णितप्रकारेण विचार्य १ तद्गुणितसंवादरूपं बोधकारणं श्रुत्वा एनां वृद्धवाक्य त्वावधारितं बोधाय पर्याप्तामिति सूचनाय प्रथ
मएवकारः एतावद्बोधएवं सुप्रतिष्ठितः परमपदप्राप्तये पर्याप्त इति निघातनायद्वितीयः २ धीरैर्विशुद्धिः मुहुर्विचारैः साक्षाद्विचारेण वगततीक्ष्णया प्रा
ग्मनिरतिभावया त्वदंबरे अहंकारलक्षणे कालमेघ गलतिसति ३ समस्तेत्यादौ विशेषणानि राजतेरात्कालेपि यात्याति ४ सर्वानिर्थनिवर्तकत्वात्
रण्ये ५ अध्यात्ममय आत्मैकविचारप्रचुरः अंतर्मुखो बाह्यासक्तिशून्यः चित्येवानुसंधानं पुनःपुनरादरादास्वादनं यस्य ६ रागद्वेषमयः रागद्वे

२८ ३३

मोक्षोपाये उपशमप्रकरणे सुरघूपरिघनिश्चयः सर्गः ६४ श्रीवसिष्ठ उवाच सरघुः परिघश्चैव विचार्येति जगद्भ्रमं मिथः प्रपूजितौ नु वोत्स्व
व्यापारपरौ गतौ १ तदेवं राघव श्रुत्वा परमं बोधकारणं अनेनैव विबोधेन भव लब्धात्मस्फुरः [?] २ परया प्रज्ञया धीरा विचारेण गततीक्ष्णया
गलत्यलमहंकारे कालमेघे ऽम्बरे ३ समस्तलोकानुमते सफले ह्लादकारिणि निर्मले वितते चेतःशरत्कालेऽवपातिते ४ ध्येये शारव्ये सुग
मे सकलानंदसंपदि सुप्रसन्ने चिदाकाशे स्थीयते परमात्मनि ५ यो नित्यमध्यात्ममयो नित्यमंतर्मुखः सुखी नित्यं चिदनुसंधानो मनः शोकै
र्न बाध्यते ६ व्यवहारपरस्यापि रागद्वेषमयोऽपि सन् नांतः कलंकमायाति पयोजलगतो यथा ७ सम्यग्विज्ञानवानेष शुद्धयोगः शांतमना
मुनिः न बाध्यते समनसा करिणेव मृगाधिपः ८ भोगैकशरणं दीनं न चित्तं तस्य विद्यते नंदने दुर्गमस्थमिव चित्तं हि महावपुः ९ विरक्तोऽज
न्ममरणे यथा दुःखी न मानवः परिज्ञाताखिलाविद्यं तथा चित्तं न दुःखितं १० परिज्ञानमनोमोहाज्जगद्भावाद्बाह्यात्मना स्वच्छयते नैनसा साध्यो
रजसेवनभस्त्रतं ११ ॥

षट्पदपुर इव मूढैः कल्प्यमानोऽपि ७ ८ दुर्गमो विषमकंटकवृक्षः हि यस्मात् तस्य चित्तं महावपुः स्थूलसुखलवनिःस्पृहमितियावत्
त् ९ यथा विरक्तो मानवः जायामरणे सति कामुक इव न दुःखी तथा परितो विचार्य ज्ञाता आखिला विषयेंद्रियशरीरादिर्वृत्तिरूपा अविद्या
मिथ्याभ्रांतिर्येन तथाविधं तच्चित्तं न दुःखितं भवतीत्यर्थः १० तस्य भावि दुःखहेतुपापसंबंधोऽपि नास्तीत्याह परिज्ञानेति जगति व्यवहारप
देभावः कर्तृत्वाभिमानस्तस्माद्दुद्भवतीति जगद्भावो द्वंद्वं तदात्मना एन सा पापेन ११

१३७

अविद्यालक्षणजगदाकारविस्तीर्णव्याधेः अविद्यामात्रंजगदितिसम्यकपरिज्ञानंविचार्य जन्यंज्ञानमेवमहौषधमित्यर्थः १२ यथाखमोयमितिपरिज्ञाते
नखमेनतद्भोगभूःपरिक्षीयतेतद्वत् १३ मत्स्यानोमीक्षणंचक्षुरंभसानस्थरूपतेतद्वत्तस्यत्रीपिहिताक्षाणांतेषांजलेदर्शनादिव्यवहारोनस्यादितिभावः
१४ शेमुषीप्रज्ञा १५ ज्ञायतेऽनेनेतिज्ञानंशास्त्रंतद्रूपेणार्केणबोधितः तत्ताद्दशंप्रबोधं १६ इदानींविद्योल्लोति दिनानोत्यादिना जीव्यतेऽतिभावेलः
दिनानीतिकालाध्वनोरत्यंतसंयोगेद्वितीयानतुकर्मणि येषुदिनेषुचिज्ज्योत्स्नात्दयांबरेआह्लादयतिविराजतेवेतिशेषः १७ १८ येभ्योमित्रादिभ्यो

अविद्यासंपरिज्ञानायदैवहितरैवहि सापरिक्षीयतेभयःस्वप्नेनेवहिभोगभूः ११ अविद्यासंपरिज्ञानमिदमेवमहौषधं अविद्याक्तित
व्याधेस्तिमिरस्येवदीपकं १२ व्यवहारपरोप्यंतरसक्तमतिरेकधीः स्यज्यतेनेनसासाधुर्मत्स्येक्षणमिवांभसा १४ प्राप्तेचिज्ञामुरालोकेप्रज्ञी
णाज्ञानयामिनी शेमुषीपरमानंदमागतात्तस्याराजते १५ अज्ञाननिद्रोपशमेजनोज्ञानार्कबोधितः तत्प्रबोधमवाप्नोतिपुनर्येननसुप्य
ति १६ दिनानिजीव्यतेनोसानंदाल्लेक्रियाक्रमा आत्मचंद्रोदितायेषुचिज्ज्योत्स्नाल्हदयांबरे १७ नरोमोहसमुत्तीर्णःसततंस्वात्मचिंतया
अंतःशीतलतामेतिखामेतेनेवचंद्रमाः १८ तानिमित्राणिशास्त्राणितानिमानिदिनानिच विरागोल्लासवानेभ्यःआत्मचित्तोदयःस्फुरः
१९ चिरंशोचंतितेदीनाजन्मजंगलवीरुधः आत्मावलोकनेहेलायेषामविगतेनसां २० आशापाशशतैर्बद्धंभोगोल्लपसुलालसं जरा
जर्जरितांकारंशोकोद्यासकदर्थितं २१ व्यूढदुःखमहाभारंजन्मजंगलजीवितं कुकर्मकर्दमालिसंमोहपल्वलशायिनं २२ रागदंशावली
दष्टंतृष्णावरत्रया मनोवणिग्निकेतस्थंबंधुबंधननिश्चलं २३ पुत्रदारजराजीर्णमज्जोन्मग्नकुकर्दम श्रांतंविगतविश्राममभग्नमादीर्घवर्त्मनि
२४ गमागमपरिक्षीणंसंसारारण्यचारिणं अलब्धशीतलाछायंतीव्रतापोपतापितं २५ (निमित्तेभ्यःविरोगाल्लासवानू आत्माकारवृत्तिल

क्षणश्चित्ताभ्युदयःस्फुरंसिध्यतीतिशेषः १९ हेला अवहेलनमुपेक्षेतियावत् अविगतेनसामक्षीणपापानां २० इतआरभ्यसर्वेषांद्वितीयांतप
दानांनवमश्लोकस्थेजीवबलीवर्दंउत्तारयेदित्यत्रसंबंधः उत्पालक्षणाविशेषाः २१ विशेषेणऊढदुःखमहाभारोयेन २२ वरत्रयाचर्ममय्यानासा
रज्ज्वा मनोलक्षणस्यवणिजःनिकेतेअज्ञानलक्षणस्यवणिजःनिकेतेअज्ञानलक्षणेसंकेतेनिवासेचलितंबंधुजनलक्षणैर्बंधनैर्निश्चलंचलितुम
ण

न

वा॰री॰उप॰
१२९

बहिराकारमाणेत्रैभासुरमंतास्कंदीनां बाह्येंद्रियैश्चक्षुरादिभिराक्रांतं आरूढं कर्मपदेन काम्यकर्म परोचकार्थवादा लक्ष्यंते लक्षणेन घंटारवे
णाक्रांतं भ्रमितं २६ चक्रीवर्तधुराराकरभारःसाहिराकूरचक्रैरावर्तनेतदुद्वहं २७ करुणं यथास्यात्तथा आक्रंदकारिणं २८ चिरंपरमं पल्वलमास्था
य ज्ञानबलादुत्तारयेदित्यर्थः २९ उत्तारितस्य पुनः पंकमज्जनशंकां वारयति तत्त्वेति ३० उत्तारणोपाय ज्ञानलाभस्तत्संकुरो रामाभिगमनात्सिद्ध्यतीत्या
न्यायेनाहमहानुभावेति ३१ देव्रगमरुचिरदेत्रामरुत्तस्मिन् ३२ सुजनलक्षणे चंपकवृक्षे षणानुभयसाधारण्येनपोज्यानि ३३ तदभावेखात्मला

आकारभासुरं दीनं बाह्यैराक्रांतमिंद्रियैः कर्माघंटारवाक्रांतं क्रांतं दुःकृतताडनैः २६ आविर्भावतिरोभावचक्रावर्तधुरोद्वहं अज्ञानवि
करास्यांलुठितं सन्नगात्रकं २७ निजानर्थसदाभग्नं सीरमानममाकिंचनं सन्नांगं कर्मभारेण करुणाक्रंदकारिणं २८ रामजीवबलीव
र्दमिमं संसारपल्वलात् परमं पल्वमास्थाय चिरमुत्तारये द्रुतात् २९ तत्त्वावलोकनात्सीपोचितेनोत्तापमेपुनः जीवः कदाचनतदाभ
वेतीर्णभवार्णवः ३० महानुभावसंपर्कात्संसारार्णवलंघने युक्तिः संप्राप्यते राम स्फुरानौरिवनाविकात् ३१ यस्मिन्देशेमरौतद्वोना
स्तिसज्जनपादपः सफलः शीतलच्छायोनतत्रनिवसेद्बुधः ३२ स्निग्धशीतघनच्छायोसितपुष्पके संपाद्विश्राम्यते राम भद्रं सुजन
चंपके ३३ तदभावेमहामोहतापसंपत्तिदायिनि किंचिज्जातविवेकेनस्वप्रयत्नेनहधीमता ३४ आत्मैव ह्यात्मनो बंधुरात्मनात्मैव मुद्धरेत
नात्मानमवलेपेनजन्मपंकार्णवे क्षिपेत् ३५ किमिदं कथमायातं किंमूलमिति किं क्षयं देहदुःखमिति प्राज्ञैः प्रेक्षणीयं प्रयत्नतः ३६ नध
नानि नमित्राणि नशास्त्राणि नबांधवाः नराणामुपकुर्वंति मग्नस्यात्मसमुद्धृतौ ३७ मनोमात्रेण सुहृदा सदैव सहवासिना सह किंचित्परा
मृश्य भवस्यात्मा समुद्धृतः ३८ वैराग्याभ्यासयत्नाभ्यां स्वपरामर्शजन्मना तत्त्वालोकनयोतेन तीर्यते भवसागरः ३९ श्रीरामायनमः ॥

१२९

भविश्रांत्यभावे इह संसारे न स्वप्रयत्ने ३४ एवं अनेनोपायेन उद्धरेदात्मानमित्यर्थः अवलेपेन देहाभिमानवर्गेण ३५ कस्मात्क्षयो यस्य किंक्षयं दे
हाधीनं दुःखं प्रेक्षणीयं स्वबुद्ध्या शास्त्रसज्जनसहायेन च विचारणीयं द्वौ इतिशब्दौ विचार्यविचारप्रकारबाहुल्यद्योतनार्थौ ३६ शास्त्राण्यना
त्मशास्त्राणि ३७ किं तर्ह्युपकरोतीत्यत आह मनोमात्रेणेति सुहृदा परिस्फुरंतेनेति यावत् ३८ ३९

नात्मानमवमन्येतनोपेक्षेत ५० आलानंगजबंधनस्तंभःजंबालेपंकेनिर्मग्नं ५१ विमूढत्वंस्वात्मज्ञानं ५२ सतःपरमात्मनोमार्गणं मार्गोबोधपर्यंतो
विचारस्तस्मिन्प्रकटतांस्फुटावलोकनतां मनोरथिनंबाह्याध्यात्मिकासक्तिजालं ५३ तत्रापिदुस्त्यजदेहाभिमानत्यागएवमुख्यइत्याशयेना
हएतावतैवेति ५४ तस्यदर्शनस्यपरिणामेनभूमिकापरिपाकेनचिद्दिवाकरभावापत्त्यावा ५५ अवलोकनंसिद्ध्यतीतिविशेषः ५६ सुखमोदेति
रतिंव्यापानंदविश्रांतिस्तज्ज्ञातादृपूर्णाविर्भूतानिर्विकल्पावस्था ५७ तामेववर्णयतिपरिपूर्णेत्यादिनाऽसंजनंदृश्योपरागं ५८ तयैवसोपमीयते
नान्यत्तदुपमानमस्तीत्यर्थः ५९ कैनतर्हिनिदर्शनेनतत्संभावनास्यात्तत्राहअदूरेतिनिर्विक्षेपत्वांशेसन्निहितात्तत्सादृश्यादित्यर्थः उपसमि
नोच्यमानंजनैर्नित्यंदह्यमानंदुराशयः नात्मानमवमन्येतप्रोद्धरेदेनमादरात् ५० अहंकारमहाजालानंतस्मारज्जुंमनोमदं जन्मजंबा
लनिर्मग्नंजीवदंतिनमुद्धरेत् ५१ अयमेतावतैवात्मात्रातोभवतिराघव यदपास्यविमूढत्वमहंकारःप्रमार्ज्यते ५२ एतावतैवसन्मार्ग
पातिप्रकटतामलं यदपास्यमनोजालमहंभावोविलीयते ५३ एतावतैवदेवेशःपरमात्मावगम्यते काष्ठलोष्ठसमत्वेनदेहोयदवलोक्य
ते ५४ अहंकारांबुदेक्षीणेदृश्यतेचिद्दिवाकरः ततस्तत्परिणामेनतत्पदंसमवाप्यते ५५ यथाध्वांतसमुच्छेदेस्वयमालोकवेदनं तथा
हंकारविच्छेदेस्वयमात्मावलोकनं ५६ अहंकारेपरिक्षीणेयावस्थासुखमोदजा साविश्राभरिताकाराप्यासेव्यासंप्रयत्नतः ५७ परि
पूर्णार्णवप्रख्यानवाग्गोचरमितिनः नोपमानमुपादत्तेनानुधावतिरंजन ५८ केवलंचित्प्रकाशाद्याकलिकाछिरतांगता तुर्यचित्प्राप्यते
दृष्टिस्तत्तयासोपमीयते ५९ अदूरगतसादृश्यात्सुषुप्तस्योपलक्ष्यते साविश्राभरिताकारागगनश्रीरिवानता ६० मनोहंकारविलयेसर्व
भावांतराश्रिता समुदेतिपरानंदोयानतुःपारमेश्वरी ६१ सास्वयंयोगसंसिद्धासुषुप्तादूरभाविनी नगम्यावचसारामतद्युवैहानुभू
यते ६२
पेलक्ष्यतेअतानावरणंचेत्तदानस्यात्तर्हितुर्यावस्थैवस्यादित्यनयारीत्येत्यर्थः ६० यद्विलयेनदाकाशस्यमहाकाशात्वमिवम
नोहंकारोपाधिविलयेत्वंपदलक्ष्यस्यतत्पदलक्ष्यात्मस्वभावतासिद्ध्यतीत्याहमनइति ६१ सुषुप्तस्यअदूरभाविनीसंनिहितादृश्यैवानुभूयते
स्वानुभवातिरिक्तंतस्याव्यापकंनास्तीत्यर्थः ६२॥

यथाखंडाद्यसाधारणाणवारिस्वरूपपरिचयेनानुभवात्स्वन्मानं तथा आत्मन्यपीत्याह अनुभूतिमिति आत्मनो रूपं परमार्थस्वरूपं चेत्यर्थः
५३ इदं अखिलं आत्मतत्त्वमेव तर्हि तत्कथमनुभूयते तत्राह दृढेति चेतसि बुद्धिविषये घृपशामिते अंतः प्रत्यगात्मनि स्फीरेणकवदेकरस्येन दृढपरि
णामिनि स्थिते निःश्लेषेसनिचराचराणां आत्माप्रत्यग्भूतः देवानां चक्षुरादीनां देवः साक्षितया प्रकाशयिता स्वयं साक्षादनुभूयत एव नात्र संशयः का
र्य इत्यर्थः ५४ एवं चतुर्थभूमिकायां आत्मानुभवे तदनु पंचमभूमिकायां आत्यंतिकविषयवासनाविनाशात्तदनु षष्ठभूमिकायां विनेयत्वं स्फुभः
परमपुरुषार्थरूपः स्वात्मनः स्फुटः प्रकाशः सदैवपूर्णभावानुभवः सिद्ध्यति तदनु सप्तमभूमिकायां समाध्यसमाध्योः समतावस्थादात्यंतिकवैष

अनुभूतिं विना तत्त्वं खंडादेर्नानुभूयते अनुभूतिं विना रूपं नात्मनश्चानुभूयते ५३ अखिलमिदमनंतमात्मतत्त्वं दृढपरिणामिनि चेतसि स्थि
तेनतः बहिरूपशमिते चराचरात्मा स्वयमनुभूयत एव देवदेवः ५४ तदनु विषयवासनाविनाशात्तदनु शुभः परमः स्फुटप्रकाशः तदनु चस
मतावस्थात्मस्वरूपेपरिणामनमहतामचिंत्यरूपं ५५ मोक्षोपायेषूपशमप्रकरणे नपदेशो नाम सर्गः ६८ श्रीवसिष्ठ उवाच मनसैवमनाश्छिला २०८८
यद्यात्मा नावलोक्यते ममेत्यहमिति त्यक्त्वा तत्तामरसलोचन १ नास्तमेति जगद्दुःखं यथा चित्रगतो रविः आयात्यापदनंतत्वं महार्णवविवदात
ता २ पुनः पुनरुपायाति जलकल्लोलकारणं मे घनीलतमः श्यामा संसृतिः प्रौढदाकुला ३ अत्रैवोदाहरंतीममितिहासं पुरातनं संवादंसु
रदैत्येः म सुसमानौ भासविलासयोः ४ अस्त्युत्सेधजितकाशः पीठेनाजितभूतलः तलेनाजितपातालस्त्रिलोकविजयो गिरिः ५ स्यनिवृत्ते समु

द्रुं विलीन सैंधववाघनवत्सर्वैकरसतयापरिणमनं सिद्ध्यति तनुमहतां ब्रह्मादीनामपि दुष्प्रापा अचिंत्यरूपं यतो वाचो निवर्तंते अप्राप्य मनसा स
हेति श्रुतेरित्यर्थः ५५ इति श्रीवा० उप० चतुःषष्टितमः सर्गः ६४ सह्याख्ये शैलस्तत्रात्रेराश्रमस्तत्र वर्ण्यते विलासभासयोर्जन्म कर्म च शोकोदय
क्रमः आत्मदर्शनोपायोपेक्षणे शोकमोक्षादिदुःखपरंपरादुर्वारेत्यर्थे भासविलासाख्यापिकामवतारयिष्यन्नाह मनसैवेति यदि नावलोक्यते तेन त
र्हि जगद्दुःखं यथा चित्रगतो रविर्नास्तमेति तथा नास्तमेतीति परेणान्वयः १ आपत् अनंतत्वं अपरिच्छेद्यत्वं आयाति २ मेघनीलतमोभिः श्यामा १३९
संसृतिलक्षणा प्रावृट् वर्षर्तुः ३ सुहृदोर्मित्रयोः शुद्धचित्तयोश्च ४ पीठेन उपत्यकाभागेन तलेन भूम्यंतः प्रविष्टमूलभागेन जितत्राब आक्रांतपराः ५

अविषह्याद्रूक्प्रसरप्रतिघातिनीभाः रत्नादिदीप्तिर्यस्मिन् ६ भानुभिः सूर्यरत्नादिकिरणैर्भासुराभित्तिभित्तिर्यस्य प्रेः पाटलभित्तिभिरिति पाठेप्ये
वं कांचनैरस्तैर्निर्मितैः कुरंगैः अत्यारब्धायां बकुरुचनं ७ धातुसारैहरितालमनःशिलागैरिकादिभिराततः ८ इतस्ततः प्रतिप्रवेशगाभे दोक्तिः ९
मानोपस्थे मत्तानीवगर्जंत्यप्राणियस्मिन् १० ११ नगात्यदेन लोकत्रयवासिनो लक्ष्यंते तेषां गृहमिव त्रैलोक्यलक्षणं ब्रह्मांडगृहमिहेति वास्थित

असंख्यकुसुमापूरोऽसंख्यनिर्मलनिर्झरः गुह्यकराशिततनिधिः सत्त्वनामाविषह्यभाः ६ मुक्तापटलसंपूर्णैर्भानुपाटलभित्तिभिः भासुरः कांचनत
टैः कूरैरिवसुराद्रिपः ७ क्वचित्पुष्पभरासारो धातुसारान्ततः क्वचित् क्वचित्कल्मरःसारो रत्नशालिशिलः क्वचित् ८ इतोरशनिर्झरवानितः
क्वणितकीचकः इतोरयत्कुहावातइतः षट्पदघुंघुमः ९ मानोगीतोप्सरोवृंदैर्वनेमत्तखगारवः आधित्यकायांमत्ताश्रोगगनेषु खगारवः १०
विद्याधराश्रितगुहोभृंगगीतोंबुजाकरः किरातगीतपर्यंतः खगगीतवनद्रुमः ११ स्कंदेषु देवैर्वलितः पादेषु वलितोऽमरैः पातालेवलितोना
गैर्जगद्गृहमिवापरः १२ कंदरेषुश्रितः सिद्धैर्निधानैरंतराश्रितः चंदनेषुश्रितो नागैः सिंहशृंगान्तरीखासु च १३ पुष्पाभ्रसंवीतवपुः पुष्परेण
भ्रपांशुलः पुष्पवासाभ्रलङ्घ्यः पुष्पपादपपांडुरः १४ धातुधूल्यभ्रकपिलो रत्नोपलतलाश्छितः मंदारगौरविपुरश्री गणोत्तमाश्रितः १५
अभ्रनीलांशुकच्छन्नामूकरत्नविभूषणाः ज्योत्स्नाः कनकसुंदर्यो यत्रशृंगाभिसारिकाः १६ तत्रोत्तरतटे मानोर्विनम्रफलपादपे रत्नपुष्करिणी
जालवहन्निर्झरवारिणि १७ चूतद्रुमलतोन्मुक्तपुष्पस्तबकदंतुरे विकचालोलपुन्नागनीलनीरजदिक्करे १८ लतावितानच्छन्नार्करत्नां
शुभरभास्वरे सवत्तांबूरसस्पृते सर्वलोकाह्लादवारिणि १९ ब्रह्मलोकसमः स्वर्गरम्यः शिवपुरोपमः अत्रेरत्याश्रमः श्रीमान्सिद्धाश्रमहरो
महान् २०

रत्नोषः १२ निधानैर्निखातधनैः १३ १४ मंदारः कल्पवृक्षभेदस्तद्गैरगैरत्वरदासुरैरिव १५ नीला एवाभिसारिकात्वेनोत्प्रेक्ष
तेऽभ्रेति कूणन्मंजिरादिस्वचितरत्नानामभिसारविरोधित्वान्मूकरत्नविभूषिताः शृंगैरभिसारिकाः इवाश्लिष्टत्वात् शृंगाभिसारिकाः १
६ तत्र उत्तरतटे अत्रेराश्रमोऽस्तीति चतुर्थेसंबंधः १७ चूतद्रुमाणां लताभिः शाखाभिरुन्मुक्तैरुर्ध्वभागप्रसारितैः पुष्पस्तबकैर्दंतुरे उन्नत
दंतवसिद्धते नीलनीरजानि नीलोत्पलानि १८ स्वर्लोकः स्वर्गस्थानमिवाह्लादकारिणि १९ २०

वा॰टी॰उप॰
१५०

महत्तिविस्तीर्णेका विहंसोऽशुक्रवृहस्पतीइवरतितयोर्नाम निर्देशोऽपि २१ अंबुजयोः पद्मगुल्मयोः फुल्लांकुरौ पुष्पप्रकृतिभूतेकलिकेइव २२
लतापादपयोः पल्लवेइववृद्धिमाययतुः २३ २४ नायुक्तोनवियुक्तौ पुत्रार्थयुक्तौ परस्परंसुरक्तौ दंपतीइव २५ मौनेमुदितेमुनियुक्तेच २६
२७ २८ पंचत्वंमरणंगतयोःसतोः २९ और्ध्वदैहिकामित्यनुज्ञातिकादिलादुभयपदवृद्धिः परिदेवनंविलापं ३० निरस्तसमस्तचेष्टोचेलिकिं

महत्यत्राश्रमेतस्मिंस्तापसौद्वौबभूवतुः कोविदौतुनभोमार्गेइवशुक्रबृहस्पती २१ तयोरथेकास्परयोस्तत्राभूतांसुतावुभौ फुल्लांकुरौ
शुद्धेतनुसरस्यंबुजयोरिव २२ विलासभासनामानौवृद्धिमाययतुःक्रमात् तौपित्रोःपल्लवेदीर्घलतापादपयोरिव २३ आस्तामन्यान्य
सुस्निग्धौसुतद्वेवतत्रभोमिथः तिलतैलवदाश्लिष्टौतौपुष्पामोदवत्स्थितौ २४ नायुक्तोपुत्रयुक्तोनुसुरक्ताविवदंपती एकंद्वित्वमिवापन्नंस
ममासीत्तयोर्मनः २५ तौतथान्यान्यमुदितौमनोहरतराकृती तस्थतुःस्वाश्रमेमौनेसराजेइवषट्पदौ २६ प्राप्ततुर्यौवनंबाल्यमुत्सृज्यन
ववल्लभौ कालेनाल्पतरेणेवचंद्रसूर्याविवोदितौ २७ जग्मतुर्देहमुत्सृज्यतत्तस्तौपितरौतयोः खंगंजराजर्जरावुड्डीयनीडादिवविहंगमौ २
८ पंचत्वंगतयोःपित्रोर्दीनवक्त्रौबभूवतुः तत्संगौविगतोत्साहौपद्माविवनलाद्धृतौ २९ तत्रौर्ध्वदैहिकंकृत्वाचक्रातेपरिदेवनं लोक
स्थितिरलंघ्याहिमहतामपिमानद ३० कृत्वौर्ध्वदैहिकमथोभ्ययथाभिभूतौयुक्तोत्थयाकरुणयोर्भ्रगिराविलाप्य चित्रार्पिताविवनिर
स्तसमस्तचेष्टौतौसंततौसुखमशून्यतरौविरतौ ३१ मोक्षोपायेषुपशमप्रकरणेभासविलासवृत्तांतेसत्यागिरिवर्णनंसर्गः ६४ श्रीव
सिष्ठउवाच अतिशोकपराभूतौतस्थतुर्हृत्तापसौ तापसंशुष्कसर्वांगौनावरण्यद्रुमाविव १ विरक्तौविपिनेकालंक्षपयामासतुर्हिजौ
विपूथाविवसारंगावनास्थामागतौपरां २ जग्मुर्दिनानिमासाश्चवर्षाणिचतयोस्तदा क्रमात्तद्वौवपिसंयातौजराश्चभ्रद्रुमाविव ३

सतोनेत्याहअशून्यतरावितितथाचमूर्छितौविरतौसंपन्नावित्यर्थः ३१ इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेटीकायांचतुष
ष्टितमःसर्गः ६४ अत्रबुद्धमतेरत्रदुःखाधीपरिवर्तनं भासस्यवचनेनात्रविस्तरेणप्रकाश्यते आरण्यद्रुमपक्षेतापेनतपसंबंधिनाग्रा
मातपेनदावाग्निनाचसंशुष्कसर्वांगौ १ अनास्थांगत्हसेत्रधनादावनासक्तिं २ ३

२०१०
१५०

संघटितौ कं चित्कालं दैवाद्वियुज्य पुनर्मीलितौ ४ जीविताग्यमश्रेष्ठं जीवनं तत्र लक्षणद्रुमफलभूत हृदि आवासोयस्य तथाम तां बुधे इति मैत्र्यानि
नायो हीपने विशेषणे ५ ६ आत्मवान् प्रबोधलब्धात्मा अत एव फलितविद्यः ७ अलंस्पष्टं प्राह ८ ९ चित्ते भवतीति चित्तभूः कामसंकल्या
दिः १० वसिष्ठोलनापाङ्गदाक्षेण त्रांकुलादिना ११ ज्ञानं शोधिततत्वं परार्थज्ञानं बोधोऽखंडवाक्यार्थ इति भेदः १२ १३ शैशवलक्षणं अं

अप्राप्तविमलज्ञानो चिराज्जर्जरतापसौ तावेकदा संघटितावितरमन्योन्यमूचतुः ४ विलासउवाच जीविताग्र्यद्रुमफलहृदावासमम तां बुधे ज
गत्यस्मिन्महाबंधो भासस्वागतमस्तु ते ५ एतावन्त्योदिनावल्यो मद्वियोगवतात्वया वद कच्चित्तापितः साधो कच्चित्ते सफलं तपः ६ कच्चित्ते
विज्वरा बुद्धिः कच्चिज्ज्ञानस्त्वमात्मवान् कच्चित्कलितविद्यस्त्वं कच्चित्कुशलवानसि ७ श्रीवसिष्ठउवाच इत्युक्तवंतं संसारसमुद्विग्नमलं तथा
प्राह प्राप्तमहाज्ञानं सुहृदं सुहृदादरात् ८ भासउवाच साधो स्वागतता येदद्य प्राप्तोऽसि मानद कुशलं तु कुतोऽस्माकं संसारे तिष्ठता
मिह ९ यावन्नाधिगतं ज्ञेयं यावत्क्षीणा न चित्तभूः यावत्तीर्णो न संसारस्तावन्मे कुशलं कुतः १० आशा यावद्दशेषेण न लूनाश्चित्तसंभ
वाः वीरुधो दात्रकेणेव तावन्नः कुशलं कुतः ११ यावन्नाधिगतं ज्ञानं यावन्न समतोदिता यावन्नाभ्युदितो बोधस्तावन्नः कुशलं कुतः १२ आ
त्मलाभं विना साधो विना ज्ञानमहौषधं उदेति पुनरेवेयं दुःसंसृतिविषूचिका १३ शैशवांकुरितोजृंभमाननवयौवनपल्लवः जराकुसुमितो
भ्येति पुनः संसारद्रुमः १४ कायजीर्णतरोरस्माद्वांधवाक्रंदषट्पदा जराकुसुमितोदेति पुनर्मरणमंजरी १५ भुक्तकर्मर्तुविरसा पुराण
दिवसोंऽभिता नीयते नीरसप्राया पुनः संवत्सरावली १६ महा (कुटिनस्पन्दं भगणमुज्जृंभस्तं अनीत्येतिल्यद्ध्रो पेहेनो वा पंचमो १४ बां

धवानामाक्रंदा एव षट्पदाः लक्षणयातद्गुंजारवाः यस्यां जरया कुसुमितासंजाकुसुमा १५ मरणोत्तरं दैवान्नरकस्था वरतिर्यग्जन्मप्राप्ते
भुक्तानि दुष्कृतकर्माणि येषु तथाविधैः शीतोष्णवातवर्षादिं ग्राममशकादिसंकुलैर्वसंतादिऋतुभिर्विरसा देवान्स्वर्गादिप्राप्तावपि तत्र पुण्यसंचया
नधिकारात्पूर्वसंचितपुण्यव्ययाद्पतस्त्रियाकामादिदोषबहुलत्वाच्च ग्रामदमाद्यसंभवेन ज्ञानस्यापि दौर्लभ्यात्केवलभोगैकलं पतनप्रायैः पुराणैः
प्रागनुभूतत्वादभिनवविषयाभावात्पुरातनप्रायैरेव दिवसैः उंभिता पूरिता अत एव नीरसप्राया संवत्सरावली पुनर्हर्षेवनीयते इत्यर्थः १६

वा॰रो॰उप॰
१५१

देवात्पुनर्मानुष्येतत्रापिदुर्लभतानेत्रा लक्षणादिच्चारीरेप्रासेपिसांप्रतिकदेहइवभोगलंपटतयैवभ्रमणंदुर्वारमित्याशयेनाहमहादरीषिति वि
षयभोगलक्षणानिफलान्येवव्यालाःपांसुतल्पासहस्रैःसंतानकंदकासुदेहलक्षणस्याद्रेर्महाभीषणदरीप्रायच्छिद्रस्थैस्तैद्विपासक्तिपु
रोहिकामुष्मिकभोगोपायलौकिकवैदिकक्रियासुचपरिलुठपतेनतत्रापिआत्मविवेकसंभावनानास्तीत्यर्थः १७ चिराल्पकालभोगयत्वाभ्यां
दीर्घादीर्घैर्दुःखैःअपर्याप्ताअसमाप्ताआगमापायापायासुरात्विग्रहणंकालमात्रोपलक्षणंप्रयांसीतिर्वजन्मस्वितिशेषः १८ तत्क्रमेवतलकारणा
मरवेनाह अयथार्थेति अयथार्थामिथ्याभूताःक्रियाभिरारभ्यंतइतिक्रियारंभाःफलानियेषांतथाविधैःकर्मभिःआहतानिमृषाभूतानिक

महाशरीषुदेहाद्रेस्तस्याकंटकिनाम्नपि पलव्यालासुचपुनःक्रियासुपरिलुठपने १७ दुःखैःसुखलवाकारैर्दीर्घादीर्घैःशुभाशुभैअपर्याप्तागमा
पायाःप्रयांत्याशातिरात्रयः १८ अयथार्थक्रियारंभैःकदाशावृक्षपल्लवैः क्षीयतेकर्मभिस्तुच्छैरायुराहतकर्मभिः १९ उन्मूलिताश्रया
लानोसमनोमत्तमतंगजः तृष्णाकरेणुकांनिद्रोद्दूरंविपरिधावति २० जिज्ञासाचपलतालम्रःकायद्रुममहालये पतश्चिंतामणौरुद्धोगार्द्धगृध्रोवि
वृद्धते २१ नीरसानिःसुखालक्षीयतेत्पेलवगात्रिका जीर्णपर्णसवर्णेयंक्षीयतेदिवसावली २२ अवमानरजोध्वस्तमस्तंगतवपुःश्रियं मु
तं खंधूसतैरतामेतिहिमैःपद्मामिवार्हे २३ शुष्यतःकायसरसःप्रगलद्यौवनाम्भसः राजहंसःक्षणादायुरनिवर्त्तिपलायते २४ कालानिल
बलोद्भूताजर्जराजीविनद्रुमात भोगपुष्पाणिदिवसपर्णानिनिपतंत्यधः २५ (र्माणियेषांतथाविधैर्जंतुभिरायुःक्षीयतेविनाश्यते १९

जन्मनिजन्मनिविवेकविरोधिप्राबल्यंतत्सहापदोर्केन्नंप्रपंचपतिउन्मूलितेत्यादिना आश्रयःपरमात्मात्तत्रबंधनहेतुर्विवेकआलानंतदुन्म
लितंयेन तृष्णापदेनतद्विषयोलक्ष्यतेतत्लक्षणायांकरेणुकायांसकामत्वादुन्निद्रोनिर्निद्रः २० अर्थंपतनन्परमपुरुषार्थोपयोगीआयुर्ल
क्षणोविवेकलक्षणश्चचिंतामणिर्यस्मात्तथाविधकायलक्षणद्रुमस्थ्ठेमहतितद्रूपेलक्षणेआलयेनीडेगार्द्धःस्वादुत्वादभिलाषःसएवगृध्रःश्र
मदोबल्याभयादिनापतंतिकार्यक्षमाणिभवंतिगात्राणियस्यांदिवसावलीपदेनतत्स्मृतिच्छिन्नाकायलताग्लायते २२ वार्द्धक्येपुत्र
भृत्यावमानैःरजोभिःप्रध्वस्तं अस्तंगतंयौवनवपुःश्रीर्यस्यतथाविधंक्लीबेभमोदुलुकूलंदासः २३ राजहंसइवेतिशेषःभोगलक्षणानिपु

बालिकपणानिनिपतंतिक्षयकणानिनिपतंतिकणापातिन्यः २४

१५१

भोगेषु निवृत्तेष्वपि भोगाभ्यासात्तदासक्तिदुःखं तत्स्मृत्युक्तचिंतात्मकमोहाधिक्यं वर्द्धित एवेत्याशयेनाह भोगेत्यादिना २६ चैत्यं देवाद्यायतनं अ
ग्रे बद्धा पताकेव दूरमुच्छ्रितं यथा स्यात्तथा २७ संसारलक्षणस्य तंत्रस्य प्रबंधस्य आयाः जीविताशा प्रचुरं आयुस्तंतुः २८ बहल्लोलाः सिमद्राक्रोधद्धे
षभयादिना फेनिला परावर्ताः लोभतृष्णादिना भ्रमणान्येव महांत आवर्ता यस्याः २९ त्रिलोल्यनर्कैर्नीतिशास्त्रादिभिः कलाकुलैः कोमल हृदं
जगद्व्यवहारकार्यलक्षणो यो कल्लोलैराकुला संकुला च क्रियाप्रवृत्तिलक्षणा सरित् प्रतिजन्म एवमेवं वहतीत्यर्थः ३० ३१ देह एव परम

भोगभोगिभिन्नेषु तद्दुःखदर्दुरधारिषु मनोमोहांधकूपेषु पूरेषु विनिमज्जति २६ नानानुरंजनाचारस्पष्टा त्वष्मांतरलपेलवा चैत्यमग्रपताकेव दू
रं समाधिरोहति २७ अस्य संसारतंत्रस्य दृह कालविलास्यदः जीविताशामयं तंतुमं तकाखुर्निकृंतति २८ यौवनोत्कूरकल्लोला वहल्लोला
सिफेनिला परावर्तमहावर्ता याति जीवितनिर्झरी २९ कलाकुलजगत्कार्यकल्लोलकुलसंकुलं क्रियासरिदपर्यंता वहत्याकुलकोटरा
३० अनंतावधुननतानयोगंभीरकोटरे अजस्रं निपतंत्येता वितते कालसागरे ३१ देहरत्नालाके पतनाशपं कार्यगे[illegible]शापे कार्णवोदरेन
लाघवे कमग्नेति तात जन्मनि जन्मनि ३२ चिंताचक्रे चिरं बद्धं कुक्षिपाशावचुरं चेतो भ्रमति सामुद्रगर्तावर्ते तृणं यथा ३३ उद्य
मानमनं तेषु चेतः कार्यमहोर्मिषु क्षणमेति न विश्रांतिं चिंतातांडविताशयं ३४ इदं कृतं करोमीदं करिष्यामीदमत्यलं कल्पनाजालवलिता
मूर्छिता मतिपक्षिणी ३५ अयं सुतरदयं भ्रातुरिति द्वंद्वमहाद्विपः विनिकृंतति मर्माणि यथा नीलोत्पलानि मे ३६ चिंतानघामहावृत्तेर्वो
विकानि चयो चिरं क्षणादुच्छूनतामेति मनोमीनः क्षणाकृतिः ३७ अनात्मीयानि दुःखानि बहून्येवंविधान्ययं आत्मबुध्याविचिंत्य ना
च प्रयोगदर्शनात्संदिहानस्य प्रश्नः प्रतिबिंबति आदर्शे प्रतिबिंबवत्स्फुरति ३२ तत्र मांसमनसोः परिच्छिन्नत्वादैक्यमेव प्रकल्प्य हेयत्वाविभागो बो
ध्यः ३३ ३४ ननु आत्मनि हृदयत्वाद्वेत्तृत्वमात्रास्थितिकृत्वाक्षेपः किं न स्यादित्याशंक्याह तदंतरे चेति ३५ अस्मिन् घटाघाटपृथिवी अंतरे च समाहि
ते इति श्रुतेरिति भावः ३६ ३७ ३८ ३९ सहसा हठयोगे प्रवृत्तिं वारयितुमाह अभ्यासेनेति हठान्निरोधे तु रोगाद्याबाधा स्यादेवेति भावः ४० यथावास

चिरं कालं हृदेकांतव्योमसंवेदनान्मुने अवासनानमनोध्यानात्प्राणस्पंदो निरुध्यते ३१ श्रीरामउवाच ब्रह्मन् जगति भूतानां हृदयं तत्किमु
च्यते इदं सर्वं महादर्शे यस्मिंस्तत्प्रतिबिंबति ३२ श्रीवसिष्ठउवाच साधो जगति भूतानां हृदयं द्विविधं स्मृतं उपादेयं च हेयं च विभागोयं तयोः शृणु
३३ इयत्तया परिछिन्ने देहे यद्धृत्सोंतरं हेयं तद्धृदयं विद्धि तनावेकृतदेशस्थितं ३४ संविन्मात्रं तु हृदयमुपादेयं स्थितं स्मृतं तदंतरे च बाह्ये च न च
बाह्ये न चांतरे ३५ ननु प्रधानं हृदयं तत्रेदं समवस्थितं तदादर्शः पदार्थानां तत्कोशः सर्वसंपदां ३६ सर्वेषामेव जंतूनां संविद्धृदयमुच्यते न दे
हावयवैकाशो जडजीर्णोपलोपमः ३७ तस्मात्संविन्मये शुद्धे हृदये तत्त्ववासने बलान्नियोजिते चित्ते प्राणस्पंदो निरुध्यते ३८ एभिः क्रमैस्त
थान्यैश्च नानासंकल्पकल्पितैः नानादेशिकवक्त्रस्थैः प्राणस्पंदो निरुध्यते ३९ अभ्यासेन निराबाधेनैते नाम्नायोगयुक्तयः उपायतामुपायांति
भव्यस्य भवभेदने ४० अभ्यासाद्रूढतां याता वैराग्यपरिलांछितः यथावासनमायामः प्राणानां सफलः स्मृतः ४१ नासाताल्वनुसंस्थासु द्वादशांगु
लिकांतिषु अभ्यासाच्छाम्यति प्राणो दूरे गिरिनदी यथा ४२

नं यदापायावासनानुद्भवंति तदा तन्निरोधायेत्यर्थः अथवा मुमुक्षावासनायां
मोक्षफलेन सफलः भोगवासनीयां तु तत्तद्भोगसिद्धिवैचित्र्यफलेन सफल इत्यर्थः ४१ अत एव तत्तत्सिद्धिफलभेदार्थे पातंजलशास्त्रे भ्रूमध्यादि
स्थानभेदेन धारणाभेदा दर्शिता इत्याशयेनाह नासेति तालुसंस्थानं कंठाग्राद्यारभ्य द्वादशांगुलिमितप्रदेशाः कोटिः सीमा द्वादशांतः पुरुषभेदा
द्गुरुवचनं यथाह पतंजलिः नाभिचक्रे कायव्यूहज्ञानं कंठकूपे क्षुत्पिपासानिवृत्तिः कूर्मनाड्यां स्थैर्यं कंठकूपादधः कूर्माकृतिर्वर्तुला तत्प्रदेशे कूर्मना
डी प्रसिद्धा मूर्धज्योतिषि सिद्धदर्शनमित्यादि शिरःकपालछिद्रे भास्वरज्योतिर्मूर्धज्योतिः गिरिनदी निर्झरः सा यथा दूरे गत्वा तत्रैव लीयते तद्वत् ४२

जिह्वयाक्रम्यघंटिकामिति यत्प्रागुक्तंतत्रोपायमाह भ्रूमध्यइतिस्थ्यपते आक्रम्यते ५३ एतेषांसमाधिभेदानांतत्तत्सिद्धिफलेषु विकल्पबहुल
त्वेपिनिष्कामस्यपरमोपशमेफलेअविकल्पतेवसर्वेषामित्याह विकल्पेति ५४ ५५ ५६ वासनावलितंमनःजन्मशरीरंतत्रप्राणंचाभिमा
नेनगृह्णाति निर्वासनंतुमोक्षं ५७ एवंउक्ताभ्यासप्रकारेणदीपतेखंड्यतेचिकित्स्यतेइतियावत् ५८ ५९ इदंदृश्यंयत्रनेत्याधेयतयाय
तोनेत्युपादानतयान्नेतितादात्म्येनचसच्चिदात्मसंबंधनिषेधान्नकेनाप्यंशेनजगद्रूपसदृशमित्यर्थः ५० अतएवविनाशित्वादिधर्मकेज

भयोभ्रूयश्चिराभ्यासाज्जिह्वाग्रंतेनतालुनि घंटिकास्थ्यपतेप्राणोयेनोर्ध्वैर्निवहत्यलं ५३ विकल्पबहुलास्त्वेतेस्वाभ्यात्येनसमाधयः
परमोपशमायाशुसंप्रयांत्यविकल्पतां ५४ आत्मारामोवीतशोकोभवत्यंतःसुखःपुमान् अभ्यासादेवनान्यस्मात्तस्मादभ्यासवान्भ
व ५५ अभ्यासेनपरिस्पंदेप्राणानांक्षयमागते मनःप्रशममायातिनिर्वाणमवशिष्यते ५६ वासनावलितंजन्ममोक्षंनिर्वासनंमनः
प्राणंचरामगृह्णातिपथेच्छसितथाकुरु ५७ प्राणस्पंदोमयोरूपंतस्मात्संसृतिविभ्रमः तस्मिन्नेवंशमंयातेदीयतेसंसृतिज्वरः ५८ विक
ल्पांशास्तपांतोःपदंतदवशिष्यते यतोवाचोनिवर्तंतेसमस्तकलनान्विताः ५९ यत्रसर्वंयतःसर्वंयत्सर्वंसर्वतश्चयत् यत्रनेदंयतोनेदं
यन्नेदंनेदृशंजगत् ५० विनाशित्वाद्विकल्पत्वाद्गुणित्वान्निर्गुणात्मनः यस्यनोसदृशोदृष्टोदृष्टांतःकश्चिदेवहि ५१ स्वादनीत्यवस्थाली
नादीपिकासर्वतेजसां कलनासर्वकामानांमताश्चिच्चंद्रिकोदिता ५२ यस्मात्कल्पतरोर्बह्व्यःसंसारफलपंक्तयः अनारतंबहुरसाजायं
तेचपतंतिच ५३ तत्पदंसर्वसीमांतमवालंब्यमहामतिः पःस्थितःस्थिरधीस्तद्वःसजीवन्मुक्तउच्यते ५४ श्रीरामायनमोनमस्ते॥

गतिनकश्चिदपिब्रह्मणोदृष्टांतोस्तीत्याह विनाशित्वादिति ५१ यदिनकश्चिद्दृष्टांतस्तर्हिकिंयंतत्परिचयस्तत्राह स्वादिनीति रसरूपादिगोचर
बाह्यवृत्तित्रिपुटीनांकामाद्यंतरवृत्तित्रिपुटीनांचभासकतयातत्परिचेयमित्यर्थः ५२ फलमनत्तूपपत्तेरितिन्यायाद्विचित्रकर्मफलोदय
हेतुनिमित्ततयावातत्परिचेयमित्याह यस्मादिति ५३ तत्परिचयावलंबनेपुरुषार्थसिद्धिंदर्शयन्नुपसंहरतितदिति द्वाभ्यां ५४ ५५

श्री

त्यागतानि सर्वाणि समीहितकौतुकानि कामभोगोत्कंठायस्य अतएव तदनुकूलप्रतिकूलेषु समुपगतं नाहितं नाहितवासनायस्य अतएवस कलेषु संव्यवहारेषु समः हर्षविषादशून्यः आशयोयस्य ईदृशो मुक्तमनाः पुरुषश्रेष्ठो भवति भगवान्विष्णुरपि भवतीत्यर्थः ५५ इतिश्री वासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे अष्टसप्ततितमः सर्गः ७८ उद्दिष्टौ चित्तनाशाप्ययोगज्ञानमोहियो तयोराद्योपरितात्तद्द्वितीयोत्र निरूप्यते ॥ द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघवेति उद्दिष्टक्रमयोर्मध्ये आद्यश्चित्तस्य शमः नाशप्रकारो निरूपितस्तस्येत्यर्थः १ लक्षण

विगतसर्वसमीहितकौतुकः समुपगतं नहितं नाहितं कल्पनः सकलसंव्यवहारसमाशयो भवति मुक्तमनाः पुरुषोत्तमः ५५ मोक्षोपाये उपशमप्रकरणे योगवर्णनं नाम सर्गः ७८ श्रीरामउवाच योगयुक्तस्य चित्तस्य नाश एव निरूपितः सम्यग्ज्ञानमिदानीं मे कथयानुग्रहात्मभो १ श्रीवसिष्ठउवाच अनाद्यंतावभासात्मा परमात्मेह विद्यते इत्येको निश्चयः स्फारः सम्यग्ज्ञानं विदुर्बुधाः २ इमाघटपटाकाराः पदार्थशतपंक्तयः आत्मैव नान्यदस्तीति निश्चयः सम्यगीक्षणं ३ असम्यग्वेदनाज्जन्म मोक्षः सम्यगवेक्षणात् असम्यग्वेदनाज्जुः सर्पो नो सम्यगीक्षणात् ४ संकल्पांशविनिर्मुक्ता संवित्संवेद्यवर्जिता संवित्याभिसमाख्याता मुक्तास्ती हाहिनेतरत् ५ साशुद्धरूपा विज्ञाता परमात्मेति कथ्यते शुद्धा तच्छुद्धरूपा न विद्येत्युच्यते बुधैः ६ संवित्तिरेव संवेद्यं नानयोर्द्वित्वकल्पना चिन्नीत्यात्मानमात्मैवरामेवं नान्यदस्ति हि ७ यथा भ्रतात्मदर्शित्वमेतावद्भुवनत्रये यदात्मैव जगत्सर्वमिति निश्चित्य पूर्णता ८ सर्वमात्मैव कोदिष्टो भावाभावो क्व च स्थितौ क्व बंधमोक्षकलने किमन्यद्रामवोच्यते ९

स्वरूपसाधनादिभिः सम्यग्ज्ञानं प्रपंचयिष्यन्प्रथमं आत्मपरिचयेन जगद्बाधात्मा ज्ञानलक्षणं तल्लक्षणमाह अनाद्यंतेति एकः असाधारणः स्फारः अपरिच्छिन्नाकारः २ एवं जगद्बाधेनात्मपरिचयात्मिता वात तल्लक्षणमित्याह इमाइति ३ सम्यग्ज्ञानस्य मोक्षसमर्थतादर्शयितुं असम्यगिति सम्यगीक्षणात् नो सर्पः सर्पो नो वमोक्षइति यावत् ४ मुक्तेन हि किं परिशिष्यते तदाह संकल्पेति संवित्याख्यप्रकाशास्वभावेनैव अभितः सम्यक् आख्याता प्रथमाना इह मुक्तौ ५ अपृथर्थे तु शब्दः ६ तथा चाविज्ञानरूत एव संवित्तिसंवेद्ययोर्भेदो न वास्तव इत्याह संवित्तिरेवेति चिनोति अज्ञानात्संचिनोति ज्ञानात्तु परिचिनोतीत्यर्थः ७ नि

१० इह तोपि हृहृ दुःखस्वात्मन्येव मायया नरवद्बृंहिताकारं इदं दृश्यं व्यवस्थितं ११ सम्यक् अधिष्ठानसन्मात्ररूपेणालोकिते सति क्वासिनत्येक
रूपे हेयोपादेये संकल्पनं विकल्पनं वा संभवतीत्यर्थः १२ अविनाशियत्स्वरूपं तदेव वस्तु नामेति प्रसिद्धो आत्मनश्च स्वरूपं एवंविधं अतस्त
न्मयो भवेत्यर्थः १३ परं निरतिशयानंदरूपं ब्रह्म १४ स्फुरति अन्तस्येति शेषः १५ तं तत्वरसं के भोगाः १६ मनोभोगः कामस्तद्दस्यः षडरयः १७ अ

न चेत्यमन्यन्नो चित्तं ब्रह्मैवेदं विजृंभते सर्वमेकं परं व्योम को मोक्षः कस्य बंधना १० ब्रह्मेदं बृंहिताकारं हृहृ हृद्व्यवस्थितं नानादृत्तमित
द्वित्वं भवात्मैवत्वमात्मना ११ सम्यगालोकितरूपे काष्ठपाषाणवाससां मनागपि न भेदोस्ति क्वासि संकल्पनोन्मुखः १२ आद्यंतेच
संत्यागं तत्स्वरूपमविनाशि यद् वस्तु नामात्मनश्चैव तन्मयो भव राघव १३ परं व्योमेदमखिलं जगत्स्थावरजंगमं सुखदुःखक्रमः कु
त्र किन्वरो भव राघव १४ द्वैताद्वैतसमुद्भूतैर्जरामरणविभ्रमैः स्फुरत्यात्माभिरात्मैव चित्रैरंब्धिव वीचिभिः १५ शुद्धमात्मानमालिंग्यति
ष्ठमं तत्स्थया धिया यः स्थितस्तं क आत्मेहं भोगा बंधयितुं क्षमाः १६ कृतस्फारविचारस्य मनोभोगादयोरयः मनागपि न भिंदंति शै
लं मंदानिला इव १७ अविचारिणमज्ञानं मूढमात्मापरायणं निगिरंती हृदुःखानि वक्का मत्स्यमिवाजलं १८ जगदात्मैव सकलम

स्व

विद्या नास्ति कुत्रचित् इति दृष्टिमवष्टभ्यैव दृश्यः स्थिरो भव १९ नानात्वमलिकल्पनासु न वस्तुतोंतर्नानाविधासु सरसीषु जलादिना
न्यत् इत्येकनिश्चयमयः पुरुषो विमुक्त इत्युच्यते समवलोकितसम्यगर्थः २० मोक्षोपायेषूपशमप्रकरणे सम्यक्ज्ञानलक्षणनि

३५४७

रूपणं सर्गः ७९ श्रीवसिष्ठ उवाच इदमंतः कल्पना भोगान्प्रति विवेकिनः पुरःस्थितानपि सदा स्पृहे वा न जायते १ श्रीरामाय

जलं जलान्निर्गतं अल्पजलस्थं वा १९ २० जलादि आदिपदात्तरंगफेनबुद्बुदादि जलात् नान्यत् यथेति शेषः इति विविच्य समवलोकितस
म्यगर्थस्तदेकनिश्चयप्रधानः पुरुषः आत्यंतिकचित्तनाशात् विमुक्त इत्युच्यते इत्यर्थः २० इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे
एकोनाशीतितमः सर्गः ७९ यस्मिन्विमर्शे सति हृदे दिव्यभोगेष्वपि स्पृहा नोदेत्यपि पुरःस्थेषु स विमर्शोत्र वर्ण्यते इदं वक्ष्यमाणं विमर्श
पदर्शनं पुरःस्थितानपि भोगान्प्रति स्पृहा न जायत एवेत्यन्वयः १

तत्रारोचक्षुषाद्दृष्टानिरूपेआलोचितेचक्षुरहंताभिनिवेशाज्जीवस्यसुखदुःखेदृश्यतेतत्रचक्षुःप्रतिस्वामितिवास्यवत्वहंतेतिविमर्शेनदुःखादिप्रसक्ति
रितिदर्शयातिचक्षुरिति॥ बलीवर्दएवभारवहनदुःखायनतस्यभारद्रव्यस्यचनायकःनह्यस्यबलीवर्दस्त्यर्थः २ स्वामित्वमपितस्यनचक्षुमात्रेकिं
तुकार्यकारणसंघातकामकर्मवासनातत्फलभेदेषत्रेतेअहंकारबुद्धिमनःप्राणपरंपरयाकथंचित्स्वत्वकोटिनिविष्टस्यकस्यचक्षुषःकदाचिद्दृनि
रूपसंप्रयोगेकावागणनाकुतोवास्यदुःखप्रसक्तिरित्याशयेनाहनयनेतिगर्दभेसेनांतर्गतरंकगर्दभे ३ स्वामित्वादेवततनिवारयितुमपिशक्य
मित्याशयेनाहरूपेति एतत्स्त्रीपुत्रादिसौंदर्यलक्षणंहिंसतिनाशयतिछांदसोविकरणव्यत्ययःहेअधममूढतम ४ प्रत्युतहिंकीदृशाःकृति
बध्यतेतत्राहयेनेति क्रूरेनिशितमतिःप्रातस्तत्कयेनांतर्गतेनचिदात्मनेवसम्यक्‌स्व्यानंसंख्याबाह्याभ्यंतरार्थप्राप्त्याक्रियतेयेनैवअस्वाअनात्म
भूताकोशपरंपराआत्मतादात्म्यासेरोपेणानुगम्यतेतदीयैः औदासीन्येनयथाप्राप्तार्थप्रकाशनलक्षणैःकर्मभिश्चरित्रैर्निबध्यतेअभ्यासेनसंब

चक्षुरालोकनायैवजीवस्तुसुखदुःखयोः भारायैवबलीवर्दोभोक्ताद्रव्यस्यनायकः २ नयनेरूपनिर्मग्नेक्षोभःकइवदेहिनः गार्दभेपल्वलेम
ग्नेकेवसेनापतेःक्षतिः ३ रूपकर्दमसेतन्मानयनास्वादयाधम नयत्येतन्निमेषेणभवंतमपिहिंसति ४ येनैवसंख्याक्रियतेयेनैवास्वानुगम्य
ते तदीयैःकर्मभिःक्षिप्रंप्रातःक्रूरेनिबध्यते ५ उत्पन्नध्वंसिचापातमात्रतद्घनसन्मयं रूपमाश्रयमानेत्रविनाशायाविनाशिने ६ सा
क्षिवस्थस्तिष्ठितंनेत्ररूपमात्मनितिष्ठति आलोकंकालवशात्त्वमेकंकिंप्रतप्यसे ७ सलिलस्यंदवद्दृष्टिःपिच्छिकेवांबरोत्थिता सुजातिबधा
स्फुरतितत्रचितकिमागतं ८

ध्यतेनमूढरूपकर्दमास्वादनकर्मभिस्तथाचत्वमप्युदासीनंसतद्रूपंप्रकाशयनतुतदास्वादयेत्यर्थः ५ उत्पन्नध्वंसि
आपातमात्ररम्यंचेतिविशेषणे असन्मयमित्यस्योपपत्तयेअविनाशिनेअनिवार्याय विनाशायमृत्युमुखप्रवेशाय ६ किंचरूपविषयेसदासर्वार्थ
प्रकाशनेनिरपेक्षसमर्थेपिपरमात्मनिउदासीनेस्थितेसतिहेनेत्रकालवशातःकदाचिद्देवदीपाद्यालोकंप्राप्यप्रकाशयत्त्वमेवैकंकिमर्थंप्रतप्यसेअ
तस्त्वमपिसाक्षिवत्तिष्ठतंसतद्रूपंपश्येत्यर्थः ७ इदानींचक्षुषाभ्रांत्यारूपेआलोकितेपिचित्तस्यतदभिनिवेशहेतुनास्तीत्याहसलिलेतिहेचित्त इयंदि
चित्ररूपदृष्टिःनद्यादिसलिलेनानाविधानियतस्यंदवैचित्र्यवदनियताअंबरेस्वर्गलोकाभिमुखसाश्रुनेत्रनिरीक्षितामयूरपिच्छिकेवमिथ्याभूताच
गौरयमश्वोयंस्त्रीपिंडोयमित्येवंनानाविधसुजातिदुर्जातिविकल्पानुबंधाच्चक्षुषःस्फुरतितत्रतवकिमागतंयेनत्वंस्व्यसेतप्यसेवेत्यर्थः ८ श्रीरामः

चित्तवेतालेन लब्धेन आत्मना तदात्मभूतेन मया इदानीं स्वयं परमार्थात्मभूतोऽहं तान्विकारान् स्मृत्वा हसामीत्यर्थः ३५ निपातितः निपात्य वमारितः
३६ कामादिमत्तभावात् पवित्रां पदवीं इंद्रियद्वारमार्गं गतेऽपि ३७ समः निरस्तवैषम्यः सन् ३८ कलत्रं पोष्यवर्गः ३९ इदानीं परिच्छिन्नं निरतिशा
यानन्नमस्यतिए कस्मैइत्यादिना ४० अहं अहं अहमभिमानप्रधानजडांत्राः नैव न चैव नाहं अहंकारप्रत्यक् चिदात्मा नेति च न ४१ ४२ आत्मा
आत्मशब्दप्रत्ययविषयोन तथा च बृहदारण्यकभाष्ये तद्वार्तिके च आत्मेत्येवोपासीतेत्यत्र इतिशब्द आत्मशब्दप्रत्ययविषयत्वनिवारणा
र्थं इत्युक्तं न वा अन्यः अनात्मा अहं कोन्यस्तत्वेदृशः संभाव्यते यदहं स्यां एवमहंशब्दप्रत्ययविषयस्तदितरश्च नाहं एवं च स्वेतराप्रसिद्धेः स्वयमेव सर्वमि

चित्तवेतालल ब्धेन चिरंकालं मया आत्मना कृता विकाराविविधाः स्वयं स्मृत्वा हसाम्यहं ३५ चिरान्निपातितो दिष्ट्या विचारासिप्रहारितः लद्देहाचि
तवेतालस्तालोत्तालसमुन्नतिः ३६ प्रसंगं ते चित्तवेतालेऽपवित्रां पदवीं गते दिष्ट्या शरीरनगरे सुखं तिष्ठामि केवलं ३७ मत्तं मनो मत्तमातंगं नाम्न
तोऽहंकारराक्षसः विचारमंत्रेण समः स्वस्थोऽस्मि तिष्ठामि केवलं ३८ किं मनो मे ममाशा का को मेऽहंकारको भवेत् दिष्ट्या व्यर्थकलत्रं मे नष्टमेत
द्दशेषतः ३९ एकस्मै कूलकूटस्थाय नित्याय विमलात्मने निर्विकल्पचिदाख्याय मह्यमेव नमो नमः ४० नत्वोऽको ऽस्ति न मोहोऽस्ति न चैवाहमहं स्व
यं न च नाहं न चान्योऽहं मह्यमेव नमो नमः ४१ न मे माशा न कर्माणि न संसारो न कर्तृता न भोक्तृता न देहो मे मह्यमेव नमो नमः ४२ नाहमात्मा
न वा कोऽन्यो नाहमस्मि न चेतरः सर्वमेवाहमेतत्स्मै मह्यमेव नमो नमः ४३ अहमादिरहं धाता चिरहं भुवनान्यहं मम नास्ति व्यवच्छेदो मह्यमेव नमो
नमः ४४ निर्विकारस्वनित्याय निरंशाय महात्मने सर्वस्मै सर्वकालाय मह्यमेव नमो नमः ४५ नीरूपाय निराख्याय प्रकाशाय महात्मने स्वय
मात्मैकसंस्थाय मह्यमेव नमो नमः ४६ समां सर्वगतां सूक्ष्मां जगदेकप्रकाशिनीं सत्तामुपगतो स्म्यंतर्मह्यमेव नमो नमः ४७ साध्यवस्तु वानदीसे
पं नाहमेवाहमेव च जगत्सर्वपरार्थाय मह्यमेव नमो नमः ४८ व्यपगतमननं समाभिरामं प्रकटितविभ्रमरूपमप्यनंतं स्वयमजमजरं गुणा
दतीतं वपुरहमहमच्युतमीश्वरं नमामि ४९ ।मिति सर्वमेवाहमित्यर्थः ४३ आदिर्भुवनानां कारणं धाता धारयिता व्यवच्छेदस्त्रिविधपरिच्छेदः
४४ सर्वकालाय सनातनाय ४५ ४६ ४७ अद्ययश्च अध्ययश्च तु र्वाचन यश्च तैः सहितासा प्रसिद्धा स्यं वर्तमाना दृश्य श्रीर्नाहं एवमतीतानागतपदा
र्थं इदं जगत्सर्वमपि नाहमहमेव वेति योज्यं ४९ व्यपगतानि मननानि मनोविकल्पा यस्मात् अत एव समाभिरामं प्रकटितविभ्रमं अनंतं अच्युतं कुतः ३६

वा॰टी॰ उप॰
१७०

इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेअशीतितमःसर्गः ८० यत्नैःप्राक्चित्तवेतालोदेहगेहाद्विवासितः इहानुभवयुक्तिभ्यांचित्तास
त्तोपपद्यते आत्मातेयः अकल्पनातव्य इतिविचारतत्वविद्भिःपुनरत्थंवक्ष्यमाणप्रकारेणविचार्यनैवचित्तमितिशेषः १ येनचित्तेनआत्मैवेदमिति
बोधेनजगन्मार्जितंतच्चित्तंकुतउत्थितंस्यात्यत्जगदंनःपातेनस्वयमप्यवस्तुअहोइत्याश्चर्ये २ अवस्तुत्वमेवसाधयतिअवद्यत्वादिति ज
उत्वाच्चितांतरश्रन्यत्वान्मायाकार्यत्वाच्चएवंनिश्चयेनचित्तंनास्त्येवेत्यसदेवअथवाअसत्सवद्भ्रमादेवान्यद्भूत्वातत्तुशशदुःखमिवास्मैवतदित्य
र्थः ३ यथानौकागतस्यबालस्यस्थाणुपरिस्पंदोभ्रांतिमात्रसिद्धस्तद्वद्बुद्धस्यचित्तासिद्धमपिबुद्धस्यात्मविदोनसिद्धंकिंत्वसन्मयमेवेत्य

उपशम
मोक्षोपायेषूपशमप्रकरणेदृश्यदर्शनसंबंधःसर्गः ८१ श्रीवसिष्ठउवाच एवंविचार्यबुद्ध्यांतःपुनरित्थंविचार्यते तत्वविद्भिर्महा
बाहो तेयआत्मामहात्मभिः १ आत्मैवेदंजगदितिसत्यांचित्तेनमार्जितं उत्थितंस्यात्कुतश्चित्तमहोचित्रमवस्तुयत् २ अवद्यत्वादवि
चित्तस्यत्वान्मायात्वाच्चासदेवहि एवंनास्त्येववाचित्तंभ्रमादन्यत्स्वरूपवत् ३ सिद्धंस्थाणुपरिस्पंदोनौगतस्ययथाशिशोः अबुद्धस्यन
बुद्धस्यन तथाचित्तमसन्मयं ४ मोक्ष्यमोहभ्रमेशांतेचित्तंनोपलभामहे चक्रारोहभ्रमस्यांतेपर्वतस्पंदनंयथा ५ एवंहिचित्तंनास्त्ये
वब्रह्मैवास्तितथात्मकं पदार्थभावनाश्चिंतातेनासत्यामयोज्झिताः ६ जातोस्मिशांतसंदेहःस्थितोस्मिविगतज्वरः यथातिष्ठामिति
ष्ठामितथैवविगतैषणः ७ चिंताभावेपरिक्षीणाबाल्यतःप्रमादयोगुणाः आलोकोपरमेचित्रोवर्णाख्याइवसंविदः ८ मनश्चित्तंगतात
त्स्मात्प्रक्षीणोमोहपंजरः निरहंकारताज्ञानाज्जाग्रत्यस्मिन्प्रबुद्धवान् ९ एकमेवजगत्क्षांतंनानात्वंनसदत्यपि किमन्याद्भिरन्याभ्यंतः
कथयेवालमेतया १० निराभासमनाद्यंतंपरंपावनमागतः सौम्यःसर्वगतःसूक्ष्मःस्थितआत्मास्मिशाश्वतः ११ (र्थः ४ तैलेष्वादियंत्रच

क्रारोहणप्रयुक्तभ्रमस्यांतेतदवरोहणोत्तरमित्यर्थः ५ यतोबाह्याभ्यंतरपदार्थभावनाः असतश्चिंताप्रस्थतास्तेनहेतुनाअसत्याइतिम
यामयाउज्झिताः ६ यथायेनपारमार्थिकस्वभावेनातिष्ठामितथैवेदानींस्वानुभवेनापितिष्ठामिनान्यथाभूतइत्यर्थः ७ बाल्यंबालस्यकर्मचा
पलंवर्णाकृत्यादिष्वितिहस्तारूपभेदानाख्यांतिप्रथयंतितथाविधाश्चासुप्तसंविदइव ८ अस्मिन्नहमात्मनिजाग्रतिअपगताज्ञाननिद्रेसति
अहंप्रबुद्धवान्स्वाभाविकंस्वरूपमित्यर्थः ९ जगत्क्षांतंसत्एकंब्रह्मैव एतयाअसद्विषयिण्याकथयेवालंप्रयोजनंनास्तीत्यर्थः १० निर्ग

अस्तु वा चित्ते चक्षुर्दृष्टार्थाकारवृत्तिस्तथाप्यभिनिवेशहेतोरहंकारस्य निमित्तं नास्तीत्याह कल्पेति स्वयं रूपाद्याकारः स्फुरतु नाम अयमहंकारस्त्वं कुतः प्रो
त्थितः ९ किंच स्त्रीपिंडादिलक्षणं रूपं स्वरूपं यद्यालोकमाश्रित्य स्फुरति स यालोकश्च पिंडाश्रित इत्यन्योन्यसंयोगे सौंदर्यभ्रांत्या कामादिना चित्तस्य व्याकुलता
प्रसिद्धा सा च तयोश्चित्तेनासंबंधाद्व्यर्थेत्यर्थः १० असंबंधमेव दृष्टांतेन स्फुटयति निरूपेति चक्षुषा बहिः रूपालोकनं मनसा चांतः संकल्पादयो मनस्कारा इ
ति भिन्नदेशत्वाद्देवेतिभावः संपन्नाः संलग्नाइव ११ तत्संलग्नताभ्रांतौ चाज्ञानेन जतुनाभिव्याप्तस आत्मैव निमित्तमित्याह अज्ञानेनेति पृथक् विश्लिष्टा स्तब्ध
सन्मयाबाधिताः संतः अधिष्ठानमात्रपरिशेषेण तिष्ठंति १२ दारुणी काष्ठे जतुनालाक्षया १३ स्वमनोमननमेव तंतुः काष्ठाकारवंतु वल्कबंधनं स च मं

कल्पाभसीव शफरी चित्ते स्फुरणधर्मिणि स्वयं स्फुरत्यहंकारस्त्वमयं प्रोत्थितः कुतः ९ आलोकरूपयोर्नित्यं जडयोः स्फुरतोर्मिथः आधाराधेय
योश्चित्तव्यर्थमाकुलता तव १० रूपालोकमनस्काराः परस्परमसंगिनः संपन्ना इव लक्ष्यंते वदनादर्शबिंबवत् ११ अज्ञानजतुनाल्येते श्लिष्टा
ज्ञाननिरंतराः अज्ञाने ज्ञानगलिते पृथक्तिष्ठंत्यसन्मयाः १२ मनःकल्पनयात्येते सुसंबद्धाः परस्परं रूपालोकमनस्कारा दारुणी जतुना य
था १३ स्वमनोमननं तंतुर्मनोभ्यासेन यत्नतः विचारच्छेदमायाति छिन्ने वाज्ञानभावना १४ अज्ञानसंक्षयात्क्षीणे मनसीमे पुनर्मिथः रूपा
लोकमनस्काराः संघट्टं तेन केचन १५ सर्वेषां चित्तमेवांतरिंद्रियाणां प्रबोधकं तदेव तस्मादुच्छेद्यं पिशाच इव मंदिरात् १६ चित्तवत्त्वासि मिथ्येव
दृष्टेनाभवतो मया आद्यंतयोः सुतुच्छे त्वं वर्तमाने विनश्यसि १७ मुधा पंचभिराकारैः किमंतः परिवल्गसि यस्त्वां स्वमिति जानाति तस्यैव परिव
ल्गसि १८ त्वं हृद्ज्ञानमेकं मनो न मनागपि तुष्टये माया मनः स्यदेवं व्यर्थं वृत्तिमुदस्यसे १९ इदमस्याध्यात्माधिकारिणो वैराग्यशमदमनिरोधा

दिमनोभ्यासेन यत्नतो विचारच्छेदमायाति मुख्याधिकारिणस्तु सह सोत्पन्नज्ञानेन तस्मिंश्छिन्ने सति स्वभावत एव विषयांतरापरिशेषादात्मतानुभा
वेनैव प्रवर्तत इत्यर्थः १४ तत्र द्वितीयस्यानायास इत्याह अज्ञानेति १५ प्रथमेन तु यत्नेन चित्तमुच्छेद्यमित्याह सर्वेषामिति १६ इदानीं चित्तमेव संबोध
यति चित्तेत्यादिना अंतः बोधोपायः यतः आद्यंतयोः सुतुच्छे अतो वर्तमानकालेपि विनश्यसि असदासि न हि पूर्वापरकालयोस्तुच्छो वंध्यापुत्रो वर्तमान
काले सन्भवतीत्यर्थः १७ पंचभिरिंद्रियोपनीतैः शब्दाद्याकारैः यस्त्वदभिमानी प्रमाता त्वां स्वं मदीयमिति जानाति तस्यैव त्वं तदुपकरणतया परिवल्गसि न त्व
संगोदासीनविदेकरसस्य ममेत्यर्थः १८ तुष्टिग्रहणं विषादस्याप्युपलक्षणं ऐंद्रजालिकमायाप्रयुक्तं मनसः नानाविषयदर्शनाकारस्यंदवत् १९

प्रकृत्या स्वीयमिथ्यास्वभावेनैव मृतं निरात्मकमसि विचारानुत्तथास्तु तं सतत्सुमृतं अत्यंतासदसीत्यर्थः २० २१ एतावत्कालं वयं त्वां मृतं भवत् नैरात्म्ये नवर्तमानं अज्ञातवंतो न ज्ञातवंतः अद्य आत्मतत्त्वदर्शनकाले २२ साधवः शमदमादयः एव सज्जना मम आसीरिति शेषः २४ हे जगद्रूपचित्तकेतालेश्वर त्वं पूर्वमेव नासी संप्रति च नास्येव अग्रे च न भविष्यसि एवं मया कालत्रयेनिषिध्यमानोपि इदानीमत्र स्थातुं किं न लज्जसे अहो गतवनिर्लज्जेत्यर्थः २५ यदि सकृज्ज्ञोसि तर्हि निर्गछेत्याह सहेति २६ २७ चित्तवंचितजनाननुशोचति अहोस्विति २८ जनानां मध्ये मृतं मरणधर्मकं देहात्मर

तिष्ठ वा गच्छ वा बितनासि मे न च जीवसि प्रकृत्यासि मृतं नित्यं विचारात्सुमृतं मृतं २० निस्तत्त्वं त्वं जडं भ्रांतं शठ नित्यमृता कृते मूढ एव तत्पातेन बाध्यो न प्रविचारवान् २१ वयमज्ञातयंतस्त्वां मौर्ख्येणाशुमृतं भवत् मृतमस्माकमद्यासि दीपानां तिमिरं यथा २२ शठेन भवता दीर्घकालं देहगृहं मम उपरुद्धमभूत्सर्वं साधुसंसर्गवर्जितं २३ जडे प्रेतसमाकारे गते त्वयि मनःशठे सर्वसज्जनसंसेव्यमिदं देहगृहं मम २४ पूर्वमेवासि नासीस्त्वं संप्रत्येवत्वराद्य जगत् न भविष्यसि चेदानीं वेताल किं न लज्जसे २५ सह तृष्णापिशाचीभिः सह कोपादि गुह्यकैः निर्गछ चित्तवेताल शरीरसदनान्मम २६ दिष्ट्या विवेकमात्रेण निर्गतो देहमंदिरात् प्रमत्तश्चित्तवेतालः कुवृकः कंदरादिव २७ अहो नु चित्रं सुमहज्जडे क्षणनभंगिना मनःशठेन सर्वेयं नीतो विवशतां जनः २८ कस्ते पराक्रमः किं ते बलं कस्ते समाश्रयः यदि विलासि मामेकं जनानां बाधसे मृतं २९ सर्वथैवासि न मया दिनचित्त कमार्यसे मृतमिथ्यात्वबुद्धत्वमद्य केवलमत्तह ३० एतावंतमहं कालं त्वां ताताजीवदास्थिति स्थिष्टप्रभृत संगास्क चिरं संसृति रात्रिषु ३१ चित्तं मृतं हि नास्तीदमिस्यद्याधिगतं मया तेन त्वदाशां संत्यज्य तिष्ठाम्यात्मनि केवलं ३२ दिष्ट्या चित्तं मृतमिति ज्ञातमद्य मया स्वयं नष्टशठेन समं नेयं समग्रं जीवितं निजं ३३ उत्सार्य देहसदनान्मनःशठमहं क्षणात् अहं स्वस्थः स्थितोस्म्यंतर्वेताल परिवर्जितः ३४

स्मात्खतो मृतं बाधसे अयं कस्ते पराक्रमः एकं अद्वितीयात्मभूतं मां प्रतियदि विलासि आगंतुं शक्नोषि न दा ते पराक्रम इति शेषः २९ हे दीन अस्ते दीन चित्तकमथा याअ घनुमार्यसे यतः पूर्वमेव सर्वथैव त्वं मृतमिति अवबुद्धं अयमेव बधः इत्यर्थः ३० जीवदास्थिति जीवतः स्वआस्थितिः स्वरूपसत्तायस्य तथाविधं सत्त्वाम्नि स्तस्त्वया सह ताशात्म्येन संगतः ३१ ३२ बाधोत्तरं जीवन्मुक्तानां निश्चित्तमेवायुः शेषं नयन मुचितमित्याह नष्टशठेनेति ३३ शठानां कामक्रोधलोभमोहानां महत्त्वसंमृतं मनः

यल्लोके व्यवहारदृशा वितादिशंकति दृशाच आत्मब्रह्मचैतन्यादिचु अस्तीति च प्रसिद्धं यच्च रज्जुसर्पादि वंध्यापुत्रादि च नास्ति प्रसिद्धं वस्तुवस्तु च तत्सर्वं रवा
द्याकाशादप्यच्छतरं निर्मलतरं अयाल्लक्ष्यप्रकाशं ब्रह्मैवाततं तस्मिन्नेव सदसद्रूपविकल्पारोपादित्यर्थः १२ १३ अहं एतावत्कालं मौर्ख्यात् विचारस्य अ
कारकः अकर्तासन् अमितस्थितिः परिच्छिन्नदेहादिस्वभावः आसं संप्रति विचारेण अमिताकारः सन् विचारकः अहं कनामगतइति न निरूपयितुं शक्य इत्य
र्थः १४ मनसि संसति विचारको स्लिन्नवेति विकल्पश्रीरपि निरर्थिका मनोवेतालस्य स्वस्यर्थं पुनर्जीवनार्थं किमुपजायते अतस्तामिमां प्रजहामीति परेण
संबंधः १५ ओमिति ॐकारलक्ष्ये तुरीये आत्मनि मौनवदिति स्थितिक्रियादृष्टांतः १६ कृतं विचारमुपसंहरंस्तस्य सदैवकर्तव्यतामाह अश्नन्निति

यदस्ति यच्च नास्तीह वितताद्यात्साधवस्तु च तत्खादच्छतरं शांतमनंतायासमाततं १२ चित्तं भवतु मावांतात्स्थिपतां स्थितिमेतु वा को विचार
णया धर्मश्चिरं साम्योदितात्मनः १३ विचाराकारको मौर्ख्यादहमासममितस्थितिः विचारेणामिताकारः कनामाहं विचारकः १४ मतेयिम
नसीयं मे विकल्पश्रीनिरर्थिका मनोवेतालवत्स्यर्थं किमर्थमुपजायते १५ तामिमां प्रजहाम्यंतः संकल्पकलनामिति निर्णीयोमिति शांता
त्मातिष्ठाम्यात्मनि मौनवत् १६ अश्नन्नाछन्स्वपंस्तिष्ठन्निति राघव चेतसा सर्वत्र सयातन्तः प्रत्यहं प्रविचारयेत् १७ प्रविचार्य स्वसंस्थेन स्वस्थेन स्व
च्चेतसा तिष्ठंति विगतोद्वेगं संतः प्रकृतकर्मसु १८ विगतमानमदा मुदिताशयाः शरदुपोढशशांकसमत्विषः प्रकृतसंव्यवहारविहारिण
स्त्विह सुखं विहरंति महाधियः १९ मोक्षोपायेषु पञ्चाम प्रकणे चिन्ताप्रतिपादनं सर्गः ८१ श्रीवसिष्ठ उवाच विचार एवं विदुषा संवर्तेनि कृ
तः पुरा कथितो मम विंध्याद्रौ तेनैव विदितात्मना १ एतां दृष्टिमवष्टभ्य विचारपरयाधिया संसारसागरादस्मात्तारतम्येन संतर २ अथेमाम
परां राम भ्रणु दृष्टिपरंपरां मुनिना वीतहव्येन यथास्थितमशंकितं ३

१ यथाहः गच्छंस्तिष्ठंतो वापि जाग्रतः स्वपतोपि वा न विचारपरं चेतो य
स्यासौ मृत उच्यते इति १७ प्रकृतकर्मसु स्ववर्णाश्रमोचिताचारेषु १८ शरदा उपोढेन शशांकेन समा त्विट् प्रसन्नमुखकांतिर्येषां १९ इतिश्रीवासिष्ठ
तात्पर्यप्रकाशे एकाशीतितमः सर्गः ८१ इहेंद्रियाणि च मनो व्यर्थचेष्टादिहेतुभिः वीतहव्येन बोध्यंते आत्मेकाम्यप्रसिद्धये कृतस्य विचारस्य सांप्रदा
यिकत्वं दर्शयति विचार इति संवर्तेन रहस्यति श्रात्त्रा १ तारतम्येन उत्तरोत्तरचित्तविश्रांतिप्रकर्षपरिपाकप्रयुक्तभूमिकारोहणक्रमेण २ अपरां इं
द्रियमनःप्रबोधनरूपां यया दृष्ट्या वीतहव्येन मुनिना अशंकितं निःशंकं परमास्थितमधिरूढमित्यर्थः यथेतिपाठे येन प्रकारेण ३ श्रीरामाय नमः

३६९५

विंध्यशैलदरीः समाध्यनुकूलाः अन्वेषमाणो विभ्राम ४ कुतस्तस्य समाधीच्छाभूत्तत्राह अस्मादिति ५ जहारत् उपसंजहार सन्यस्तवानिति यावत् ६ रं
भारचितं कल्हारलीदलनिर्मितं कृतगौराः श्वेताः पीताश्च कर्पूराः परागाश्च येन अत एव स्फसौगंध्यं ७ तां तेन शिलापेष्ठचलेशास्य हिमवतो नेप्रांते
वा ८ पाष्णीः पादतलमूलयोरधिउपरि करांगुलयो यस्य तथाविधः सन् असमर्थसमासश्छांदसः स्पष्टकंधरं ऊर्ध्वीकृतग्रीवं यथास्यात्तथा ९
रिस्तुट् द्रियालोकान्त्रिमित्तोद्धिकीर्णंमनस्तन्निग्रहोपायेन जहार तत् यपसंजहारशनैर्वक्ष्यमाणप्रबोधनक्रमादित्यर्थः १० बाह्यानैंद्रियकानाभ्यं
तरान्मानसांश्च विषयस्पर्शान्परिजहार तत्यजन्मनेनाभ्यस्तात्छतुरितितु मिषेधः इदं वक्ष्यमाणमाकलयामास विचारयामास ११ तरंगैः प्रोदेनप्र

वीतहव्योमहातेजा विबभ्राम भवने पुरा विंध्यशैल दरीर्दीर्घा शविमेरुदरीरिव ५ अस्मात्क्रियाक्रमाद्घोरात्संसारभ्रमदापिनः आधिव्या
धिमयाकारात्काले नोद्वेगमापयो ५ निर्विकल्पसमाध्यंत्रालभ्यो दारपरेछया सजहारजगज्जीर्णांखिव्यापारपरंपरां ६ विरचितं भारचितं
तं निजपर्णीरजोंतरं कृतगौरं सुसौगंध्यमनिर्नलिमिवोत्पलं ७ तत्रासने समे शुद्धे स्वालीएहिरियानिने विश्राम्याभाचले शृंगे वीतवर्षइवां
बुदः ८ बद्धपद्मासनस्तस्थौ पाष्णीरधिकरांगुलिः शृंगवृच्छांतचलनमतिष्ठत्स्पष्टकंधरं ९ सजहारालमालोकाद्विविकीर्णंमनः शनैः वि
न्ध्यमेरुदरीसायं भानुर्भासिरवोत्करं १० बाह्यानाभ्यंतरांश्चैव स्पर्शान्परिजहत्क्रमात् इदमाकलयामास मनसा विगतैनसा ११ अहोनुचं
चलमिदं प्रत्याहृतमपि क्षणात् नमनः स्थैर्यमायाति तरंगप्रोरुपर्णवत् १२ चक्षुरादिभिरुद्दामै रूपेराहितसंभ्रमैः अजस्रमुसेतत्येव वी
देवतलताडिता १३ त्यजदेवानुरज्यति शनैरिंद्रियवर्द्धिताः यस्मान्निवार्यते तस्मिन्प्राम्मत इव धावति १४ घयत्स्पर्शमुपायाति घटाच्छक
टमुत्करं चित्तमर्थेषु चरति पादपे विवमर्कटः १५ पंचद्वाराणि मनसश्चक्षुरादीन्यमून्यलं दर्पेंद्रियाभिधानानि तावदालोकयाम्यहं १६ हेहेह
तेंद्रियगणाः किम्मे बोधायनेहवः वेलाविलुलितांबूना मब्धिनामिवचंचलाः १७ ग्राहितेन पर्णेन तुल्यं तरंगप्रोरुपर्णवत् १२ चक्षुरादिभिराहि
तसंभ्रमैर्नानाविषयरूपैर्निमित्तैरजस्रनतिन त्यति वीटाकं दुक इव १३ पूर्वपूर्ववृत्तिस्त्यजदेवतदनुसारिणी अनरोत्तरवृत्तीर्ग्रहाति १४ १५ ए
वं चित्तदोषानालोच्य तन्निर्गमद्वाराण्यालोचितवानित्याह पंचेति दर्पधत्ताः मोर्निदार्थः छांदसत्वात्कुत्सितानि कुत्सने रिति समासो नाश्रितः १६ १७

इदानीमिंद्रियाण्येव निर्भर्त्स्य बोधयति हेहे इति हे चंचलाः हतेंद्रियगणाः मेममबोधाय समाधिनाचिरं आत्मदर्शनाय वः वेलावसरोनास्ति किं

यूयं मनस एव द्वारभेदेन कल्पितानि खरूपाणि जडेलडयोरभेदाज्जलेचउत्सिक्तनातरंगोत्सेकवत्तेवव्यर्थं वल्गति १९ असारात्मअनन्तंरखरूपंये षां तथाविधानां भवतां अनालोकवतां आत्मज्ञानशून्यानां यासमुद्भूति र्दुर्विनयादमार्गप्रवृत्तिः सेयं अंधानां सादृश्याय नुपमार्थमेवजायते अमार्गधावतामंधानां कूपे पातस्योपमाजायत इत्यर्थः २० यदिवयं जडाः कस्तर्हि दिवानादिनासर्वव्यवहारं करोतित्तत्राह चिदात्मेति २१ नो रूपाःसत्यखरूपशून्याः २२ येन साक्षिणा बहुत्वेन सर्वावभासकेन नयनादयः परिज्ञाता स्तेन सह एषांमनागपि संबाधो नास्ति द्युपातालयो र्लताद्रिभ्यां दिवो वा पाताल तलाद्विभिस्तद्वदित्यर्थः २३ चिन्मात्रं विदेकरसः प्रत्यगात्मा पराग्भ्य इंद्रियेभ्यो दूरं तिष्ठति परां चिरख्यानिव्यत एतत्स्वयं

माकुरुध्वमनर्थाय चापलं चपलाशयाः स्मरतातीतवृत्तीनि दुःखजालानि भूरिशः १९ रूपाणि मनसो यूयं जडा एव किलाधमाः जडेत्त त्सिक्तवाव्यर्थं मृगतृष्णेव वल्गति १९ असारात्मस्वरूपाणामनालोकवतां सदा अंधानामुद्भूतिर्येयं सादृश्यायैव जायते २० चिदात्मा भगवन्सर्वसाक्षित्वेन करोम्यहं हतेंद्रियगणा यूयं किं निरर्थकमाकुलाः २१ मिथ्येवमेवि वल्गति नीरूपा नयनादयः अलातचक्रप्रतिमाः सर्परज्जुभ्रमोपमाः २२ तेनात्मना बहुत्वेन निर्ज्ञाताश्चक्षुरादयः मनागपि न संबंधो द्युपातालतलादिवत् २३ भीतः पांथ इवाहिभ्यः पुल्कसेभ्य इव द्विजः दूरे तिष्ठति चिन्मात्रमिंद्रियेभ्यस्त्वनामयं २४ चित्तजामात्रकेणालं संक्षोभो भवतो मिथः तिष्ठति स्वैरमादित्ये दिने कार्यवतामिव २५ चित्तेचारए चार्वाक चतुर्दिक्कुक्षिभिक्षुक स्वैवव्यर्थमनर्थाय मैवं विहर हे जगत् २६ अहं चिद्वृत्तिव्यर्थ मसत्यात तवासना अत्यंतभिन्नयोरैक्यं नास्ति चिन्मनसोः शठ २७ जीवाम्येवाहमित्येषा तवाहंकार दुर्मतिः मिथ्येवज्ञानाद्दुःखाय नसत्या सत्यवर्जिता २८ अहंकारस्येसोस्मीत्येतां संरब्धतां त्यज न किंचिदपि मूर्खत्वं किं व्यर्थं तरलायसे २९ (भूरिति श्रुतेरिति भावः २४ तर्हि

कथमिंद्रियव्यापारे आत्मनो निमित्तताप्रसिद्धिस्तत्राह चित्तजेति दिनकार्याणि श्राद्धकृष्यादीनि तद्वतां २५ इदानीं चित्तं संबोध्य बोधयति चित्तेत्यादिना इंद्रियाणां बहिर्मुखतया प्रचारहेतुत्वाच्चारएदेहात्माभिमानित्वाच्चार्वाक चतसृषु दिक्षु कुक्षिभरणाय भिक्षुक २६ चिद्वृत्तेचेतनमिति वासना श्रांतिः २७ न सत्येति न ह्यहंकाराधीनं जीवनं सत्यं असत्यपि तस्मिन्सुषुप्तौ जीवनदर्शनात् इतोपि मिथ्यैव सा यतः सत्ये नापरमात्मना वर्जिता न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवति यस्मिन्नेतावुपाश्रिताविति श्रुतेरित्यर्थः २८ अहंकारस्य अभिमानाख्यपरिणामस्य त

तवैवस्वरूपंदुर्लभंत्वयाअभिमानेनान्यूरक्षणंतुदूरनिरस्तमित्याशयेनाहसंविदिति ३० परिणामेविषपर्यवसानाभोगकालेरसायनवदुत्थि
ता ३१ इंद्रियगणानामाश्रयंकृत्वेतिशेषः अन्ये नसाक्षिणा ३२ भोगानुभवशक्तिश्चान्यस्यजडस्यामिथ्याभूतस्यचनत्वभोगाशाष्यर्थेत्याहक
त्वमिति ३३ आत्मैवतेनास्तीत्येतदुपपादयतियदिति सतपरसत्तावृत्त्यादिघुमानतयाभासमानमेवस्फटिकलौहित्यमिवस्वतः असत्तयान्वितंतत्
त्वंचकर्तृत्वंचभोक्तृत्वंचमन्यसेपूर्वापरमनुसंधत्सेइतिमन्यसेतच्चतेषांचैतन्यमंतरेणासंभवात् ३४ तर्ह्यहंप्रत्यक्चेतनरूपमेवकिंनस्यामितिचे
तर्हितवसदानिर्विकल्पेवास्थितिर्युक्तानतुदुःखदाकर्तृत्वभोक्तृत्वभावाभावविकल्पमयीत्याहप्रत्यगिति नचसर्वाकेविल्पत्यागश्चित्तनातवा

संविच्चित्त्वमनाद्यंतंसंविदन्यन्नविद्यते देहेस्मिंस्तन्महामूर्खकिंत्वंस्याश्चितनामकं ३० विषपर्यवसानेयंरसायनवदुत्थिता भोक्तृता
कर्तृतानाशंकावृतचित्तसुधैवहि ३१ सोपहासोपदंगछमूर्खेंद्रियगणाश्रयं नकर्ताहंनभोक्तात्वंजडोस्यन्येनबोध्यसे ३२ कुतस्त्वंभवसि
भोगानांकेवाभोगाभवंतिते जडस्यात्मैवतेनास्तिबंधुमित्रादितःकुतः ३३ यज्जडंतद्विनास्त्येवसदेवासत्तयान्वितं तत्वकर्तृत्वभोक्तृत्व
मन्यसेतानासंभवात् ३४ प्रत्यक्चेतनरूपश्चेत्त्वंतदात्मैवतेवपुः भावाभावमयीचित्तसंततेकेवदुःखदा ३५ यथाकर्तृत्वभोक्तृत्वेमिथ्ये
वाधिगतेत्वया मयातेहिप्रमार्ज्यंतेभ्रष्टयुक्त्याकथंत्वानैः ३६ स्वयंत्ताचृड्वानेषजडोनास्त्यत्रसंशयः जडस्यकीदृक्कर्तृत्वंनरत्यंनाहकथं
शिलाः ३७ उपजीवचिरंतस्मात्त्वंतद्भागमैश्वरं जीवसीहसिहंसित्वंदृष्टायासिविवल्गसि ३८ क्रियतेयत्तुपुत्रत्वयोसतेनैवकृतंभवेत्
त्वनर्गीदाश्वंपुंशक्त्याज्ञावकःप्रोच्यतेपुमान् ३९ हन्यतेयस्तुपुत्रत्वयोसतेनैवहतोभवेत् निहंतिखड्गःपुंशक्त्याहंनैवप्रोच्यतेपुमान् ४० पी
ति
य
पीयतेयत्तुयच्छत्वयापीतंतेनैवतद्भवेत् पात्रेणपीतेपानंपातायस्तूच्यतेनरः ४१ प्रकृत्येवासिसुजडःसमस्तंतेनबोध्यसे तेनात्मैवात्म
नात्मानंचिनोतीदंहिनो

स्तीतिभावः ३५ अचेतनत्वेतुभयत्लेनैवकर्तृत्वादिकंप्रमार्जितुंशक्यमित्याहयथेति ३६ शिलाःशिलापुत्रिकाः ३७ य
दिवृक्षेकाष्ठप्रतिमाचेतनव्यापारमुपजीव्यनर्त्यंताहृष्येतितर्हित्वमपितद्वैश्वरंचिदाभासभोगंउपजीवतथाचप्रतिमानर्त्यफलभोक्तायथाचेत
एवनप्रतिमातथात्वंत्वत्कृतजीवनादिफलभोक्ताचिदात्मैवेतित्वंवृथाजीवनायुधीधावसीत्यर्थः ३८ दात्रंशंकुला ३९ पुमानेवहंताप्रोच्यतइ
त्यन्वयः ४० यस्तुनरःसएवपातातुच्यतेनपात्रं ४१ चिनोतिभोक्तृभोग्यकरणोपकरण्यादिभावेनस्वप्नइवसंचिनोति भवच्छब्दस्यसर्वनाम्नो
नपुंसकेभवदितिरूप ४२ ॥

बोधयतिचिदाभासव्याप्त्यास्फोरयतियुक्तंचैतदित्याहबोधनीयाइति ४३ अतएवबोधसत्ताधीनत्तवनामरूपाभ्यामात्मलाभइत्याह आ-
त्मेति ४४ तथाचात्मैवस्वात्तानानात्वमिवसंपन्नःस्वज्ञानेनत्वज्ञावानमुच्यतइत्याह एवमिति विगलितंभावेक्तः ४५ तदात्मैवाहमितितादात्म्यं
ध्यासोमास्तुअसुखायजनादिदुःखाय ४६ आत्मत्वंअंगस्वरूपं ४७ शक्तिश्चिदेकत्तिसंवलितामायाअतएवबेलेव ४८ हेमहेत्वंआत्मतत्त्वबो
धाच्चिन्मयपुष्पेद्भवेः नतर्हिचित्तोभेदकारणाभावात्परमात्मपदान्नित्यमव्यतिरिक्तएव ४९ नदाश्नभासविषयाभावादनुत्तोकोनिर्विषयोनसंभा
व्यइत्याशयेनाहसर्वगामितिसर्वेषुतीतानागतभावेषपिस्थितंकालकृतपरिछेदशून्यमितियावत् ५० तथात्वंपश्यद्भातिछंदसःपुरुषव्य

अनारतंबोधयतित्वामात्मापरमेश्वरः बोधनीयाबुधैर्मदःकिलावृत्तिज्ञातैरपि ४३ आत्मसत्तैवबोधैकरूपिणीस्फुरतीहहि त
येवचित्तत्वार्थविंगीकृत्यवत्वयालक्षितं ४४ एवंचित्तत्वमज्ञानादात्मचक्रेरूपागतं ज्ञानेनत्वपाविगलितंतीव्रेहिममहातपे ४५ तस्मा
न्नतंत्वमदंत्वंनासित्वंपरमार्थतः तदेवाहमितिव्यर्थमतोमास्तुसुखायते ४६ असत्याचित्तकलनाइंद्रजालजलोद्भव विज्ञानमात्रमे
वेहब्रासमेगंविजृंभितं ४७ नरामरजगद्रूपैर्ब्रह्मसीशक्तिरुदेत्यलंसामुद्रकणकल्लोलजालैर्वेलेवबल्गाति ४८ चिन्मयपुष्पेद्भवेर्मद त
तस्मात्परमात्मपदाद् नित्यमव्यतिरिक्तंत्वंकिमन्यत्परिज्ञोचसि ४९ सर्वगंसर्वभावस्थंसर्वरूपंहितत्पदं तत्त्वासोसर्वमेवात्तभासभ
वतिसर्वदा ५० नत्वमास्तिनदेहोस्तिब्रह्मास्तीहमहस्फुरत् अहंत्वमितिनिस्पंदेस्फुरत्यार्तिर्हिकस्यका ५१ आत्माचेत्त्वंतदात्मैवसर्व
गोस्तीहनेतरः आत्मनोन्यज्जडत्वंचतत्वंनास्त्यस्तितद्वपुः ५२ आत्मैवसर्वत्रिजगत्तदन्यत्तुनकिंचन नत्वंकिंचित्त्वामात्मान्यद्यदितत्वं
नकिंचनः ५३ अहंत्विदमहंतन्मइतिव्यर्थंकिमीहसे असद्वपुःकिंस्फुरतिशशशृंगेणकोहतः ५४ तृतीयाकलनानास्तिचिज्ञदांशो
तराश्राठ छायातपेनयोर्मध्येतत्तीयेवानुरंजना ५५

(त्वयः अहंत्वमित्याभासोनिस्पंदेआत्मनिस्फुरति अंतःकस्यकावाआर्तिः ५१ उ

क्तकल्पद्वयंपुनःस्पष्टमाह आत्मेति ५२ ततस्माद्यदित्वंकिंचिदात्मान्यद्यदिभवसितदाकिंचनंतत्वपरमार्थरूपनेत्यर्थः ५३ अहंतुइदंबालशारी
रं अहंतत्वदेहशारीरंततबालशरीरसंबंधिक्रीडोपकरणादिवृद्धशारीरसंबंधिपुत्रपौत्रादिचममइतिव्यर्थंकिंईहसेनह्यात्मनस्तस्यस्वंशारीर
नास्तवीत्यसद्वपुःकिंस्फुरतीत्यर्थः ५४ तर्हिचिदविद्यातिरिक्तंतत्तीयंरूपमहकिंनस्यांतत्राहततीयेतियथाजगतिछायातपान्यतरानुरंजना

तद्रूपं तत्त्वतः किं स्वरूपमिति चेच्चरमसाक्षात्कारवृत्त्या अविद्यापासहत्वदीयजाड्यस्य तदंतर्गतचिदाभासस्य च क्षते यैचुरमसाक्षात्कारवृत्त्यावि
र्भूतं यत्स्वप्रकाशपूर्णात्मस्वरूपं तदेव त्वमित्याह सत्येति तदुक्तं तस्मात्सत्यावलोकनाशाविर्भूतं ५६ ५७ यद्यहमात्मैव तर्हि मनसैवेदमात्तव्यं नेहना
नास्ति किंचनेत्यादिश्रुतिषु ममश्चात्मोपकरणत्वं कथमुक्तं तत्राह केवलामिति अतद्व्यापामे वात्मज्ञानस्य चार्थकृतानां तत्त्वमसीत्याद्युपदेशानां
प्रयोजनासिद्धये करणत्वेन कल्पितेन त्वया केवलं शुद्धं स्वतत्त्वं तत्त्वे चरमसाक्षात्कारस्तद्विषयं करोति यथा स्वमुखतत्त्वं दिदृक्षुर्दर्पणोपाध्यभिरूढे
न स्वमुखेनैव करणेन मुखं पश्यति तद्वदिति भावः ५८ यदि त्वं करणस्वभावमेव स्वं मन्यसे नाहं तव चलनेपि स्वतः सामर्थ्यं नास्तीति कर्तृत्वाभिमा

सत्यावलोकनाज्ञाने चिन्मात्रस्य दृशेः स्वयेः संपद्यते यत्तु तदुक्तं स्वसंवेदनमानकं ५६ तेनमूढ न कर्तृत्वं न भोक्तृत्वं तवापि हि तदेवासि परंब्र
ह्मत्यज मोहं स्वयं भवात्मवान् ५७ केवलं तत्त्वविषयमुपदेशार्थसिद्धये त्वया करणभूतेन करोत्यात्मेति कथ्यते ५८ असत्स्वरूपं करणं ज
डं निरवलंबनं निस्यंदनं न स्यंदेत कर्तृसंबोधनं विना ५९ अकर्तुः करणस्यास्य शक्तिः काचिन्न विद्यते दात्रस्य लावकाभावे कर्तुं कि
मिव शक्तता ६० खड्गप्रहारविच्छेदक्रियायां पुंसि शक्तिता न खड्गे सुजडे चित्तसर्वांगेषु पिशक्तितः ६१ तस्मान्नासि सखे कर्तुमाव्यथं
दुःखभाग्भवा परार्थं क्लेशिता स्मस्त्वया कृतेषु न शोभते ६२ ईश्वरेणेह शास्त्रोक्त्वा चोद्यो यस्त्वया स दृश्यो भवेत् न च तस्य कृते नार्थो नाकृते ने
ह कश्चन ६३ गुर्वात्मोपकरोम्येनमिति केवलमल्पधीः क्लिश्यते वसतां त्वथो न किंचिदुपयुज्यते ६४ कर्तृभोगेश्वरस्यैवमर्थं चेदनुवर्तसे
तदस्य काचिन्नेच्छा हतस्त्वात्मसर्वदैवहि ६५ ॐ कौत्रि

नास्ति तव व्यथैवेत्येतदुपपादयति असत्स्वरूपमित्यादिना निस्यंदनं स्वतः स्यंदनशक्तिर
हितं कर्तृसंबोधनं चैतन्यकृतं कर्तव्यार्थप्रकाशं ५९ अकर्तुरनधिष्ठितस्य ६० सर्वांगेषु आमस्तकाग्रं सर्वावयवेषु सर्वेष्वंगेषु उपकरणेषु सत्स्व
पीति वा ६१ प्राकृतेषु पामरतुल्येषु प्रकृतिकार्येषु आत्मनः क्लेशो भृतएव ६२ ननु ईश्वरएवमोहाज्जीवतां प्राप्तः अज्ञानादिनापीड्यमानः कथं
मयोपेक्षणीय इति वदर्थं सर्वप्रयत्नैर्घटमानमहं तमनुग्रहीष्यामीति चेत्तत्राह ईश्वर इति यस्त्वयासेव्यः शास्त्रोक्त्या चोद्यः ईश्वरस्तु न तत्कृतश्रद्धस्य
र्थः ६३ गर्वात्कार्यकरणसंघाताभिमानात् एनमात्मानमुपकरोमीति भ्रांत्या त्वयाल्पा परिच्छिन्ना धीर्बुद्धिः क्लिश्यते पीड्यते संघाते तु वसतां
पंच प्राणमनोबुद्धिदशेंद्रियाणां सर्वेषामचेतनत्वान्नो गोनार्थ इति न किंचिदुपयुज्यत इत्यर्थः ६४ अतः परिशेषादीश्वरस्यार्थे त्वत्प्रवृत्तिर्वाच्या

कुतस्तस्य नेच्छेति चेत्स्वपूर्णत्वादद्वयत्वाच्चेत्याह कृत्रिमेति ६६ सर्वस्य जगतः स्वात्मनि तेनैव कल्पितत्वेनाप्राप्तत्वाभावादपि तत्र तस्य नेच्छेत्याह एकेति आत्मनाआत्मन्येवाविघुकेन एकानेकावभासेन तज्जगद्भूतं क्रियते तत्र किं किमलभ्यं यदिष्यते ६७ यदि सर्वमीश्वरस्वं तर्हि तत्र कथं ममेच्छात्वाः हत्वादृशस्येति मत्सर्वस्येत्यर्थः ६८ तर्हि तेनेश्वरेणैव संबध्यत इतु यद्वात्तभोगान् लप्स्यामि तत्राह आत्मनेति आत्मसंबंधेच्छायारमणीयत्वात् सुंदरेति अस्यात्मनः संबंधि संबंधयोग्यं नास्ति यथा कुसुमादुत्पन्नमपि फलं कुसुमस्य बहिर्मुखत्वात्तत्सौगंध्याद्युपभोगसंबंधयोग्यं न भवति तदभिन्नं दृष्टं कुसुमस्येव तिरोभावात्तद्वत्त्वमपीत्यर्थः ६९ संबंधायोग्यतामुपपादयितुं मुख्यसंबंधलक्षणमाह द्वितीयेनेति एकस्य द्वितीयेन समं एकतरक्रियया उभयक्रियया च मिलनात्तस्य पूर्वस्य तावद्भवनं अपरांतर्भावित्वेन एकता वा सा संबंधगतिः संबंधस्य फलतो लक्षणमिति

अकृत्रिमावभासेन सर्वगेन चिदात्मना । एकेनैवेदृशापूर्णकल्पनैवास्ति नेतरा ६६ एकानेकावभासेन समस्तेन तदात्मना । आत्मन्येवांतरात्मांतः क्रियते किं किमिष्यते ६७ तादृशस्यतु दृष्टैव वस्तु व्युतजापतेमुधा । आलोकराजमहिषीपूनोमदृमयीपथा ६८ आत्मानासह संबंधं चेतः कर्त्रीसि सुंदर किंतु नास्यास्ति संबंधि कुसुमस्य यथाफलं ६९ द्वितीयेन समं येषा तत्तावद्भवनैकता । सा संबंधगतिः प्रोक्ता भागि दित्वादृश्कनेकता ७० नानाप्रकाररचना नानारूपक्रियोन्मुखी । सुखदुःखदशाहेतुर्भवानेकविधास्तता ७१ संबंधः समयोर्दृष्टस्तथाई समयोरपि । न विलक्षणयोश्चान्यस्तस्मिन्मतिजगत्त्रये ७२ द्रव्यांतरगुणं द्रव्यान्याश्रयंति बहून्यलं । संविदस्थ्यवनं दुःखं संविदो माच्युतोभव ७३

गिति ७० तादृशे च मुख्ये संबंधे भवान् अहेतुः यतस्त्वस्वतोनेकविधा कार्यतश्च नानाप्रकारे रचना नानारूपविहितनिषिद्धक्रियोन्मुखी सुखदुःखदशाआसंमतात्स्मृता प्रसिद्धेत्यर्थः ७१ समयोः क्षीरयोः आर्धसमयोः क्षीरनीरयोः विलक्षणयोर्वा रविवह्न्योरिवात्यंतविरुद्धयोः यतस्तास्मिन्विरुद्धसन्निपातेसति अन्यः एकतरस्य नाश एव दृष्टो न संबंधावस्थानमित्यर्थः ७२ ननु शब्दस्पर्शरूपादिविरुद्धगुणवतामपि सूक्ष्मभूतानां पंचीकरणेन संबंधवन्मम आत्मसंबंधः किं न स्यात्तत्राह द्रव्यांतरगुणा अपि परमेलनेप चीकृतद्रव्याण्याश्रयंति तथाचाकुः शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् शब्दस्पर्शरूपगुणोग्निगुणं तेजउच्यते शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणः शब्दस्पर्शरूपरसगंधैः पंचगुणा महीति ७३ ननु संविज्जाड्ययोः विरोधजडात्वतः संविदः अवनं चेत्साधकाभावाज्जडांशो नसिद्ध्यस्येवेति तद्वदसिद्धिप्रसंगदुःखं संविदः सकाशात्तत्वच्युतवनं चेत्वयाखनाशार्थमेवात्म

अथ वाऽन्तर्दृश्यासंविदा दुःखस्य दृश्यस्य खरादेर्वल्गुनः अभावेनाशोमति निर्दुःख निरतिशयानंदात्ममात्रपरिशेषः एतावता चेत् संतुष्यसि तदा एकाग्रेण ध्यानेन नित्यध्यानात् स्थिरमविच्छिन्नसमाधिः सन्न आत्मदृक् आत्मदर्शी भवेत्यर्थः ७५ समाधावेव तत्सुखं न तु संकल्पोन्मुखत्वे यतः संकल्पैर्निर्गरोद्रकं शीलासु च्युतमिव देहादिषु च्युतासंविदिंद्रियद्वारैर्बहुधा विभज्यमाना विशीर्यत इवेति न दृढदुःखमित्याह संकल्प्येति ननु नाहं संकल्पयामि किं त्वात्मैव कर्तृत्वस्वभावात् संकल्पयतीति चेन्नेत्याह कीदृशीत्यादिना ७७ ७६ त्वत्कल्पितया नानानानातया आत्मा केवलं स्फुरत्येव न कल्पयतीत्यर्थः ७७ ७८ यथाऽम्बुधौ तत्सांगारो नास्ति तद्वत् एवमात्मदेवे कलनारहिते सति देहे मनसि च जडे सति विवेकदृशा इदं मन्यदिद

एतावतैकध्यानेन नित्यध्यानोऽथवात्मदृक् अभावे दुःखदस्यांतर्दृश्यदृश्यस्य वल्गुनः ७५ संकल्पोन्मुखतां विद्धि दुःखदां संविदः श्रुतिं जडेषूपलभूतेषु मनोदेहेंद्रियादिषु ७५ कीदृशी कर्तृता चिन्तपुष्पं व्योम्नि कथं भवेत् निरस्तकलनापंके मनन ध्वंसरूपिणि ७६ न चैवात्मनि कर्तृत्वं संभवत्यंबरागवत् अयं केवलमात्मैवनानानानानतयात्मनि ७७ स्फुरत्यब्धिरिवांभोभिः फेनबुद्बुदवीचिभिः आभासमात्रे सर्वस्मिन् स्फुरत्यस्मिंश्चिदात्मनि ७८ द्वितीयानास्ति कलनात्तसीगारइवांबुधौ कलनारहिते देवे देहमनसि वा जडे ७९ संवित्संवेद्यनिर्मुक्तासारं सुंदरनेतरत् इदमन्यदिदं चान्यच्छुभं वाशुभमेव च ८० इत्यसत्कल्पनानास्ति यथा न भासि कानने संवेद्यरहितं संविन्मात्रमेवेदमाततं ८१ तत्रायमहमन्योयमित्यसत्कलनाकथं अनादिमति नीरूपे सर्वगे दितताल्मनि ८२ आरोपयेत्कः कलनां भ्रमरेखां व्योम्नि कोलिखेत् नित्योदिते सकलवस्तुपदार्थसारे संविततिस्थितेऽभरितनिर्भरभरिदिकं आत्मन्यसत्यमिव साधु गतेऽमलश्रीः त्वं क्षीणसुखासुखलवो भव वैसमोहः ८३ मोक्षोपाये वासिष्ठे वाल्मीकीये उपशमप्रकरणे इंद्रियानुशासनयोगोपदेशो नाम ... सर्गः ८२

मश्शुभाभेत्याद्यसत्कल्पना कल्पकाभावादेव नास्तीति संविदेवसारं मैनेतरदिति सिद्धमिति परेणान्वयः ७९ ८० तदेवस्पष्टमाहसंवेद्यति ८१ ८२ कःखे द्य्रहणलेख्यमात्रोपलक्षयं ८२ हे चित्तत्वया अमलत्वात्सनैर्मल्यात्सकलेषु वस्तुत्वेन प्रासिद्धेषु परेषु धर्थेषु च सारभूते संविन्मात्रस्वभावाच्छितते आत्मनि भरिततनिर्भरभरिदिकं यथा स्यात्तथा साधु असंदिग्धापरोक्षतया गते अवगते सति ममसुखासुखलवोऽसत्यामिव मृगतृष्णोदकरज्जुसर्पशुक्तिरजतादिकमिव क्षीणोयतः वै इति निश्चयेन सप्राकृतमसुखदुःखप्रत्ययः गोहो भ्रांतिरेव तस्य पार्थामित्यर्थः ८३ इति श्रीवा॰ भा॰ उप॰ द्व्यशीतितमः

ला
१३१८

१२४

समस्तदोषानर्थानिश्रितेंद्रियगणेसति समस्तगुणसौख्यानिलदसत्वेनकीर्त्यते धवलाभ्रुद्धामेधाधारणायस्तात्तथाविधयागुणोरदःस्थः
१ इंद्रियगणस्यार्थितेनकृतंरहसिप्रबोधनंतेस्फुटंवक्ष्यामि २ हेइंद्रियादिगणाःभवतांएषाअविचारदशाप्रसिद्धाआत्मसत्तास्वीयाविघ्नमा
नताजीवनकालेबहुतरानर्थदुःखायैवतदूर्ध्वंचांतदायिनीपुनःपुनर्मत्युनरकादिदायिनीततस्मादितिप्राग्दशितिविचारेणतात्मनःअसत्यां
सतांत्यजंतु ३ मदीयेनप्राकृतेनात्मतत्वोपदेशेनहियतोयूयंअज्ञानसंभवाःउपदेशेनाज्ञानेनष्टेनसत्तांलस्यथेत्यर्थ ४ इयंनीचितंप्रस
पितयेवाहस्वसतेति ततकाष्ठेनमिवज्वलनरौतीजरतितसकांचनरुतअप्रितस्मिनलासःक्रीडाबालानांपक्षिणांवापार्श्वयोःदाहायेव ५ ।

श्रीवसिष्ठउवाच भूयोमुनिवरोधीरोधीयाधवलमेधया स्वमिंद्रियगणंगुप्तोबोधयामासमाधिरं १ तद्वेंद्रियगणस्यार्थेश्रृणुव
क्ष्यामितेस्फुटं श्रुत्वातद्भावनामेत्युपरांनिर्दुःखांतोव्रज २ भवतामात्मसत्तेषादुःखायैवांतदायिनी असत्यामात्मनःसत्तांतद्भवंत
स्त्यजंत्विति ३ मदीयेनोपदेशेनसत्तेषाभवतांस्वयं गतेवेतिस्फुटंमन्येयूयंस्वज्ञानसंभवाः ४ खसत्तास्फुरतांयातिदुःखायतवचित
क तप्तकांचनरुल्लोसो दाहायेवखपार्श्वयोः ५ पत्रपलवयिसतिश्रांतजडकल्लोलसंकुलाः विशंतिकालजलधिंसंसारसरितांगणाः
६ पतंत्यहमहमिकाविहितान्योन्यचिंतिताः कुतोपिदुःखावलयोधाराआसारगाइव ७ परिस्फुरत्यपर्यंतात्तदयोन्मूलनोघता
आक्रंस्कारिणीक्रूराभावाभावविषूचिका ८ काशश्वासरणद्भृंगाकलेवरजरद्रुमे विकसत्यमलोयोतानरामरणमंजरी ९ कल्लो
लव्यालवलितेशरीरश्वभ्रकोटरे घननीहारखेखांतच्छिंताचपलमर्कटी १० लोभनायारत्नपक्षीतीक्ष्णायाइंद्रतुंडया कोयजी
र्णद्रुमादस्माऊर्णखंडंनिकृंतति ११ १चितेंद्रियगणसत्ताप्रयुक्तामनर्थपरंपरांदर्शयतिपत्रपेत्यादिलडयोरभेदाज्जडानांमूर्खाणांराग
द्वेषादिकल्लोलैःसंकुलाः ६ अहमहमिकाःपरस्पराहंकाराः विहितान्यन्योन्यवधपराजयपीडनादिचिंतनानिषासुताः ७ भावाभावौसंपद्विपदौ
८ ९ कल्लोलैर्मनोरथभंगैर्व्यालैर्वलितेशरीरश्वभ्रकोटरेतदूपे घननीहाराणिनिविडजाड्यानिखानींद्रियच्छिद्राणिपस्थितालक्षणाच
पलोजालरचनच्छिद्रामर्कटीऊर्णनाभिकीटिकाभ्रमतीतिशेषः १० लोभलक्षणःनाचैःखविलासेरारटनकूजनपक्षीतीक्ष्णयासुखदुःखा
दिद्वंद्वलक्षणयातुंडयाचंचागुणर्षंइंश्चांतिदांतिधृत्यादिफलपुष्पलक्षणंगुणसमूहंनिकृंतति ११

कामेलस्पर्शः कुक्कुटः रागादिवासनाकीर्णं हृदयं मनस्तल्लसत्पंअवकरं उत्करं कुरुते पुनः पादाभ्यां विकिरतीत्यर्थः १२ अतानं भ्रांतिनां मं
तल्लसत्पः कौशिकः उलूकः १३ इदानीं चित्तेंद्रियगणस्य सर्वगुणसंपतिं रूपतितलपीत्यादिना असल्लेसाधुरेवेतितथासंबोधनं शुभश्रि
योवृक्षमालगुणाश्रियः सालोकं विवेकालोकसहितं यथास्यात्तथा प्रभातपक्षेपि यथा योगं योज्यं एवमग्रेपि १५ हृदयांबरं हार्दब्रह्मली
रजस्कृतरं अत्यंतापगतरजोगुणं आंतरं मनो यामिन १६ अशंकितं निःशंकमेव नभः कोशपतिनानिर्गतावाघादिना आकुला अश्रुयुक्ता
सारपूरतत्त्वहृतवैकल्यकारिलो विक्षेपहेतवो विकल्पौघाः नापतंति १७ १८ अंतस्थिंद्रं अपूर्णता जाड्ययुक्तेषु मूर्खेषु एव आयुक्तगपयोजि

हृदयावकरं कीर्णमितस्ततश्च कर्कशाः अपवित्रो दुराचारः कुरुते कामकुक्कुटः १२ महत्यां मोहयामिन्यां मुल्लुणोः तान कौशिकः रमस्ता
नरवेतालः परिवल्गतितद्दुमे १३ एतावान्यावदेवौ विलयो द्रियगणस्यति पिशाच्चरवर्त्या येवी प्रबला त्वं शुभश्रियः १४ त्वयित्वसमु
तिह साधो स्वपरेण शुभश्रियेः प्रभातरवपस्मित्यः सालोकं विलसत्पलं १५ प्रशांतमोहमिहिकं राजते त्वद्यांबरं निर्मलारशोकवलितं नो
रजस्कृतरांतरं १६ अशंकितनभः कोशपतिताकुलपूरवत् नापतंति विकल्पौघाध्विरवैकल्यकारिणः १७ सर्वस्याह्लादनी शीता मैत्री
परमपावनि अभ्युदेति सदोह यामुनरोरिव मंजरी १८ अंतस्थिद्वतीजाड्ययुक्तायुगोकगुणासयं चिंतामणिमपुपाप्नोति हिमरण्येवप
श्विनी १९ आलोकः स्फुरतामंतरा यात्यस्तानसंक्षये प्रत्यग्मयत्वं बुद्ध्येयोगिग्रारद्येवार्कमंडलं २० प्रसन्नस्फारगांभीर्यमम्बुधिभमपराह
तं हृदयं समतामेतिसंशीतावातरवालवेः २१ अम्लतापूरपूर्णेन नित्यानंदमयेन च स्लाघ्यते पुरुषेणांतः शीतेन शाल्मिना यथा २२ संविदः
स्फुरतामंतरायात्यस्तानसंक्षये संविदंशोकविश्रांतं समग्रं सचराचरं २३ भाव्यते भरिताकारं वपुरानंदमंथरं नभवत्यसुसंगानामाश्रपा
शविधायिनां २४

ताः विद्याकोन्मालादिगुणाः यथापद्मिनीपक्षेस्यष्टं १९ अंतः आंतरतत्वं आलोकेन स्वीयज्ञानप्रकाशेन स्फुरतो मुकुरतां २० अपराह
तं वैषम्यहेतुभिरपि अनभिभूतं हृदयं मनः २१ २२ संविदः आत्माकारवृत्तयः स्फुरतरं पूर्णतापादकं विकासं यांति तेन च सचराचरं समग्रं
जगद्बाधितं संविदंशोकविश्रांतं भवतीति शेषः २३ वपुः आत्मस्वरूपं भरिताकारं पूर्णं भाव्यते न भूयते नतु आश्रणपाश्रविधायिनां असुसंगानां
प्राणसंबद्धानां देहादीनां पक्षे भवतीत्यर्थः अथांवा वपुः शरीरं आनंदाविर्भावं मंथरं सत् अमनप्रान्नानेन भरिताकारं भाव्यते नत्वत्रपाना

द्याश्रणपाश्रविधायिनां असुसंगानां प्राणाद्यासंगपाप्मनां पक्षे भवतीत्यर्थः २५

यथा नरो दीर्घदग्धानां पर्णानां पुनर्वर्षासु पल्लवोदयेन आगमो भवति न तु हुतज्ञानाग्निप्लुष्टपित्तसंसारजन्मोपलक्षितसंसारमहाध्वनामपि पुंसां
रसानामारोग्यतुष्टिपुष्टिकांत्यादिगुणानां पुनरागमो भवतीत्यर्थः २५ निरतिशयाप्यात्मनि पुनरावृत्तिरहिता विश्रांतिरेव सर्वगुणसीमांत
दानुषंगिका अन्ये गुणास्तु न तान् वर्णयितुं शक्याः इत्याशयेनोपसंहरति अपुनरिति २६ एतयोरत्यंतनात्मभावेन स्थितिरात्यंतिकनैरात्म्य
स्वीकारो वेत्येतयोः पक्षयोर्मध्ये २७ तत्र प्रथमपक्षो वरीयानित्याह स्वात्मेति २८ अभावं भावांतरशून्यं ननु किमर्थं मंतर्भावितचेतनेन प्र
वसिद्धमनोरूपेणैव जीवनं मम नेच्छसि किमर्थं ममात्यंतमभावमिवेच्छसि तत्राह यदीत्यादिना हे चित्त त्वं अंतर्भावितचेतनं यत्प्रसिद्धं रूप

दग्धानामिव पर्णानां रसानां पुनरागतिः पुंसस्तु पितसंसारजराजन्ममहाध्वनां २५ अपुनर्भ्रमणायात्मद्रुमे विश्रम्यते चिरं एवंप्रायास्तथा
न्याश्च भवंति गुणसंपदः २६ असति त्वयि सर्वाशिन्सर्वाशाक्षयसंक्षये पक्षयोरनयोश्चित्त सत्तासत्तास्वरूपयोः २७ यन्नैव पश्यसि श्रेयस्त
मेवांग कुरु क्षणं स्वात्मभावस्तव सुखमन्ये मानवतां वर २८ न मे त्वभावपाभावं सुखस्याशागोहि मूढता यदि त्वत्ति भवेत्सत्यमंतर्भावितचे
तनं २९ जीवनस्तत्वात्यंतमभावं कस्त्वेच्छति किंतु नास्त्यसि सत्येन तदा मितवसुंदर ३० तेन मिथ्यैव जीवामीत्याशया मा सुखी भव पूर्वमे
वासि नास्त्येव या वद्भ्रांत्या त्वदर्शिता ३१ सैवेदानीं विचारेण भ्रांत्यात्तपमुपागता एतावदेव तद्रूपं साधो यदविचारणं ३२ विचारविहितेस
म्यक् समरूपं समस्थितं अविचारात्समजातं तम नालोकात्तमो यथा ३३ विचारेणोपशांतं त्वमालोकेन तमो यथा एतावंतं सदा कालं बभूवा
त्यविवेकिना ३४ तदानेनाभिपीनत्तमभूर्दुःखैककारणं मोहसंकल्पमात्रेण बालवेतालवद्भवेत् ३५ इदं चायं न संकल्पक्षीणस्त्वयि
नवस्थितं इदानीमुदितं नित्यं स्वप्राग्रूपक्षयं गतं ३६

(मस्ति तद्यदि सत्यं भवेत्तत्तस्मिन्हितेन रूपेण जीवनस्तवाभावं कस्त्वेच्छति किं तु त्वं तेन रूपेण
नास्त्यसि असदसि अहं सत्येन रूपेण निरास्त्रानुभवादिना विचार्य तदामिनापात दर्शनेनेत्यर्थः २९ ३० तदत्यंतात्मभावेनावस्थानं तत्रापि हितमि
त्याह तेनेति पूर्वं प्राथमकल्पिकमेवासि पूर्ववत् यतः ३१ सैव भ्रांतिः ३२ समरूपं सन्मात्ररूपं समं विक्षेपवैषम्यशून्यं स्थितं अनालोकात्प्रका
शाभावात् ३३ अनेन स्वल्पविवेकत्वेन हेतुना न त्वसतः पीनत्वं कथं भवेत्तत्राह मोहेति ३५ पीनत्वं तत्प्रयुक्तं सुखदुःखादि इदं च अभूदिति पू
र्वेणान्वयः यतः स्वपुराद्यंत संकल्पेन संकल्पकाल एव क्षीणं अतः क्षयीति इदं द्वविशेषणं यस्य विवेकस्य प्रसादेन इदानीं ज्ञानोदयकाले आविर्
भूतं स्वप्राग्रूपक्षयं गते सति नित्यं अनाद्यंतं आत्मरूपं उदितं तस्मै विवेकाय नमो नम इति परेणान्वयः ३६

हे चित्त कत्वं त्यक्तोपि बहुधा प्रति बुद्धः शास्त्रेणाप्यनुबोधितः ३७ प्रागपि त्वं परमेश्वरः स्थितः संप्रत्यपि प्रबोधनस्ते स्वरूप विलासः स्थितिमाग ८
तः इति महेश्वरएवेति परेणान्वयः ३८ ३९ ४० ४१ विल्वेति पाठे इंद्रियेश्वरासिद्धांतयुक्तिभिः इति विल्वात्स्वरूपं लब्ध्वा अनंतसंसारपारमागतो भवते
तुभ्यं स्वस्ति अस्तु मनसः कान्तत्रयेप्यसत्वर्महनित्यमिति ४२ चित्कासत्तयैव परमपुरुषार्थसिद्धिं दर्शयति निर्वामीत्यादिना ४३ ४४ ४५ अ
हं चिदेकरसे अयमात्मेति कलनापि यत्र दुर्लभा तत्र दूरेऽन्यकलनेत्याशयेनाह अयमिति ४६ अत एव तद्भावाभावविषय इत्याह अहमिति

विवेकस्य प्रसादेन विवेकाय नमो नमः बहुधापि प्रबुद्धं त्वं चित्त काप्यनुबोधितं ३७ चित्ततायां प्रनष्टायां स्थितस्त्वं परमेश्वरः प्राक्स्वरूप
विलासस्ते श्रेयसे स्थि— तिमागतः ३८ समस्तवासनान्मुक्तः संप्रत्यस्मि महेश्वरः यस्याविवेकाद्दुस्तत्तिः स विवेकाद्विनश्यति ३९ प्रकाशेन
प्रयात्यंतमनालोको इव त्वं नमः अनिच्छतोपि ते साधो विचारे स्थितिमागते ४० सर्वतोयमुपायानो विनाशः सुखसिद्धये तस्मान्नास्त्यस्ति नि
र्णीतमिति सिद्धांतयुक्तिभिः ४१ चित्तेंद्रियेश्वरस्वास्ति भवते त्वं तमागतः नित्यं पूर्वमभूत्तापनास्ति रूपाप संप्रति ४२ भविष्यते च नोदर्कं
स्वमनः स्वस्ति तेऽस्त्विति परिनिर्वामि शांतोस्मि दिष्ट्यास्मि विगतज्वरः ४३ स्वात्मन्येवावतिष्ठेहं तुर्यरूपपदे स्थितः अतो नास्त्येव नास्त्येव सं
सारे चित्तमस्त्विति ४४ आत्मा त्वस्त्येव चास्त्येव यस्मादन्यन्न विद्यते अयमात्माहमेवासौ नास्त्यन्यन्मरते क्वचित् ४५ स्फुरच्चिद्देवबोधात्मा
सर्वत्राहं स्थितः सदा अयमात्मेति कलनामन्यो नो निर्मलांतरे ४६ प्रतियोगिव्यवच्छेदकलनैकस्य वै कुतः अहं तेनायमात्मेति कलनामनुश
ह रन् ४७ मौनी स्वात्मनि तिष्ठामि तरंग इव वारिणि संशांतवासनमनाश्रितचेतनं शामप्राणसंचरणमस्तमितांशदोषं संवेद्यवर्जितमुपेत्य सु
से विदं शांशाम्यामि मौनमहमेव निरीहमंतः ४८ मोक्षोपायेषु॰ चित्तसत्ता विचारोपायोपदेशः सर्गः ८३ श्रीवसिष्ठ॰ इति निर्णीय स मुनिर्वीत
हव्यो विवासनः आसीत्समाधावचलो विंध्यकंदरकोटरे १ {अनुदाहरन् अनभिलपन् ४७ अहं अंतः स्वहृदि संवेद्येन जडांशेन वर्जितं तत्का
रणविद्याया अपि बाधात्संशांतवासनं चिदाभासस्यापि दृश्यगनवल्ह्यानादनाश्रितचेतनं शांतदृश्योन क्रियाशक्ते रप्युपरमाद्प्राणसंचरणं भेद
काभावादेव अस्तमितांशाभेदं सममेकरसं चिदंशं चिन्मात्रलक्षणं जगद्वाधपरिशिष्टं शांत उपेत्य निरीहं निर्मनस्कं मौनं निर्वाग्व्यापारं च शाम्यामि विश्राम्ये नास्मीत्यर्थः ४८ इति श्रीवा॰प्र॰उप॰त्र्यशीतितमः सर्गः ८३ समाधिर्वनिहव्यस्य धराविवरसंस्थितिः हृदि विद्याधरेंद्रस्य गणे

अपरिस्पंदितोयं अशेषः पूर्णः स्वप्रकाशसंविद्रूप आनंदलक्षणः सन्सुंदरः २३ तस्याक्षिण्यमीलिते अक्षिणी वर्णयति अनंतरिति द्वाभ्यां नात्यंतमंतर्नि
ष्ठतां निमीलनं याते शेषे उन्मीलितं भ्रांतिरिक्तं शे ४ घ्राणप्रांतो नासाग्रं तत्रगतः प्रसृतः अल्पाद्यप्यल्पः समंतभयतत्कल्पः आलोकः प्रकाशः इवलल
क्ष्माणोर्ई लक्षणे चक्षुषी ५ ६ कच्छस्य निर्झरसन्निहितदेशस्य ७ ८ आसारभैरणां वर्षनिर्झरधारासंपातानां घर्घरैः स्वनैरपि ९ पर्यंतवासिनां
मंडलाधीशानां सामंतानां स्मगयासु आननानां आगतानां बृंहितैर्गर्जितैः सर्वत्रापि शब्दपोन्यः १० सिंहानां संरंभ रदितैः सक्रोधगर्जनैः ११ भ्रकु

अपरिस्पंदिताशेषसंविदानंदसुंदरः बभावसंगतमनाः स्तिमितांभोधिशोभनः २ अंतरेचशशाम स्यक्रमेण प्राणसंततिः ज्वालाजालप
रिस्पंदे हृतधूमध्वनरवानले ३ अनंतनिष्ठतां याते बाह्यार्थेचाप्यसंस्थिते शेषे न लब्धसंस्थाने तस्यास्फुरितपक्ष्मणी ४ घ्राणप्रांतगतात्या
ल्पसमालोके दर्शेक्षणे अर्द्धकुड्मलितैः पत्रैः श्रियमाययतुः समं ५ समकायशिरोग्रीवस्थानकः समहामतिः आसीच्छैलादिवोत्कीर्णश्रि
त्रार्पितइवाथवा ६ तथाभितिष्ठतस्तस्य संवत्सरशतत्रयं कोटरे विंध्यकच्छस्य पयाई मुकुर्नवत् ७ एतावंतमसौ कालंनाबुद्धत किला
मवान् जीवन्मुक्ततपाध्यानीनचतत्याजतां तनुं ८ तावत्कालं ससुभगो नाप्रबुध्यतयोगवित् उदारैरंबुदासारभरघर्घरैः ९
पर्यंतमंडलाधीशास्मगयानतबृंहितैः पक्षिवानररनिह्रादैर्मत्तगास्फाटनिस्वनैः १० सिंह संरंभरटितैर्निर्झरशवसीत्कृतैः विषमाशनिसं
पातेर्जनकोलाहलैर्घनैः ११ भ्रमतशरभास्फोटैर्भंकंपतरघट्टनैः वनदाहधमध्वानैर्जलौघाहतिवल्गनैः १२ महोपलतराघातैर्धर
णीतलमज्जलैः जलौघांदोलनापातैस्तापैरनलकर्कशैः १३ केवलं वहति स्वैरं कालेगलितकारणं परिपूर्णान्तीपुनर्पांसुलहरी विवशाशिणि
१४ स्वल्पैर्नेवहिकालेन तस्मिन्पर्वतकंदरे प्राग्वृडोघविनुन्नेन पंकेनोर्वीतलेकृतः १५ तत्रासावसद्मोकोटरेसंकटोदरे पंकसंपीडित
स्कंधः पर्वतेषु शिलायथा १६ (पेनविशीर्णानां तराणां गिरिवप्राणां घट्टनैः शस्फालनैः वनदादेषु धूमैः अग्निसंयोगेसत्युक्तध्वानैश्च जल
स्य ओघैः आहतयः आस्फालनानीव वल्गनानि वहनानि चैतेरपि १२ धरणीतलान्मस्तैर्मत्स्यकिल जलैः अनलं वल्कर्कशैस्तापैः ग्रीष्मादिसापै
रपि नप्राबुध्यते तिसर्वत्रयोन्वयं १३ गलितकारणं निष्प्रयोजनं कालेवहति सति असौप्राग्वृडोघविनुन्नेन पंकेन तत्पर्युपरिप्रचीयमानेन अल्पेनैव
कालेन धरणीविवरेभूगर्भेकृतः प्रवेशितः स्तद्वयोरन्वयः १४ १५ संपीडितः संश्लिष्टः स्कंधोपस्येत्यर्थः नहितस्य समाधिसुखनिमग्नस्य पीडा
स्ति १६

१७ एवं संकटस्थस्य कथं जीवनमभूत्तत्राह संविदेवाति जीवनाद्यल्लिंगदेहप्रतिबिंबिता संविदेहं जयाहतउपाशयपालितवती प्राणमयः प्राणवृत्तिरूपः स्पंदस्तु न जग्राह प्राणसंसरणाभावादित्यर्थः १८ वर्षशतमत्र यानंतरं तस्य यद्वृत्तं तदाह उत्पत्तीति अथ तस्य कलना जीवसंविद्प्रारब्धशेषभोगाय तद्धेवडत्पत्त्यानुन्मेषक्रमेण प्रौढिं स्थौल्यमासाद्य स्वभनोरूपिणी भूत्वा वस्थमाणं सर्वं कल्पनया अनुबभूव अनुभूतवती अनुभवतीत्यर्थः १९ यदनुबभूव तदेवाह कैलासेत्यादिना २० इंद्रत्वं देवराजत्वं २१ कैलासकानेत्यादिना दिङ्नियमः युगपंचकमित्यादि कालनियमः अल्पकालमेव तद्दयप्रदेशएवं तदनुभवाद नियमश्च कथमुपपद्यते दिक्कालनियतेः अन्यथाकर्तुमशक्यत्वादिति प्रश्नार्थः २२ असावा

शतत्रये स वर्षाणामथ यातेस्वयं प्रभुः प्रबुध्यतात्मरूपात्माघुराकोटरपीडितः १७ संविदेवास्य तं देहं जग्राहोर्वी निपीडितं न तु प्राणमयः स्पंदः प्राणसंसरणं विना १८ उत्पत्तिप्रौढिमासाद्य कलनात्तद्दयांतरे स्वमनोरूपिणी तस्य तद्द्येवानुबभूव सा १९ कैलासकाननेकांते कंदंबस्य तरोस्तले मुनित्वं शतमब्दानां जीवन्मुक्तात्मनिर्मलं २० विद्याधरत्वं वर्षाणां शतमाधिविवर्जितं युगपंचकमिंद्रत्वं प्रणतं सुरचारणैः २१ श्रीराम उवाच शक्रत्वादिषु तेषस्य प्रतिभासेषु भोमुने नियमो नियमश्चैव दिक्कालनियतेः कथं २२ श्रीवासिष्ठ उवाच सर्वात्मिकैषा चिच्छक्तिर्यतो देतिप्यथा यथा तथा तत्राशु भवति तथात्मैकस्वभावतः २३ यथा यत्र यदा बुद्धो नियमः सततः स्थितः देशकालादिनियमक्रमाणां तन्मयात्मता २४ तेन नानाविधान्येष जगंति परिदृष्टवान् तदिदं वेरनाकाशोपातहव्योविवासनः २५ सम्यग्बोधवनामेषा वासनैवन वासना ज्ञानाग्निदग्धादग्धस्य कैव बीजस्य बीजता २६ कल्पमेकगणत्वं स चंद्रमौले श्वकार ह। समाप्तिं विद्यानिपुणत्वि का

त्येन तातांपां विति अल्पयोरपि देशकालयोर्विल्लिनदेशकालांतरकल्पनासामर्थ्यं भवत्येवानियतिर्विरोधः न तु सर्वात्मिकायां सर्वशक्तिसंपन्नायां पूरितात्वाधामित्याशयेन परिहरति सर्वात्मिकेति ना द्रशात्मैकस्वभावलादनुभवितृचित इत्यर्थः २३ स्वबुध्या अनुभूयमानयोरेव देशकालयोः संकोचवैपुल्यनियमानियमौ विरुद्धौ नान्यानुभूयमानेन सह अनुभूयमानस्य तो अल्पतरनाडीकुहरे घल्पकाले विस्ततदेशकालस्वप्नानुदर्शनादित्याशयेनाह यथेति यत्र यदा बुद्धौ यथा अनुभवस्तदा तथा नियमः स्थित इत्यर्थः तन्मयता बुद्धिमयात्मन्यध्यस्तानात्मतेत्यर्थः तन्मयात्मना मिमितिपाठे हेतुगर्भं विशेषणं २४ तेनोक्तहेतुद्वयेन २५ बीजशक्तिनाशाद्दग्धस्य तउपलभ्यमानत्वाद्दग्धस्य भर्जितस्येति यावत् २६ शंकंसमाधाय

१७७

जीवन्मुक्तस्यापि तस्य मोक्षक प्रारब्धकर्मेच्छ्योधिन दृढसंस्कार एव देहभोगादिवैचित्र्यप्रतिभासे हेतुरित्याह यदिति २८ रामत्वं काश्यपः २९ इदंधुप
स्न्यायेनासतः प्रारब्धशेषेण प्रतिभासो बाधितानुवृत्तिमात्रं न बंध इत्याशयेन परिहरति यथास्थितमित्यादिना ३० विंदते लभते रव ३१ ईश्वरस्या
समष्टिजगत प्रतिभासवद्ज्ञातस्य विनैव बंधं तत्प्रतिभास इत्याशयेनाह तेनेति ३२ वीतहव्यदेहोपलक्षितचैतन्यस्यैवास्मदादिसर्वात्मत्वात् स
र्वजंतूनां जगदनुभवोपि तस्यैवेत्युपपादयंश्च मित्याशयेनाह धरेत्यादिना नीरूपेषु निःस्वरूपेषु प्रतिभासते महात्मसु विशालतमेषु जगत्सु भुव
नेषु पंचाक्षः अभ्रतरः अधरीनेषु देशविशेषु दीनानांविवासो जनपदस्य यथे जातस्य तद्धितस्य जनपदे लुब्विति लुपि युक्तवद्भावा दुरुवच

नि

यो यातदृढसंस्कारः सतं पत्रपतितावदं जीवन्मुक्ततयैवैतद्वीतहव्योनुभूतवान् २८ श्रीरामउवाच एवं स्थिते मुनिश्रेष्ठ जीवन्मुक्
मतेरपि बंधमोक्षदृशः संति वीतहव्यात्मना यथा २९ श्रीवसिष्ठउवाच यथास्थितमिदं विश्वं शांतमाकाशनिर्मलं बद्धे वज्जीवन्मु
क्तानां बंधमोक्षदृशः कुतः ३० एतत्संविन्नभो भाति यत्र यत्र यथा यथा तत्र तत्र तथा तावत्तावत्तद्विंदते जन ३१ तेनानुभूतानि बहून्यनु
भूयंते एव च जगंति सर्वात्मनैवाब्जस्वरूपेण राघव ३२ धराकोटरनिर्मग्नवीतहव्यचिदात्मसु जगत्सु तेषु संख्येषु नीरूपेषु महात्मसु ३३
पंचाक्षो नववृद्धात्मा सो ऽधदीनेषु पार्थिवः कर्तुं प्रवृत्तो ऽमरगां सुखं सोस्मिन्नपि कानने ३४ योहं सोनववृद्धात्मा पापैः पैतामहे भवत् स्थि
तः स एव दाशेंद्रः कैरातवनकुंजके ३५ यो राजा नववृद्धात्मा भ्रमे सौराष्ट्रमंडले स एषो ऽद्य स्थितो ग्राम्यग्रामे बकुलपादपे ३६ श्रीराम
उवाच मानसः किल सर्गोसौ वीतहव्यस्य तत्र पे देहिनो भ्रांतिमात्रं चेत् तद्देहाकारिणः कथं ३७ श्रीवसिष्ठ उवाच यदि भ्रांत्येकमात्रात्म
वीतहव्यस्य तज्जगत् तदिदं नाम ते राम किं भ्रूयः परिभासते ३८ इदमप्यंग चिन्मात्रं मनोमात्रं भ्रमोपमं तदपि व्योम चिन्मात्रं मनोमा
त्रं भ्रमोपमं ३९

नं ३३ ३४ पैतामहे पाद्मे कल्पे वीतहव्यस्य गाणपत्यकाले कैलासवनकुंजके तच्छ्रीडाहं सोयो भवत् स एव दशदानीं दाशे
न्द्रः निषादराजो भूत्वा स्थितो ऽस्तीत्यन्वयः एवमग्रे पि ३५ गुरूक्तेः सर्वात्मताभिप्रायमप्रतिपद्यमानानां जनानां तच्छंकां द्वारेनेन गुरुमुखेन बो
धयिष्यन् रामः पृच्छति यदीति तद्देहाकारिणः शाक्रहंसादिदेहाकारिणः सचेतनाः कथमित्यर्थः ३७ सर्वस्यापि जगतो मनः कार्यत्वस्य भ्रांतिमा
त्रत्वस्य च बहुशः उक्तत्वात्तुल्यत्वात्तुल्यमेतेति यदिदं नाम ते प्रसिद्धं जगत् तत्किं कथं सचेतनैर्जनैर्युक्तं प्रतिभासत इत्यर्थः ३८ द्वयोः संगमयुमेव वद
त्यपति इदमिति ३९

एवं एतज्जगत्सत्त्वाइतरदेतद्विलक्षणं च न सालक्षण्यवैलक्षण्ययोः प्रतियोगिसिद्धिं तरेणायोगादिति भावः ५० संविन्मात्रत्वेनावशिष्टं यन्मनस्तदेव तन्मयं ५१ ५२ प्रत्युल्लासउत्पत्तिर्विलासो विपरिणामस्ताभ्यां ५३ उक्तमर्थं संक्षिप्याह यथास्थितेनेति अविकृतेनैव चिराका न्तस्वभावेन मायया किं चिन्नैव यदि वात्मानं कल्पयच्चितं सत्त स्यैव पुनःपुनर्मननान्मनो भिधानं एतितेन च स्फारं जगत्संपन्नमिति एवं दृश्यं जग त्ततं परमार्थतस्तु किंचिदपि नैव ततामित्यर्थः ५४ इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे चतुरशीतितमः सर्गः ८४ मुनेः पिंगलमा

वस्तु तस्तु न तद्धामजगन्नैवं न चांतरत् तथापि नजगत्सत्ताब्रह्मेदं भाति केवलं ५० भाविभूतं नविष्यं च न तथेदं च न तथेतरत् जगत्स र्वमिदं दृश्यं सविन्मात्रमनोमयं ५१ एवंरूपमिदं पावृत्तपरितानमीदृशं वज्रसारं दृढं तावत्तावन्तं सत्यं रमांबरं ५२ असत्तानात्मनए वेदमित्यं सप्रविजृंभते पत्युल्लासविलासाभ्यां जलमंबुनिधाविव ५३ यथास्थितेनैव चिदंबरेणास्व चित्तमेवेति मनोभिधानं स्फारं हृ तेन जगद्दृश्यमेवं तत नैव ततं च किंचित् ५४ मोक्षोपायेषूपशमप्रकरणे वीतहव्यमनोजगद्वर्णनं सर्गः ८८ श्रीरामउवाच अथ किं वीतहव्यः खंस्थितं तस्मिन्धरोदरे कथमुद्गतवान्देहं ससंपन्नश्च किं कथं १ श्रीवसिष्ठउवाच अनंतरमनंतात्मवीतहव्याभिधं म नः स्वमेवात्मचमत्कारमात्रं तमवबुद्धवान् २ शार्वस्यास्य गणस्याभूत्प्राग्ज्योतिःस्मरणेस्वयं इच्छाकदाचित्सकलं प्राग्जन्मालोकनो न्मुखी ३ अत्रोषान्सदरत्राथि नष्टान्पश्यद्देहकान् अनष्टानां ततो मध्यातनकोटरसंस्थितं ४ यदृच्छयैव प्राग्दृष्टं देहं तस्याभवन्मतिः अपश्यत्तत्र यातत्र पंके कोटरमिव स्थितं ५ शरीरं वीतहव्याख्यं धराकोटरपीडितं प्रावृडोघोपनीतस्पष्टस्तब्धपंकमंडलं ६ तृणजालाव कीर्णत्वग्देहपृष्ठम्रदं तथा एतद्दृष्ट्वा महातेजाधरा विवरयंत्रितं ७

६ विन्यसमुद्गारस्तनो रिह जीवन्मुक्तस्थितिश्रांत्यः समाधिश्चोपवर्ण्यते स मुद्गारस्य तस्य कारस्य तदुत्तरस्वर्गायाः विदेहमुक्तपरिशिष्टतद्रूपस्य चतुर्भिः किं वीतेः क्रमात्प्रश्नः १ अनंतात्मअपरिछिन्नब्रह्माकारं समवबुद्ध्वा न्समाधावित्यर्थः २ प्राक्तनं ज्योतिः श्रिदात्मा तस्य स्मरणे ध्यानकाले ३ नष्टान्नष्टान्कांश्चिन्नष्टान्कांश्चिदनष्टान् तत्रदनष्टदेहेतु दरपकोटरेजी वरोपाख्यानवसमाणन्यायेन स्वकल्पनयैव यं स्थितं वीतहव्यदेहमित्यर्थः ५ प्रावृषः ओघेन पूरेणउपनीतं किंचिद्दूरं प्रावाहितं पृष्ठस्तब्धत्सु न्यायअधोमुखतया पातितमित्यपि गम्यते ६ तृणानां कानादीनां जालैः अवकीर्णाः निबद्धाः त्वग्देहपृष्ठमदो यस्य देहपदेनतद्वयवालस्यं

३०७

१७८

प्राणवायुभिस्तत्संचारैरितियावत् ८ आकर्तुमीषदपि कर्तुं क्रियामनात्मनस्तु किमनात्मकं मितिनिपीनरुक्तं तत्तस्मात्तदुद्धारार्थं उपायं ज्ञात्वा एवं परका
यप्रवेशयोगप्रकारेण ९ तदीयस्तत्सेवकः पिंगलाख्यो गणस्तद्ज्ञत्यानुद्धरिष्यतितस्य चिंतांतरमाह अथचेति एतेनदेहेन त्यक्ष्याम्यामि विदेहमुक्तोस्य
र्थः १० ११ त्यागः संश्रयो वा नो पापादेयः नापेक्षणीयः विशेषाभावात् १२ तदेवाह यादृशाइति अणुनां धूलीभावं १३ पिंगलेन पिंगलद्वारा तदु
र्तुं तापनं सौरं वपुः प्रविशामि १४ अनिलरूपधृक् सूक्ष्मीभूत इतियावत् १५ पुर्यष्टकं प्राग्व्याख्यातं लिंगशरीरं तद्वपुः भस्त्रा खं चर्म पेत्र्या कार्शंमु

भूयोपि चिंतयामास धिया परमबोधया सर्वसंपीडितांगत्वात्कायो मे प्राणवायुभिः ८ मुक्तश्चलितुमाकर्तुं शक्तोनिनमनापति तद्ज्ञात्वा प्रवि
शाम्याशु देहमेवं विवस्वतः ९ तदीयः पिंगलो देहमुद्धरिष्यति मे मतः अथवा किं ममैतेन शाम्याम्यहमविघ्नतः १० निर्वामि खः पदं यामि को र्थो
मे देहलीलया इतिसंचिंत्य मनसा वीतहव्योमहामते ११ तूष्णीं स्थित्वा क्षणं भस्या श्वांतयामास भूतले उपादेयो हि देहस्य न मे त्यागो न संश्रयः
१२ यादृशो देहसंत्यागस्तादृशो देहसंश्रयः न घोवदस्ति देहोयं न पावदणुतां गतः १३ तावद्देनमुपारुह्य किंचित्प्रविहराम्यहं पिंगलेन शरी
रं समुद्धर्तुं तापनं वपुः १४ प्रतिशामि नभः संस्थ मुकुरं प्रतिबिंबवत् इत्यसौ मुनिरादित्यं विवेशानिलरूपधृक् १५ पुर्यष्टकवपुर्भूत्वा भस्त्रा
खमिव वानिलः भगवान्मुनिरप्येन तद्गतं मुनिनायकं १६ दृष्ट्वासौ चिंतयन्कार्यं पौर्वापर्यमुदारधीः विंध्यभूदरभूकोशामं तं मुनिकलेव
रं १७ तृणोपलपरिछिन्नं दरदर्शगतसंविदं कृषेश्चिकीर्षितं ज्ञात्वा भानुर्गगनमध्यगः १८ धरातो मुनिमुद्धर्तुमादिदेशाग्रगं गणं वीतहव्य
मुनेः संवित्सा पुर्यष्टकरूपिणी १९ रविशानमपीरज्यं प्रणनामाशु चेतसा भानुनाप्यभ्यनुज्ञातो मानपूर्वकमग्रगं २० विवेश पिंगलाका
रं विंध्यकंदरगामिनं पिंगलोसौ नभस्त्यक्त्वा कुंजकुंजरसुंदरं २१ प्राप विंध्यवनं प्राप्य प्रमत्ताभ्रांबरभासुरं उद्दधारधराकोशान्नखनिष्ठक्षश्मू
तलः २२

निर्मनन शैलो भगवान्सूर्योद्गतं तद्दिप्रविष्टं तं मुनिनायकं दृष्ट्वा तस्य कार्यं तत्पौर्वापर्यं च दृष्ट्वा विंध्यकोशगतं गतसंविदं म्लातिप्रायमुनिकलेवरं द
दर्शेतिव्यवहितेनान्वयः १६ १७ ततो रविः किं चकार तदाह कृषेरिति १८ मुनिमुनिशरीरं गणं पिंगलाख्यं सूर्यतद्गतं प्रविष्टा मुनेः संवित् किं चकार तदा
ह वीतिहव्येति १९ समुनिर्भानुना तद्येव बहुमानपूर्वकमभ्यनुज्ञातः सन् स्वकार्यार्थं प्रस्थितं पिंगलस्य आकारं शरीरं आविवेश विवेश २० कुंजैर्ल
तागहैः कुंजरैश्च सुंदरं २१ प्रावृषि मत्तान्यभ्राणि यस्मिंस्तथाविधमंबरमिव तत्पक्षे कुंजे कुंजरैरिव च सुंदरमिति योज्यं नखैर्निष्कृष्टं खातं भूतलं ये

५४

अ

पिंगलःमुनेःसंबोधिमौनंपुर्यष्टकंपिंगल देहात्त्वकलेवरं विवेश २३ आलयं स्वनीडं मूर्तःप्राप्तमूर्तिर्वीतहव्यःनभश्चरःपिंगलश्चमिथःअन्यो
न्यंप्रणेमतुः २४ सरःस्नानार्थं २५ सूर्येणअंशुकवतीपीतरक्तांबरालंकृतेवआकृतिर्यस्यबालातपरागरंजितोदकमितिपाकम् २६ पंकयु
केषुपल्वलेषुलीलायाःअंतेवसाने २७ मनोभूषितयामननादिव्यवहारवत्यादिनमात्रमेवरेमेनचिरंसमाधिप्रच्युतस्तत्स्थावित्यर्थः २८ २९
इतिश्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणेपंचाशीतितमःसर्गः ८५ पुनःसमाधिषट्कुत्रंजीवन्मुक्तस्थितिस्थिरं रागादिभ्योजलनिर्मुक्तेयेसमा

कलेवरंमुनेःपंकान्मृणालमिवसारसः मौनंपुर्यष्टकमथस्वंविवेशाकलेवरं २३ नभस्तलपरिभ्रांतोविहंगमश्वालयं प्रणेमतुर्मिथो
मूर्तवीतहव्यनभश्चरो २४ बभूवतुःस्वकार्यैकतत्परौतेजसांनिधी जगामपिंगलेव्योममुनिश्चविमलंसरः २५ तारकाकारकुमुदं
सूर्यांशुकवदाकृति वीतहव्योममज्जाशुसरस्युद्भिन्नपंकजं २६ पंकपल्वललीलांतेवनेकलभकोयथा तत्रलात्वाजपंकृत्वापूजांपित्व
दिवाकरं २७ मनोभूषितयातन्वापूर्ववत्पुनराबभौ मैत्र्यातयासमतयापरयाचश्चांत्यासत्यतयामुदितयाकृपयाश्रियाचयुक्तोमुनिः
सकलसंगविमुक्तचेताविंध्येसरितटगतोदिनमेवरेमे २९ मोक्षोपायेषूपशमप्रकरणेवीतहव्यसमाधियोगोपदेशःसर्गः ८५ ३६०९

श्रीवसिष्ठउवाच दिनांतेससमाधानात्पुनरेवमनोमुनिः विवेकाकांचिहितांविज्ञानांविंध्यकंदरां १ तदेवात्मानुसंधानमत्यजन्सम
मिंद्रियैः चेतसाकलयामासदृष्टलोकपरावरः २ पूर्वमेवेंद्रियगणोमयापरित्यक्तःस्फुरं इदानीचिंतयानार्थःपुनर्विनतयामम ३
अस्तिनास्तीतिकलनाभंक्त्वाम्रडीनतामिव शेषंतुबहुसंस्थानास्तिष्ठाम्यचलशृंगवत् ४ अदितोस्तंगतस्त्वस्तंगतस्त्वोदितः स
मःसमरसाभासास्तिष्ठामिस्वच्छतांगतः ५ प्रबुद्धोपिसुषुप्तस्थःसुषुप्तस्थःप्रबुद्धवत् तुर्यमालंब्यकायांतस्तिष्ठामिस्तंभितस्थितः
६

धिचास्यवर्णयति विज्ञातांप्राकारितां १ दृष्टलोकेपरःसारःअवरःअसारश्चयेन २ पकलयामास तदाहपूर्वमित्यादिना ३ अ
स्तिनास्तीतिविधांद्वयकलनांत्यक्त्वाशेषमखिलंतदुभयसाक्षिचिन्मात्रमवलंब्येतिशेषः बहुसंस्थानःसमकायशिरोग्रीवोदृढासनश्च ४
उदितोजीवन्नाप्यस्तंगतोमृत इवाततद्द्वयाद्व्यतिरिक्तस्तुतद्विपरीतःसमरसाभासएकरसचिन्मात्ररूपः ५ प्रबुद्धोजाग्रदपिसुषुप्तस्थःद्वैतजाल
मपश्यत् एवंसुषुप्तोपिस्वस्वरूपस्फुरणानुभवात्प्रबुद्धवत् तुर्यंस्थूलसूक्ष्मकारणनिर्मुक्तंपदं ६

स्वांतस्यांतेपारभूतेनिर्मनंतेसर्वतःस्थितेपूर्णसत्तासामान्यलक्षणेपरमसाम्ये ७ ८ सिद्धःव्युत्थानेपिसमाहितस्थितिः ९ नाभिननंदगुण
दृष्ट्यानिनिंदानिदोषदृष्ट्या १० कथावक्ष्यमाणेविचारलक्षणेबाधितानुवृत्तस्वमनसासह ११ अव्ययस्यविषयोपभोगप्रयुक्तसामर्थ्यव्ययपराहि
तस्यइंद्रियवर्गस्यस्वामिन् हेमनःआनंदयत्याह्लादयतिसर्वजगदित्यानंदं तथाविधंसुखंनिरतिशयानंदरूपंसुशोभनंखंआकाशमितिवा
१२ त्वयाअग्रेपिएषैवनीरागेवृत्त्याअवलंब्या द्वावेवकारावधारणदार्ढ्याय १३ हे हंताज्ञाः इतिआत्मनांपृथक्संबोधनं अयंमयानुभूयमा
नआत्मायुष्माकंनास्ति १४ एवंसदात्मसंबंधाभावात् वःस्वरूपंअवगम्य विनाज्ञांज्ञेअसत्वप्रसंगेज्ञातांसमाक्रांतोममेतिदोषः १५ प्राक्तर्हिस्माकं

स्थितःस्थाणुरिवैकांतेस्वांतांतेसर्वतःस्थिते सत्त्वसामान्यसाम्येहिस्थितिमभ्युपगतामयः ७ इतिसंचिंत्यसध्यानेपुनस्तस्थौदिनानिषट् ततःप्र
बोधमापन्नःक्षणसुप्तइवाध्वगः ८ ततःसिद्धःसभगवान्वीतहव्योमहातपाः विजहारचिरंकालंजीवन्मुक्ततयातदा ९ वस्तुनाभिननंदासौ
निनिंदनकदाचन नजगामनतापोद्वेगंनचहर्षमवापसः १० गच्छंस्तिष्ठंस्तथैवैतस्यैवमभवद्धृदि विनोदायचचित्तस्यकथास्वमनसासह ११
अव्ययेंद्रियवर्गेशमनःशममवतात्वयु पश्यानंदसुखंकीदृग्विधमासादितंततं १२ एषैवाविरतंतस्मान्नीरागेवदशात्वया अवलंब्यापरि
त्याज्यंचापलंचलतांवर १३ भोभोइंद्रियचौराहेहताशाहतनामकाः युष्माकंनायमात्मास्तिनभवंतस्तथात्मनः १४ ब्रजतांवोविनाशांशा
मात्राशाविफलीकृताः नसमर्थाःसमाक्रांतोभवंतोभंगुराश्रयः १५ वयमात्मेतियेषांवोबभूवकिलवासना तत्त्वविस्मृतिजाताहिदृष्टरज्जुभु
जंगवत् १६ अनात्मन्यात्मसेषासैषावस्तन्यवस्तुता अविचारेणवजाताविचारेणक्षयंगता १७ भवंतोन्येवयंचान्येब्रह्मस्तान्यत्कर्तृनापरा
अन्योभोक्तान्यआदत्तेकोदोषःकस्यकीदृशः १८ वनेभ्योदारुसंजातंरज्जवोवेणुचर्मणः वाह्नीचायःफलान्येवंतत्साप्रासार्थमुद्यतः १९

त्वत्समाक्रांतोकुतःसामर्थ्यमभूदितिचेदात्मतादात्म्याध्यासबलादित्याहवयमिति १६ १७ एवंविवेकदृष्टिनिकस्यापिभवत्प्रयुक्तदोषसंबं
धोपिनास्तीत्याहभवंतइति भवंतःकरणभूताःवयमभिमंतारःब्रह्मस्त्वअद्वयंकर्तृताप्राणप्रयुक्तक्रियानिमित्तताभोक्ताचिदाभासःआदत्तेम
नः १८ एवंचेत्कथंव्यवहारकार्यनिष्पत्तिरितिचेत्काकतालीयन्यायादितिसहदृष्टांतेनाहवनेइत्यादिना वेणुत्वचाकाष्ठभारबंधनंवाह्नगंप्रासि
द्धंवाकारात्कुगारंकिंकादयश्चअयसःफलानिप्रयोजनानिलोहकुद्दुरभरणप्रयुक्तानीतियावत् एवंतत्साप्रासार्थमुद्यतोनगरगृहसिद्धये १९

एवंचभिन्नप्रयोजनैः क्रियाकारकैरर्थान्विष्यघूमानागृहाकृतिः काकतालीयन्यायादेवेत्यर्थः २० तथाऽऽइहापिकार्यकरणसंघातेदर्शन श्रवणवचनादिफलकस्वशक्तिभिर्नियतानितानींद्रियाणियासांतथाविधाः व्यवहारकार्यकलिकाः काकतालीयादेवबलंयथास्यात्तथासं पन्नाः तत्रकस्यकेवखंडनास्मृतिरत्तिनकाचित्कस्यचिदित्यर्थः २१ विस्मृतेरविद्यास्मृतिरात्मविद्यातत्फलमाहसदिति २२ २३ अंतंना त्मागता तत्रतस्मिन्नूणीनंदस्वप्रकाशपरे २४ यथास्थितेवस्तुनिकदाचिद्भ्रांत्याविचित्रपदार्थघिरदर्शनादुत्थंप्रसक्तंअनर्थकंव्यर्थमेवा

इत्थंयथेहसामग्र्यास्वशक्तिस्वापदार्थया संपन्नाकाकतालीयाद्दृष्टावरगटाकृतिः २० संपन्नाःकाकतालीयात्स्वशक्तिनियतेंद्रिया त थैवकलिकालोलंकेवकस्यात्रखंडना २१ विस्मृतिर्विस्मृतादूरंस्मृतिःस्फुटमनुस्मृता सच्चसत्समसच्चासत्यंतंक्षीणंस्थितंस्थितं २२ एवंविधेनभगवान्विचारेणमहातपाः सोतिष्ठन्मुनिश्चार्द्धोव्हूनुवर्षगणानिह २३ अपुनर्भवनायेवयत्रचिंतांतमागता मरुतावसुद् रस्यातत्रासावबसत्सदा २४ यथाभ्रंतपदार्थघिदर्शनोत्थमनर्थकं ध्यानाश्वासनमालंब्यसोवसत्सुखगःसदा २५ हेयादेयसमा संगत्यागादानदृशःक्षये वीतहव्यमुनेरासीदिच्छानिच्छातिगंमनः २६ विदेहकेवलीभावेसीमांतेजन्मकर्मणां संसारसंगसंत्यागरसास वननेच्छया २७ विवेशासतयैवांतेसह्याद्रेहेमकंदरं अपुनःसंगमायाशुजगज्जालमवेस्यसः २८ बद्धपद्मासनःस्थित्वातत्रोवाचात्म नात्मनि रागनीरागतांगच्छद्वेषनिर्द्वेषतांव्रज २९ भवद्भ्यांसुचिरंकालंइहप्रक्रीडितंमया भोगानमोस्तुयुष्मभ्यंजन्मकोटिशतान्यहं ३० भवद्भिर्लालितोलोकेलालकैरिवबालकः इमामपिपरांपुण्यांनिर्वाणपदवीमहं ३१ येनविस्मारितस्तस्मैसुखायास्तुनमोनमः त्वदुत्तपेन हेदुःखमयात्मान्विष्टआदरात् ३२ तस्मात्वदुपदिष्टेयंमार्गोममनमोस्तुते त्वत्प्रसादेनलब्धेयंदृगीतलापरवामया ३३ नाश्वासंवारयित्वं पु

नःपुनर्ध्यानाश्वासनमालंब्येत्यर्थः २५ तस्यप्रारब्धशेषक्षयेकीदृशंमनआसीत्तदाहहेति हानयोग्यानां आदानयोग्यानांचविषयाणांसमा संगप्राप्तावपिहानादानदृशोःक्षये २६ प्रतिभासमात्रेणापिस्थितस्यदेहादिसंसारसंगस्यसंत्यागेपरिशिष्यमाणेब्रह्मरसमकरंदेनवेच्छ यातुकंठयाविवेशेतिपरेणान्वयः संत्यागेवांछामापातिशूगयिनीमितिपाठेस्पष्टं २७ नयावांछया २८ सहजशत्रुषुरागद्वेषादिषुपिनिर्द्वेषतां मैत्रीभावयत्नर्गतुकामस्वहितमुपदिशन्प्रणम्यनान्निमंत्रयतेरागेत्यादिना २९ ३० ३१ सुरम्यविषयसुखलवायत्वयाऽतमनसंतोपि

हे दुःखस्य तत्वसुखद आत्मन् इदानीं ज्ञानजननोपकारिणं देहं प्राप्य मित्रय पतिकल्याणमित्यादिना ३६ हे देह इयं आवयोर्वियुक्तिः स्थितिरनादिनि
यतिस्वभावः संयोगा विप्रयोगांतारतिन्यापादितिभावः जंतूनां प्राणिनां संबंधिनां प्रयोजनानां स्वार्थानां इयं गतिः रीति विषमा यस्मिन् संपा अत्यंत
मित्रस्वजनानपि विहाय पुरुषाः धावंतीति भावः ३५ न देवस्वस्यापि उपास्थितमित्याह देहेनापीति ३६ नायं ममापराधस्त्वयापि स्वनाशगौर्यमिवम
दुपकारः कृत इत्यनुत्रोचन्नि वाहत्वयैवेति ३७ एतत्त्वयैव उपासितमनुष्ठितं इदानीं त्वं क्षमां प्रार्थयन् एकाकिन्येति ३८ त्वजयार्थं त्विद्विपरीत

हे दुःखनाम्ने दुःखतत्वसुखदात्मन्नमोस्तु ते कल्याणमस्तु ते मित्र संसारासारजीवित ३८ देहस्थितिरियं पामो वयमात्मीयमास्यदं
प्रयोजनानां जंतूनां महानु विषमा गतिः ३५ देहेनापि चियुज्येहं भूत्वा जन्मशतान्यपि मित्रकार्यं मयापत्वं त्यज्यसे चिरबांधवः ३६ त्व
येगात्मन्युपानीता सात्मस्तानवत्रातस्तातिः अधिगम्यात्मविज्ञानमात्मनाशः कृतस्त्वया ३७ देहनान्येन भग्नोसि त्वयैवैतदुपासितं ए
काकिन्यापि शुश्रूषंत्या प्रशांतेमयि दीनया ३८ त्वया दुःखं न कर्तव्यं मातः [illegible] जनाम्यहं क्षंतव्या काम भगवन् विपरीतापराधजाः ३९
दोषा उपशमे कांतं व्रजाम्याहिज्ञमंगलं चिराच्चिराय वेदानीं मंबतस्मे किलावयोः ४० वियोगो योगदोषेण प्रणामोयं सपश्चिमः नमः सु
कृतदेवाय भवते स्कृत्वपापुरा ४१ नरकेभ्यः समुत्तार्य स्वर्गेहमभियोजित कुकार्य क्षेत्ररूपाय नरकस्कंभवाहिने ४२ वासनापुष्पभारा
पनमो दुष्कृतत्रगाखिने येन सार्द्धं चिरं बद्धो भुक्ताः प्राकृतयोनयः ४३ अयप्रभृत्यदृत्यापतस्मै मोहात्मनेनमः प्रध्वनद्धू रामधुरे वच
से पत्रवाससे ४४ नमो गुहातपस्विन्यै वयुसाये समाधिषु संसाराध्वनि खिन्नस्य त्वं समाश्वासकारणं ४५ आसीर्वपस्यासास्निग्धा सर्वलो
भापहारिणी सर्वसंकटखिन्नेन दोषेभ्यो द्रवतामया ४६ त्वमेका शोकनाशार्थमाश्रिता परमा सखी संकटावटकुंजेषु हस्तालंबनदा

वैराग्यसेवनाद्यपराधजाम दोषाः ३९ उपशमेकांतं प्रात्युतिकोपशमं आदिराज्ञा स्वपुनरावृत्यात् क्षमा मुखवद्दूर्णनिप्रसक्तिं वारयन्नाह चिरादिति
चिरादपि चिराय शाश्वत इतियावत् इदानीं आरभ्येति शेषः ४० सुकृतं पुण्यमेतत्तत्र क्षणाय देवाय ४१ कुकार्यं निषिद्धाचरणं तत्र क्षेत्रभ
मोरूपाय नरकलक्षणानां स्कंधानां दृहच्छाखानां वहनशीलाय ४२ वासनाः यातनाए वपुष्पभारो यस्य ४३ प्रध्वनद्भिर्वंशैः कीचकैर्मधुरव
चसे जीर्णपत्राण्येव वासांसि यस्याः तपा विधायै गुहान्तस्थायै तपस्विन्यै ४४ आश्वासकारणमित्यत्र जहल्लिंगं गुहाविशेषणं ४५ सुस्निग्धा अ
त्यंतस्नेहवती वपस्या आसीः अभूः पूर्णात्मविश्रांतिदाने न सर्वलोभापहारिणी दोषेभ्यः समाधिविघ्नेभ्यः ४६ इदानीं दंडकाष्ठगुणानर्घ्यं

उत्कला

इदानीं देहभागं — — — — — — — — — नीअस्थीति ४८ एतावन्मात्रमेवसारं न त्वं यस्य तथाविध एकं त्वं असाधारणभागं गृहीत्वागच्छ स्वाः प्रकृतीः ४९ देहे हे कप यसो जलस्य त्वदीयमलस्य दौर्गंध्यस्वेदादिना दूषणात् पेसोभा अपराधास्त्वदीय प्रकारभेदरूपेभ्यस्ते नाने भ्यः शुचित्वसंपादनोपायेभ्यो पि न मोक्ष तथा भोजनशयनाभ्यां न नालंकरणादिव्यवहारेभ्यस्त्वत्साम प्रीसंपादनाये तस्ततो धावन लक्षणाभ्यः संस्तिभ्यश्च न मोक्तहे प्राणाः सहजाः सुहृदः मया अधपुत्रदानं नमस्कारक्रमेणएते प्रभवंतो पिंडत्कृष्टाः कृताः नमस्कृता

वाईकैकांतसुहृदे दंडकाष्ठायते नमः अस्थिपंजर मात्मीपं तथारकां त्रजंतुकं ४८ एतावन्मात्रसारेकं गृहीत्वागच्छ देहक पयः स्तोभप्रकारेभ्यः स्नानेभ्यो पि न मोक्तते ४९ नमोक्त व्यवहारेभ्यः संसृतिभ्यो न मोक्तते एते भवंतः सहजाः प्राक्तनाः सुहृदो मया ५० क्रमेण घोत्कृताः प्राणाः स्वस्ति स्तिवोस्तु व्रजाम्यहं भवद्भिः सह विश्रांतु मया बद्धीषु योनिषु ५१ विश्रांतं गिरिकुंजेषु श्रांतं लोकांतरेषु च क्रीडितं पुरपीठांतरुषितं पर्वतेषु च ५२ स्थितं कार्यविलासेषु प्रस्थितं विविधाध्वसु न तदस्ति जगत्यत्र भवद्भिः सह यन्मया ५३ न कृतं न गतं यातं न दत्तं नाचलं विनं इदानीं स्वां दिशं यांतु भवंतो याम्यहं प्रियाः ५४ सर्वे स्वयं तानि चयाः पतनांताः समुच्छ्रयाः संयोगा विप्रयोगांताः सर्वे संसारवर्त्मनि ५५ अयं चासुषमालोको विशत्वादित्यमंडलं विशंतु वनपुष्पाणि सौगंध्यानंदसंविदः ५६ प्राणानिलस्तथास्पंदं विशत्वघप्रभंजनं विशत्वाकाशकुहरं शब्दश्रवणशक्तयः ५७ इंदुमंडलमायांतु रसाऽनार सज्ञाक्तयः निर्मंदिर इवांभोधिर्गतार्कइवबासरः ५८

इतियावत् ५० प्राक्तनसुहृत्त्वमेव वर्णयति भवद्भिरिति ५१ पुराणं पोगानां सिद्धक्षेत्राणां चांतः ५२ ५३ न कृतं न दत्तं न दत्तं च हस्ताभ्यां नयातं पद्भ्यां नावलं बितं मनसा च भवंतः स्वां दिशं प्रकृतिं यांतु अहं ब्रजयामिहे प्रियाः ५४ किमर्थमस्मान्प्रकृतिषु विलापयसि कार्यकरणसंघातात्मने वस्थित्वाभोग्यनिचयानेव पूर्ववत्कुतो न प्राप्स्यामस्तत्राह सर्वे इति हे सर्वे प्राणादयः ५५ इदानीं प्रत्येकमिंद्रियादीनां पासव्याः प्रकृतौ विभज्य दर्शयति अयमित्यादिना सौगंध्यानंदसंवित्पदेन तत्कारणं घ्राणेंद्रियं लक्ष्यते वनपुष्पपदेन च गंधमात्रसारा पृथिवी ५६ एवमिंदुमंडलपदेनापो ग्राह्या इतिक्रमेण गताः कलाः पंचदश प्रतिष्ठामिति श्रुतिरेव प्रमितिदिशा सर्वेषां स्वाप्रकृतिं यांतित्यर्थः ५७ एवं युष्मासु उपाधिभूतेषु गतेषु भवत्स्वतिबिंबितचिदाभासात्माजीवभूतोहमपि स्वबिंबभूत प्रणवाद्यं मात्रं तस्ये ब्रह्मात्मनि प्रवरगम्यामीत्याह निर्मंदिर इत्यादिना ५८

खं ईरयति जनयति स्वैरं स्वोपादानं किल येन प्राप्तोयुन इव कल्पांते प्रलयकाले सर्गं वत्प्रपंच इव च स्वमननं सुषुप्त मननं आत्यंतिकमनः
शांतिर्यथास्यात्तथा ५९ दीर्घोच्चारितस्य प्रणवस्य अक्षरं प्रेक्षांतिं अनुसृत्य शांता ब्रह्माकारता मात्र प्राप्त्यानुपरताधीर्यस्य ततएव विग
तः प्रारब्धप्रतिबंधः शिष्टावि घालेशामलः ६१ इति श्रीवा० ता० प्र० उ० षडशीतितमः सर्गः ८६ नमः कोदंडहस्ताय संधीकृतशराय च द्रा
रिताखिलदैत्याय रामायापन्निवारिणे १ येन क्रमेण संप्राप्तो वीतहव्यो विदेहतां प्रणवात्तं समालंब्य सक्रमोत्र निरूप्यते एवं वक्ष्यमाणक्र
मेण तारमतुच्चैः स्वरं प्रणवं ज्ञानेः दैर्घ्यापादनेनोच्चारयन् समनुमननेषणः प्रशांतिक्रमेण प्राप्तषष्ठसप्तमभूमिकोभूत्वा अंतः स्वतः दिव
ष्टकलितवान् प्राप्तवान् १ यतिः सन्यासी वीतहव्यः ॐमित्येतदक्षरमिदं सर्वं तस्योपाख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्य

च्चार दीव यनः खे रंभ्रासः कल्पांतसर्गवत् ॐकारांते स्वमननं प्रशाम्याम्यात्मनात्मनि ५० दग्धेंधन इवार्चिष्मान्निस्तेह इव दीपकः व्य
पगताखिलकार्यपरंपरः सकलदृश्यदृशातिगतस्थितिः प्रणवशांत्यनुसंसृतिशांतधीर्विगतमोह मलोयमहं स्थितः ६० मोक्षोपा
३८७९ ये मुमुक्षुप्रकरणे इंद्रियवर्गनिराकरणोपदेशः सर्गः ८६ श्रीवसिष्ठउवाच एवं कलितवानंतः प्रशांतमननैषणः ज्ञानेरूच्चारयं
स्तारं प्रणवं प्राप्तभूमिकः १ मात्रादिपादभेदेन प्रणवं संस्मरन्मुनिः अध्यारोपापवादेन स्वरूपं शुद्धमव्ययं २ स बाह्याभ्यंतरान्भावा
न्स्थूलान्सूक्ष्मतरानपि त्रैलोक्यसंभवांस्त्यक्त्वा संकल्पाकल्पकल्पितान् ३ तिष्ठन्नक्षुभिताकारश्चिंतामाणैरिवात्मनि संपूर्णइवशीतां
शुर्विश्रांत इव मंदरः ४ कुंभकारगृहे चक्रं संरोधितमिव भ्रमात् अंभोधिरिव संपूर्णस्तिमिताकारनिर्मलः ५ त्रिकालातीतं तद्यों का

र एवेति मांडूक्यश्रुतिदर्शितक्रमेण अकारोकारमकारव्यमात्राभिः र्दमात्रया च कल्पितेन स्थूलसूक्ष्माव्याकृततुरीयलक्षणपादभेदेन प्रणवं
संस्मरन्सन् पंचीकरणोक्तेन विराड्हिरण्यगर्भाव्याकृतलक्षणानां तुर्ये प्रथमजागरितस्थानो बहिष्प्रज्ञ इत्यादिश्रुत्युक्तदिशा अध्यारोपेण
नांतःप्रज्ञं न बहिःप्रज्ञं नोभयतः प्रज्ञं न प्रज्ञं न प्रज्ञानघनमित्याद्यपवादेन स्थूलसूक्ष्मकारणरूपानपि स बाह्याभ्यंतरएव भावांस्त्यक्त्वा शुद्धमव्य
यं स्वरूपं दृष्टाप्रपंचोपशमं शिवं शांतं महैतं चतुर्थं मन्यंते स आत्मा स विज्ञेय इति श्रुत्युक्ते तुर्ये स्वात्मनि तिष्ठन्सन् प्रणवपर्यंतं दीर्घनिःस्व
नतं तुनासह इंद्रियतन्मात्रजालं जहाविति षष्ठेन संबंधः २ ३ ४ भ्रमात्कुमरणात्संरोधिते सति कुंभकारगृहे चक्रमेवाक्षुभिताकारं ५ श्रीः

तेजस्तमसोर्युगपच्छांत्यप्रसिद्धेरत्नोपमेयं ६ प्रणवस्यपर्यंतोग्रभागस्तल्लक्षणेनदीर्घनिस्वनतंतुनासहजह्यावित्यादिः सर्वःस्थूलसूक्ष्मे तरागनपित्यक्तेत्यस्यैवप्रपंचः ७ ततःउत्तिष्ठत्सुसाक्षिणात्मस्फुरद्रूपंतमोमात्रं ९ तांनमःप्रकाशाभ्यस्यामवस्थांआसाद्यतत्कल्पनाहेतुंमनस्त्त्वं णांप्रत्यगात्मयतत्छिन्नवान् १० अंगेतिसंबोधने प्रतिभासंनिवातदीयवस्फुरप्रकाशतांआलंब्यतामपिकलनांतत्स्वरेहात्यागेवनिमेषा र्द्धार्द्धभागेनकालेनजहौसएवचित्तश्चेत्यदशात्यागइत्यर्थः ११ १२ अनयारीत्यासाक्षिमात्रपरिशेषलक्षणंपरस्यंतीपदमासाद्यतदेवविय

शांतंतेजस्तमःपुंजंविगतार्केंदुतारकं अधूमाभ्ररजःस्वच्छमनंतंशारदीवसं ६ सहप्रणवपर्यंतदीर्घनिःस्वनतंतुना जहाविंद्रिय तन्मात्रजालंगंधमिवानलः ७ ततोहृहैतनोमात्रं प्रतिभातमिवांबरे उत्तिष्ठत्स्फुरद्रूपंप्राप्तकोपलवंयथा ८ प्रतिभातंततस्तेजो निमेषार्द्धविचार्यसः जहौबभूवचनदानंतमोनप्रकाशकं ९ तामवस्थामथासाद्यमनसातन्मनस्तथांमनागपिप्रस्फुरितं निमेषार्द्धार्द्धशा तयत् १० ततोंगसंविदं स्वस्थांप्रतिभासमुपागतां सद्योजातशिशुस्तानसमानकलनामलं ११ निमेषार्द्धार्द्धभागेनकालेनकलनांप्रभुः जहौचित्तश्चेत्यदशांस्पंदशक्तिमिवानिलः १२ पश्यंतीपदमासाद्यसत्तामात्रात्मकंततः सुषुप्तपदमालंब्यतस्थौगिरिरिवाचलः १३ त तःसुषुप्तसंस्थानंस्थित्वास्थिताविभुर्मना क्रमसुषुप्तस्थैर्यमासाद्यतुर्यरूपमुपाययौ १४ निरानंदोपिसानंदःसच्चासच्चापितत्रसः आसी न्नकिंचित्किंचित्तत्प्रकाशस्तिमिरंयथा १५ अचिन्मयंचिन्मयंचनेतिनेतिपदुच्यते ततस्तत्संबभूवासौयद्गिरामप्यगोचरः १६ तदसौ सुसमंस्फारंपदंपरमपावनं सर्वभावांतरगतमभूत्सर्वविवर्जितं १७ यच्छून्यवादिनांशून्यंब्रह्मब्रह्मविदांवरं विज्ञानमात्रंविज्ञानविदां यदमलंपदं १८ ॥७॥

जे

शादिबाधपरिशिष्टसत्तामात्रात्मकंकारणतत्त्वमितितञ्चावस्थितिलक्षणंसुषुप्तपदंआलंब्येत्यर्थः १३ एतेषट्सप्तम भूमिकेसदेहावस्थे ततःसाक्षिकसदैकरस्येनिरतिशयाखंडानंदाविर्भावात्मारब्धशेषेणसहात्यंतिकप्रातिभासमाशोविदेहकैवल्यावासिंद र्शयतितुर्यमिति १४ ततःकिमासीदितिचतुर्थप्रश्नस्योत्तरमाहनिरानंदइत्यादिनाविषयानंदश्रून्योपिस्वस्वरूपेणैवसानंदःस्वातिरिक्तसत्ताश्र न्योपिसद्रूपइत्येवंसर्वंयोज्यं यथानक्तंदृशांतिमिरमेवप्रकाशस्तद्वत् १५ चेत्याभावाद्विन्मयंस्वस्वरूपेणैवचिन्मयं १६ १७ सर्ववादिभिर्नाना विकल्पैःस्वस्वसिद्धांततयाविकल्पितमपिदेवेत्याहयदित्यादिना १८

न्यादिकलांकानां शिवमतस्थानां तिपाठेपि स एवार्थः १९ तन्नु आत्मनो विदुषामात्मानत्येकेति निषेधविषयेषु षष्ठीछांदसी नैरात्म्यं क्षणिकवि ज्ञानसंतानः स हि स्थायित्वेन समानो नास्त्येवेति नैरात्म्यं तादृग्ज्ञात्मनां सौत्रांतिकवैभाषिकाणां माध्यमिकानां चिद्चित्मध्यमशून्यमात्रं तद्वादि नां सुसमचेतसां जीवन्मुक्तानां निरवशेषपूर्णं शून्यवादिभिरुपक्रम्य सर्ववादिभिरुपसंहारस्तत्र योः परिच्छेदवादे परमावधिता इतरेषां तु आंत रालिकमतानामुभयमिश्रणात्तारतम्यवैचित्र्येणोत्थानमिति द्योतनायेति बोध्यं २० सर्वस्य तत्वं सार्वं ईदृशं यत्सत् असौ तत्सत् ईदृक्त्वास्थि तइत्यर्थः २१ यत्अनुत्तमनिस्यंदमंत्वत निःक्रियंव्योम्न पिजन्मादिक्रियासत्वात्तनोपि कूटस्थमित्यर्थः तेजसामपि भासकत्वेन त्रिलोक यत्स्वा

पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनां शिवः शिवमतस्थानां कालः कालैकवादिनां १९ आत्मात्मनस्तद्विदुषां नैरात्म्यं तादृग्ज्ञात्मनां मध्यं माध्यमिकानां च सर्वं सुसमचेतसां २० यत्सर्वशास्त्रसिद्धांतो यत्सर्वत्तदयानुगं यत्सर्वं सर्वगं सार्वं यत्तत्तत्सदसोऽस्थितः २१ यदनुत्त मनिःस्यंदं दीप्यते तेजसामपि स्वानुभूत्यैकमात्रं यद्यत्तत्सदसौऽस्थितः २२ यदेकं चाप्यनेकं च जनरंजनरंजनं यत्सर्वं चाप्यसर्वं च य त्तत्सदसौऽस्थितः २३ अजमरमनाद्यनेकमेकं पद्ममलं सकलं चनिःकमं स्थितइति सत्तज्ञानभःस्वरूपादपि विमलास्थितिरीश्वरः स एनः २४ मोक्षोपायेषु पशामप्रकरणे वीतहव्यनिर्वाणोपसर्गः ८७ ३५९७३ श्रीवसिष्ठ उवाच प्राप्य संसृतिसीमांतं दुःखाब्धेः पारमागतः वीतहव्यः शशामैवमपुनर्मननेमुनिः १ तस्मिंस्तथोपशांतेहि परां निर्वृतिमागते पयःकण इवांभोधौ स्वे पदे परिणामिनि २ तथैव तिष्ठन्निःस्यंदः सकायो ज्ञानिमायया अंतर्विरसतां प्राप्य मार्गशीर्षांतिपद्मवत् ३ (नुभूत्यैकमात्रं यत्तत्प्रसिद्धं सत् तदसावि तिप्राग्वत् २२ २३ स वीतहव्यः इतिउक्तक्रमेण मुक्तः तज्ज्ञानभःस्वरूपादपि निर्मलस्थितिः सन् अजमजरमनाद्येकं अमलं निष्कलं पदं भूत्वास्थि तः बहुदृष्ट्यानुसरणेन ईश्वरः सन् एकोऽनेक ऐश्वर्यभेदैरनेकं सकलं च भूत्वास्थितइत्यर्थः २४ इति श्रीवासिष्ठतात्पर्यप्रकाशेनुपशामप्रकरणे सप्ताशीतितमः सर्गः ८७ वीतहव्ये विमुक्ते तत्प्राणानां तदिसलयः वृण्यते देहसंशोषः कलानां कारणेलयः एवमुक्तरीत्या अपुनर्मनेन आत्यंतिकमनोनाशोति १ परिणामिनि परिनिष्ठिते सति अपरिणामिनीति वाछेदः २ मार्गशीर्षस्यांते हेमंते पद्मवत् ३ श्रीरामायनमोन्नः

सर्वदेहव्यापिनां प्राणानां लययुपसंहारमाह तस्येति तस्य असवः प्राणाः देहदुमस्यां तस्छं तत्तन्नाडीस्थानं त्यक्त्वा तत्त्वक्षणं नीडं प्रति आययुः देहदु
मं तस्थं तन्नीडं त्यक्त्वा बहिरायायुरिति तु न व्याख्येयं न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते ब्रह्मैव सन् ब्रह्माप्नोतीत्यादिश्रुतिविरोधापत्तेः सर्वकर्म
वासनानाशेनोत्क्रमणे बीजप्रयोजनयोरभावाच्चेति विहगाः यंत्रो विहगवदाचरंतः लोहितादित्वात्क्यष् यंत्रेभ्यउन्मुक्ताः शिलाइव ४ इतितुपं
चम्यामाकृतावापः पुरुषवचसो भवंतीति तद्यथा पेशस्कारी पेशसो मात्रामपादायेत्यादिश्रुत्यातदनंतर प्रतिपत्तेरंहतिपरिष्वक्तः प्रश्ननिरूपणाभ्या
मिति बादरायणोक्तन्यायाच्च पूर्वजन्मानुष्ठिताग्निहोत्रादिकर्मसमवाय्यपूर्वाब्वाच्यसोमाज्यपयःप्रभृतिभूतमात्रासाहितस्यैव लिंगस्य चंद्रमं
डलारूढस्यभागांते आकाशादिक्रमेणौषधिव्रीहियवपुरुषयोषिदनुप्रवेशेन पुरुषाकारतापत्तिवगमात्तासां भूतमात्राणां कारणानुप्रवेश

तस्य देहदुमां तस्छं त्यक्त्वा तन्नीडमाययुः प्रोड्डीय विगाः हे यंत्रोन्मुक्ता इवासवः ४ भूतेष्वेव प्रतिष्ठानि भूतानि सकलान्यलं मांसास्थि
यंत्रदेहस्त्वेव नाथ नतलेवसत् ५ चिद्रूपेणैव प्रविष्टानि तोयंरसाततवृंधानुषुस्थिताः स्वस्वरूपे स्थितं सर्वमुनावुपशाममंमते ६ एषा ते
कथितारामविचारत्रातत्त्वशालिनी विश्रांतिर्वीतहव्यस्यप्रज्ञयैनां विवेचय ७ एवंप्रकारयाचार्यो व्याख्याविचारेणायदुद्या तत्वमालो
क्य तत्सारमातिष्ठोत्तिष्ठ राघव ८ यदेतदखिलं राम भवते वर्णितं मया यदिदं वर्णयाम्यग्रे वर्णयिष्यामि यच्चवा ९ त्रिकालदर्शिनाति
स्युषिरं चकिलजीवना विचारितं च दृष्टं च मया तदखिलं स्वयं १० तदेतां मम तां दृष्टिमवलंब्य महामते ज्ञानमासादय परं ज्ञानान्मुक्ति
हि लभ्यते ११ ज्ञानान्निदुःखतामेति ज्ञानादज्ञानसंक्षयः ज्ञानादेव परा सिद्धिर्नान्यस्माद्राम वस्तुतः १२ माहभूतेष्वेवेति सकलानिप्रा

णादिनामांतषोडशकलासहितानि यस्तु पितृमातृमलजः स्थूलतरं आः सतत्रैव स्थितस्त्याहमांसेति ५ चितु लिंगे बिंबिता जीवचित्स्व बिंब
भूते चिद्रूपेणैव प्रविष्टे वधा तैत वस्त्वग सृक् मांसमेदोऽस्थिमज्जाशुक्राणि धातुषु स्वोपादानेषु ६ उपसंहरति एषेति ७ चाव्यारमणीयया वृत्ता
गुणवृत्तनादिति ङीष् ८ इदानीं भगवान्वसिष्ठः कृपातिशयेनोक्तोच्यमानवक्ष्यमाणग्रंथस्य चिरायुर्भिः सर्वदर्शिभिरस्मदादिभिः सर्वप्रकारे
रसत्स्थकेतानां विचारेणालोकेनुशास्त्रश्रुतिभिरन्वयव्यतिरेकाभ्यां च परीक्ष्य भगोदर्शनस्य चैकात्म्य दृष्टिमवलंब्य ज्ञानप्रतिष्ठाप्राप्तिरेव
फलं नातः परं पुरुषैः संपाद्यमस्तीति निर्णीतमिति विश्वासदार्ढ्याय हृदयदेनतदित्यादिना ९ १० ११ १२ श्रीरामचंद्राय नमो नमस्ते ७ ॥

शांतिनः खंडितः अशेषः संस्कारशेषेणाप्यनवशेषितश्चित्तादिर्येन तथाविधोभूदित्यर्थः ९३ ननु वीतहव्येन स्वहृदि संकल्पमयं जगत्तत्र गणत्वं चानुभूतमित्युक्तं तज्जगदंतर्गतं सूर्यं प्रविश्य तत्रत्यपिंगलहस्तस्य तज्जगद्व्यतिष्ठस्वदेहोद्धारः कथं कृतः नहि स्वाप्नकुड्यैर्जाग्रत्स्थितिरित्याशंक्य मनोमात्रं कांतिशैशवात्स्वप्नाहवीतहव्येति सा वीतहव्यात्मिका संवित् स्वदृश्योपलक्षिते ब्रह्मणि इदमस्मदादिसाधारणमेव दृश्यं स्वसंकल्पजगतीगतमनुभूतवतीनापूर्वमित्यर्थः ९४ ९५ इतश्च इदमेव तज्जगदित्याह वीतहव्य इति ऐंद्रियैः अस्मदादिचक्षुरादिदृष्टं पावीतहव्यः अस्मदीयमनोमात्रं यतोऽस्मन्मनएवाहमिवत्वमिव भासते मनएवेदं कृत्स्नं जगत् तत्रान्यताऽनन्यते केन हिविंध्याभेदेन तत्सुत्राभिधं तेन भिधंतेवेत्य

शानेन सकलामात्रां विनिकृत्य समंततः शांतिनाशेषचित्तादिर्वीतहव्यो मुनीश्वरः ९३ वीतहव्यात्मिका संवित्संकल्पजगतीगता अनुभूतवती दृश्यमिदमेव च तज्जगत् ९४ वीतहव्यो मनोमात्रं मनो हंतेमि चेंद्रियैः मनोजगदिदं कृत्स्नमन्यतानन्यतेतुके ९५ अधिगतपरमार्थः क्षीणरागादिदोषः सकलसकलविकारोपाधिसंगाद्यपेतः चिरमनुसृतमतःस्वस्वभावं विवेकी पदममलमनंतं प्राप्तवानस्तशोकः ९६ मोक्षोपायेपूपशमप्रकरणे वीतहव्यविश्रांतिःसर्गः ८८ श्रीवसिष्ठ उवाच वीतहव्यवदात्मानं नीत्वा विदितवेद्यतां वीतरागभयोद्वेगस्तिष्ठ राघव सर्वदा १ त्रिंशद्वर्षसहस्राणि विजहारयथासुखं वीतहव्यो वीतशोकस्तथा विहर राघव २ अन्ये च राजमुनयो जातास्तेषां महाधियः यथा वसन्स्तराद्वत्वं तथैवास्व महामते ३ सुखदुःखक्रमैराम नानकराचनराप्यते सर्वगोपि महाबाहो किंमुधा परिशोचसि ४ बहवो विदितात्मानो विहरंतीह भूतले न केचन वशंयांति दुःखस्यांभेगवानिव ५ स्वस्थो भव भवोदारः समो भव सुखी भव सर्वगस्त्वं त्वमात्मैव तव नास्ति पुनर्भवः ६ (र्थः ९४ एवं राममसमाधाय प्रकृतमर्थमाह अधिगतेति सकलेभ्योऽविद्याकामकर्मादिमलेभ्यस्तत्प्रयुक्तेंद्रियविकारेभ्यो देहत्रयोपाधिभ्यस्तत्प्रयुक्तप्रियसंगादिभ्यश्चापेतः विवेकी सन्वीतहव्यः चिरं चितशुद्ध्युपायमनुष्ठानैः श्रवणमनननिदिध्यासनसाक्षात्कारसमाधिकाभ्यासैरंतःस्वहृदि अनुसरणेनाभिमुखीकृतं स्वभावभूतममलं अनंतं मोक्षपदं प्राप्तवानित्यर्थः ९६ इति श्रीवासिष्ठतात्पर्यप्रकाशेउपशमप्रकरणे अष्टाशीतितमः सर्गः ८८ अनिच्छाज्ञानतमोहानानभोगत्यागसिद्धिश्चापदाश्चैर घष्यत्वंततनोश्चात्र कीर्त्यते आत्मानं स्वनीव स्थोर्हरतेश्चेति कात्यायनवचनाद्धिकर्मता १२३४ अंगेति संबोधनं ५ उदारः अंतः सर्वत्यागशीलः ६

३९७१९ नं

७ शिखिनां मयूराणां ८ शारीराणामित्युक्तेः सति प्रारब्धे वीतहव्यस्य विद्याधरादिभोगइवमानस्यः सिद्धयः संभवंत्येवेत्याशयः ९ प्रमाणि
ताः प्रमाणैरुपलब्धाः ताः अग्नेरूर्ध्वज्वलनमिव देवयोनीनां स्वभावसिद्धाः १० नभोगमनादिक्रियाजालं वस्तुस्वभावस्तत्तद्योनिदेहस्वभावः
मंत्रादीनामपि नभोगतिशक्तिदर्शनादिति भावः मतं वांछितं ११ तर्हि मनुष्याणां योगसिद्धा नभोगमनादिप्राप्तिः कथं तत्राह अनात्मवि
दिति मण्यौषधादिद्रव्यशक्त्या मंत्रशक्त्या योगाभ्यासादिक्रियाशक्त्या तत्परिणामकालशक्त्या च करादिवदेव प्राप्नोति दृष्टांतार्थं वा कालग्रह

हर्षामर्षविकाराणां जीवन्मुक्ता भवादृशाः न केचन वशं यांति मृगेंद्राः शिखिनामिव ७ श्रीरामउवाच अनेनैव प्रसंगेन संशयोयं ममो
दितः शरत्काल इवांभोधस्तन्मे त्वं तनु तानयं ८ जीवन्मुक्तशरीराणां कथमात्मविदांवर शक्तयो नेह दृश्यंते आकाशगमनादिकाः
९ श्रीवसिष्ठउवाच आकाशगमनादीनि यान्येतानि रघूद्वह प्रमाणिताः पदार्थानां सहजाः खलु शक्तयः १० यद्धि चित्रं क्रियाजा
लं दृश्यते गम्यते पुनः राम वस्तुस्वभावो सौ न तदात्मविदां मतं ११ अनात्मविदमुक्तोपि नभोविहरणादिकं द्रव्यकर्मक्रियाकालशक्त्याप्रा
प्नोति राघव १२ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्मवान्स्वयं आत्मनात्मनि संतृप्तो नाविद्यामनुधावति १३ ये केचन जगद्भावास्तानवि
द्यामयान्विदुः कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति १४ अविद्यामपि ये युक्त्या साधयंति सुखात्मिकां ते ह्यविद्यामया एव न त्वात्मज्ञा
स्तथाविधाः १५ तत्वज्ञो वाप्यतत्वज्ञो यः कालद्रव्यकर्मभिः यथाक्रमं प्रयतते तस्योड्डीनादि सिद्ध्यति १६ आत्मवान्निह सर्वस्मादतीतो
विगतैषणः आत्मन्येवहि संतुष्टो न करोति न चेहते १७ न तस्यार्थो नभोगत्या न सिद्ध्या न च भोगकैः न प्रभावेन नो मानैर्नाशामरणजी
विते: १८ नित्यतृप्तः प्रशांतात्मा वीतरागो विवासनः आकाशसदृशाकारस्तत्र स आत्मनि तिष्ठति १९ अशंकितोपयातेन दुःखेन च सु
खेन च तृप्यत्युपगतासंगो

णं यथा पिपीलिकाग्रीष्मांतकालशक्त्या पक्षोद्गमान्नभोगतिं प्राप्नोति तद्वत् १२ एष नभोगत्यादिर्नं विषयः अ
भिलाषयोग्यस्तुच्छत्वात् आत्मवान् लब्धात्मा अविद्यां अविद्यकं तुच्छफलं १३ १४ युक्त्या योगाभ्यासादिश्रमसहस्रेण तथाक्रमास्त
थाविधाः १५ तर्हि किं तत्वज्ञानां तत्संपादनशक्तिर्नास्त्येव नेत्याह तत्वज्ञ इति कालेन चिरकालप्रयत्नेन द्रव्यकर्मभिर्यथाशास्त्रोक्तक्रमं प्र
एवं प्रयतते तस्य ऊर्ध्वत्वं नभोगतिस्तरादि सिद्ध्यति १६ १७ प्रभावेन सर्वाधिपत्यनिग्रहानुग्रहसामर्थ्येन मानैः लोकपैरव्यापनार्थैः १८ १९ त
प्यति स्वाभाविकं कीर्तत्सिंनजहाति जीवनेन २०

समेनस्वानुकूलेनविषमेनप्रतिकूलेनापिप्रारब्धकर्मसंप्राप्तभोग्यवस्तुना समुद्गापस्ते ओधत्तएा काष्ठादिवस्तुना अर्चयन् अखंडाकारवृत्तिपुष्पैः
पूजयन्ः २१ अर्थस्थपाश्रयः प्रयोजनोपजीवनं २२ अभाविनात्माआत्मज्ञानलेशशून्योपि २३ मणिमंत्रादियुक्तात् इव आकस्मागमनादि
त्यसिद्धानीतितच्छास्त्रप्रतिष्ठोनियतेः क्रमः ततन्नियतिकर्तृभिरप्यशास्त्रादिभिरपिव्यर्थीकर्तुंनशक्यते २४ धातुदेव्याः वादीनां स्वतः खेचरत्वादि
सिद्धिः एषवस्तुस्वभावः अतएवसा उत्पत्तिमारभ्यायावज्जीवस्थायिनीत्याह नमहात्म्येवेति २५ २६,२७ विषघ्नौषधादिद्रव्यत्रालिवदेवमणिमंत्रादि
शक्तिरपिस्वस्वकार्यसमर्थेत्याहयथेति विषघ्नद्रव्यमणिमंत्रादिशक्तयो विषाणिनिघ्नंतिमधूनियथामदयंति यथाश्रुङ्क्कानिमाक्षिकमधूनिम

समुद्रस्सरितेवांनुःक्रमसंप्राप्तवस्तुना समेनविषमेनापितिष्ठत्यात्मानमर्चयन् २१ नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन नचास्यस
र्वभूतेषुकश्चिदर्थव्यपाश्रयः २२ यत्कृवाभाविनात्मापिसिद्धिजालानिवांछति ससिद्धिसाधकैर्द्रव्यैस्तानिसाधयतिक्रमात् २३ सिद्ध्यंती
त्यमिदंसुक्तौवस्थ्यंनियतःक्रमः शास्त्रादिभिःसुरवैर्व्यर्थीकर्तुंनशक्यते २४ स्वभावएषवस्तूनांस्वतःसिद्धिर्हिनान्यतः नियतंनजहात्ये
वतत्संगकस्वशीततां २५ सर्वज्ञोपिबहुज्ञोपिमाधवोपिहरोपिच अन्यथानियतिंकर्तुंनशक्तःकश्चिदेवहि २६ द्रव्यकालक्रियामंत्रप्र
योगाणांस्वभावजाः एताःशक्तयोरामयद्योमगमनादिकं २७ यथाविषाणिनिघ्नंतिमदयंतिमधूनिच वमयंतियथाश्रुङ्क्कानिमदनानि
फलानिच २८ तथास्वभावजान्नाद्यद्रव्यकालक्रियाक्रमः नियतंसाधयंत्याशुप्रयोगंयुक्तयोजिताः २९ एतस्मात्समतीतस्यत्यक्ताविघ
स्यराघव आत्मज्ञस्यास्यनात्यंतकर्तृताकर्तृतानघ ३० द्रव्यदेशक्रियाकालयुक्तयः साधुसंविदः परमात्मपदप्राप्तौनोपकुर्वंतिकाश्च
न ३१ यस्येच्छाविद्यतेकाचित्संसिद्धिंसाधयत्यलं आत्मज्ञस्यतुपूर्णस्यनेच्छासंभवतिक्वचित् ३२ सर्वेच्छाजालसंशांतावात्मलाभोदयोहियः
तद्धिरुद्धाकथंकस्मादिच्छासंजायतेनघ ३३

(द्रनफलानिचास्वादितानिवमयंतितद्वदिरएं कारयंति २८ प्रयुज्यतइतिप्रयोगंसिद्धिजातंनियत
मवत्र्यंसाधयंतियुक्तैर्योगाद्दिकुशलैःपुरुषैर्योजिताः प्रयुक्ताः २९ एतस्माद्द्रव्यकालक्रियाक्रमात् लक्षणादावेद्याविषयात्समतीतस्यत्यक्ताविघ्नस्य
वाधितात्मज्ञानस्य अत्र नभोगमनादिसिद्धिजाले कर्तृताकारणताअकर्तृताविरोधितावानास्तीत्यर्थः ३० यथाआत्मज्ञानस्यक्रियाफले द्रव्यदेशक्रि
यादेरप्यनुपयोगइत्याहद्रव्येतिसाधुसंविदस्तत्त्वज्ञस्य ३१ ३२ कुतोनसंभवतीत्याहसर्वेति ३३

निरिच्छोपि तत्त्ववित्कौतुकाद्यनन्तवेत्तत्स्य भवंत्येव सिद्धय इत्याशयेनाह यथेति ३४ वीतहव्यस्य तर्हि सिद्धयः कुतो न जातास्तत्राह वीतहव्येनेति सिद्ध्यीच्छया नोद्यतितं तत्कुतस्तत्राह ज्ञानेच्छेनेति इतरेच्छाप्रतिबंधादित्यर्थः ज्ञाने ज्ञानेच्छया तु तेन यतितमेव यथा असौ वने ज्ञानाभ्यासाय प्रोत्थित उद्युक्त इति प्राग्वर्णितमेवेत्यर्थः ३५ ३६ सिद्धिविषये ज्ञानविषये वा अनुपरतस्य प्रयत्नस्यावश्यफलवत्तामुमुक्षुव्यवहारप्रकरणे विस्तरेण प्रपंचितत्वादाह याःफलेति यच्च वेदवीप्सितोद्देश्यः संप्राप्तादृष्टपंत इति शेषः ३७ ईहितं सर्वाभिलषितं परमप्रेमास्पदमात्मसुखमिति यावत् ३८

यथोदेति च यस्यैच्छा सतया पततेतथा यथाकालं तदाप्नोति सोवाप्यज्ञ नरोपि वा ३४ वीतहव्येन यतितं नो ज्ञानेच्छेन किंचन ज्ञानेच्छया तु पतितं प्रोत्थितो गतो यथा वने ३५ एवं कालक्रियाकर्मद्रव्ययुक्तिस्वभावजाः यथेच्छमेव सिध्यंति सिद्धयः खाःक्रमार्जिताः ३६ याःफलाव लयायेन संप्राप्ताः सिद्धिनामिकाः ताल्लेनाधिगता राम निजात्मपतनं दुमात् ३७ महतां नित्यतृप्तानां तत्त्वज्ञानां भाविनात्मनां ईहितं संप्रवृत्तानां नोपकुर्वंति सिद्धयः ३८ श्रीरामउवाच अयं मे संशयो ब्रह्मन् वीतहव्यस्य सा तनुः कव्यादैर्न कथं भुक्ता कथं किन्नानभूतले ३९ तदेव वीतहव्योसौ कथं च नगतः प्रभो विदेहमुक्ततां दीर्घं यथा वृत्तिमिवद ४० श्रीवसिष्ठउवाच यासं विद्वलिता साधो वासना मलतंतुना सुखदुःखदशा दाहभागिनी भवतीह सा ४१ निर्मुक्तवासना शुद्धसंविन्मात्रमथीतु सा तनुस्तिष्ठति तत्ज्ञदेहेत्राका नेह हि केचन ४२ शृणु युक्तया कया योगी तत्तुच्छेद्यादिविभ्रमैः नाक्रम्यते महाबाहो बहुवर्षशतैरपि ४३ चेतःपदार्थे पतति परस्मिन्यास्मिन्यदा यदा तन्मयं तद्भवत्याशु तस्मिंस्तस्मिंस्तदा तदा ४४ तथा दृष्टारि हिमतो विकारमुपगच्छति दृष्टमित्रं सुहृत्पक्षं स्वयमित्यनुभूयते ४५ श्रीरामायणमा

क्लिन्नापंकादिक्लेदान्नविदीर्णो नेत्यर्थः ३९ तदा भप्रवेशकालेएव इति एतत्प्रश्नद्वयोत्तरं यथावद्वद ४० तत्र प्रथमप्रश्नस्योत्तरं वक्तुं भूमिकां रचयति येति या अज्ञ संविद्देहाहंभाववासनारूपेण रागादिमलदूषितेन तंतुनावलितावृत्ता वेष्टिता भवति सैव देहच्छेदभेदादिप्रयुक्तसुखदुःखदशालक्षण दाहभागिनी इत्यर्थः ४१ सा जीवन्मुक्ततनुः प्रअधिष्ठानशुद्धसंविन्मात्रमपीति तिष्ठति तस्य संविन्मात्रस्य च्छेदके पि कव्यादादयो न त्राकाः अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएव चेति भगवद्वचनादिति भावः ४२ उपपत्त्यंतरं वक्तुं प्रतिजानीते शृण्विति ४३ ४४ तथा हीति संबंधः दृष्टःअरिर्द्विष्यायेन तथाविधं मनः अरिद्वेषप्रतिबिंबमिव द्वेषादिविकारं उपगच्छति दृष्टमित्रं तु मनस्तदीयत्वरूपप्रीतिप्रतिबिंबमिव सुहृत्पक्षत्वमुपगच्छतीति इत्ययमर्थः ४५
य

१९५

अतएव एकस्य रागद्वेषशून्यत्वे अन्यस्यापि न दृश्यते तस्मात् रागेति पथिके उदासीनपुरुषे च योगिनो विषये मनः अरागद्वेषं भवतीत्यर्थः ५६ एवम
चेतनेषु भोज्यादिष्वपि प्रीत्यप्रीत्यौदासीन्यानि तत्तद्गुणदोषतदुभयाभावप्रतिबिंबनादेव मनसि प्रसिद्धानीत्याशयेनाह मिष्टे इति दुर्भोज्ये नीरसे
निस्पृहं स्पृहाभावं धत्ते भावे व्ययीभावे कृष्णः वैरस्याभावस्याप्युपलक्षणमेतत् ५७ अस्त्वेवं प्रकृते किं न तत्राह समेति समा रागद्वेषवैषम्यशून्या योग
सद्विलाससत्तेन आत्मरूपसंपन्नतमयुति देहके योगिशरीरे यत्र हिंस्राणां क्रव्यादानां चेतः प्रदापतति तत्तदा आशु तत्कालमेव योगिसंवित्समस्ताप्रतिबिंबना
दिव समेतामेति अतो नत्वन्तहिंसाप्रसक्तिरित्यर्थः तथा चाहिंसाप्रतिष्ठां प्रस्तुत्य पतंजलिनोक्तं तत्सन्निधौ वैरत्याग इति ५८ हिंस्रोपि समस्य समदर्शि

रागद्वेषविहीनेनु पथिके पादपे गिरौ भवत्यरागद्वेषं स्वयमित्यनुभूयते ५६ मिष्टे लौल्यमुपादत्ते दुर्भोज्ये याति निस्पृहं वैरस्यं याति कृत्स्नं स्वयमि
त्यनुभूयते ५७ समसंवित्त्विलासाढ्ये यत्र याति देहके हिंस्रचेतः पतत्याशु समतामेति तत्तदा ५८ समसंगविमुक्तत्वाच्छेदादौ न प्रवर्त्तते पांथो
व्यर्थं पथि ग्रामे यथा ग्रामीणकर्मणि ५९ योगिदेहसमीपागत्याप्नोति हिंस्रतां यद्युद्भवति तत्राशु तथारूपं न संशयः ५० इति हिंसे मृगव्याघ्रसिं
हक्रोडसरीसृपैः नष्टीन्नाव तद्धव्यस्य न तु भूतलशालिनी ५१ सर्वत्र विद्यते संवित्काष्ठलोष्ठोपलादिके सत्तासामान्यरूपेण संस्थिता मूकबालवत्
५२ योग्रूपमाना तरला केवलं परिदृश्यते तन्वी पुर्यष्टके चैव प्रतिबिंबजलाष्विव ५३ तेन भूजलवाय्वग्निसंवित्यासमरूपया निर्विकारं न नुनीता वो
तद्व्यस्य यापव ५४ अन्यद्युष्मणो मे रामस्यंदो नाङ्गस्य कारणं विकारः स च चित्तोत्थो वातजो वा जगत्स्थितौ ५५ प्राणानां प्राणनस्पंदस्तत्स्थं नो ते
दृषत्समाः यतः स्थिता धारणया तेन नष्टस्य मानतुः ५६ | नोपते: संगेन द्वेषादिभ्यो विमुक्तत्वात् कस्यापि छेदनादौ न प्रवर्त्तते यथा ग्रामीणकर्मणि
ग्रामसन्निहितवनलताछेदादौ पांथो न प्रवर्त्तते तद्वत् ५९ योगिदेहसमीपादन्यत्र गत्वा तु न द्वेषादियुक्तं पयपुद्गं तु जातं भवति तत्तदनुरूपां हिंस्रतां प्रा
प्नोति ५० इति एतस्मात्कारणाद्धयात् ५१ कथं छिन्नानां भूतले इति प्रश्नस्योत्तरमाह सर्वत्रेत्यादिना ५२ नहि पुर्यष्टकेषु च कथं तदुपलंभस्तत्राह योग्रूपमा
नेति निष्ठावमाने तरला परिणामसहस्वविषमा तन्वी परिच्छिन्ना च सा परिदृश्यते असमाहितचित्तैरिति शेषः ५३ तेन वा नहव्यस्य पुर्यष्टके न तत्त्वबो
धसमाधिभ्यां समरूपमाप्य विषमस्वभावं नीतया भूजलादिसंवित्या न तु निर्विकारभूतत्वं प्रत्यगात्मस्वभावं नीता न विकारं गतेत्यर्थः ५४ अन्यद्युत्थं तरमपि स्व
ष्टुतदेवाह स्पंद इत्यादिना जगत्स्थितौ लोकव्यवहारे प्रसिद्ध इत्यर्थः ५५ ते प्राणाः देहदृषत्समाः दृढीभूताः यतो हेतोः स्थितास्ते न हेतुना ५६

बाह्यो हस्तपादादिराभ्यंतरः प्राणादिस्तत्सहिते देहे प्रकृतिर्देश्यादिः स्वयः अपस्वपादिश्च ५७ धातवस्त्वगादयः संस्थितिं पूर्वावस्थां ५८ मेरवं मेरु
संबंधि मेरुतुल्यमितियावत् ५९ स्यंदयतीति स्पंदः प्राणस्तच्छांतो ज्ञवांगानां इव अचोपता अकंपता चुपमंदा यांगतो भावे युज्ञ ६० इति अनयापु
तपाजलदा इव नक्षियंते भूमस्मा शिलावत् न भियंते इति व्युत्क्रमेनान्वयः ६१ चरमप्रश्नमनूद्य तरमाह नद्देवेत्यादिना ज्ञाता तं ते यंत्रस्यैरूपायैस्त
दृतां परिज्ञातात्मवतां वा ६२ नस्वातंत्र्यमेवोपपादयति दैवमिति प्राक्तनकर्मफलप्रदानोन्मुख ईश्वरो दैवं कर्मप्राधान्यवादे कर्माणि वत्तेषां प्रारब्ध

सबाह्याभ्यंतरस्पंदश्चित्तजो वाङ्जोथवा नमस्याविद्यते तस्य दूरस्थोप्रकृतिस्वयो ५७ सबाह्याभ्यंतरेत्रांतेस्पंदेन त्वविदांवर धातवःसं
स्थितिंसेहेनत्यजंतिकदाचन ५८ संशांतदेहप्रस्पंदे चितवातमये तथा धातवो मेरवंस्थैर्यं यांति संस्तंभितात्मकाः ५९ तथाचहृत्र्यतेलो
केस्पंदनाशनोदर्कस्थितिः शरत्स्वणामिव धीराणांज्ञवांगानामचोपता ६० इति वर्षसहस्राणि देहा जगति योगिनां नक्षियंते नभिद्यंते मध्यव
जलदा इव ६१ तद्देवं वाग्नहद्यो सोष्टपुकिंनापदां गंतवान् देहमुत्सृज्य नत्वज्ञो ज्ञानज्ञेयवतांवर ६२ येहि विज्ञानविज्ञेया वीतरागमहाधियः
विच्छिन्नग्रंथयः सर्वे तेस्वतंत्रा स्तनगास्थिताः ६३ दैवंवापि च कर्माणि प्राक्तनान्यैहिकानि च वासनावान्नतेषां तज्ज्ञेनानियमयंत्यलं ६४ तेनतत्व
विद्यां तात काकतालीयवन्मनः यद्यद्भावयति क्षिप्रं तत्तदाशु करोत्यलं ६५ काकतालीययोगेन वीतहव्यस्य संविदा सांप्रतं जीवितं बुद्धं तदे
वाशुस्थिरीकृतं ६६ यदा तु तस्य प्रतिभा विदेहान्मुक्ततां गता तदा विदेहमुक्तोभूदसौ स्वातंत्र्यसंस्थितिः ६७ विगतवासनमाशु विपाशतामु
पगतं मनआत्मतयोदितं यदभिवांछति तद्भवति क्षणात्सकलशक्तिमयो हि महेश्वरः ६८ मोक्षोपायेषु प॰ सद्विलासविचारयोगोपदेशः सर्गः ८९
श्रीवसि॰ यदात्युत्संगतप्रायं जातं चित्तं विचारतः तदाविर्भावं तहव्यस्य जा सामैत्र्यादयो गुणाः १ शेषभोगायप्रवृत्तं चेतो नियमयंति नान्यथा प्रवर्त्त

यितुमीशते ६४ काकतालीयवदाकस्मिकप्रारब्धोन्नीतं यद्युज्जीवनं मरणं वा ६५ ६६ यदा तु प्रारब्ध समाप्तौ प्रतिभा संवित् गता भावितवती ६७ नुक्त
मेषसंक्षिप्योपसंहरति विगतेति विपाशतामुपगतं अत एव वास्तवात्मस्वभावेनोदितं मनुत्तदुपाधिर्जीव एव हि यस्मात् सकलशक्तिमयः शिव एव
स्वयं जात इत्यर्थः तथा चाहुः तुषेण बद्धो व्रीहिः स्यात्तुषाभावेन तंदुलः पाशबद्धः सदा जीवः पाशमुक्तः सदाशिव इति ६८ इति श्रीटीकायां एकोननं
वतितमः सर्गः ८९ मैत्र्यादिगुणसंपन्नस्य पानि फलनां गतः द्विविधश्चित्तनाशोत्र विस्तरेणोपवर्ण्यते अस्तंगतप्रायं भर्जितबीजवदंकुरशक्त्यपाअ

अ

इतित्वयाकिंकिमभिप्रायंउक्तं २ अस्तंगतेबोधितेसति कस्यकिंबाधितस्यात्तदधिष्ठानस्यकवाकिंचिदाभासेनतविंबचितिस्फुरंतिनहिबाधितायाम
गतच्छानद्यामरुभमेवद्वित्यमाधुर्यपीवनत्वादयोगुणाः संभवंतिनवातद्भासकिंकिंचिदस्तीतिभावः ३ सरूपःस्फटिकभित्तिगतस्वप्रतिबिंबपुरु
षांतरभ्रमाभासवत्प्रतिभासमानतद्रूपसहितस्तद्रूपरहितश्च ४ ५ चित्तसत्तानर्हिकोहृन्नानामाहतामसेरिति तामसैः अबाधितात्ताज्ञानप्रभवैः ६
प्राक्तनमनाद्यध्यासमिद्दंदेहेंद्रियविषयोदेर्गुणसंभारंधर्मजातं आत्मसंसर्गाध्यासान्ममेत्यभिमन्यते ७ ८ अस्मिन्नतज्ज्ञत्वावेववासनाप्ररोहजा

श्रीरामउवाच विचाराभ्युदयाच्छिन्नखरूपेतर्हितेमुने मैत्र्यादयोगुणाआत्मा इत्युक्तंकिंत्वयाप्रभो २ ब्रह्मण्यस्तंगतेचित्तेकस्यमैत्र्यादयोगुणाः
कवापरिस्फुरंतीतिवदमेवदतांवर ३ श्रीवसिष्ठउवाच द्विविधश्चित्तनाशोस्तिसरूपोरूपएवच जीवन्मुक्तःसरूपःस्यादरूपोदेहमुक्तजः ४ चि
तसत्तेहदुःखायचित्तनाशःसुखायतु चित्तसत्तांक्षयंनीत्वाचित्तनाशमुपानयेत् ५ तामसैर्वासनाजालैर्बाध्यंयुज्जन्मकारणं विद्यमानंमनोवि
द्धितद्दुःखायैवकेवले ६ प्राक्तनंगुणसंभारंममेतिबहुमन्यते यतुचित्तमतत्वस्थंदुःखितंजीवउच्यते ७ विद्यमानंमनोयावत्तावद्दुःखक्षयःकुतः
मनस्यस्तंगतेजंतोःसंसारोन्तमुपागतः ८ दुःखमूलमवष्टब्धमस्मिन्नेवविनिश्चलं विद्यमानंमनोत्वविद्धिदुःखवृक्षवनांकुरं ९ श्रीरामउवाच नष्टंक
स्यमनोब्रह्मन्नष्टंवाकीदृग्भवेत् कीदृशश्चास्यनाशास्यसत्तानाशस्यकीदृशी १० श्रीवसिष्ठउवाच चेतसःकथितासत्तामयारघुकुलोद्वह अ
स्यनाशमिदानींत्वंशृणुप्रश्नविदांवर ११ सुखदुःखदशाःधीरंसाम्यान्नप्रोद्धरंतियं निश्वासाइवशैलेंद्रंचित्तंतस्यमृतंविदुः १२ अयंसोहमयंना
हमितिचिंतानरोत्तमं खर्वीकुरुविपन्नांतनुंध्वंतस्यमनोविदुः १३ आपत्कार्पण्यमुत्साहोमदोमांद्यंमहोत्सवः यंनयंतिनवैरूप्यंतस्यनष्टंविदुर्मनः
१४ एषसाधोमनोनाशोनष्टचेतत्तमनोभवेत् चित्तनाशादृशोचैषाजीवन्मुक्तस्यविद्यते १५ लैरवाष्टब्धंदृढप्रतिष्ठितंवद्यमानंमनःदुःखतरोर्मू

लंविद्धि दुःखवृक्षवनस्यअंकुरयःप्ररोहायस्मात्तथाविधं ९ नाशस्याभावतांगतस्यसत्ताविद्यमानताव्यवहारक्षमताकीदृशीकिंलक्षणा १०
कथितातामसैर्वासनाजालैरित्यादिग्रंथेन ११ यंधीरंबाह्याआभ्यंतरावासुखदुःखदशाःसाम्यात्समस्वभावपूर्णानंदैकरसस्वात्मप्रतिष्ठायाःस
काशात्नप्रोद्धरंतिनचालयंतितस्यचित्तंमृतंनष्टंविदुः १२ अयंसमवितास्तिमितोदेहःसप्रसिद्धोहं अयंतदतिरिक्तःसर्वोनाहंइतिचिंताभावना
यंनखर्वीकरोतिनपरिच्छिनत्तीतियावत् १३ वैरूप्यंसुखवैवर्ण्यं १४ लक्षणोक्तिमुपसंहरतिएषइति १५

मनस्तांपरमार्थताभ्रांत्यादृश्यमनंयोग्यतां सत्वंशुद्धसत्वभावतं १६ केश्चित्तद्व्यवहाराभासदृष्टिभिः १७ तदेवसत्वंजीवन्मुक्तमनःमैत्र्यादिभिर्गु
णैर्युक्तंभवति १८ वासनयाब्रह्माकारवासनया सत्वनाम्नाव्यवह्रियते १९ संप्रतिव्युत्थानकालेप्रतिभासतोऽनुभूतत्वात्तद्रूपःसाकारइवसत्व
स्यसन्मात्रस्वभावस्यात्याच्चतत्वसंयुतोदेहादिपरिच्छेदमस्पृष्टत्वान्मननीयाभावान्मनोनाशाभ्यासादित्यर्थः अनेनसतानाशस्यकोदृगिति प्रश्नांशः
समाहितः २० अतएवमैत्र्यादिगुणाअपिप्रतिभासतस्तत्रोपपन्नाइत्याहमैत्र्यादयइतिमुदिताःप्रसन्नाः २१ हिमस्यसंतोषस्त्रोतस्यआलये २२ दि

मनस्तांमरुतांविद्धिपदानस्यतिसानयुंचितनाशाभिधानंहितदासत्वमुदेत्यलं १६ तस्यसत्वविलासस्यचितनाशस्यराघव जीवन्मुक्तस्वभाव
स्यकैश्चित्तुनाभिधाकृता १७ मैत्र्यादिभिर्गुणैर्युक्तंभवत्युत्तमवासनं भूयोजन्मविनिर्मुक्तंजीवन्मुक्तमनोनघ १८ व्याप्तंवासनयायस्याद्रूपो
जनन्मुक्तया जीवन्मुक्तमनःसत्तारामतत्सत्वमुच्यते १९ संप्रतस्यवानुभूतत्वात्सत्वात्यानत्वसंयुतः सरूपोसोमनोनाशोजीवन्मुक्तस्यविद्यते
२० मैत्र्यादयोमुदिताःशाखाकइवदीप्तयः जीवन्मुक्तमनोनाशेसर्वदासर्वथास्थिताः २१ जीवन्मुक्तमनोनाशसत्वनाम्निहिमालये वसंतइ
वमंजर्यःस्फुरंतिगुणसंपदः २२ अरूपस्तुमनोनाशोयामयोक्तोरघूद्वह विदेहमुक्तएवासोविद्यतेनिष्कलात्मकः २३ समग्राग्र्यगुणाधारम
पिसत्वंप्रलीयते विदेहमुक्तेविमलेपदेपरमपावने २४ विदेहमुक्तविषयेतस्मिन्सत्वक्षयात्मके चित्तनाशेविरूपाख्येनकिंचिदपिविद्यते २५
नगुणानागुणास्तत्रनश्रीर्नाश्रीर्नलोलता नचोदयोनास्तमयोनहर्षामर्षसंविदः २६ नतेजोनतमःकिंचिन्नसंध्यादिनरात्रयः नदिक्षुपनचनाक
शोनाधोनानर्थरूपता २७ नवासनानरचनानेहानोहेनरंजना नसत्तानापिवासत्तानच[illegible]ध्यंहितत्पदं २८ अतमस्तेजसाव्योम्नाविनारेह्य
र्कवायुना तत्समंशारदच्छेननिःसंध्येनारजास्त्विषा २९ येहिपारंगताबुद्धेःसंसाराडंबरस्यच तेषांतदास्पदंस्फारंपवनानामिवांबरं ३० संत्रांत
दुःखमजडात्मकमेववसुप्रमानंदमंथरमपेतरजस्तमोयत् आकाशकोशतनवोतनवोमहांतस्तस्मिन्पदेगलितचित्तलवावसंति ३१ (तोयमनोनाशं

दृष्टापतिभरूपस्त्विति २३ सत्वंप्रातिभासिकंमनः २४ नकिंचिदपि[illegible]स्यपत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेतिश्रुतेरित्यर्थः
२५ उक्तमेवप्रपंचयतिनगुणाइत्यादिना २६ २७ सत्ताभावःअसत्ताअभावः रजोभित्तिविषास्पर्शज्योतिषाचरहितेन २९ आस्पदंप्रतिष्ठा ३० अजड
त्मकमेवसत्सुखमिवोन्मेषादिक्रियारहितंअतनवोविदेहमुक्ताःतस्मिन्पदेगलितःप्रातिभासिकचित्तलवोपियेषांतथाविधाःसंतस्तस्मिन्पदेवसं

वा

इति श्रीवासिष्ठतात्पर्यप्रकाशे उपशमप्रकरणे नवतितमः सर्गः ९० संसृतिव्रततेर्बीजं शरीरं तस्य तु मानसं प्राणस्पंदो वासना च तद्बीजे इति वर्ण्यते
ब्रह्मण्य धत्ते चतुर्दशभुवनाकारे जगति प्रसृता जीवसंसरणलता या बीजपरंपरावधिं मूलोच्छेदोपायं जिज्ञासया प्रष्टुकामो रामः प्रथमं भगद्
नलेन वर्णयति परमेत्यादिना परमाकाशस्य निर्विशेषब्रह्मणो द्विदलवरोधत्वाद्दृढो अव्याकृतं रूढानि जीवाकांतराणि विचित्रभुवनब्रह्मांडभेदाए
वद्रुमाः वृक्षा यस्मिन् एवं तारकापुष्पशबलमित्यादि विशेषणान्यपि वनरूपकोपपादकानि १ विधुद्धिंमंजरिते सुसंजातमंजरीकुमुदिकाश्रवाये
सुनीलानीरदा मेघा एव पल्लवा यस्याग्रहरितादिवर्णपर्णानि यस्मिन् वंदारकग्रहगणलक्षणैः रम्यकैर्विकासरमणीयैः पुष्पैर्दंतुरं उन्नतदंतम

५०२८

मोक्षोपायेषु चित्तोपदेशविचारयोगो नामोपदेशः सर्गः ९१ श्रीराम उवाच परमाकाशकोशाद्रिरूढलोकांतरद्रुमं तारकापुष्पशबलं देवासुर
विहंगमं १ विधुन्मंजरिपांतेषु नीलनीरदपल्लवं सर्वर्तुरम्यं चंद्रार्कगणरम्यकदंतुरं २ सप्ताब्धिवापीवलितं सरिच्छतमनोहरं चतुर्दशविधा
नंतभूतौजातोपजीवितं ३ जगत्काननमाक्रम्य स्थिता याः कृतजालकं ब्रह्मन्संसृतिमद्वीकालतायाः विततकृते ४ जरामरणपर्वायाः सुखदुः
खबलाबलैः प्ररूढमूलमालाया मोहसेकजलांजलेः ५ किं बीजमथ बीजस्य तस्य किं बीजमुच्यते अथ तस्यापि किं बीजं बीजं तस्यापि किं भवेत् ६
सर्वमेतत्समासेन पुनर्बोधविवृद्धये सिद्ध्यैतानसारस्य वदमे वदतां वर ७ श्रीवसिष्ठ उवाच अंतर्लीनघनारंभशुभाशुभमहांकुरं संसृतिव्रततेर्बी
जं शरीरं विद्धि राघव ८ शाखाप्रतानगहनाफलपल्लवशालिनी तेनेयं भवति स्फीता शरदीव वसुंधरा ९ भावाभावदशाकोशं दुःखरत्नसमुद्
कं बीजमस्य शरीरस्य चित्तमाशावशानुगं १०

। हंसादिपक्षिकं २ लोकभेदाच्चतुर्दशविधैः प्रत्यक्षमनंतैर्भूतजातैरुपजीवितं ३ ईदृशं जग
त्काननं व्याक्रम्य वासनाप्रतानैः सर्वतः संवेष्ट्य कृतजालकं यथास्यात्तथा स्थिता याः संसृतिः जीवसंसरणं तल्लक्षणायाः मृद्वीका द्राक्षा बीभत्स
लतायाः ४ जरामरणान्येव पर्वाणि कांडग्रंथयो यस्याः पर्वशब्दः अकारांतोपि क्वचिद्दृष्टः मोहा एव सेकजलांजलयो यस्याः ५ बीजपरंपराचतुष्टय
प्रश्नः ६ ७ अंतर्लिंगदेहे लीनानि प्रच्छन्नानि घनारंभाणि विचित्रानंतकार्यारंभकाणि शुभाशुभकर्माण्येव महांतः अंकुराः यस्मिन् ८ इयं संसृ
तिव्रततिस्तेन तादृशशरीरेण स्फीता अभिवृद्धा भवति वसुंधरा सस्यसंपदेति शेषः ९ तस्य किं बीजमुच्यते इति द्वितीयप्रश्नस्योत्तरमाह भावेति
भावा विद्यापानुपचयः अभावस्तदपक्षयः आशापाशवशं ज्ञातमनुगं भृत्याभूतं १०

१

वा०टी०उप०
१८६

सन् वर्त्तमानं असत् अतीतानागतं च अंगजालकं शरीरं जातं चित्ताद्धुरीरोद्भवे स्वमनुभवं प्रमारायतितथाचैतदिति ११ यथागंधर्वाणां मुमूर्षैरुत्थानप्रदर्शनसंकल्पाच्चेतसः सकाशादेव पुरंजायते तद्वद्वपुः शरीरमित्यर्थः १२ किंच नात्रासंभावनायुक्ता सर्वस्य जगतोहैरण्या गर्भमनोविकारमात्रत्वस्य सर्वश्रुतिपुराणप्रसिद्धत्वादित्याह यदिदमिति १३ अतश्चैस्यापि किंबीजमिति तृतीयप्रश्नस्योत्तरमाह द्वेइति दृढा भावनावासना १४ आद्यमुपपादयति यदेति संवेदनमयं विद्धि कारप्रायं १५ शिरासरण्योद्वासप्ततिसहस्रनाडीमार्गास्तेषां कोटरे छिद्रे

चित्तादिदमुदेत्युच्चैः सदसच्चांगजालकं यथाचैतत्स्वयंस्वप्नसंभ्रमेष्वनुभूयते ११ यथागंधर्वसंकल्पात्पुरमेवहि चेतसः सवातायनमाकारभासुरंजायते वपुः १२ यदिदं किंचिदाभोगिजागतं दृश्यतां गता रूपं तच्चेतसः स्फारं घटादित्वं मृदो यथा १३ द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः एकं प्राणपरिस्पंदो द्वितीयं दृढभावना १४ यदा प्रस्पंदते प्राणो नाडीसंस्पर्शनोद्यतः तदा संवेदनमयं चित्तमाशु प्रजायते १५ यदा न स्पंदते प्राणः शिरासरणिकोटरे असंवित्तिवशात्तेन चित्तमंतर्यजायते १६ प्राणस्पंदनमेवदं चित्त द्वारेण दृश्यते [illegible]गं न्नामागते व्योम्नि नीलत्वादिवदादृशं १७ प्राणस्पंदनसुप्राचतच्छांतिः शांतिरुच्यते प्राणेस्पंदना त्संविद्यातिवीटेवचोदिता १८ संवित्सरति देहेषु प्राणस्पंदप्रबोधिता चक्रावर्तैरंगणेषु वीटेव करताडिता १९ सति सर्वगता संवित्प्राणस्पंदेन बोध्यते सूक्ष्मात्सूक्ष्मतराकारा गंधलेखेव वायुना २० संकिसंरोधनं श्रेयः परमं विद्धि राघव कारणाक्रमणं यत्र क्षोभस्तत्र न विद्यते २१ संवित्समुदितैवाशु याति संवेद्यमादरात् संवेदनाद नंतानि नतोदुःखानि चेतसः २२

असंवित्ति र्वाह्यसंवेदनसंस्कारानुबोधस्तद्वशात् १६ हैरण्यगर्भचित्तो जगदाकारभावोपिसमष्टिप्राणस्पंदनप्रयुक्त एवेति स्वचित्तस्पंददृष्टांतेन लक्ष्यत इत्याह प्राणेति दृश्यते लक्ष्यते १७ एवं समष्टिप्राणस्पंदनविषयेसुप्ताउपरतात स्याश्चितः शांतिः निष्क्रियत्वैव शांतिः जगत्प्रलयो मोक्षो वा उच्यत इत्यर्थः वीटाकंदुकः चोदिता कराभिहता १८ १९ २० संविदः संरोधनं अविक्षिप्तता श्रेयो मोक्षः क्षोभकारणस्य प्राणस्पंदस्य आक्रमणं प्राणायामाभ्यासेन २१ किमर्थं संरोधः संविदश्चित्ताकारेण समुदये को दोषस्तत्राह संविदिति संवेद्यं बाह्यविषयं प्रति आदराद्द्राग्यातिनतश्च तदुपभोगसंवेदनादनंतानि दुःखा

१८६

यदा तु ब्राह्यविषये संसुप्तप्राया सती अंतरस्य आत्मनो बोधाय संतिष्ठते उद्युक्ता भवति तदेत्यर्थः २३ प्राणस्य परिस्पंदैर्वासनानां चोदनैः रा
गातिशयैर्नोद्भावनैश्च संविदमुच्छूनां मूढाय यथा कुर्वति तथा न करोषि चेत् अथवा परिरेचकवर्जनेन प्राणानां परिस्पंदैः स्पंदवर्जनैर्वासनानां चोदनैरपनोद
नैश्च संविदनो च्छूनां उच्छूनतामयुक्तमननरूपां पतिशून्यां करोषि चेत् तर्हि भवान् अजः जन्मादिसर्वविक्रियाशून्यो मुक्त एवासीत्यर्थः २४ आ
लूनाः खंडिताः विशीर्णाः च्छूर्णिताश्च जनजीवकाय येन २५ योगशास्त्रोक्तैः सद्गुरुसंप्रदायादिसिद्धयुक्तिकल्पितैस्तदुपायाभ्यासप्रयोगैः २६

संसुप्तो ऽन्तरबोधाय संवित्संतिष्ठते यदा लब्धं भवति लब्धव्यं तदा तदमलं पदं २३ तस्मात्प्राणपरिस्पंदैर्वासनाचोदनैस्तथा नो चेत्त्वं संविदमुच्छू
नां करोषि तदजो भवान् २४ संविदुच्छूनता चित्तं विद्धि ते नेदमाततं अनर्थजालमालूनविशीर्णजनजीवकं २५ योगिनश्चित्तशान्त्यर्थं कुर्वंति
प्राणरोधनं प्राणायामैस्तथा ध्यानैः प्रयोगैर्युक्तिकल्पितैः २६ चित्तोपशांतिफलदं परमं साम्यकारणं सुभगं संविदः स्वास्थ्यं प्राण
संरोधनं विदुः २७ ज्ञानवद्भिः प्रकटितामनुभूतां च राघव चित्तस्योत्पत्तिमपरां वासनाजीवितां शृणु २८ दृढभावनया त्यक्तपूर्वाप
रविचारणं यदादानं पदार्थस्य वासना सा प्रकीर्तिता २९ भावितं तीव्रसंवेगादात्मना यत्तदेव सः भवत्याशु महाबाहो विगतेतरसंस्मृ
तिः ३०

प्राणसंरोधनफलमेव प्रशंसंति चित्तेति २७ चित्तस्य बीजांतरं वर्णयितुं प्रतिजानीते ज्ञानवद्भिरिति प्रकटितां सम्यगुपदिष्टां स्वयं चानु
भूतां वासनाभिराजीवितां उज्जीवितां २८ तत्राद्ये वासनारूपमाह दृढेति प्राक्तन्या दृढभावदेहादिपदार्थानामहं ममेत्यादिरूपसंस्का
रात्मना यत् आदानं तच्चेत्त्यक्तपूर्वापरविचारणं भवति तदा सा वासयति देहादिभावेनात्मानं भावयतीति स्तुतस्या वासना प्रकीर्तितेत्यर्थः
तया च पूर्वापरविचारवतां जीवन्मुक्तानां देहादिसंस्कारेण वासनाविरोधिविचारास्कंदितत्वेन तेषां देहादिभावेन वासयितुमशक्तत्वादि
तिभावः २९ अज्ञानात्मना तु विरोधाभावात्तीव्रसंवेगभावनादार्ढ्येन देहादिभावैर्वासयितुं न क्लेशो सेवेत्याशयेनाह भावित इति ३०

वा॰टी॰उप॰
१८९

[illegible]

मादेहादावात्मतामिव बाह्यार्थसत्तामपि दर्शयतीत्याह तादृगिति बसतीति वस्तुनदात्मसत्तया वासयतीति वासनेति व्युत्पत्तेस्तत्रापि सं भवादितिभावः ३१ तत्वासनोपस्थापितंजगद्रूपसर्वं ३२ त्यक्तपूर्वापरविचारणमित्यस्य व्यावर्त्यमाह असम्यगित्यादिना ३३ सैव चितश्चित्तभावेनवासनाप्रयुक्ताउत्पत्तिरित्याशयेनाह ३४ ३५ अतएववासनानाशाच्चित्तः स्वास्थ्यलक्षणामुक्तिरित्याह यदेति नवास्यतेन

तादृग्रूपोहिपुरुषोवासनाविवशीकृतः यत्पश्यतितदेतत्तत्सद्वस्त्विति विमुह्यति ३१ वासनावेगवैवश्यात्स्वरूपंप्रजहातितत् भ्रांतंप श्यतिदुर्दृष्टिः सर्वंमदवशादिव ३२ असम्यग्ज्ञानवानेवभवव्याधिपरिप्लुतः अंतस्थायावासनयाविशेषेणवशीकृतः ३३ असम्यग्द र्शनंयस्मादच्चित्तनात्मभावनं यदवस्तुनिवस्तुत्वंतच्चित्तंविद्धिराघव ३४ दृढाभ्यासपदार्थैकवासनादतिचंचलं चित्तंसंजायतेज न्मजरामरणकारणं ३५ यदानवास्यतेकिंचिद्धेयोपादेयरूपियत् स्थीयतेसकलंत्यक्त्वातदाचित्तंनजायते ३६ अवासनत्वात्सत तंयदानमनुतेमनः अमनस्तातदोदेतिपरमोपशमप्रदा ३७ यदाकिंचिन्नसंवित्तौस्फरत्यभ्रमिवांबरे तदापेभ्रमिवाकाशे चित्तमंतर्नजायते ३८ यदानभाव्यतेभावः क्वचिज्जगतिवस्तुनि तदाहृदंबरेशून्येकथंचित्तंप्रजायते ३९ एतावन्मात्रकंम न्येरूपंचित्तस्यराघव यद्भावनंवस्तुनोंतर्वस्तुत्वेनरसेनच ४० नकिंचित्कल्पनायोग्यंदृश्यंभावयतस्ततः आकाशकोशस्वच्छ स्यकुतश्चित्तोदयोभवेत् ४१ यदभावनमास्थाययदभावस्यभावनं यद्यथावस्तुदर्शित्वंतदचित्तत्वमुच्यते ४२ सर्वमंतःपरित्यज्य शीतलाशयवर्त्तियत् वृत्तिस्थमपितच्चित्तमसद्रूपमुदाहृतं ४२ वासनायारसाध्यातद्राग्नीयस्यनविद्यते तस्यचित्तमचित्तत्वं

